श्रीः।

चरकसंहिता

श्रीचक्रपाणिदत्तविरचितया आयुर्वेददीपिकाख्यव्याख्यया संवलिता।

निदानस्थानम्।

प्रथमोऽध्यायः।

अथातो ज्वरनिदानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

सङ्क्षेपेण हेतुलिङ्गाभिधायकं सूत्रस्थानमनु प्रपञ्चेन हेतुलिङ्गाभिधायकं निदानस्थानमुच्यते; हेतुलिङ्गज्ञानपूर्विका हि चिकित्सा साध्वी भवति। यच्च चिकित्सासूत्रमात्रमभिधातव्यं, तदुपशयान्तर्गतमेवेति कृत्वा; किंवा, हेतुलिङ्गाभिधानस्यापि चिकित्सार्थत्वाच्चिकित्सासूत्रमात्राभिधानमिह। तत्रापि च शारीरविकारेषु प्रधानत्वाज्ज्वरस्यैव निदानमादावुच्यते। यथा च ज्वरः प्रधानं तथाऽत्रैव 'ज्वरस्तु खलु' इत्यादिना वक्ष्यति; तथा चिकित्सितेऽपि वक्ष्यति— "देहेन्द्रियमनस्तापी सर्वरोगाग्रजो बली" (चि.अ.३) इत्यादि। यत्तु वक्ष्यति — "पुरा गुल्मोत्पत्तिरभूत्" (नि.अ.८) इति; तत्र पुराशब्द आद्याविर्भावे गुल्मस्य वर्तते, नतु ज्वरस्य प्राग्भावे; दक्षाध्वरोद्ध्वंसे हि ज्वरपरिगृहीतानां प्राणिनां दिक्षु विद्रावणादिना गुल्मोत्पत्तेरुक्तत्वात्। निदानं कारणमिहोच्यते, तच्चेह व्याधिजनकं व्याधिबोधकं च सामान्येनोच्यते। तत्र व्याधिजनकं निदानं हेतुः, व्याधिबोधकं च कारणं निदानपूर्वरूपरूपोपशयसम्प्राप्तिरूपम्। तत्र हेतुरूपं निदानं जनकं च भवति, व्याधेर्बोधकं च भवति। अत एव प्रथमम् 'इह खलु' इत्यादिना हेतुमभिधाय तस्योपलब्धिर्निदानेत्यादिना पुनर्हेतुरप्युक्तः। ज्वरस्य निदानं ज्वरनिदानम्। किंवा, निदानशब्दो

जनककारणवचन एव; तं ज्वरस्य जनककारणं निदानमधिकृत्य कृतोऽध्यायो ज्वरनिदानम्। तेन पूर्वरूपादीनामपि ज्ञप्तिहेतूनां तथा चिकित्सासूत्रस्य च ग्रहणम्॥१-२॥

इह खलु हेतुर्निमित्तमायतनं कर्ता कारणं प्रत्ययः समुत्थानं निदानमित्यनर्थान्तरम्। तत्त्रिविधम्— असात्म्येन्द्रियार्थसंयोगः, प्रज्ञापराधः, परिणामश्चेति॥३॥

तदेवं ज्वरनिदाने वक्तव्ये सर्वव्याधिसाधारणमेव निदानं वक्तुमुद्यतः सामान्यपूर्वकत्वाद्विशेषस्य, तत्राप्युत्पन्नस्य व्याधेर्लक्षणं युक्तमिति कृत्वा उत्पत्तिहेतुमेव व्यवहारार्थं लक्षणार्थं च पर्यायैराह— इह खल्वित्यादि। इहेति इह प्रकरणे कारणाभिधायके हेत्वादयोऽनर्थान्तरे; प्रकरणान्तरे अर्थान्तरेऽपि हेत्वादिशब्दा भवन्तीति दर्शयति; यथा— वक्ष्यति— "हेतुरकृतकत्वात्" (वि.अ.८) इति, तथा "दशैवायतनानि स्युः" (सू.अ.२९) , तथा "कर्ता, मन्ता, वेदिता, बोद्धा" (शा.अ.४) इत्यादौ, प्रत्ययस्य लडादौ, उत्थानस्य उद्गमनादौ। हेत्वादिभूरिपर्यायकथनं शास्त्रे व्यवहारार्थं, तथा हेत्वादिशब्दानामर्थान्तरेऽपि वर्तमानत्वे पर्यायान्तरेण समं सामानाधिकरण्यात् कारण एव वृत्तिर्नियम्यते; तेन, एकस्मिन्नर्थे यस्मिंस्ते शब्दाः प्रवर्तन्ते तत् कारणमितरहेत्वाद्यर्थेभ्यो व्यवच्छिद्यते; तेन, लक्षणार्थं च पर्यायाभिधानं भवति। एवमन्यत्रापि व्याध्यादिपर्यायाभिधानेऽपि व्याख्येयम्। इह चाष्टसङ्ख्याया मङ्गलत्वेन, तथाऽष्टविधव्याधिज्वराद्यभिधानानुषङ्गाच्चाष्टावेव हेतुपर्याया उक्ताः; तेनापरेऽपि योनिमूलमुखप्रकृत्यादयो हेतुपर्याया बोद्धव्याः, ते च तन्त्रविस्तरभयान्नोक्ताः। एवं रोगपर्यायान्तरानभिधानेऽपि ग्रन्थविस्तरभयाद्यनुसरणीयम्। हेतोर्भेदमाह— तत् त्रिविधमित्यादि। एतच्चासात्म्येन्द्रियार्थसंयोगादि दीर्घञ्जीवितीये तिस्रैषणीये च प्रपञ्चितमिति नेह प्रपञ्च्यते। अत्र पाठादेव त्रित्वे सिद्धे त्रिविधमितिवचनं बहुप्रपञ्चस्याप्यसात्म्येन्द्रियार्थसंयोगादेस्त्रैविध्यानतिक्रमोपदर्शनार्थं, तथा प्रत्येकमयोगातियोगमिथ्यायोगभेदात्त्रिविधत्वदर्शनार्थं च। एतच्च हेतुत्रितयमुक्तमपि पुनः प्रकरणवशादुच्यमानमिह न पुनरुक्तं दोषमावहति। एतच्चासात्म्येन्द्रियार्थादेस्त्रैविध्यं मूलकारणं प्रति

नियामकं, तेन "ज्वरसन्तापाद्रक्तपित्तमुदीर्यते" (नि.अ.८) इत्याद्युक्तरोगादिरूपप्रत्यासन्नकारणानवरोधो नोद्भावनीयः। किंवा, रक्तपित्तादिकारणे ज्वरादावप्यसात्म्येन्द्रियार्थसंयोगाद्येव मूलकारणं, तेन ज्वरादिकार्ये रक्तपित्तादौ ज्वरादिकारणमेव मूलकारणं भवति। "कालबुद्धीन्द्रियार्थानां योगो मिथ्या न चाति च" (सू.अ.१) इति पूर्वोक्तक्रमभेदेनेहासात्म्येन्द्रियार्थसंयोगस्यादावभिधानेन सर्वेषामेवैषां रोगकर्तृत्वे प्राधान्यं दर्शयति, मा भूदेकान्ताभिधानेन प्रधानतानियमः। यद्यपि च मूलभूतत्वेन प्रज्ञापराधः प्रधानं भवति, तथाऽपि प्रत्यासन्नकारणत्वेन तथाऽबुद्धिपूर्वकस्याप्युत्कटशब्दमिथ्यायोगादेरपि कारणत्वेनासात्म्येन्द्रियार्थसंयोगोऽपि प्रधानम्। यद्यपि कालो दुष्परिहरत्वेन प्रधानं, तथाऽपि सोऽपीन्द्रियार्थपराधीनत्वेनाप्रधानं, कालातियोगादयो हीन्द्रियार्थशीताद्यतियोगादिभ्य एव प्रायो भवन्ति॥३॥

अतस्त्रिविधा व्याधयः प्रादुर्भवन्ति— आग्नेयाः, सौम्याः, वायव्याश्च; द्विविधाश्चापरे— राजसाः, तामसाश्च॥४॥

हेतोर्हेतुत्वं कार्ये भवतीति हेतुकार्यं व्याधिमाह— अतस्त्रिविधा इत्यादि। न चात्र यथासङ्ख्यम्, एकरूपादपि हेतोस्त्रिविधव्याध्युत्पादात्। अत्रापि त्रिविधवचनमानन्त्येऽपि रोगाणामाग्नेयत्वाद्यनतिक्रमोपदर्शनार्थम्। आग्नेयाः पैत्तिकाः, सौम्याः कफजाः, वायव्याः वातजाः। यद्यपि प्रधानत्वेन वायव्या एव प्रथमं निर्देष्टुं युज्यन्ते, तथाऽपीह ज्वरे पित्तस्य प्रधानत्वादाग्नेयाभिधानम्। आग्नेयसौम्यवायव्या इति समासेनैकैकस्मादप्यसात्म्येन्द्रियार्थसंयोगादेस्त्रिविधरोगोत्पत्तित्वं दर्शयति, असमासे हि यथासङ्ख्यमपि शङ्क्येत। अन्यथाऽपि व्याधीनुक्तहेतुजानाह— द्विविधाश्चापरे इत्यादि। राजसतामसानां च विच्छिद्य पाठेनेह तन्त्रे शारीरव्याध्यधिकारप्रवृत्तेऽनधिकारत्वेनाप्रपञ्चनीयत्वं दर्शयति, अभिधानं च

राजसतामसयोरिह व्याधिकथनस्य न्यूनतापरिहारार्थम्। आगन्तवश्चाभिघातादिजा रोगा आग्नेयादिष्वेवान्तर्भवन्ति; यतस्तत्रापि हि दोषप्रकोपोऽव्यपदेश्योऽस्त्येव; किंवा, अपरे इति अप्रधानाः, परो हि श्रेष्ठ उच्यते; अप्रधानत्वे चोक्तैवोपपत्तिः॥४॥

तत्र व्याधिरामयो गद आतङ्को यक्ष्मा ज्वरो विकारो रोग इत्यनर्थान्तरम्॥५॥

व्याधीनामाग्नेयादिविभागं दर्शयित्वा व्यवहारार्थं लक्षणार्थं च पर्यायानाह— तत्र व्याधिरित्यादि। अत्रापि पर्यायाणामनर्थान्तरेणातङ्कादिशब्दानां भयाद्यर्थताव्युदासाद्व्याधिलक्षणत्वं बोध्यम्। आतङ्कशब्देन हि भयमप्युच्यते, विकारशब्देन हि इन्द्रियादयोऽपि षोडश विकारा उच्यन्ते। तथा व्याध्यादिशब्दानां व्युत्पत्त्या रोगधर्मा लक्षणीयाः। तथा हि— विविधं दुःखमादधातीति व्याधिः; प्रायेणामसमुत्थत्वेनामय इत्युच्यते; आतङ्क इति दुःखयुक्तत्वेन कृच्छ्रजीवनं करोति, वचनं हि— "आतङ्कः कृच्छ्रजीवने" इति; यक्ष्मशब्देन च राजयक्ष्मवदनेकरोगयुक्तत्वं विकाराणां दर्शयति; ज्वरशब्देन च देहमनःसन्तापकरत्वं; विकारशब्देन च शरीरमनसोरन्यथाकरणत्वं व्याधेर्दर्शयति; रोगशब्देन च रुजाकर्तृत्वम्॥५॥

तस्योपलब्धिर्निदानपूर्वरूपलिङ्गोपशयसम्प्राप्तितः॥६॥

इदानीं व्याधेर्जनकहेतुमभिधाय तथा तद्धेतुजन्यं च व्याधिमुक्त्वा तस्य व्याधेर्ज्ञानोपायमाह— तस्येत्यादि। अविज्ञाते हि व्याधौ चिकित्सा न प्रवर्तते, अतः सामान्येन व्याधिज्ञानोपायनिदानपञ्चकाभिधानं युक्तम्॥६॥

तत्र निदानं कारणमित्युक्तमग्रे॥७॥

निदानं विवृणोति— तत्रेत्यादि। अग्रे उक्तमिति 'इह खलु' इत्यादिना 'परिणामश्च' इत्यन्तेन। कारणं च व्याधीनां सन्निकृष्टं वातादि, विप्रकृष्टं चार्थानामयोगादि; पुनर्विप्रकृष्टं कारणं रक्तपित्तस्य ज्वरसन्ताप इत्यादि; पुनश्च व्याधीनां सामान्येन विप्रकृष्टं कारणमुक्तं यथा— "प्रागपि चाधर्मादृते न रोगोत्पत्तिरभूत्" (वि.अ.३) इत्यादि; तदेतत् सर्वमपि कारणशब्देन ग्राह्यम्। तत्राधर्मकार्यत्वेन व्याधीनां दैवव्यपाश्रयप्रायश्चित्तबलिमङ्गलेत्यादिचिकित्सासाध्यत्वं प्रतीयते, रुद्रकोपभवत्वेन च ज्वरस्य महाप्रभावत्वं तथाऽऽग्नेयत्वं च प्रतीयते; क्रोधो ह्याग्नेयः, तेन तन्मयो ज्वरोऽप्याग्नेयः। तथाच वचनम्— "ऊष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना। तस्मात् पित्तविरुद्धानि त्यजेत् पित्ताधिकेऽधिकम्" (वा.चि.अ.१) इति। वातादिजन्यत्वज्ञानेन च वातादिविपरीतभेषजसाध्यत्वं तथाऽनुद्भूतवातादिविकारान्तरसम्बन्धोऽपि भावी कल्प्यते। असात्म्यरूक्षादिहेतुसेवादर्शनेन च भावी व्याधिस्तज्जन्य उन्नीयते। व्याधिपरीक्षायां च सन्देहे जाते यस्य व्याधेर्हेतुसेवा दृश्यते, स परिकल्प्यते; एवमादि हेतुना व्याधिपरीक्षणम्॥७॥

पूर्वरूपं प्रागुत्पत्ति लक्षणं व्याधेः॥८॥

निदानानन्तरीयकत्वात् पूर्वरूपादीनां निदानानन्तरं पूर्वरूपादीन्युच्यन्ते, अतः पूर्वरूपलक्षणमाह— पूर्वेत्यादि। उत्पत्तेः प्राक् प्रागुत्पत्ति। एतेन उत्पत्तेः पूर्वं यद्भविष्यद्व्याधेर्लक्षणं तत् पूर्वरूपम्। निदानसेवा तु भाविव्याधिबोधिका भवत्यपि निदानशब्दगृहीतत्वादेव तथा लक्षणशब्दानभिधेयत्वाच्च न पूर्वरूपशब्देनोच्यते। उक्तं ह्यन्यत्र— "स्थानसंश्रयिणः क्रुद्धा भाविव्याधिप्रबोधकम्। लिङ्गं कुर्वन्ति यद्दोषाः पूर्वरूपं तदुच्यते" इति। न च वाच्यं यदनुत्पन्नस्याविद्यमानस्य व्याधेः कथं लक्षणं भवतीति; यतो मेघादपि भाविनी वृष्टिरनुमीयते, तथा रोहिण्युदयं दृष्ट्वा कृत्तिकोदयोऽनुमीयते। तच्च पूर्वरूपं

द्विविधम्— एकं भाविव्याध्यव्यक्तरूपं, यदुक्तम्— "अव्यक्तं लक्षणं तस्य पूर्वरूपमिति स्मृतम्" (चि.अ.११) इति, तथा "लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम्" (वा.नि.अ.१) इति; द्वितीयं तु दोषदूष्यसम्मूर्च्छनावस्थाजन्यमव्यक्तलिङ्गादन्यदेव; यथा— ज्वरे बालप्रद्वेषरोमहर्षादि; न ह्यतत् पूर्वरूपं ज्वरावस्थायां नियमेन व्यक्तं भवति, किन्तु ज्वरपूर्वकाल एव; यत्र तु व्यक्तं भवति, स चासाध्यो मतः। अत एवैवंभूतपूर्वरूपाभिप्रायेणैवारिष्टे वक्ष्यति— "पूर्वरूपाणि सर्वाणि ज्वरोक्तान्यतिमात्रया। यं विशन्ति विशत्येनं मृत्युर्ज्वरपुरस्सरः" (इं.अ.५) इति; तथा— "अन्यस्यापि च रोगस्य पूर्वरूपाणि यं नरम्। विशन्त्यनेन कल्पेन तस्यापि मरणं ध्रुवम्" (इं.अ.५) इति। एतद्धि यद्यव्यक्तलक्षणपूर्वरूपाभिप्रायेण वचनं स्यात्तदा सर्वज्वराणामसाध्यत्वं स्यात्, यतः पूर्वरूपावस्थायामव्यक्तानि लक्षणानि ज्वरे जाते व्यक्तानि सर्वाणि सर्वत्रैव भवन्ति; तस्मात् पूर्वरूपावस्थाप्रतिनियतपूर्वरूपाभिप्रायेणैवैतद्वचनम्। अव्यक्तता च लक्षणानामियमेव— यदल्पत्वेनास्फुटत्वम्। यत्तु पूर्वरूपं दोषदूष्यसम्मूर्च्छनावस्थानियतं तद् व्याधिमात्रस्य गमकं, न तद्दोषविशेषं गमयति। एतत्पूर्वरूपाभिप्रायेण च **वाग्भटे**ऽप्युक्तं यत्— "प्राग्रूपं येन लक्ष्यते। उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः" (वा.नि.अ.१) इति। यत्तु अव्यक्तलिङ्गं रूपं पूर्वरूपं, तद्दोषविशेषमपि व्याधेर्गमयति, यदुक्तं **हारीते**— "इति पूर्वरूपमष्टानां ज्वराणां सामान्यतः, विशेषतस्तु जृम्भाङ्गमर्दभूयिष्ठं हृदयोद्वेगि वातजम्" इत्यादि, तथा **सुश्रुते**ऽप्युक्तं— "सामान्यतो, विशेषात्तु जृम्भाऽत्यर्थं समीरणात्। पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनम्" (सु.उ.अ.३९) इति, एतद्धि पूर्वरूपं भाविज्वरलिङ्गमेवाव्यक्तमल्पत्वेनेति ज्ञेयम्। व्यक्ते हि ज्वरे वातादिजे जृम्भादयः पूर्वरूपापेक्षयाऽत्यर्थं भवन्ति। एवं पूर्वरूपद्वैविध्ये यत्र विशिष्टं पूर्वरूपमस्ति तत्र साक्षादेवाभिधीयते, यत्र विशिष्टं नास्ति तत्र लिङ्गमात्रं वक्ष्यति; तेनाव्यक्तान्येव लिङ्गानि पूर्वरूपमिति तत्र ज्ञातव्यम्॥८॥

प्रादुर्भूतलक्षणं पुनर्लिङ्गम्। तत्र लिङ्गमाकृतिर्लक्षणं चिह्नं संस्थानं व्यञ्जनं रूपमित्यनर्थान्तरम्॥९॥

लक्षणमाह— प्रादुर्भूतेत्यादि। उत्पन्नव्याधेः स्वरूपं, तथा वाताद्यामपक्वादिविशेषणविशिष्टं व्याधिं निदानोपशयसम्प्राप्तिव्यतिरिक्तं यद्बोधयति, तल्लिङ्गम्। अनेन च व्याधिप्रतिनियतं लिङ्गं यथा— ज्वरस्य सन्तापः, तथा अतिसरणमतीसारस्येत्यादि गृह्यते; तथा वातादिकृतं च वातादिज्वरस्य विषमारम्भविसर्गित्वादि गृह्यते; तथा आमपक्वाजीर्णज्वरलक्षणादीनि विशिष्टव्याधिबोधकानि गृह्यन्ते; तथा उपद्रवाश्चासाध्यताद्यवस्थापन्नव्याधिबोधकत्वेन लक्षणान्येव। रिष्टं तु मरणस्य पूर्वरूपमेव। निदानादयस्तु यद्यप्युत्पन्नव्याधिगमका अपि भवन्ति, तथाऽपि पृथग्लक्षणानिर्देशान्न ते इह लिङ्गशब्देनोच्यन्ते। व्यवहारार्थं तथा लक्षणार्थं च लिङ्गपर्यायानाह— तत्र लिङ्गमित्यादि। अस्मिन्नर्थेऽनर्थान्तरमिति लिङ्गलक्षणेऽर्थेऽभिधेयेऽनर्थान्तरं, प्रकरणान्तरे त्वर्थान्तरेऽपि लिङ्गादयो भवन्ति; यथा— "बली लिङ्गं समर्पयेत्" (चि.अ.२) इत्यत्र शेफ उच्यते, तथा "संस्थानमाकृतिर्ज्ञेया सुषमा विषमा च या" (

.अ.७); तथा "लक्षणवच्चोदाहरणवच्च" (वि.अ.८), तथा "तैलसर्पिर्भ्यां व्यञ्जनान्युपकल्पयेत्", तथा "रूपस्य सत्त्वस्य च सन्ततिर्या" (शा.अ.२) इत्यादौ। ननु, यथेह 'अस्मिन्नर्थे' इत्युक्तं तथा हेतुव्याधिसम्प्राप्तिपर्यायाभिधानेऽपि 'अस्मिन्नर्थे' इति वक्तव्यम्। न, हेतुपर्यायाभिधाने तावत् 'इह खलु' इत्यनेनैव तदर्थ उक्त एव, सम्प्राप्तिपर्यायकथने च व्याधेरिति पदेनैव 'अस्मिन्नर्थे' इतिपदस्यार्थो लभ्यत एव, गदपर्यायेषु तु नार्थान्तरता प्रायो दृश्यते, तेन तत्र 'अस्मिन्नर्थे' इति न कृतम्। अयं चाचार्याभिप्रायो यत्— यत्रान्यार्थतां शब्दस्य पश्यति, तत्रैव 'अस्मिन्नर्थे' इति करोति, यथा— 'समवेतानां पुनर्दोषाणामंशांशविकल्पो विकल्पोऽस्मिन्नर्थे' इति। विकल्पशब्दो ह्ययमन्यत्रापि वर्तते, यथा— "अन्यैश्च विकल्पैर्विकल्पितानां" (वि.अ.१), तथा "विकल्पो न त्वसाध्यानां" (सू.अ.१०) इत्यादि। ननु पूर्वरूपोपशययोः किमिति पर्यायानभिधानम्? ब्रूमः— पूर्वरूपस्य तावत् पर्यायाभिधानं यदेव रूपस्य तदेव; यतः, रूपादय एव हि पूर्वशब्दयुक्ताः पूर्वरूपपर्याया भवन्ति; उपशयस्तु चिकित्सा, तस्यास्तु पर्यायाश्चिकित्सित एव स्वाधिकारत्वेन वक्तव्या इति नेह पुनरुक्ताः॥९॥

उपशयः पुनर्हेतुव्याधिविपरीतानां विपरीतार्थकारिणां चौषधाहारविहाराणामुपयोगः सुखानुबन्धः॥ १०॥

उपशयमाह— उपशय इत्यादि। उपशयनमुपशयः सुखानुबन्ध इत्यर्थः। हेतुना, तथा व्याधिना, तथा हेतुव्याधिभ्यां च विपरीता हेतुव्याधिविपरीताः; तेषामौषधाहारविहाराणां, तथा हेतुव्याधिविपरीतार्थकारिणां चौषधान्नविहाराणां; सुखानुबन्ध इति सुखरूपोऽनुबन्धः, अनुबन्धश्च सुखकारणमित्यर्थः। अयं चोपशयो गूढलिङ्गे च व्याधौ ज्ञानोपायो भवति। यदुक्तं— "गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां परीक्षेत" (वि.अ.४) इति; उक्तं च त्रिशोथीये— "स्नेहोष्णमर्दनाभ्यां च प्रणश्येत् स च वातिकः" (सू.अ.१८)। अत्र च विपरीतार्थकारि तदेवोच्यते यदविपरीततयाऽऽपाततः प्रतीयमानं विपरीतस्यार्थं प्रशमलक्षणं करोति। अत्रोदाहरणानि लिख्यन्ते— हेतुविपरीतमौषधं यथा — शीतकफजे ज्वरे शुण्ठ्याद्युष्णं भेषजं, हेतुविपरीतमन्नं यथा— श्रमानिलजे ज्वरे रसौदनः, हेतुविपरीतो विहारो यथा— दिवास्वप्नोत्थकफे रात्रौ जागरणं, व्याधिविपरीतमौषधं यथा— अतीसारे स्तम्भनं पाठादि, व्याधिविपरीतमन्नं यथा— अतीसारे स्तम्भनं मसूरादि, व्याधिविपरीतो विहारो यथा — उदावर्ते प्रवाहणं, हेतुव्याधिविपरीतमौषधं यथा— वातशोथे वातहरं शोथहरं च दशमूलं, हेतुव्याधिविपरीतमन्नं यथा— शीतोत्थज्वरे उष्णा ज्वरघ्नी च यवागूः, हेतुव्याधिविपरीतो विहारो यथा — स्निग्धदिवास्वप्नजायां तन्द्रायां रूक्षं तन्द्राविपरीतं च रात्रिजागरणं, हेतुविपरीतार्थकार्यौषधं यथा— पित्तप्रधाने पच्यमाने शोथे पित्तकर उष्ण उपनाहः, हेतुविपरीतार्थकार्यन्नं यथा— पच्यमाने पित्तप्रधाने शोथे विदाह्यन्नं, हेतुविपरीतार्थकारी विहारो यथा— वातोन्मादे सन्त्रासनं, व्याधिविपरीतार्थकार्यौषधं यथा— छर्द्यां वमनकारकं मदनफलादि; व्याधिविपरीतार्थकार्यन्नं यथा— अतीसारे विरेककारकं क्षीरं, उक्तं हि— "बहुदोषस्य दीप्ताग्नेः सप्राणस्य न तिष्ठति। पैत्तिको यद्यतीसारः पयसा तं विरेचयेत्" (चि.अ.१९) इति; व्याधिविपरीतार्थकारी विहारो यथा— छर्द्यां वमनसाध्यायां वमनार्थं प्रवाहणं; हेतुव्याधिविपरीतार्थकार्यौषधं यथा— अग्निना प्लुष्टेऽगुर्वादिना लेपः,

उष्णं हि हेतावग्नौ व्याधौ च दाहेऽनुगुणं प्रतिभाति; हेतुव्याधिविपरीतार्थकार्यन्नं यथा— मद्यपानोत्थे मदात्यये मदकारकं मद्यं; हेतुव्याधिविपरीतार्थकारी विहारो यथा— व्यायामजनितसम्मूढवाते जलप्रतरणादिरूपो व्यायामः, अयं हेतौ व्यायामे व्याधौ च सम्मूढवातेऽनुगुणः प्रतिभाति। ननूपशयवदनुपशयोऽपि व्याधिपरीक्षकोऽस्ति, उच्यते च— "गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां परीक्षेत" (वि.अ.४) , तथा **वाग्भटे**ऽप्युक्तं— "विपरीतोऽनुपशयः स ह्यसात्म्यमिति स्मृतः" (वा.नि.अ.१) इति; सत्यमस्ति च, परं निदानग्रहणेनैव गृहीतत्वान्न पृथगुच्यते; अनुपशयोऽपि हेतुसेवयैव भवति॥१०॥

सम्प्राप्तिर्जातिरागतिरित्यनर्थान्तरं व्याधेः॥११॥

यद्यपि सम्प्राप्त्यनन्तरं लिङ्गप्रादुर्भावः, तथाऽपि सम्प्राप्तेर्व्याधिनिरूपणं प्रत्यल्पप्रयोजनत्वाच्छेषतः सम्प्राप्तिमाह— सम्प्राप्तिरित्यादि। जातिः जन्म; सम्प्रात्प्यागतिजातिशब्दैर्योऽर्थोऽभिधीयते सा व्याधेः सम्प्राप्तिरित्यर्थः। अ(त)त्रैके व्याधिजन्ममात्रमन्त्यकारणव्यापारजन्यं सम्प्राप्तिमाहुः। इयं च सम्प्राप्तिर्यद्यपि निदानादिवद् व्याधिबोधिका न भवति, तथाऽपि नानुत्पन्नस्य व्याधेर्लक्षणं भवतीति कृत्वा उपपत्तेर्व्याध्युपलम्भकत्वं वर्णयन्ति। एतच्चान्ये न मन्यन्ते, यतो नैवं सति सम्प्राप्तितः कश्चिद्विशेषो व्याधेरधिगम्यते। न चायं नियमः— यदुत्पन्न एव परं व्याधिरुपलभ्यते, यतो निदानपूर्वरूपाभ्यामनुत्पन्नोऽपि व्याधिर्भावित्वेन बुध्यते। तस्माद् व्याधिजनकदोषव्यापारविशेषयुक्तं व्याधिजन्मेह सम्प्राप्तिशब्देन वाच्यम्, अत एव पर्याये 'आगतिः' इत्युक्तम्। आगतिर्हि उत्पादकारणस्य व्याधिजननपर्यन्तं गमनम्। इयं च सम्प्राप्तिर्व्याधिविशेषं बोधयत्येव। यथा ज्वरे— 'स यदा प्रकुपितः प्रविश्यामाशयम्' इत्यारभ्य 'तदा ज्वरमभिनिर्वर्तयति' इत्यन्तेन या सम्प्राप्तिरुच्यते, तया ज्वरस्यामाशयदूषकत्वाग्न्युपघातकत्वरसदूषकत्वादयो धर्माः प्रतीयन्ते। न च वाच्यं— दोषाणामयमामाशयदूषकत्वादिर्धर्मः, ततश्च कारणधर्माणां निदानग्रहणेनैव ग्रहणं भवतीति; यतः,

कारणधर्मोऽप्ययं व्याधिजनकदोषव्यापाररूपः सम्प्राप्तिशब्देन विशेषबोधनार्थं पृथक् कृत्वोच्यते; यथा — लिङ्गत्वाविशेषेऽपि भाविव्याधिबोधकत्वविशेषात् पूर्वरूपं पृथगुच्यते, अत एव **वाग्भटे**ऽप्येवमेव सम्प्राप्तिलक्षणमुक्तं— "यथादुष्टेन दोषेण यथा चानुविसर्पता। निर्वृत्तिरामयस्यासौ सम्प्राप्तिर्जातिरागतिः" (वा.नि.अ.१) इति॥११॥

सा सङ्ख्याप्राधान्यविधिविकल्पबलकालविशेषैर्भिद्यते॥(१)॥

सम्प्रति सम्प्राप्तेः प्रतिव्याधिव्यक्तिभिन्नायाः सर्वत्र व्याधौ तत्प्रयोजनाभावान्न भेदो वक्तव्यः, यस्तूपयुक्तो भवति सम्प्राप्तिविशेषस्तमभिधास्यत्येव, "स यदा प्रकुपितः प्रविश्यामाशयम्" इत्यादिना ग्रन्थेन; अतः सर्वसम्प्राप्त्यनभिधानान्न्यूनतादोषपरिहारार्थं सर्वव्याधिसाधारणान् सम्प्राप्तिभेदानाह— सा सङ्ख्येत्यादि।— सा सम्प्राप्तिः सङ्ख्यादिभिर्भिद्यते इति सङ्ख्यादिभिन्ने व्याधौ भिन्ना भवतीत्यर्थः; यतो न भिन्नानां भावानामभिन्नोत्पत्तिर्भवति, किन्तर्हि भिन्नैव भवति; यद्यपि च प्रतिव्याधि व्यक्ताऽपि सम्प्राप्तिर्भिन्नैव भवति, तथाऽपि स भेदः सम्प्राप्तेरिह प्रयोजनाभावान्नोच्यते; यतः, सङ्ख्याप्राधान्यविध्यादितुल्यासु ज्वरव्यक्तिषु एकरूपनिदानलिङ्गचिकित्सितासु भेदप्रतिपादने न किञ्चित् प्रयोजनमस्ति, सङ्ख्यादिभिन्ने तु ज्वरादौ निदानलिङ्गचिकित्साभेदोऽस्ति, अतः सङ्ख्यादिभेदजनकायाः सम्प्राप्तेर्भेदकथनमुचितमेव॥(१)॥

सङ्ख्या तावद्यथा— अष्टौ ज्वराः, पञ्च गुल्माः, सप्त कुष्ठान्येवमादिः॥(२)॥

सङ्ख्याभेदमुदाहरति— सङ्ख्या तावदित्यादि। यद्यपि प्राधान्यादिभेदभिन्नेऽपि व्याधौ सङ्ख्याभेदोऽस्त्येव, तथाऽपीह यैव शास्त्रसिद्धा अष्टौदरीयादिप्रतिपादिता सङ्ख्या सैव सङ्ख्याशब्देन प्राप्ता। अत एवाष्टौ ज्वरा

इत्यभिधाय द्विविधं शोणितपित्तमिति क्रमात् प्राप्तं रक्तपित्तं नोदाहृतं; यतः द्विविधत्वं हि रक्तपित्तस्य विधिभेदे प्रविशति न सङ्ख्यायां, 'द्विविधं शोणितपित्तम्' इति विधिशब्देनैवोक्तत्वात्॥ (२)॥

प्राधान्यं पुनर्दोषाणां तरतमाभ्यामुपलभ्यते। तत्र द्वयोस्तरः, त्रिषु तम इति॥ (३)॥

प्राधान्यं पुनरित्यादौ तरतमाभ्यामिति तरतमशब्दाभिधेयाभ्यां वृद्धिभ्याम्। तरतमशब्दयोर्विषयं विभजते— द्वयोरित्यादि।— द्वयोस्तर इति द्वयोर्दोषयोर्वृद्धयोस्तरप्रयोगो भवति— वृद्धतर इति। एवं त्रिषु तम इति त्रिषु दोषेषु वृद्धेषु सत्सु तमप्रयोगो भवति— वृद्धतम इति। तदेवं द्वन्द्वारब्धे विकारेऽन्यतरदोषस्य तरशब्दलक्षितेन प्राधान्येन सम्प्राप्तिर्भिद्यते, तथा त्रिदोषारब्धे विकारे तमशब्दलक्षितान्यतमदोषप्राधान्यात् सम्प्राप्तिर्भिद्यते, इत्युक्तं भवति॥ (३)॥

विधिर्नाम— द्विविधा व्याधयो निजागन्तुभेदेन, त्रिविधास्त्रिदोषभेदेन, चतुर्विधाः साध्यासाध्यमृदुदारुणभेदेन॥ (४)॥

सम्प्राप्तिभेदं क्रमागतं विधिमाह— विधिर्नाम द्विविधा व्याधयो निजागन्तुभेदेनेत्यादिना। विधिरिति विधिकृत इत्यर्थः। तेन द्विविधत्वादयो भेदा यतो भवन्ति स विधिः; विधिश्च प्रकारो भेद इत्यर्थः। साध्यासाध्यमृदुदारुणभेदेनेति साध्यासाध्यगतेन मृदुदारुणभेदेन; तेन, मृदुसाध्यं सुखसाध्यं, दारुणसाध्यं कृच्छ्रसाध्यं रोहिणीवलयादि, तथा मृद्वसाध्यं याप्यं, दारुणासाध्यं प्रत्याख्येयमिति भेदचतुष्टम्। यद्यपि च सङ्ख्याप्राधान्यादिकृतोऽपि व्याधेर्विधिभेदो भवत्येव, तथाऽपि सङ्ख्यादिभेदानां स्वसञ्ज्ञयैव गृहीतत्वाद्गोबलीवर्दन्यायात् सङ्ख्याद्यगृहीते व्याधिप्रकारेऽयं विधिशब्दो वर्तनीयः॥ (४)॥

समवेतानां पुनर्दोषाणामंशांशबलविकल्पो विकल्पोऽस्मिन्नर्थे॥ (५)॥

क्रमागतं विकल्पमाह— समवेतानामित्यादि।— समवेतानामिति सर्वेषां; तेन, एकशो द्विशो मिलितानां च दोषाणां ग्रहणम्। अंशमंशं प्रति बलमंशांशबलं, तस्य विकल्प उत्कर्षापकर्षरूपोंऽशांशबलविकल्पः; एवंभूतो दोषाणामंशांशबलविकल्पोऽस्मिन्नर्थे इति अस्मिन् प्रकरणे विकल्प उच्यते। प्रकरणान्तरे तु विकल्पशब्देन भेदमात्रमुच्यते; यथा— "विकल्पो न त्वसाध्यानां" (सू.अ.१०) इत्यादाविति भावः। तत्र दोषाणामंशांशविकल्पो यथा— वाते प्रकुपितेऽपि कदाचिद्वातस्य शीतांशो बलवान् भवति, कदाचिल्लघ्वंशः, कदाचिद्रूक्षांशः, कदाचिल्लघुरूक्षांश इत्यादि; एवं पित्तकफयोरप्युदाहार्योंऽशांशविकल्पः; अयं चांशांशबलविकल्पो दोषाणां शीतादिगुणोद्भूतहेतुभेदाद्भवति॥ (५)॥

बलकालविशेषः पुनर्व्याधीनामृत्वहोरात्राहारकालविधिविनियतो भवति॥ १२॥

बलकालविशेषमाह— बलेत्यादि।— बलस्य कालो बलकालः, तस्य विशेषो वसन्तपूर्वाह्णादिर्बलकालविशेषः। ऋतवश्चाहोरात्राहारयोः कालाश्च ऋत्वहोरात्राहारकालाः, तेषां भेदो विधिः, तत्र विशेषेण नियतो बलकालविशेषः ऋत्वहोरात्राहारकालविधिविनियतः; तत्र ऋतुविनियतो बलकालविशेषो यथा— श्लेष्मज्वरस्य वसन्तः, अहोरात्रविनियतो यथा— श्लेष्मज्वरस्य पूर्वाह्णः प्रदोषश्च, आहारविनियतो यथा— श्लेष्मज्वरस्य भुक्तमात्रकालः, एवमाद्युन्नेयम्। केचित्तु विधिशब्देन पूर्वकृतं कर्म ब्रुवते, तत्रापि कर्मनियतो बलकालविशेषः पच्यमानकर्मकाल एव ज्ञेयः। एषु च बलकालेषु यद्यपि व्याधेरभूतप्रादुर्भावरूपा सम्प्राप्तिर्न भवति, तथाऽपि व्याधिसन्ताने तत्कालं व्याध्युत्पत्तौ सम्प्राप्तिर्भिन्नैव भवतीति मन्तव्यम्। इयं च कालविशेषप्राप्त्या बलवद्व्याधिजनिका सम्प्राप्तिर्व्याधेर्विशेषं स्फुटमेव बोधयति। यतः पूर्वाह्णे बलसम्प्राप्त्या ज्वरस्य कफजत्वमुन्नीयते, मध्याह्ने च बलप्राप्त्या पित्तजत्वमित्यादि। इह च सम्प्राप्तेरेव विशेषाः सङ्ख्यादिकृता उक्ताः, न तु निदानादीनां

विशेषाः; यतो निदानादिविशेषाः प्रतिव्याधिवक्ष्यमाणभेदेनैवोपयुक्ताः। यतो यादृग् ज्वरे निदानं न तादृग् रक्तपित्ते; ये च पूर्वरूपादिविशेषा ज्वरे, न ते रक्तपित्तादौ, किन्तु भिन्नजातीया एव। स च भेदो निदानादीनां व्याधिभेदगमकत्वेनोपयुक्तो व्याधिभेदकथन एव वक्तव्यः। सम्प्राप्तेस्तु सङ्ख्यादिभेदः सर्वव्याधिष्वेकजातीयत्वेन न विशेषगमक इति इहैव सर्वव्याधिनिदाने कथ्यते; निदानादिविशेषास्तु प्रतिव्याधिविशिष्टत्वेन नेह प्रपञ्चेनोच्यन्ते। अत एव चात्रैवाध्याये सम्प्राप्तेः सामान्याभिधानेनैवोक्तत्वात् सम्प्राप्तिं परित्यज्य निदानादिविशेषं प्रतिजानीते— तस्य निदानपूर्वरूपलिङ्गोपशयविशेषाननुव्याख्यास्याम इति॥१२॥

तस्माद्व्याधीन् भिषगनुपहतसत्त्वबुद्धिर्हेत्वादिभिर्भावैर्यथावदनुबुध्येत॥१३॥

यस्मादिमे निदानादय उक्तेन न्यायेन व्याधिपरीक्षायामुपयुक्ताः, तस्माद्व्याधीन् भिषग् हेत्वादिभिः परीक्षेतेति योजना। न च वाच्यं यत्— निदानादीनां मध्ये चेदन्यतमेनापि व्याधिपरिच्छेदं कर्तुं समर्थस्तत् किं पञ्चकाभिधानेनेति; यतो यावन्तो ज्ञानोपाया व्याधीनां ते सर्व एवोपदर्शनीयाः। तत्र यो निदानं विस्मृतवान्, तस्य पूर्वरूपादिभिर्व्याधिः परीक्ष्यते; तथा यत्र च पूर्वरूपादयो विस्मृताः सन्दिग्धा वा, तत्रोपशयेन परीक्षा भवति; एवं कफजत्वसन्देहे ज्वरस्य सम्प्राप्तिरपि पूर्वाह्णे भुक्तमात्रे वा भवन्ती कफजत्वं गमयतीत्यादि प्रयोजनमनुसरणीयम्। तथा पूर्वरूपेणापि लिङ्गसामान्यनिश्चय उक्तः; यदुक्तं — "हारिद्रवर्णं रुधिरं च मूत्रं विना प्रमेहस्य हि पूर्वरूपैः। यो मूत्रयेत्तं न वदेत् प्रमेहं रक्तस्य पित्तस्य हि स प्रकोपः" (चि.अ.६) इति। तथा लिङ्गनिश्चितेऽपि व्याधौ पूर्वरूपेणासाध्यत्वमुक्तं, यथा— "पूर्वरूपाणि सर्वाणि ज्वरोक्तान्यतिमात्रया। यं विशन्ति विशत्येनं मृत्युर्ज्वरपुरःसरः" (.अ.५) इति। तस्मान्निदानादिपञ्चकमभिधातव्यमेव। ननु, लिङ्गेन व्याधिः परीक्षणीय इति वचनाल्लिङ्गव्यतिरिक्तो व्याधिरित्युक्तं भवति; तत्र च न लिङ्गसमुदायव्यतिरिक्तो व्याधिरुपलभ्यते, विषमारम्भिविसर्गित्वादयो हि सन्तापसहिता ज्वराः, तथा प्रतिश्यायकासाद्येकादशरूपमेलक एव यक्ष्मा। नैवं, लिङ्गत्वेन शास्त्रे

प्रतिपादितानां तदतिरिक्तव्याध्यभावे लिङ्गत्वानुपपत्तेः, वचनं हि— "विषमारम्भमूलैश्च ज्वर एको निरुच्यते" (नि.अ.८) इति। विकारश्चेह दोषदूष्यमेलकविशेषो ज्वरादिशब्देनोच्यते। स च दोषदूष्यविशेषात्मा ज्वरोऽरुच्यादिभ्यो दोषदूष्यवैषम्यविशेषेभ्योऽर्थान्तरमेव। न च वाच्यं ज्वरलिङ्गारुच्यङ्गमर्दादिरूपधातुवैषम्यविशेषमेलको ज्वरोऽस्तु, अलं तदतिरिक्तज्वरकल्पनया, लिङ्गलिङ्गिभावश्च समुदायसमुदायिभेदाद्भविष्यतीति; यत एवमप्यरुच्यङ्गमर्दादिधातुवैषम्यानुगतो धातुवैषम्यविशेषो ज्वररूपोऽवयवीति भिन्न एव वक्तव्यः; जङ्घाबाहुशिरोन्तराध्यवयवानतिरिक्तमेव शरीरमवयविरूपम्। दुःखमेव व्याधिरिति पूर्वमेव पराकृतं, तेन दुःखरूपत्वाद्व्याधेरवयवित्वं न सम्भवतीति न वाच्यम्। लिङ्गानि तु स्वरूपेण व्याधयो भवन्ति, ते च बोद्धव्यव्याध्यपेक्षया लिङ्गानि भवन्ति। तदुक्तं— "व्याधयस्ते तदात्वे तु लिङ्गानीष्टानि नामयाः" (नि.अ.८) इति। लिङ्गलिङ्गिभावश्च जिज्ञासावशाद्भवति। यद्वक्ष्यति— "विषमारम्भमूलानां लिङ्गमेकं ज्वरो मतः। विषमारम्भमूलैश्च ज्वर एको निरुच्यते" (नि.अ.८) इति। अस्य चार्थमपस्मारनिदाने प्रकरणागतं व्याख्यास्यामः। तस्मात् सुस्थितं व्याधिगमकत्वं निदानादिपञ्चकस्येत्यर्थः॥१३॥

इत्यर्थसङ्ग्रहो निदानस्थानस्योद्दिष्टो भवति। तं विस्तरेणोपदिशन्तो भूयस्तरमतोऽनुव्याख्यास्यामः॥ १४॥

इतीत्यादौ इति परिसमाप्तौ। निदानस्थानस्येति सर्वव्याधिनिदानस्य। अर्थसङ्ग्रह इत्यनेनैव सङ्क्षेपार्थाभिधाने लब्धे उद्दिष्ट इति सङ्क्षेपाभिधायिपदकरणेन सङ्क्षेपस्यापि सङ्क्षेपाभिधानमेतदिति दर्शयति। तमिति सामान्यनिदानोद्देशम्, अतो निदानोद्देशमात्रतो भूयस्तरमुपदिशन्तो विस्तरेण व्याख्यास्याम इति योजना। तेनैतदतिसङ्क्षेपकथनापेक्षया प्रपञ्चकथनमेवेह विस्तरशब्दार्थ इति दर्शयति; तेन निदानादीनां यावद्विस्तरकथनमुत्तरत्रोपपन्नं भवति॥१४॥

तत्र प्रथमत एव तावदाद्याँल्लोभाभिद्रोहकोपप्रभवानष्टौ व्याधीन्निदानपूर्वेण क्रमेण व्याख्यास्यामः, तथा सूत्रसङ्ग्रहमात्रं चिकित्सायाः। चिकित्सितेषु चोत्तरकालं यथोपचितविकाराननुव्याख्यास्यामः॥१५॥

तत्रेत्यादिना ज्वराद्यष्टविधरोगस्य निदानस्थाने कथनं प्रतिजानीते। प्रथमत एव तावदित्यनेन पश्चाच्चिकित्साभिधेयानर्शः— प्रभृतीन् सूचयति। आद्य नित्यनेन आदौ दक्षाध्वरोद्ध्वंसे उत्पन्ना ये तेषामिह कथनं दर्शयति। यद्यपि च राजयक्ष्मा पृथगेवोत्पन्नः, वचनं हि— "अतिव्यवायात् पुनर्नक्षत्रराजस्य यक्ष्मा" (नि.अ.८) इति, तथाऽप्यस्य प्राधान्यादिहाभिधानम्। यद्यपि च दक्षाध्वरोद्ध्वंसोद्भूतानपस्मारान्तानभिधाय पृथगुत्पन्नस्य यक्ष्मणोऽभिधानमुचितं, तथाऽप्युन्मादापस्मारयोरागन्तुत्वेन शोषमप्यभिधायान्तेऽभिधानम्। लोभाभिद्रोहप्रभवानित्यनेन जनपदोद्ध्वंसनीये "प्रागपि चाधर्मादृते न रोगोत्पत्तिरभूत्" (वि.अ.३) इत्यनेन वक्ष्यमाणानां ज्वरादीनां लोभाभिद्रोहजन्यतां दर्शयति, अनेनाधर्मजत्वं ज्वरादीनामुक्तं भवति। निदानपूर्वेणेति निदानप्रथमेन। क्रमेणेति रोगसामान्योक्तनिदानपूर्वरूपरूपोपशयसम्प्राप्तिरूपेण। अयं च क्रमः क्वचित् प्रयोजनवशाद्बाध्यते; यथाऽत्रैव ज्वरेऽग्रे हि रूपमभिधाय पूर्वरूपमभिधातव्यम्। क्रमभेदप्रयोजनं चेह यत्— रूपाण्यत्र प्रतिज्वरमभिधातव्यानि, न तु प्राग्रूपाणि प्रतिज्वरमभिधातव्यानि; तेन सर्वसाधारणत्वात् सर्वमभिधाय प्राग्रूपं सामान्यमभिधातव्यम्। तथा, सूत्रसङ्ग्रहमात्रं चिकित्साया व्याख्यास्याम इति सम्बन्धः। निदाने च चिकित्साभिधानप्रयोजनं प्रागेवोक्तम्। सूत्रमिति कृत्वा यत् सङ्ग्रहमिति करोति तेन सूत्रस्यापि सङ्क्षेपेणाभिधानं दर्शयति; तथा चिकित्सासूत्रमपीह किञ्चिन्न वक्तव्यं, यथा— लङ्घनकालयवाग्वादयः। चिकित्सितेष्वित्यनेनैव चोत्तरकालत्वे लब्धे पुनरुत्तरकालमिति वचनं चिकित्सितस्थानेऽपि ज्वराद्यभिधानोत्तरकालमेव यथोपचितविकाराणां निदानादिकथनं दर्शयति। यथोपचितमिति ये ये उपचिता विकाराः शोथार्शःप्रभृतयस्तान्। किंवा, 'यथाचितम्' इति पाठः, तत्रापि यथाप्रधानमित्यर्थ उन्नेयः। चिकित्सिते च विकाराणां निदानाद्यभिधानं निदानादिनाऽव्यवधानेन प्रतीते विषये चिकित्सा सम्यक् प्रतीयत इत्यभिप्रायेण। अत एव च

ज्वरादीनामपि पुनर्निदानाद्यभिधास्यति, इह तु ज्वरादीनां निदानाद्यभिधानं बहुवक्तव्यत्वेन स्थानभेदं कृत्वा कृतम्। स्थानभेदकरणेन च चिकित्सावदायुर्वेदे निदानस्यापि ज्ञेयत्वेन प्राधान्यं दर्शयति॥ १५॥

इह खलु ज्वर एवादौ विकाराणामुपदिश्यते, तत्प्रथमत्वाच्छारीराणाम्॥ १६॥

इह खल्विति अष्टविधव्याधिनिदाने वक्तव्ये। शारीराणामित्यनेन कामक्रोधादिमानसं रोगं प्रति न ज्वरस्य प्रथमत्वमिति दर्शयति॥ १६॥

अथ खल्वष्टाभ्यः कारणेभ्यो ज्वरः सञ्जायते मनुष्याणां; तद्यथा— वातात्, पित्तात्, कफात्, वातपित्ताभ्यां, वातकफाभ्यां, पित्तकफाभ्यां, वातपित्तकफेभ्यः, आगन्तोरष्टमात् कारणात्॥ १७॥

ज्वरस्य निरूपणीयस्य कारणकृतं भेदमाह— अथेत्यादि। एतच्च कारणं वातादि सन्निकृष्टम्। मनुष्याणामितिवचनेन गोगजशकुन्यादीनां नावश्यमिदं ज्वराष्टत्वमनुगामीति दर्शयति; तथाहि— हस्त्यादीनां पाकलादयो नाष्टविधाः प्रतिपाद्यन्ते। आगन्तोरिति वक्तव्ये अष्टमादिति वचनमागन्तोरभिघातादिचतुष्कारणभेदेऽप्येकत्वोपदर्शनार्थम्। आगन्तुर्हि कारणभेदोत्पन्नोऽप्येकरूप एव, यत आगन्तुः सर्वो व्यथापूर्वमेव भवति; यस्तु तत्र, "कामशोकभयाद्वायुः" (चि.अ.३) इत्यादिना भेदो वक्तव्यः, स वातादिकृत एवेति भावः॥ १७॥

तस्य निदानपूर्वरूपलिङ्गोपशयविशेषाननुव्याख्यास्यामः॥ १८॥

तस्येत्यादौ तस्येति ज्वरस्य। विशेषानिति निदानादिभिः प्रत्येकं सम्बध्यते। निदानादिविशेषाश्चेह रोगान्तररक्तपित्ताद्यपेक्षया तथा परस्परं वातादिज्वरापेक्षया च यथासम्भवं बोद्धव्याः। तेन

पूर्वरूपविशेष इह रक्तपित्तादिपूर्वरूपापेक्षया बोद्धव्यः, पूर्वरूपस्य विशेषेणेहानभिधानात्। उपशयविशेषानभिधानं च निदानविशेषाभिधानादेव लभ्यते, यतो निदानविपर्ययेणोपशयमभिधास्यति। पूर्वरूपं चेह विशिष्टमव्यक्तलिङ्गविशेषरूपमेव ज्ञेयम्। सम्प्राप्तेस्तु वक्ष्यमाणाया इहाप्रतिज्ञानं, तस्याः सर्वरोगे सम्प्राप्तिभेदाभिधाने च कथितत्वात्, तथा निदानादिवत् सम्प्राप्तेर्व्याधिबोधनं प्रत्यप्रधानत्वाच्च; यश्च सम्प्राप्तिभेदोऽभिधातव्यः स सर्वरोगसाधारण एव; भेदस्तु तस्या वातादिदोषमात्रकृत एव, वातादिभेदश्च निदानभेद एव। अन्ये तु ब्रुवते— सम्प्राप्तिं नाभिधास्यत्येवायं, यदेतत् 'स यदा प्रकुपितः' इत्याद्यभिधास्यति, तन्निदानरूपवातादिधर्मकथनमिति कृत्वा निदानान्तर्गतमेव॥१८॥

रूक्षलघुशीतवमनविरेचनास्थापनशिरोविरेचनातियोगव्यायामवेगसन्धारणानशनाभि घात-व्यवायोद्वेगशोकशोणितातिषेकजागरणविषमशरीरन्यासेभ्योऽतिसेवितेभ्यो वायुः प्रकोपमापद्यते॥ १९॥

रूक्षेत्यादि। वातप्रकोपणं प्रति रूक्षस्य प्रधानत्वेनाग्रेऽभिधानं, रूक्षो हि गुणो वातगुणेषु प्रधानम्। आस्थापनं यद्यपि वातहरमुक्तम्— "आस्थापनानुवासनं तु खलु सर्वोपक्रमेभ्यो वातविकारेषु प्रधानम्" (सू.अ.२०) इति वचनात्, तथाऽपीहास्थापनस्यातियोगो वातहेतुरुक्त एवेति न दोषः। वचनं हि— "उत्क्लेशाग्निवधौ स्नेहान्निरूहात् पवनाद्भयम्" (सि.अ.४) इति। निरूहश्चानुवासनं कृत्वा युक्त एव, मात्राकृतश्च साधारणवातहर इति सिद्धान्तः॥१९॥

स यदा प्रकुपितः प्रविश्यामाशयमूष्मणा सह मिश्रीभूयाद्यमाहारपरिणामधातुं रसनामानमन्ववेत्य रसस्वेदवहानि स्रोतांसि पिधायाग्निमुपहत्य पक्तिस्थानादूष्माणं बहिर्निरस्य केवलं शरीरमनुप्रपद्यते, तदा ज्वरमभिनिर्वर्तयति॥२०॥

स यदेत्यादिना सम्प्राप्तिमाह। यदेति वचनादेवंकुपितोऽपि वायुर्यदाऽऽमाशयप्रवेशादिसम्प्राप्तियुक्तो भवति तदैव ज्वरं करोति, नान्यदेति दर्शयति। प्रविश्यामाशयमित्यनेन ज्वरकर्तुर्दोषस्यामाशयदूषकत्वं दर्शयति। अत एव सर्वज्वरेष्वामाशयविशुद्ध्यर्थं लङ्घनमुत्सर्गतो वदन्ति। यद्यपि चामाशयप्रवेशादेवोष्मणाऽपि मिश्रत्वं लभ्यत एव, यत आमाशय एव वह्निस्थानं, "नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः" (वि.अ.२) इति वचनात्, तथाऽपि वह्निस्थानस्यामाशयैकदेशत्वेनामाशयप्रवेशोऽपि नावश्यं ग्रहणीरूपवह्निस्थानदुष्टिर्विशेषेण लभ्यत इति; अत एवोक्तम्— ऊष्मणा सह मिश्रीभूयेति। रसनामानमित्युच्यमाने आहाररसेऽपि मधुररसादौ प्रसक्तिः स्यात्, अत उक्तम्— आहारपरिणामधातुमिति; आहारपरिणामभवो धातुराहारपरिणामधातुः, तमिति। आहारपरिणामधातुत्वं च परम्परया रक्तादिष्वप्यस्तीत्याह— आद्यमिति; प्रथममित्यर्थः। रसमिति वक्तव्ये रसनामानमिति यत् करोति तेन रसतीति रस इति व्युत्पत्तिमात्रेण रक्तादिषु रससञ्ज्ञां निषेधयति, यत्रैव रससञ्ज्ञा रूढा तं ग्राहयति; एवमन्यत्रापि च यत् पदमधिकार्थमिह प्रतीयते तत् स्पष्टार्थमेव, यतस्त्रिविधशिष्यबुद्धिहितमेव विस्पष्टार्थं तन्त्रं युज्यते। अन्विति यथोक्तक्रमेण। अवेत्येति गत्वा। पिधायेति अवरुध्य। पक्तिस्थानात् पाचकाग्निस्थानात्। ऊष्माणमिति पाचकवह्निम्। बहिरिति पक्तिस्थानव्यतिरिक्तशरीरे। यद्यपि चोष्माणं निरस्येतिवचनादेव पक्तिस्थानादिति लभ्यते, तथाऽपि पक्तिस्थानादितिवचनेन पक्तिस्थानात् कृत्स्नस्य वह्नेर्निरसनं दर्शयति, इह चोष्मशब्देन पाचकाग्निं व्यपदिशन् पाचकस्य वह्नेरूष्मरूपतां दर्शयति, बाह्यवह्निसदृशज्वालाकरं पित्तं निषेधयति। अत एव च वह्नेर्निरसनादग्निमान्द्यं ज्वरे दर्शितं भवति। वायुश्चात्रातिवृद्धत्वेन वह्नेर्निरासकः, तेनाग्निदीप्तिं न करोति; यत्र हि प्रेरकमात्रो भवति वायुस्तत्र वह्नेर्वृद्धिं करोति; यथा— मेदस्विनः कोष्ठे चरन् वायुरग्निवृद्धिकरो भवति॥२०॥

तस्येमानि लिङ्गानि भवन्ति; तद्यथा— विषमारम्भविसर्गित्वम्, ऊष्मणो वैषम्यं, तीव्रतनुभावानवस्थानानि ज्वरस्य, जरणान्ते दिवसान्ते निशान्ते घर्मान्ते वा

ज्वरस्याभ्यागमनमभिवृद्धिर्वा, विशेषेण परुषारुणवर्णत्वं नखनयनवदनमूत्रपुरीषत्वचामत्यर्थं क्लृप्तीभावश्च; अनेकविधोपमाश्चलाचलाश्च वेदनास्तेषां तेषामङ्गावयवानां; तद्यथा— पादयोः सुप्तता, पिण्डिकयोरुद्वेष्टनं, जानुनोः केवलानां च सन्धीनां विश्लेषणम्, ऊर्वोः सादः, कटीपार्श्वपृष्ठस्कन्धबाह्वंसोरसां च भग्नरुग्णमृदितमथितचटितावपाटितावनुन्नत्वमिव, हन्वोश्चाप्रसिद्धिः, स्वनश्च कर्णयोः, शङ्खयोर्निस्तोदः, कषायास्यता आस्यवैरस्यं वा, मुखतालुकण्ठशोषः, पिपासा, हृदयग्रहः, शुष्कच्छर्दिः, शुष्ककासः, क्षवथूद्गारविनिग्रहः, अन्नरसखेदः, प्रसेकारोचकाविपाकाः, विषादजृम्भाविनामवेपथुश्रमभ्रमप्रलापप्रजागररोमहर्षदन्तहर्षाः, उष्णाभिप्रायता, निदानोक्तानामनुपशयो विपरीतोपशयश्चेति वातज्वरस्य लिङ्गानि भवन्ति॥२१॥

लिङ्गान्याह— तद्यथा विषमेत्यादि। तदिति सामान्येन स्त्रीलिङ्गपुंलिङ्गनपुंसकलिङ्गवक्ष्यमाणरूपप्रत्यवमर्शकं, सर्वलिङ्गप्रत्यवमर्शो हि तदिति सर्वनाम युक्तम्। यथेति उदाहरणे। आरम्भ उत्पादः, विसर्गो मोक्षः, तौ विषमौ यस्य स विषमारम्भविसर्गी; विषमत्वं च कदाचिच्छिरो गृहीत्वा भवति, कदाचित् पृष्ठं, कदाचिज्जङ्घे इत्यादि; एवं मोक्षोऽपि कदाचिच्छिरोऽग्रे मुच्यते इत्यादि; किंवा, ज्वरारम्भमोक्षकालानवस्थितत्वमेव वैषम्यम्। ऊष्मणो वैषम्यमिति क्वचिच्छरीरप्रदेशे महानूष्मा, क्वचिन्मन्द इत्यादि। तीव्रतनुभावानवस्थानानीति तीव्रभावस्तनुभावश्च ज्वरस्य कालाप्रतिनियत इत्यर्थः। एतत्सर्वं वायोरनवस्थितत्वेनोपपन्नम्। यच्च वायोर्जरणान्तदिवसान्तादिषु बलवत्कार्यकर्तृत्वमुक्तं, तदपि प्रायिकत्वेन ज्ञेयम्। अन्यथा, एतदेवारम्भादिवैषम्यं न स्यात्। यदि कालविशेषे जरणान्तादौ शरीरप्रदेशविशेषे च जङ्घादौ प्रतिनियमेन वातकोपः स्यात्, तदा शरीरप्रदेशविशेषे वातस्थाने जङ्घादौ कालविशेषे जरणान्तादौ च वातप्रकोपः प्रायिको ज्ञेयः। एतमेव प्रायिकवातकालमाश्रित्याह— जरणान्त इत्यादि। घर्मान्त इति प्रावृषि मुक्तिभाववतो ज्वरस्य सततकादेरभ्यागमनं, नित्यानुषक्तस्य त्वतिवृद्धिरिति व्यवस्था। परुषारुणत्वं च नखादिष्वेव प्रव्यक्तमुपलभ्यत इति कृत्वा नखादय इहोच्यन्ते। त्वग्ग्रहणेनैव

वदनग्रहणे लब्धेऽपि वदनग्रहणं वदनत्वचि विशेषेण परुषत्वादिदर्शनार्थम्। क्लृप्तीभावः अप्रवृत्तिः, सा च योग्यतया मूत्रपुरीषयोरेव नखादिषूक्तयोर्मन्तव्या; किंवा, क्लृप्तीभावो भेदः स्फुटनमिति यावत्; स च नखादीनाम्। चलाश्च काश्चिद्वेदना अचलाश्च काश्चिन्नित्यानुषक्तत्वेनेति चलाचलाः; किंवा अत्यर्थं चलाश्चलाः। पिण्डिका जान्वधो जङ्घामध्यमांसपिण्डिका। भग्नं किञ्चिदवशेषेण च्छिन्नं, रुग्णं किञ्चिच्छिन्नं, मृदितं पार्श्वावमोटितम्, अवपाटितम् एकदेशोत्पाटितम्, अवनुन्नं प्रेरितम्; एषां च भग्नादीनां लोकत एवार्थावगतिः, यतो लौकिकैरेवैते शब्दाः प्रसिद्धत्वेन तत्र तत्र शास्त्रेऽभिधीयन्ते। हन्वोरप्रसिद्धिरिति हन्वोः स्वव्यापाराकरणम्। आस्यवैरस्यमिति अरसज्ञता। अन्नरसखेदः अन्नरसे खेदोऽवसादोऽन्नरसखेदः, सर्वरसेष्वनिच्छेत्यर्थः। अरुचिस्तु वक्ष्यमाणा वक्त्रे प्रविष्टान्नानभ्यवहरणाद्बोद्धव्या। उष्णाभिप्रायता उष्णप्रियता। निदानोक्तानामनुपशय इति वचनेनैव विपरीत उपशयोऽर्थलब्धोऽपि स्पष्टार्थमुच्यते; किंवा, अर्थापत्तेरनैकान्तिकत्वेन उच्यते; यथा— नवज्वरे दिवास्वप्ने प्रतिषिद्धेऽर्थापत्त्या पुराणज्वरे दिवास्वप्नः प्राप्नोति, अथ च तत्र दिवास्वप्नो न विहित इत्यर्थापत्तेरनैकान्तिकत्वं वदन्ति। निदानोक्तानामित्यत्रोक्तग्रहणाद्यदेव निदानत्वेनोक्तं तस्यैवानुपशयित्वं निदर्शयति न पुनर्यस्यापाततो निदानत्वं प्रतिभाति; तेन, मदात्ययादौ मद्यादेर्निदानत्वेन प्रतीयमानस्यापि उपशयित्वमेव॥२१॥

उष्णाम्ललवणक्षारकटुकाजीर्णभोजनेभ्योऽतिसेवितेभ्यस्तथा तीक्ष्णातपाग्निसन्तापश्रमक्रोध-विषमाहारेभ्यश्च पित्तं प्रकोपमापद्यते॥२२॥

तद्यदा प्रकुपितमामाशयादूष्माणमुपसृज्याद्यमाहारपरिणामधातुं रसनामानमन्ववेत्य रसस्वेदवहानि स्रोतांसि पिधाय द्रवत्वादग्निमुपहत्य पक्तिस्थानादूष्माणं बहिर्निरस्य प्रपीडयत् केवलं शरीरमनुप्रपद्यते, तदा ज्वरमभिनिर्वर्तयति॥२३॥

तस्येमानि लिङ्गानि भवन्ति; तद्यथा— युगपदेव केवले शरीरे ज्वरस्याभ्यागमनमभिवृद्धिर्वा भुक्तस्य विदाहकाले मध्यन्दिनेऽर्धरात्रे शरदि वा विशेषेण, कटुकास्यता, घ्राणमुखकण्ठौष्ठतालुपाकः, तृष्णा, मदो, भ्रमो, मूर्च्छा, पित्तच्छर्दनम्, अतीसारः, अन्नद्वेषः, सदनं, खेदः, प्रलापः, रक्तकोठाभिनिर्वृत्तिः शरीरे, हरितहारिद्रत्वं नखनयनवदनमूत्रपुरीषत्वचाम्, अत्यर्थमूष्मणस्तीव्रभावः, अतिमात्रं दाहः, शीताभिप्रायता, निदानोक्तानुपशयो विपरीतोपशयश्चेति पित्तज्वरलिङ्गानि भवन्ति॥२४॥

उष्णेत्यादिना पित्तज्वरमाह— तद्यथेत्यादि।— पूर्ववद्व्याख्येयम्। द्रवत्वादग्निमुपहत्येतिवचनादुष्णस्यापि पित्तस्य द्रवत्वेनाग्निविपरीतेन गुणेनाग्निहन्तृतां दर्शयति। वक्ष्यति हि ग्रहण्यध्याये— "आप्लावयद्धन्त्यनलं जलं तप्तमिवानलम्" (चि.अ.१५) इति। बहिर्निरस्य प्रपीडयदितिवचनेन पित्तज्वरे वातज्वर इव न सहसा वह्निक्षेपणं भवति, किन्तु शनैः स्तोकक्रमेणेति दर्शयति। युगपदेवेति न वैषम्येण। अभ्यागमनमभिवृद्धिर्वेति च पूर्वेण युगपदेवेत्यादिना परेण च विशेषेणेत्यन्तेन च ग्रन्थेन सम्बध्यते। कोठाभिनिर्वृत्तिः शरीर इति च्छेदः॥२२-२४॥

स्निग्धगुरुमधुरपिच्छिलशीताम्ललवणदिवास्वप्नहर्षाव्यायामेभ्योऽतिसेवितेभ्यः श्लेष्मा प्रकोपमापद्यते ॥२५॥

स यदा प्रकुपितः प्रविश्यामाशयमूष्मणा सहमिश्रीभूयाद्यमाहारपरिणामधातुं रसनामानमन्ववेत्य रसस्वेदवहानि स्रोतांसि पिधायाग्निमुपहत्य पक्तिस्थानादूष्माणं बहिर्निरस्य प्रपीडयन् केवलं शरीरमनुप्रपद्यते, तदा ज्वरमभिनिर्वर्तयति॥२६॥

स्निग्धेत्यादिना श्लेष्मज्वरमाह। स यदेत्यादि पूर्ववत् कफज्वरेऽपि व्याख्येयम्। ननु, श्लेष्मण आमाशयः स्थानं, तत् किं प्रविश्यामाशयमिति वचनेन? नैवं, श्लेष्मण उरोऽपि प्रधानं स्थानं, तेनेहोरःस्थस्यापि श्लेष्मण आमाशयप्रवेशं दर्शयति। यत्र केवलामाशयवृत्ति पित्तं, तत्र 'आमाशयं प्रविश्य' इति न कृतं,

किन्तु 'आमाशयादूष्माणमुपसृज्य' इति कृतं; पित्तं ह्यामाशयप्रविष्टमेव भवति, तच्चामाशयैकदेशस्थं ग्रहणीरूपामाशयैकदेशं वह्निस्थानं स्वस्थानाद्गच्छतीति युक्तम्॥२५-२६॥

तस्येमानि लिङ्गानि भवन्ति; तद्यथा— युगपदेव केवले शरीरे ज्वरस्याभ्यागमनमभिवृद्धिर्वा भुक्तमात्रे पूर्वाह्णे पूर्वरात्रे वसन्तकाले वा विशेषेण, गुरुगात्रत्वम्, अनन्नाभिलाषः, श्लेष्मप्रसेकः, मुखमाधुर्यं, हृल्लासः, हृदयोपलेपः, स्तिमितत्वं, छर्दिः, मृद्वग्निता, निद्राधिक्यं, स्तम्भः, तन्द्रा, कासः, श्वासः, प्रतिश्यायः, शैत्यं, श्वैत्यं च नखनयनवदनमूत्रपुरीषत्वचाम्, अत्यर्थं च शीतपिडका भृशमङ्गेभ्य उत्तिष्ठन्ति, उष्णाभिप्रायता, निदानोक्तानुपशयो विपरीतोपशयश्च; इति (श्लेष्मज्वरलिङ्गानि भवन्ति)॥२७॥

युगपदिति एककालम्; एकदैव कफज्वरे सर्वशरीरव्याप्त्या आगमनमभिवृद्धिर्वा भवतीति दर्शयति। शीतपिडकास्तन्त्रान्तरे श्वेतपिडका उच्यन्ते। 'तस्येमानि लिङ्गानि भवन्ति' इत्येतावतैव कफज्वरलिङ्गत्वे लब्धे पुनः 'श्लेष्मज्वरलिङ्गानि भवन्ति' इति वचनं किमर्थं? ब्रूमः— तस्येतिपदेन स्वदोषमात्रप्रत्यवमर्शोऽपि स्यात्, तेन दोषलिङ्गतैव परं लिङ्गानां मा स्यादित्येतदर्थं पुनरभिधानम्; किंवा, पूर्वप्रतिज्ञया लिङ्गानां प्रागवच्छेद उक्तः, उत्तरेण श्लेष्मज्वरलिङ्गानि भवन्तीत्यनेनान्त्यावच्छेद उच्यते; एवमन्यत्रापि वातज्वरादौ पूर्वरूपे च पुनरुक्तिः परिहर्तव्या॥२७॥

विषमाशनादनशनादन्नपरिवर्तादृतुव्यापत्तेरसात्म्यगन्धोपघ्राणाद्विषोपहतस्य चोदकस्योपयोगाद्गरेभ्यो गिरीणां चोपश्लेषात् स्नेहस्वेदवमनविरेचनास्थापनानुवासनशिरोविरेचनानामयथावत्प्रयोगात् मिथ्यासंसर्जनाद्वा स्त्रीणां च विषमप्रजननात् प्रजातानां च मिथ्योपचाराद् यथोक्तानां च हेतूनां मिश्रीभावाद्यथानिदानं द्वन्द्वानामन्यतमः सर्वे वा त्रयो दोषा युगपत् प्रकोपमापद्यन्ते, ते प्रकुपितास्तयैवानुपूर्व्या ज्वरमभिनिर्वर्तयन्ति॥२८॥

विषमाशनादित्यादिना द्वान्द्विकसान्निपातिकज्वरानाह। अनशनं यद्यपि न पित्तश्लेष्मकरं, तथाऽप्यग्निमान्द्यकरत्वात्त्रिदोषकरमपि भवति; किंवा एषु विषमाशनादिषु यथायोग्यतया द्वन्द्वकारणत्वं त्रिदोषकारणत्वं चोन्नेयं, तेनानशनं वातपित्तकरं बोद्धव्यं; यत्तु पित्तहरत्वमुक्तमनशनस्य, तत्तु पित्तद्रवांशक्षयात्। वचनं हि— "कफपित्ते द्रवे धातू सहेते लङ्घनं महत्" इति। अन्नपरिवर्तादिति सहसैवाक्रमेण कृताभ्यस्तान्नपरिवर्तात्। असात्म्यगन्धो गन्धद्रव्यस्य नासिकयाऽन्तःप्रवेशाद्यथा दोषकरो भवति न तथाऽसात्म्यरूपादयः, ते हि नावश्यं शरीरं विशन्ति, तेन नेहासात्म्यरूपादय उक्ताः। यथानिदानमिति यदा द्वयोर्निदानं सेव्यते तदा द्वन्द्वः, यदा त्रयाणां निदानं सेव्यते तदा त्रयो दोषाः; द्वन्द्वेऽपि यदा वातपित्तयोर्निदानं सेव्यते तदा वातपित्तरूपं द्वन्द्वम्; एवमन्यदपि कुप्यतीत्यर्थः। सर्वे त्रयो दोषा इत्यनेनैव लब्धेऽपि युगपदितिवचनं क्रमप्रकोपप्रतिषेधार्थं, युगपदेव प्रकोपमापद्यन्ते न क्रमेणेत्यर्थः॥२८॥

तत्र तथोक्तानां ज्वरलिङ्गानां मिश्रीभावविशेषदर्शनाद्द्वान्द्विकमन्यतमं ज्वरं सान्निपातिकं वा विद्यात्॥२९॥

ज्वरलिङ्गानामित्यादौ मिश्रीभावविशेषो वातपित्तलिङ्गं वा, वातश्लेष्मलिङ्गं वा, पित्तश्लेष्मलिङ्गं वा। अन्यतममिति वातपित्तज्वरादिकम्॥२९॥

अभिघाताभिषङ्गाभिचाराभिशापेभ्य आगन्तुर्हि व्यथापूर्वोऽष्टमो ज्वरो भवति। स किञ्चित्कालमागन्तुः केवलो भूत्वा पश्चाद्दोषैरनुबध्यते। तत्राभिघातजो वायुना दुष्टशोणिताधिष्ठानेन, अभिषङ्गजः पुनर्वातपित्ताभ्याम्, अभिचाराभिशापजौ तु सन्निपातेनानुबध्येते॥३०॥

आगन्तुज्वरमाह— अभिघातेत्यादि। अभिघातो लगुडाद्यभिघातः, अभिषङ्गः कामाद्यभिषङ्गः, अभिचारोऽथर्वमन्त्रादिर्ज्वरकरः, अभिशापस्तु गुरुसिद्धाद्यभिशपनम्; एतत् प्रधानत्वेन चतुर्विधं

कारणमिहोक्तं; तेन, ओषधिगन्धभूताभिषङ्गदुष्टग्रहनिरीक्षणादयोऽप्यागन्तुज्वरहेतवो बोद्धव्याः; किंवा, अभिघातग्रहणेन शरीराभिहननवाचिनाऽसात्म्यगन्धादयो ग्राह्याः, अभिषङ्गेण तु भूताभिषङ्गादयः। व्यथापूर्वमिति आगन्तौ प्रथमं व्यथा भवति, पश्चाद्दोषानुबन्धकृतानि लक्षणानीति दर्शयति; किंवा, व्यथापूर्वमितिवचनादागन्तौ ज्वरे व्यथैव पूर्वरूपमिति वदन्ति। रूपं तु यदेव ज्वरस्य प्रात्यात्मिकं सन्तापरूपं तदेव वातज्वरादिलक्षणरहितं बोद्धव्यं प्रथमतः, उत्तरकालीनदोषानुबन्धे तु यथावक्ष्यमाणदोषलिङ्गान्येव भवन्ति। अष्टम इतिवचनेनाभिघातादिहेतुचतुष्टययोगप्राप्तं चातुर्विध्यं निषेध्य व्यथापूर्वकत्वेनैकरूपयोगादेकविधत्वं चतुर्णां दर्शयति; चातुर्विध्ये ह्यागन्तोर्नाष्टमत्वं, नवमत्वादयोऽपि स्युः। किञ्चित्कालमिति स्तोककालं; केचित् त्र्यहं वदन्ति, अन्ये सप्ताहमाहुः। आगन्तौ हि सप्ताहादूर्ध्वं दोषलिङ्गानि भवन्तीति दृष्टम्। तत्र यस्यागन्तोर्यादृशो दोषानुबन्धो भवति तमाह— तत्राभिघातेत्यादि। वातपित्ताभ्यामिति कश्चिद्वातेन, कश्चित् पित्तेन, कश्चिद्वातपित्ताभ्याम्। वचनं हि— "कामशोकभयाद्वायुः, क्रोधात् पित्तं, त्रयो मलाः। भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः" (चि.अ.३) इति। भूताभिषङ्गे तु यद्यपि त्रिदोषप्रकोप उक्तः, तथाऽपि तत्र वातपित्तयोरेवैतद्वचनबलात् प्राधान्यम्॥३०॥

स सप्तविधाज्ज्वराद्विशिष्टलिङ्गोपक्रमसमुत्थानत्वाद्विशिष्टो वेदितव्यः, कर्मणा साधारणेन चोपचर्यते। इत्यष्टविधा ज्वरप्रकृतिरुक्ता॥३१॥

आगन्तोर्निजाद्भेदमाह— स इत्यादि। विशेषलिङ्गता आगतोर्व्यथापूर्वकव्याख्याने व्याकृता, समुत्थानविशेषोऽप्यभिघातादिरुक्तः, उपक्रमविशेषोऽपि 'साधारणेन कर्मणा चोपचर्यते' इति वचनेनैवात्र कथ्यते। साधारणेनेति दैवयुक्तिव्यपाश्रयेण; दैवव्यपाश्रयं हि बलिमङ्गलहोमादि, युक्तिव्यपाश्रयं हि लघ्वशनापतर्पणयवागूकषायपानादि। प्रकृतिरुक्तेति स्वभावोऽपि वातादिज्वराणां निदानाद्युपहित उक्त इत्यर्थः॥३१॥

ज्वरस्त्वेक एव सन्तापलक्षणः। तमेवाभिप्रायविशेषाद्विविधमाचक्षते, निजागन्तुविशेषाच्च। तत्र निजं द्विविधं त्रिविधं चतुर्विधं सप्तविधं चाहुर्भिषजो वातादिविकल्पात्॥३२॥

निजागन्तुविशेषाच्च द्विविधमिति सम्बन्धः। निजं द्विविधमित्यादौ द्वैविध्यं (संसृष्टासंसृष्टजन्यत्वेन) शीतोष्णाभिप्रायभेदात्, त्रिविधं त्रिदोषभेदात्, चतुर्विधं प्रत्येकं वातादिदोषजन्यभेदात्। तत्र चातुर्विध्ये द्वन्द्वज्वराः प्रतिक्षिप्यन्ते, तेषां प्रत्येकं वातादिज्वरसदृशत्वात्; त्रिदोषज्वरस्तु असाध्यतायोगात् कृच्छ्रसाध्यतायोगाद्वा पृथगुच्यते॥३२॥

तस्येमानि पूर्वरूपाणि भवन्ति; तद्यथा— मुखवैरस्यं, गुरुगात्रत्वम्, अनन्नाभिलाषः, चक्षुषोराकुलत्वम्, अश्र्वागमनं, निद्राधिक्यम्, अरतिः, जृम्भा, विनामः, वेपथुः, श्रमभ्रमप्रलापजागरणरोमहर्षदन्तहर्षाः, शब्दशीतवातातपसहत्वासहत्वम्, अरोचकाविपाकौ, दौर्बल्यम्, अङ्गमर्दः, सदनम्, अल्पप्राणता, दीर्घसूत्रता, आलस्यम्, उचितस्य कर्मणो हानिः, प्रतीपता स्वकार्येषु, गुरूणां वाक्येष्वभ्यसूया, बालेभ्यः प्रद्वेषः, स्वधर्मेष्वचिन्ता, माल्यानुलेपनभोजनपरिक्लेशनं, मधुरेभ्यश्च भक्षेभ्यः प्रद्वेषः, अम्ललवणकटुकप्रियता च, इति ज्वरस्य पूर्वरूपाणि भवन्ति प्राक्सन्तापात्; अपि चैनं सन्तापार्तमनुबध्नन्ति॥३३॥

तस्येमानीत्यादिना सर्वज्वरसाधारणं पूर्वरूपमाह। एतानि च पूर्वरूपाण्यागन्तोरपीत्येके वदन्ति; अन्ये तु निजानामेवैतानीति वदन्ति, आगन्तोस्तु व्यथैव पूर्वरूपम्। अत्राप्यनन्नाभिलाषारोचकयोः पूर्ववद्भेदः। दौर्बल्यं शरीरबलहानिः, अल्पप्राणता च मानसबलहानिर्बोद्धव्या; किंवा दौर्बल्यं मांसापचयः। दीर्घसूत्रता चिरेण कार्यकर्तृत्वम्। ज्वरपूर्वरूपाणि भवन्ति प्राक्सन्तापादिति च्छेदः, ज्वररूपसन्तापात् प्रागेतानि पूर्वरूपाणि भवन्तीत्यर्थः। अपिच सन्तापार्तमनुबध्नन्तीत्यनेन प्रव्यक्तेऽपि ज्वरे कानिचित्पूर्वरूपाणि मुखवैरस्यारुच्यादीनि भवन्तीति दर्शयति। न चैवं पूर्वरूपानुवृत्तौ रिष्टत्वं

वाच्यं; यतः सर्वपूर्वरूपाणामतिमात्रानुवर्तनं रिष्टमुक्तम्। वचनं हि— "पूर्वरूपाणि सर्वाणि ज्वरोक्तान्यतिमात्रया। यं विशन्ति विशत्येनं मृत्युर्ज्वरपुरःसरः" (.अ.५) इति; किंवा, अस्य श्लोकस्यान्य एवार्थः, तमिन्द्रिये वक्ष्यामः। न चारुच्यादीनां व्यक्तज्वरभावित्वेन पूर्वरूपत्वं हन्यते, यतो लिङ्गान्तरयुक्तान्यरुच्यादीनि लिङ्गानि भवन्ति, लिङ्गान्तरविरहितानि तु पूर्वरूपाणि॥३३॥

इत्येतान्येकैकशो ज्वरलिङ्गानि व्याख्यातानि भवन्ति विस्तरसमासाभ्याम्॥३४॥

एकैकशो ज्वरलिङ्गानीत्यत्र लिङ्गशब्देन निदानपूर्वरूपादीन्युच्यन्ते। विस्तरसमासाभ्यामिति विस्तरेण वातादिज्वरोक्ताः, समासेन संसर्गसन्निपातजाः; यस्त्वत्र समासेनोक्तः स चिकित्सिते प्रपञ्चनीय इति भावः॥३४॥

ज्वरस्तु खलु महेश्वरकोपप्रभवः, सर्वप्राणभृतां प्राणहरो, देहेन्द्रियमनस्तापकरः, प्रज्ञाबलवर्णहर्षोत्साहह्रासकरः, श्रमक्लममोहाहारोपरोधसञ्जननः; ज्वरयति शरीराणीति ज्वरः, नान्ये व्याधयस्तथा दारुणा बहूपद्रवा दुश्चिकित्स्याश्च यथाऽयम्। स सर्वरोगाधिपतिः, नानातिर्यग्योनिषु च बहुविधैः शब्दैरभिधीयते। सर्वे प्राणभृतः सज्वरा एव जायन्ते सज्वरा एव म्रियन्ते च; स महामोहः, तेनाभिभूताः प्राग्दैहिकं देहिनः कर्म किञ्चिदपि न स्मरन्ति, सर्वप्राणभृतां च ज्वर एवान्ते प्राणानादत्ते॥३५॥

सम्प्रति ज्वरस्य महाप्रभावतां दर्शयितुं पूर्वोत्पत्तिप्रकारमाह— ज्वरस्त्वित्यादि। महेश्वरकोपप्रभव इत्यनेन ज्वरचिकित्सिते "द्वितीये हि युगे शर्वमक्रोधव्रतमास्थितम्" (चि.अ.३) इत्यादिग्रन्थे वक्ष्यमाणां ज्वरोत्पत्तिमाह। क्रोधभवत्वेन च श्लेष्मजन्यस्याप्याग्नेयत्वं दर्शयति; क्रोधो ह्यग्निरूपः, तेन तन्मयोऽपि ज्वरस्तथैव; अत एवोक्तम्— "ऊष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना। तस्मात् पित्तविरुद्धानि त्यजेत् पित्ताधिकेऽधिकम्" (वा.चि.अ.१) इति। न च रुद्रकोपभवत्वेन लोभाभिद्रोहप्रभवत्वं ज्वरस्य विरुध्यते; यतो रुद्रकोपोद्भूत एव ज्वरो

लोभाभिद्रोहस्वरूपपापाचारप्राप्त्या पुरा मनुष्येषु भूतः। सर्वप्राणिनां ज्वर एव प्राणहर इति मरणकाले सर्वप्राणिनां ज्वर एव प्राणहर इति दर्शयति। देहेन्द्रियमनस्तापकर इत्यत्र प्रत्येकं तापलक्षणं ज्वरचिकित्सिते बोद्धव्यं "वैचित्त्यमरतिर्ग्लानिर्मनःसन्तापलक्षणम्" (चि.अ.३) इत्यादिना। ज्वरयति सन्तापयति। इतिशब्दो हेतौ; तेन, यस्मादुक्तमहेश्वरक्रोधप्रभवत्वादियुक्तः, तस्मात्। सर्वरोगाणामधिपतिरिवेति सर्वरोगाधिपतिः। नानाविधैः शब्दैरिति हस्तिषु पाकलो, गोषु खेरिको, मत्स्यानामिन्द्रजालो, विहङ्गानां भ्रामरक इत्यादिशब्दैः। सर्वप्राणभृतः सज्वरा एव जायन्ते सज्वरा एव म्रियन्ते च तत् किमिति तेषां जन्मनि मरणे वा सन्तापात्मा ज्वरो न लक्ष्यत इत्याह— स महामोह इति; जन्ममरणयोर्महामोहरूपो ज्वरो भवति, न सन्तापात्मेत्यर्थः। अत एवोक्तं— "ज्वरप्रभावो जन्मादौ निधने च महत्तमः" (चि.अ.३) इति। जन्मनि महामोहरूपतामाह— तेनेत्यादि। प्राग्दैहिकं जन्मान्तरकृतम्। ननु, शुद्धसत्त्वानुगमात् प्राग्दैहिकं स्मरणं युक्तं; वचनं हि— "यदा तेनैव शुद्धेन मनसा युज्यते, तदा जातिमतिक्रान्तामपि स्मरति" (शा.अ.३) इति। न, तस्य शुद्धमनःसत्त्वानुवृत्तेरपवादत्वादेतत्परित्यज्यान्यत्र ज्वरस्य प्राग्दैहिकविस्मारकत्वं ज्ञेयम्। मरणे महामोहतामाह— सर्वप्राणभृतामित्यादि। ज्वर एव महामोहरूप एवेति भावः; तेन म्रियमाणाः सर्वे महामोहं प्रविशन्तीत्यर्थः॥३५॥

तत्र पूर्वरूपदर्शने ज्वरादौ वा हितं लघ्वशनमपतर्पणं वा, ज्वरस्यामाशयसमुत्थत्वात्; ततः कषायपानाभ्यङ्गस्नेहस्वेदप्रदेहपरिषेकानुलेपनवमनविरेचनास्थापनानुवासनोपशमननस्तःकर्मधूपधूमपानाञ्जनक्षीरभोजनविधानं च यथास्वं युक्त्या प्रयोज्यम्॥३६॥

सम्प्रति सूत्रितं चिकित्सासूत्रमाह— तत्रेत्यादि। यद्यपि चिकित्सिते ज्वरादौ लङ्घनं वक्ष्यति, तथाऽपीह पाक्षिकलघ्वशनविधानं न विरोधि, लघ्वशनस्यापि लाघवकर्तृत्वेनैव लङ्घनत्वात्; किंवा, यत्र वातादिज्वरे लङ्घनं न कर्तव्यं तत्र लघ्वशनं बोद्धव्यम्, अपतर्पणं च लङ्घनमेव। अथ किमिति

वातिकेऽपि ज्वरे वातकारकं लघ्वशनमपतर्पणं वा कार्यमित्याह— आमाशयसमुत्थत्वादित्यादि। आमाशयसम्बन्धेन वातोऽपि मनाग्लङ्घनीयः स्थानापेक्षया भवतीति भावः। वचनं हि— "स्थानं जयेद्धि पूर्वं स्थानस्याविरोधेन" इति॥३६॥

जीर्णज्वरेषु तु सर्वेष्वेव सर्पिषः पानं प्रशस्यते यथास्वौषधसिद्धस्य; सर्पिर्हि स्नेहाद्वातं शमयति, संस्कारात् कफं, शैत्यात् पित्तमूष्माणं च; तस्माज्जीर्णज्वरेषु सर्वेष्वेव सर्पिर्हितमुदकमिवाग्निप्लुष्टेषु द्रव्येष्विति॥३७॥

भवन्ति चात्र—

यथा प्रज्वलितं वेश्म परिषिञ्चन्ति वारिणा।
नरः शान्तिमभिप्रेत्य तथा जीर्णज्वरे घृतम्॥३८॥
स्नेहाद्वातं शमयति, शैत्यात् पित्तं नियच्छति।
घृतं तुल्यगुणं दोषं संस्कारात्तु जयेत् कफम्॥३९॥
नान्यः स्नेहस्तथा कश्चित् संस्कारमनुवर्तते।
यथा सर्पिरतः सर्पिः सर्वस्नेहोत्तमं मतम्॥४०॥

यथास्वौषधसिद्धस्येति वातादिज्वरे वातज्वरादिहरद्रव्यसिद्धस्य। कथं सर्पिः सर्वत्र कार्यमित्याह— सर्पिर्हि स्नेहादित्यादि। संस्कारात् कफमिति कटुतिक्तादिकफहरसंस्कारात्। यद्यपि च 'यथास्वौषधसिद्धस्य' इति वचनाद्वातेऽपि वातहरसंस्कृतमेव सर्पिर्विहितं, तथाऽपि वाते रूक्षविपरीतेन स्नेहेनापि सर्पिर्वातहरमेव, पित्तेऽप्युष्णविपरीतशैत्यान्वितं, कफे तु सर्पिषः स्नेहशैत्यादिना समानेन कश्चिन्न स्वाभाविको विरोधिगुणोऽस्ति किन्तु संस्काराद्धितमेवेति दर्शयति। ऊष्माणं चेति ज्वरप्रभावभूतमूष्माणं; न पित्तोष्माणं, तस्य पित्तग्रहणेनैव ग्रहणात्। अनेन ज्वरस्योष्महरणेन सर्पिषो

ज्वरव्याधिप्रत्यनीकत्वं दर्शितं भवति। अत्र वातशमनं सर्पिषोऽभिधाय पित्तशमनेऽभिधातव्ये कफशमनमुच्यते, शेषतो वक्तव्योष्मरूपव्याधिप्रत्यनीकतयाऽपि पित्तशमनहेतोः शैत्यस्य समानगुणत्वात्; यदि त्विह मध्ये पित्तप्रशमनमुच्यते, तदा पुनः संस्कारात् कफमित्युक्त्वा शैत्यादूष्माणमिति वक्तव्यं स्यात्। यत्र तु श्लोकपाठे व्याधिप्रत्यनीकत्वं घृतस्य पृथङ्नोक्तं; तत्र, 'स्नेहाद्वातं शमयति' इत्यादौ वातमनु पित्तमेव कृतमिति साधु कृतम्। तस्मादिति दोषव्याधिप्रत्यनीकत्वात्। जीर्णज्वरेष्विति वचनेनामज्वरे निषेधयति, सामे हि समानगुणत्वात् सर्पिरहितम्। शान्तिमिति सन्तापशान्तिम्। अभिप्रेत्येति बुद्ध्या स्वीकृत्य, तथा जीर्णज्वरे घृतं 'ददाति' इति शेषः। नन्वत्र, श्लोके सर्पिर्गुणकथने किमिति व्याधिरूपोष्मशमनं नोच्यते? ब्रूमः— पित्तोष्माव्यतिरिक्तत्वेन ज्वरोष्मणः पित्तशमनेनैव लब्धत्वात्। ननु यद्येवं गद्यपाठे पृथङ्क तर्हि पठनीय ऊष्मा? ब्रूमः— यावानूष्मा शारीरः स पैत्त एव, यतो ब्रूते— "ऊष्मा पित्तादृते नास्ति" (वा.चि.अ.१) इत्यादि, तथा "पित्तादूष्मोष्मणः पक्तिर्नराणामुपजायते" (सू.अ.१७) इति; किन्तु, नासावूष्मा कदाचित् पित्तेन साम्येऽप्येको भवति, यथा— कफज्वरे; कदाचित्त्वधिके पित्ते वह्निरूप ऊष्मा मन्दो भवति, यथा— पित्ताग्निमान्द्ये; तदेवमूष्मा पित्ताद्भिन्नोऽभिन्नश्च भवति; तत्र भेदं गृहीत्वा गद्यपाठे पृथग् ज्वरोष्मा पठितः, श्लोकपाठे त्वभेदविवक्षया न पृथक् पठितः। ज्वरे तु पित्तोष्मा ज्वरप्रभावेण वर्धते, स च प्रभावो ज्वरस्य दोषदूष्यविशेषात्मकस्य, तथा "ज्वरस्त्रिपादस्त्रिशिरः" इत्याद्युक्तप्राणिविशेषस्य ज्ञेयः। ननु सर्पिः कथं पित्तं हन्ति? यतः, यथा पित्तविपरीतशैत्यं सर्पिषि, तथा पित्तसमानः स्नेहोऽप्यस्ति। नैवं, पित्ते "सस्नेहं" (सू.अ.१) इतीषदर्थेन सशब्देनाल्पस्य स्नेहस्याभिधानात्, उष्णत्वं तु पित्ते प्रधानम्। यद्यपि पित्तं जलेनाप्यारब्धं, तथाऽपि तत्र शैत्यमभिभूयाग्निकृतमौष्ण्यमेवाधिकं भवति, तथा तेजसो रौक्ष्येण जलकृतस्नेहोऽपि पित्तेऽभिभूयते, द्रवत्वं तु जलकृतं तेजसा नाभिभूयते, दृश्यते ह्यग्निसम्पृक्ते जले द्रवत्वमल्पस्नेहता उष्णता चेति। किंवा, किमनेन तप्तजलदृष्टान्तेन, अदृष्टकृत एवायं भूतानामुत्पादः; तेन, कश्चितेव गुणः पाञ्चभौतिकत्वेऽपि द्रव्याणामाविर्भूतो भवति, नतु सर्वे; यथा— शालिषु तोयकृतं मधुरत्वं, न तु गौरवमित्युक्तं सूत्रस्थाने।

उत्सर्गतः सस्नेहस्यापि पित्तस्य कदाचित्तेजोभूयस्त्वेन रूक्षत्वमपि भवति जीर्णज्वरे, तेन स्निग्धशीतं सर्पिर्हितं तत्र भवतीति न दोषः। अत एवोक्तं चिकित्सिते— “रूक्षं तेजो ज्वरकरं” (चि.अ.३) इत्यादि। न च वाच्यं— यत्— सांसिद्धिकमपि चेत् पित्तस्य स्निग्धत्वमपैति तदा वातस्यापि रौक्ष्यं किमिति नापैतीति; यतो विचित्रा एव हि गुणा अप्रतिक्षेपणीयाः प्रतिक्षेपणीयाश्च; तत्र ये न सर्वदा दृश्यन्ते वातशैत्य-पित्तस्नेहादयः, त एव प्रतिक्षेपणीयाः; नान्ये, तथैव दृष्टत्वात्। तुल्यगुणमिति सर्वथा तुल्यगुणम्। ननु संस्कारात् कफहन्तृत्वे संस्कारेणैव कफो हन्यते, कस्तत्र सर्पिषो व्यापार इत्याह— नान्य इत्यादि। नान्य इति तैलादिः। संस्कारमनुवर्तत इति संस्कारकद्रव्यकार्यं करोति। एतेनैतद्दर्शयति— यत्— तेनैव द्रव्येण यादृङ्मानेन घृतं संस्क्रियते, अन्यत्र तैलादिस्नेहस्तथैव यदि संस्क्रियते तदा घृतमेवान्यस्नेहेभ्यो विशेषेण संस्कारकद्रव्यकार्यं करोति; अयं घृतप्रभावोऽधिकः, तेन संस्कारात् कफविजये घृतमेव कर्तव्यमित्यर्थः। प्रपञ्चितश्चायमर्थः स्नेहाध्याये॥३७-४०॥

गद्योक्तो यः पुनः श्लोकैरर्थः समनुगीयते।
तद्व्यक्तिव्यवसायार्थं द्विरुक्तं तन्न गर्ह्यते॥४१॥

ननु स्नेहाद्वातं शमयतीत्यादिग्रन्थो गद्येनैवोक्तः, तत् किमर्थं श्लोकेनोच्यत इत्याह— गद्योक्तो य इत्यादि। तद्व्यक्तिव्यवसायार्थमित्यत्र तद्व्यक्तिर्गद्योक्तार्थस्य व्यक्तिः प्रसन्नतेति यावत्, व्यवसायः अध्यवसायो ग्रहणमित्यर्थः; यस्मात् पूर्वोक्तार्थस्पष्टीकरणार्थं पुनः श्लोकेनाभिधानं, तस्मात् प्रयोजनान्तरयुक्तत्वान्न पुनरुक्तिदोष इति भावः। गद्योक्तापेक्षया श्लोकाभिधानं सुखग्रहणं भवतीति लोकसिद्धमेव। अत्र च गद्योक्त इत्युपलक्षणं, तेन श्लोकोक्तोऽपि श्लोकेनोच्यत इति बोद्धव्यं; यथा— आरग्वधीये। एवं गद्योक्तोऽपि गद्येनेति बोद्धव्यं; यथा— प्रपञ्चेन कारणाद्यभिधायोक्तम्— “एवमसात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्च” (सू.अ.११) इत्यादि। तथा श्लोकेनोक्तोऽपि गद्येनोच्यते, यथा— “ब्रह्मणा हि यथा प्रोक्तं” (सू.अ.१) इत्यादि श्लोकेनाभिधाय आद्येऽध्याये पुनरन्यत्रोक्तं— “यमायुर्वेदमश्विनौ मह्यं प्रायच्छेताम्” (चि.अ.१.पा.४) इत्यादि। अत्र

श्लोकाभिधानमेव सुखग्रहणार्थमिति ज्ञेयम्। किंवा, तद्व्यक्तिव्यवसायार्थमिति यथायोग्यतया बोद्धव्यम्। तेन, प्रपञ्चाभिधानमर्थव्यक्त्यर्थं बोद्धव्यं, सङ्क्षेपाभिधानं तु व्यवसायार्थं; तेन गद्यश्लोकाभिधानाभ्यां व्यक्तिव्यवसायौ क्रियेते। तत्र प्रपञ्चाभिधानेऽर्थस्य व्यक्तिः स्फुटैवेति, सङ्क्षेपाभिधानं तु प्रपञ्चापेक्षया सुखग्रहणं भवति॥४१॥

तत्र श्लोकाः—

त्रिविधं नामपर्यायैर्हेतुं पञ्चविधं गदम्।

गदलक्षणपर्यायान् व्याधेः पञ्चविधं ग्रहम्॥४२॥

ज्वरमष्टविधं तस्य प्रकृष्टासन्नकारणम्।

पूर्वरूपं च रूपं च भेषजं सङ्ग्रहेण च॥४३॥

व्याजहार ज्वरस्याग्रे निदाने विगतज्वरः।

भगवानग्निवेशाय प्रणताय पुनर्वसुः॥४४॥

सङ्ग्रहे यद्यपि हेतुपर्यायाः पूर्वमुक्तास्तदनु हेतुत्रैविध्यं, तथाऽपि छन्दोऽनुरोधेन तद्विपर्ययकथनम्। नामरूपा योगरूढाः पर्याया नामपर्यायाः। पञ्चविधं गदमिति आग्नेयादिभेदेन। 'गदपर्यायनामानि' इति पाठे यल्लिङ्गपर्यायाभिधानं तस्य व्याधिपञ्चविधग्रहशब्देनैव 'तस्योपलब्धिः' इत्यादिग्रन्थान्तर्निविष्टसकलार्थस्य गृहीतत्वाद्ग्रहणम्; 'गदलक्षणपर्यायान्' इति पाठे तु पूर्वपक्षो नास्त्येव, पाठस्तु नायमतिप्रसिद्धः। प्रकृष्टासन्नकारणं ज्वरस्य रूक्षादि प्रकृष्टम्, आसन्नं वातादि; तथा प्रकृष्टं रुद्रकोपः, आसन्नं तु रूक्षादि। यद्यपि रूपात् पश्चात् पूर्वरूपमुक्तं, तथाऽपि छन्दोनुरोधात् पूर्वरूपमग्रे कृतं; किंवा, वातादिजविशिष्टज्वरलक्षणानामव्यक्तानां विशिष्टज्वरपूर्वरूपतां सूचयता पूर्वरूपं पूर्वंकृतं; वातादिज्वरलक्षणानि ह्यव्यक्तानि पूर्वरूपाणि भवन्ति॥४२-४४॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते निदानस्थाने ज्वरनिदानं नाम प्रथमोऽध्यायः॥१॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां निदानस्थाने ज्वरनिदानं नाम प्रथमोऽध्यायः॥१॥

द्वितीयोऽध्यायः।

अथातो रक्तपित्तनिदानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

पित्तं यथाभूतं लोहितपित्तमिति सञ्ज्ञां लभते, तद् व्याख्यास्यामः॥३॥

आद्योत्पत्तौ ज्वरसन्तापाद्रक्तपित्तोत्पत्तेर्ज्वरमनु रक्तपित्तनिदानमुच्यते। पित्तं यथाभूतमित्यादिना पित्तमेवावस्थावशाल्लोहितपित्तमित्युच्यत इति दर्शयति, नतु रक्तं च पित्तं च रक्तपित्तमिति॥१-३॥

यदा जन्तुर्यवकोद्दालककोरदूषप्रायाण्यन्नानि भुङ्क्ते, भृशोष्णतीक्ष्णमपि चान्यदन्नजातं निष्पावमाषकुलत्थसूपक्षारोपसंहितं, दधिदधिमण्डोदश्वित्कट्वराम्लकाञ्जिकोपसेकं वा, वाराहमाहिषाविकमात्स्यगव्यपिशितं, पिण्याकपिण्डालुशुष्कशाकोपहितं, मूलकसर्षपलशुनकरञ्ज-शिग्रुमधुशिग्रु(खडयूष)भूस्तृणसुमुखसुरसकुठेरकगण्डीरकालमालकपर्णासक्षवकफणिज्झकोपदंशं, सुरासौवीरतुषोदकमैरेयमेदकमधूलकशुक्तकुवलबदराम्लप्रायानुपानं वा, पिष्टान्नोत्तरभूयिष्ठम्; उष्णाभितप्तो वाऽतिमात्रमतिवेलं वाऽऽमं पयः पिबति, पयसा समश्नाति रौहिणीकं, काणकपोतं वा सर्षपतैलक्षारसिद्धं, कुलत्थपिण्याकजाम्बवलकुचपक्वैः शौक्तिकैर्वा सह क्षीरं पिबत्युष्णाभितप्तः; तस्यैवमाचरतः पित्तं प्रकोपमापद्यते, लोहितं च स्वप्रमाणमतिवर्तते। तस्मिन् प्रमाणातिवृत्ते पित्तं प्रकुपितं शरीरमनुसर्पद्यदेव यकृत्प्लीहप्रभवाणां लोहितवहानां च स्रोतसां लोहिताभिष्यन्दगुरूणि मुखान्यासाद्य प्रतिरुन्ध्यात् तदेव लोहितं दूषयति॥४॥

यदा जन्तुरित्यादिना निदानमुच्यते। यवकः व्रीहिविशेषः; उद्दालः वनकोद्रवः; कोरदूषः यद्यप्यन्नपाने पित्तहर उक्तस्तथाऽप्यस्य निष्पावादियुक्तस्य संयोगमहिम्ना रक्तपित्तनिदानत्वं ज्ञेयम्, एवमन्यत्रापि

रक्तपित्तनिदानत्वेनेहोक्तक्षीरादौ ज्ञेयम्। दधिमण्डः मस्तु, उदश्वित् अर्धजलं तक्रं, कद्वरं निर्जलं, किंवा अम्लं तक्रम्। मधुशिग्रुः स्वल्पशोभाञ्जनकः। खडयूषः रागकर्पूर इति ख्यातः। सुमुखादयः फणिज्झकान्ताः पर्णासभेदाः। उपदंशमिति मूलकादीनि खादयित्वा यावकाद्यन्नं भुङ्क्ते इत्यर्थः। मधूलकः गोधूमविशेषः। शुक्तः सन्धानविशेषः। पिष्टान्नमुत्तरत्र भोजनस्य भूयिष्ठं यत्र तत् पिष्टान्नोत्तरभूयिष्ठम्। अतिवेलमिति पुनः पुनः। रौहिणीकं रोहिणीशाकम्। शौक्तिकैरिति बदरीफलैः। आममित्युत्तरेण सम्बध्यते। स्वप्रमाणमतिवर्तते प्रवर्धत इत्यर्थः। यदेवेत्यनेन एवमपि प्रकुपितस्य पित्तस्य य एवांश उक्तसम्प्राप्तिमान् भवति स एव रक्तं दूषयति नान्य इति दर्शयति। लोहिताभिष्यन्दगुरूणि प्रवृद्धलोहितस्यन्देन गुरूणि उत्सन्नानि विवृतानीति यावत्। प्रतिरुन्ध्यात् 'वृद्धेन शोणितेन' इति शेषः; 'प्रतिपद्यते' इति पाठपक्षे तु 'शोणितम्' इति शेषः, तेन शोणितं प्रतिपद्यत इत्यर्थः। यकृत्प्लीहप्रभवाणामित्यस्य विशेषणं— लोहितवहानामिति। चकारोऽवधारणे। वक्ष्यति च रक्तपित्तचिकित्सिते— "प्लीहानं च यकृच्चैव तदधिष्ठाय वर्तते। स्रोतांसि रक्तवाहीनि तन्मूलानि हि देहिनाम्" (चि.अ.४) इति॥४॥

संसर्गाल्लोहितप्रदूषणाल्लोहितगन्धवर्णानुविधानाच्च पित्तं लोहितपित्तमित्याचक्षते॥५॥

एवं रक्तदूषके पित्ते यथा रक्तपित्तसञ्ज्ञा भवति, तदाह— संसर्गादित्यादि। संसर्गात् लोहितसम्बन्धात्। लोहितगन्धवर्णानुविधानादिति लोहितसदृशगन्धवर्णयुक्तत्वात्। एतेन, 'रक्तयुक्तं पित्तं रक्तपित्तम्' इति प्रथमा निरुक्तिः, 'रक्ते दूष्ये पित्तम्' इति द्वितीया, 'रक्तवत् पित्तं रक्तपित्तम्' इति तृतीया दर्श्यते। उक्तं च चिकित्सिते— "संसर्गाद्दूषणात्तत्तु सामान्याद्गन्धवर्णयोः। रक्तस्य पित्तमाख्यातं रक्तपित्तं मनीषिभिः"— (चि.अ.४) इति। एतदेव च रक्तपित्तस्य सामान्यलक्षणं— यद् — रक्तगन्धवर्णानुविधानं; विशेषलक्षणं तु ऊर्ध्वादिभेदेन कफादिसम्बन्धादेवेह बोद्धव्यं; चिकित्सितेऽपि 'सान्द्रं सपाण्डु' (चि.अ.४) इत्यादिना लक्षणं वक्ष्यति॥५॥

तस्येमानि पूर्वरूपाणि भवन्ति; तद्यथा— अनन्नाभिलाषः, भुक्तस्य विदाहः, शुक्ताम्लगन्धरस उद्गारः, छर्देरभीक्ष्णमागमनं, छर्दितस्य बीभत्सता, स्वरभेदो, गात्राणां सदनं, परिदाहः, मुखाद्धूमागम इव, लोहलोहितमत्स्यामगन्धित्वमिव चास्यस्य, रक्तहरितहारिद्रत्वमङ्गावयवशकृन्मूत्रस्वेदलाला-सिङ्घाणकास्यकर्णमलपिडकोलिकापिडकानाम्, अङ्गवेदना, लोहितनीलपीतश्यावानामर्चिष्मतां च रूपाणां स्वप्ने दर्शनमभीक्ष्णमिति (लोहितपित्तपूर्वरूपाणि भवन्ति)॥६॥

पूर्वरूपे छर्दितस्य बीभत्सता वैवर्ण्यवैगन्ध्यादियोगात्। पिडकोलिका नेत्रमलः। अङ्गवेदना अङ्गमर्दः॥६॥

उपद्रवास्तु खलु दौर्बल्यारोचकाविपाकश्वासकासज्वरातीसारशोफशोषपाण्डुरोगाः स्वरभेदश्च॥७॥

व्याधेरसाध्यत्वस्य धर्मस्य ख्यापकान् लिङ्गविशेषानुपद्रवाख्यानाह— उपद्रवास्त्वित्यादि। एतेनोपद्रवस्य लिङ्गभूतत्वेन निदानपञ्चकानतिरिक्तत्वम्। रक्तपित्ते चैते उपद्रवाः प्रायोभावित्वेन नियता इत्यभिधीयन्ते; ज्वरे तूपद्रवा नियता न सन्ति, तेन तत्र नोक्ताः; एवं गुल्मादावपि प्रायोभावित्वेनोपद्रवकथनं व्याख्येयम्। स्वरभेदश्चेति पृथक्पाठेन स्वरभेदस्य प्रायोभावित्वमाह॥७॥

मार्गौ पुनरस्य द्वौ ऊर्ध्वं, चाधश्च। तद्बहुश्लेष्मणि शरीरे श्लेष्मसंसर्गादूर्ध्वं प्रतिपद्यमानं कर्णनासिकानेत्रास्येभ्यः प्रच्यवते, बहुवाते तु शरीरे वातसंसर्गादधः प्रतिपद्यमानं मूत्रपुरीषमार्गाभ्यां प्रच्यवते, बहुश्लेष्मवाते तु शरीरे श्लेष्मवातसंसर्गाद्द्वावपि मार्गौ प्रतिपद्यते, तौ मार्गौ प्रतिपद्यमानं सर्वेभ्य एव यथोक्तेभ्यः खेभ्यः प्रच्यवते शरीरस्य॥८॥

तत्र यदूर्ध्वभागं तत् साध्यं, विरेचनोपक्रमणीयत्वाद्बह्वौषधत्वाच्च; यदधोभागं तद्याप्यं, वमनोपक्रमणीयत्वादल्पौषधत्वाच्च; यदुभयभागं तदसाध्यं, वमनविरेचनायोगित्वादनौषधत्वाच्चेति॥९॥

साध्यत्वादिविशेषस्य तथा कफादिसम्बन्धस्य च मार्गविशेषकृतस्य प्रतिपादनार्थं मार्गमाह— मार्गावित्यादि। बहुश्लेष्मणि शरीरे श्लेष्मसंसर्गादिति वचनेन ऊर्ध्वगे रक्तपित्ते श्लेष्मसम्बन्धः कारणान्तरचितेनापि श्लेष्मणा भवतीति दर्शयति। यत्तु रक्तपित्तनिदानजन्यत्वं कफस्य, तन्नावश्यं भवति; अत एव "स्निग्धोष्णमुष्णरूक्षं च रक्तपित्तस्य कारणम्। अधोगस्योत्तरं प्रायः" (चि.अ.४) इत्यादौ प्रायःशब्दं कृतवान्। एवं 'बहुवाते तु' इत्यत्रापि व्याख्येयम्। खेभ्य इति रन्ध्रेभ्यः। विरेचनोपक्रमणीयत्वादिति एतच्च श्लोकेन स्वयमेव व्याकरिष्यति॥८-९॥

रक्तपित्तप्रकोपस्तु खलु पुरा दक्षयज्ञोद्ध्वंसे रुद्रकोपामर्षाग्निना प्राणिनां परिगत-शरीरप्राणानामभवज्ज्वरमनु॥१०॥

रक्तपित्तस्याप्याग्नेयत्वप्रतिपादनार्थं पूर्वोत्पत्तिमाह— रक्तेत्यादि। कोपयुक्तः अमर्षः, अमर्षः अभिनिवेशः; अन्यत्रापि च कोपामर्षयोर्भेद उक्तः; यथा— "अमर्षसंरम्भविनम्रभावाः सन्तर्जनाभिद्रवणौष्ण्यरोषाः" (चि.अ.९) इति॥१०॥

तस्याशुकारिणो दावाग्नेरिवापतितस्यात्ययिकस्याशु प्रशान्त्यै प्रयतितव्यं मात्रां देशं कालं चाभिसमीक्ष्य सन्तर्पणेनापतर्पणेन वा मृदुमधुरशिशिरतिक्तकषायैरभ्यवहार्यैः प्रदेहपरिषेकावगाहसंस्पर्शनैर्वमनाद्यैर्वा तत्रावहितेनेति॥११॥

सन्तर्पणेनेति अधोगस्य, अपतर्पणेनेति ऊर्ध्वगस्य। संस्पृश्यत इति संस्पर्शनं मुक्तादि॥११॥

भवन्ति चात्र—

साध्यं लोहितपित्तं तद्यदूर्ध्वं प्रतिपद्यते।

विरेचनस्य योगित्वाद्बहुत्वाद्भेषजस्य च॥१२॥

विरेचनं तु पित्तस्य जयार्थे परमौषधम्।
यश्च तत्रान्वयः श्लेष्मा तस्य चानधमं स्मृतम्॥१३॥
भवेद्योगावहं तत्र मधुरं चैव भेषजम्।
तस्मात् साध्यं मतं रक्तं यदूर्ध्वं प्रतिपद्यते॥१४॥

ऊर्ध्वगस्य विरेचनयोग्यतां विवेचयति— विरेचनमित्यादि। ऊर्ध्वगे रक्तपित्ते पित्तं प्रधानमनुबन्धश्च श्लेष्मा, रक्तपित्ताख्यव्याधिर्जेतव्यः; तत्र पित्तस्य जयार्थे विरेचनं तावत् परमौषधं, "विरेचनं पित्तहराणाम्" (सू.अ.२५) इति वचनादिति भावः, यश्च तत्रान्वयः अनुबन्धस्वरूपः श्लेष्मा, तस्य च जयार्थे अनधममधमं न भवति मध्यममित्यर्थः; वचनं हि— "पित्तं वा कफपित्तं वा पित्ताशयगतं हरेत्। स्रंसनं" (चि.अ.३) इति। योगावहं च तत्रेति तत्रोर्ध्वगे रक्तपित्ते तद्विरेचनं योगावहं भवति, प्रतिमार्गहरणरूपत्वादित्यर्थः; अनेन च व्याधिप्रत्यनीकत्वमुच्यते। एवं व्याधिप्रधानकारणे पित्ते प्रधानशमक(न)त्वात्, तथा मध्यकुपिते च कफे मध्यभेषजत्वात्, प्रतिमार्गहरणरूपतया च व्याधिप्रत्यनीकत्वाद् विरेचनमूर्ध्वगे साधु भेषजम्। मधुरं चैव भेषजमित्यत्र एवशब्दोऽप्यर्थः; तेन, तिक्तकषायौ तावद्भेषजे भवत एव पित्तकफप्रत्यनीकत्वात्, मधुरमपि लङ्घनादिना कफे जिते भेषजं भवतीत्यर्थः॥१२-१४॥

रक्तं तु यदधोभागं तद्याप्यमिति निश्चितम्।
वमनस्याल्पयोगित्वादल्पत्वाद्भेषजस्य च॥१५॥
वमनं हि न पित्तस्य हरणे श्रेष्ठमुच्यते।
यश्च तत्रान्वयो वायुस्तच्छान्तौ चावरं स्मृतम्॥१६॥
तच्चायोगावहं तत्र कषायं तिक्तकानि च।
तस्माद्याप्यं समाख्यातं यदुक्तमनुलोमगम्॥१७॥

अधोगे वमनस्यायोगितां विवेचयति— वमनं हीत्यादि। पित्तस्य रक्तपित्तमूलस्य हरणे न श्रेष्ठं वमनं; वमनं हि कफानुगं पित्तं हरति, न पित्ते प्राधान्येन क्रियते। तच्छान्तौ चावरमिति वातहरणे त्वप्रधानमेव वमनं, वातहरणेऽयुक्तत्वादेव वमनस्य। तच्चायोगावहमिति तद्वमनं प्रतिमार्गहरणरूपतया योगावहमपि सत् पित्तवातयोरुक्तेन न्यायेनायौगिकत्वेनायोगावहमित्यर्थः। कषायं तिक्तकानि च अयोगावहानीति योजना, कषायतिक्तयोर्वातप्रतिकूलत्वादित्यर्थः; एवं मधुरमेकमवशिष्टमधोगे रक्तपित्ते भेषजं भवति; तेनाल्पौषधत्वं सिद्धम्। अम्ललवणकटुकानां तु पित्तविरुद्धत्वेन रक्तपित्ते प्रसक्तिरपि नास्तीति भावः॥ १५-१७॥

रक्तपित्तं तु यन्मार्गौ द्वावपि प्रतिपद्यते।
असाध्यमिति तज्ज्ञेयं पूर्वोक्तादेव कारणात्॥ १८॥
नहि संशोधनं किञ्चिदस्त्यस्य प्रतिमार्गगम्।
प्रतिमार्गं च हरणं रक्तपित्ते विधीयते॥ १९॥
एवमेवोपशमनं सर्वशो नास्य विद्यते।
संसृष्टेषु च दोषेषु सर्वजिच्छमनं मतम्॥ २०॥
इत्युक्तं त्रिविधोदर्कं रक्तं मार्गविशेषतः।

पूर्वोक्तादिति वमनविरेचनायौगिकत्वादनौषधत्वाच्च। वमनविरेचनायौगिकत्वं व्युत्पादयति— न हीत्यादि। संशोधनमिति सामान्यवचनेन बस्तिशिरोविरेचनयोरपि प्रतिक्षेपं सूचयति। यदधोभागं विरेचनं तदधोभागं रक्तपित्तं कोपयति, यदूर्ध्वभागं वमनं तदूर्ध्वभागं रक्तपित्तं कोपयति; अतो नास्त्युभयमार्गे रक्तपित्ते शोधनम्। अथानुगुणमेव शोधनं कफच्छर्द्यामिव वमनं रक्तपित्ते भवतीत्याह — प्रतिमार्गं चेत्यादि। रक्तपित्तव्याधिमहिम्ना प्रतिमार्गहरणमेव भेषजं भवति नान्यदित्यर्थः। अथात्रैवं

संशोधनं मा भवतु भेषजं, संशमनं भेषजं भवत्वित्याह— एवमेवेत्यादि। उभयमार्गानुसारित्वेन वातकफानुबन्धत्वाद् यथा यौगिकं संशोधनं नास्ति तथोपशमनमपि युगपद्वातकफशमकत्वाभावान्नास्तीत्यर्थः। सर्वशो न विद्यत इति किञ्चिदपि न विद्यत इति। एतदेवोपशमनभेषजाभावं स्फोटयति— संसृष्टेष्वित्यादि। संसृष्टेष्विति सन्निपातेष्विति बोद्धव्यम्। सर्वजिदिति अनुबन्धभूतवातकफमूलभूतपित्तजित्; मधुरं हि कफकारि, तिक्तकषायौ तु वातकरौ, शेषास्तु पित्तकरा एवेति भावः। किंवा, एवमेवेति विना भेषजं नोपशमनं रक्तपित्तस्य भवतीति योजनीयम्। त्रिविधोदर्कमिति त्रिविधायतीयफलं, तच्च साध्यत्व याप्यत्व प्रत्याख्येयत्वरूपम्॥१८-२०॥—

एभ्यस्तु खलु हेतुभ्यः किञ्चित्साध्यं न सिध्यति॥२१॥

प्रेष्योपकरणाभावाद्दौरात्म्याद्वैद्यदोषतः।

अकर्मतश्च साध्यत्वं कश्चिद्रोगोऽतिवर्तते॥२२॥

तत्रासाध्यत्वमेकं स्यात् साध्ययाप्यपरिक्रमात्।

असाध्यतोपोद्घातेनेतरव्याधिसाधारणान्यप्यसाध्यतापत्तिकारणान्याह— एभ्यस्त्वित्यादि। उपकरणाभावादिति भेषजाभावात्। दौरात्म्यादिति आतुरस्यानात्मवत्त्वात्। अकर्मत इत्यत्र कुत्सायां नञ्, अपुत्र इति यथा; तेन, अकर्मतः असम्यक्चिकित्सात इत्यर्थः; किंवा अकर्मत इति अधर्मादसाध्यव्याधिजनकात्। कश्चिदितिवचनेन अचिकित्सया न सर्वे तिलालकमशकादयोऽवश्यमसाध्या भवन्तीति दर्शयति, तेषामचिकित्सायामपि साध्यत्वात्। प्रेष्यादिदोषेण प्रकृते रक्तपित्तेऽसाध्यत्वं दर्शयन्नाह— तत्रेत्यादि। तत्रेति रक्तपित्ते। असाध्यत्वमेकमिति असाध्यत्वमेव परं स्यात्। साध्ययाप्यपरिक्रमादिति साध्ययाप्यमार्गाभ्यां परिक्रमादुभयमार्गानुसारित्वादित्यर्थः; किंवा, साध्ययाप्ययोः परिक्रमः साध्ययाप्यपरिक्रमः, तस्मात्; तत्र साध्यपरिक्रमो याप्यमार्गगामित्वम्, एवं याप्यस्य परिक्रमोऽसाध्यमार्गगामित्वम्। अयं च

मार्गपरिक्रमः मार्गपरित्यागादपरित्यागाद्वाऽसाध्य एव; अपरित्यागे तावदुभयमार्गत्वेनैवासाध्यत्वं; परित्यागेऽसाध्यत्वमुक्तं, वक्ष्यति हि चिकित्सिते— "मार्गान्मार्गं चरेद्यद्वा तच्च रक्तमसिद्धिमत्" (चि.अ.४) इति। किंवा, साध्ययाप्यपरिक्रमादिति साध्यस्य याप्यत्वेन परिक्रमादित्यर्थः॥२१-२२॥—

रक्तपित्तस्य विज्ञानमिदं तस्योपदिश्यते॥२३॥

यत् कृष्णमथवा नीलं यद्वा शक्रधनुष्प्रभम्।

रक्तपित्तमसाध्यं तद्वाससो रञ्जनं च यत्॥२४॥

भृशं पूत्यतिमात्रं च सर्वोपद्रववच्च यत्।

बलमांसक्षये यच्च तच्च रक्तमसिद्धिमत्॥२५॥

येन चोपहतो रक्तं रक्तपित्तेन मानवः।

पश्येद्दृश्यं वियच्चापि तच्चासाध्यं न संशयः॥२६॥

ऊर्ध्वगस्यापि रक्तपित्तस्य लाक्षणिकीमसाध्यतामाह— रक्तपित्तस्येत्यादि। एते च कृष्णादयो वर्णा गम्भीरधातुसम्बन्धाद्भवन्ति, ततश्चासाध्यत्वं युक्तमेव। वाससो रञ्जनं च यदिति प्रक्षालितमपि सद्वासो रञ्जयति, न क्षालनेनापैतीति बोद्धव्यम्; अन्यथा 'सर्वमेव रक्तं वाससो रञ्जनं भवति' इति वचनमनर्थकं स्यात्। किंवा 'अरञ्जनम्' इति पाठः; तेन, रक्तस्य वाससो रञ्जकस्यारञ्जनमेव विकृतिः। भृशं पूतीति धात्वन्तरसम्बन्धादतिदुर्गन्धि। सर्वोपद्रववदिति उक्तदौर्बल्याद्युपद्रवयुक्तम्। दृश्यं घटपटादि। वियद् आकाशम्। रक्तं रक्तवर्णमित्यर्थः। यद्यप्याकाशमपि दृश्यं भवति मीमांसकनये, तथाऽपि प्राय आकाशे एवासाध्यरक्तपित्ते रक्तत्वं प्रतीयत इति न पुनरुक्तम्॥२३-२६॥

तत्रासाध्यं परित्याज्यं, याप्यं यत्नेन यापयेत्।

साध्यं चावहितः सिद्धैर्भेषजैः साधयेद्भिषक्॥२७॥

यत्नेनेति वचनाद्याप्ययापनं यत्नं विना न भवतीति दर्शयति॥२७॥

तत्र श्लोकौ—

कारणं नामनिर्वृत्तिं पूर्वरूपाण्युपद्रवान्।

मार्गौ दोषानुबन्धं च साध्यत्वं न च हेतुमत्॥२८॥

निदाने रक्तपित्तस्य व्याजहार पुनर्वसुः।

वीतमोहरजोदोषलोभमानमदस्पृहः॥२९॥

कारणमित्यादि सङ्ग्रहः। नामनिर्वृत्तिमिति लोहितसंसर्गादित्यादिना। न चेति न च साध्यत्वम्; अनेन च याप्यमपि सङ्गृहीतम्, असाध्यभेदो हि याप्यम्। हेतुमदिति विरेचनस्य यौगिकत्वादिहेतुवर्णनं सङ्गृह्णाति। वीता अपगता मोहादयो यस्य स तथा॥२८-२९॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते निदानस्थाने रक्तपित्तनिदानं नाम द्वितीयोऽध्यायः॥२॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां निदानस्थाने रक्तपित्तनिदानं नाम द्वितीयोऽध्यायः॥२॥

तृतीयोऽध्यायः।

अथातो गुल्मनिदानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

इह खलु पञ्च गुल्मा भवन्ति; तद्यथा— वातगुल्मः, पित्तगुल्मः, श्लेष्मगुल्मो, निचयगुल्मः, शोणितगुल्म इति॥३॥

दक्षाध्वरोद्ध्वंसे रक्तपित्तमनु गुल्म उत्पन्न इति रक्तपित्तमनु गुल्मनिदानम्। इह पञ्चेतिवचनाच्चिकित्सितेऽधिकान् गुल्मान् सूचयति; वक्ष्यति हि— "व्यामिश्रलिङ्गानपरांस्तु गुल्मांस्त्रीनादिशेदौषधकल्पनार्थम्" (चि.अ.५) इति। निचयः सन्निपातः, तत्कृतो गुल्मो निचयगुल्मः। इह प्रत्येकवातादिगुल्मक्रियामेलकादेव द्वन्द्वजगुल्माः साध्यन्त इति कृत्वा न पृथगुक्ताः। सन्निपातगुल्मस्तु वातादिगुल्मक्रियामेलकेन साध्यो न भवत्येव वातादिसंयोगमहिम्ना; तेन, अतिरिक्तासाध्यत्वयोगान्निचयगुल्मः पृथगुक्तः। एतदेव गुल्मेऽस्मिन्नसाध्यत्वं प्रतिपादयितुं सन्निपातशब्दं साध्यज्वरादिसन्निपातेऽपि वर्तमानं परित्यज्य निचयशब्दः कृतः; अत्यर्थं हि असाध्यरूपश्चायं निचयः॥१-३॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच— कथमिह भगवन् पञ्चानां गुल्मानां विशेषमभिजानीमहे; नह्यविशेषविद्रोगाणामौषधविदपि भिषक् प्रशमनसमर्थो भवतीति॥४॥

तमुवाच भगवानात्रेयः— समुत्थानपूर्वरूपलिङ्गवेदनोपशयविशेषेभ्यो विशेषविज्ञानं गुल्मानां भवत्यन्येषां च रोगाणामग्निवेश! तत्तु खलु गुल्मेषूच्यमानं निबोध॥५॥

समुत्थानेत्यादौ लिङ्गान्तर्निविष्टा वेदना पृथगुच्यते, गुल्मादिष्वन्तर्गतेषु वेदनाप्रधानविकारेषु प्रायो वेदनयैव विशेषावधारणं भवतीति दर्शयितुम्। सम्प्राप्तेस्त्विहाकथनं गुल्मविशेषागमकत्वेनैव बोद्धव्यं, गुल्मविज्ञानं चेहाधिकृतं; सङ्ख्यादिभेदभिन्ना तु सामान्यसम्प्राप्तिः सर्वरोगनिदानप्रस्ताव एवोक्तेति भावः। बलकालभिन्ना तु सम्प्राप्तिर्यद्यपि वातिकत्वादिविशेषं गमयत्यपि, तथाऽप्यल्पत्वात्तथा लिङ्गगृहीतत्वाच्च सा नाद्रियते। दिवसान्तजरणान्तादिबलसम्प्राप्तिर्हि वातादेर्लिङ्गमध्य एव पठ्यते तत्र तत्र; तेन लिङ्गग्रहणेनैव तत् सुस्थम्। प्राग्रूपं च यद्यपि पृथग्वातादिगुल्मगमकं साक्षान्न पठितं, तथाऽपि विशेषलिङ्गाव्यक्ततारूपं विशिष्टं प्राग्रूपं विशेषलिङ्गकथनेनैवोक्तमेव; तेन, वातादिगुल्मविशेषगमकनिदानादिमध्ये पूर्वरूपपाठो न्याय्य एव; किंवा, पूर्वरूपविशेषोऽप्यत्र रक्तपित्तादिरोगान्तरापेक्षया सामान्योक्तोऽपि विशेषो ज्ञेयः॥४-५॥

यदा पुरुषो वातलो विशेषेण ज्वरवमनविरेचनातीसाराणामन्यतमेन कर्शनेन कर्शितो वातलमाहारमाहरति, शीतं वा विशेषेणातिमात्रम्, अस्नेहपूर्वे वा वमनविरेचने पिबति, अनुदीर्णां वा छर्दिमुदीरयति, उदीर्णान् वातमूत्रपुरीषवेगान्निरुणद्धि, अत्यशितो वा पिबति नवोदकमतिमात्रम्, अतिसङ्क्षोभिणा वा यानेन याति, अतिव्यवायव्यायाममद्यशोकरुचिर्वा, अभिघातमृच्छति वा, विषमासनशयनस्थानचङ्क्रमणसेवी वा भवति, अन्यद्वा किञ्चिदेवंविधं विषममतिमात्रं व्यायामजातमारभते, तस्यापचाराद्वातः प्रकोपमापद्यते॥६॥

वातलो विशेषेणेति वचनात् पित्तलादेरपि यथोक्तमाचरतो वातगुल्मो भवति, वातलस्य त्वत्यर्थमिति दर्शयति। शीतं वा विशेषेणेति अत्यर्थशीतमित्यर्थः। अतिमात्रमिति च्छेदः। अतिव्यवायव्यायामादिरुचिर्वा ‘भवति’ इति शेषः; व्यवायादिरुच्या व्यवायाद्याचरणं लक्षयति॥६॥

स प्रकुपितो वायुर्महास्रोतोऽनुप्रविश्य रौक्ष्यात् कठिनीभूतमाप्लुत्य पिण्डितोऽवस्थानं करोति हृदि बस्तौ पार्श्वयोर्नाभ्यां वा; स शूलमुपजनयति ग्रन्थींश्चानेकविधान्, पिण्डितश्चावतिष्ठते, स पिण्डितत्वाद् 'गुल्म' इत्यभिधीयते; स मुहुराधमति, मुहुरल्पत्वमापद्यते; अनियतविपुलाणुवेदनश्च भवति चलत्वाद्वायोः, मुहुः पिपीलिकासम्प्रचार इवाङ्गेषु, तोदभेदस्फुरणायामसङ्कोचसुप्तिहर्षप्रलयोदयबहुलः; तदातुरः सूच्येव शङ्कुनेव चाभिसंविद्धमात्मानं मन्यते, अपि च दिवसान्ते ज्वर्यते, शुष्यति चास्यास्यम्, उच्छ्वासश्चोपरुध्यते, हृष्यन्ति चास्य रोमाणि वेदनायाः प्रादुर्भावे; प्लीहाटोपान्त्रकूजनाविपाकोदावर्ताङ्गमर्दमन्याशिरःशङ्खशूलब्रध्नरोगाश्चैनमुपद्रवन्ति; कृष्णारुणपरुष-त्वङ्नखनयनवदनमूत्रपुरीषश्च भवति, निदानोक्तानि चास्य नोपशेरते, विपरीतानि चोपशेरत इति वातगुल्मः॥७॥

रौक्ष्यात् कठिनीभूतमिति महास्रोतोविशेषणं; तच्च प्रकुपितस्य वायो रौक्ष्येण तथोक्तज्वरकर्शनादिहेतुकृताच्च रौक्ष्यात् कोष्ठस्य कठिनत्वमुपपन्नम्। आप्लुत्येति व्याप्य, कोष्ठमेव। अन्यत्राप्युक्तम्— "आप्लुतं मारुतेनेह शरीरं यस्य केवलम्" (इं.आ.१०) इति; आप्लुतं व्याप्तमित्यर्थः। यदा तु 'रौक्ष्यात् कठिनीभूत' इति पाठस्तदा वातविशेषणं, वातस्य कठिनत्वमत्यर्थं प्रकोपेण घनत्वमेव बोद्धव्यम्। पिण्डित इति कुण्डलीभूतः। नाभ्यां वेति च्छेदः। पिण्डितश्चेति द्वितीयपिण्डितशब्देन मांसाद्युत्तुण्डनेन गुल्मप्रदेशस्यापि पिण्डितत्वमुच्यते; पूर्वेण पिण्डितशब्देन तु वायोः पिण्डितत्वमिति न पौनरुक्त्यम्। अनेकविधानिति च्छेदः। ग्रन्थींश्चानेकविधानिति दीर्घवृत्तस्थूलादिभेदेन भिन्नान्। पिण्डितत्वाद् 'गुल्म' इत्युच्यते इत्यनेन लतादिगुल्मसादृश्यनिबन्धनां गुल्मसञ्ज्ञां दर्शयति। आधमति विस्तारीभवति। अनियतविपुलाणुवेदन इति कदाचिद्विपुलवेदनः कदाचिदल्पवेदनश्चानियमेन भवति। अत्रैव हेतुमाह— चलत्वाद्वायोरिति। आयामः विस्तरणं, हर्षः रोमहर्षः, प्रलयः नाशः, उदयः जन्म; स्फुरणादीनां जन्मनाशौ बहुधा भवत इत्यर्थः। अत्रापि

चलत्वमेव वायोर्हेतुर्बोद्धव्यः। हृष्यन्ति चास्य रोमाणीति वेदनाप्रादुर्भावे प्रतिनियमेन, स्फुरणादौ तु हर्षो विनाऽपि वेदनामिति ज्ञेयम्॥७॥

तैरेव तु कर्शनैः कर्शितस्याम्ललवणकटुकक्षारोष्णतीक्ष्णशुक्तव्यापन्नमद्यहरितकफलाम्लानां विदाहिनां च शाकधान्यमांसादीनामुपयोगादजीर्णाध्यशनाद्रौक्ष्यानुगते चामाशये वमनमतिवेलं सन्धारणं वातातपौ चातिसेवमानस्य पित्तं सह मारुतेन प्रकोपमापद्यते॥८॥

तत् प्रकुपितं मारुत आमाशयैकदेशे संवर्त्य तानेव वेदनाप्रकारानुपजनयति, य उक्ता वातगुल्मे; पित्तं त्वेनं विदहति कुक्षौ हृद्युरसि कण्ठे च; स विदह्यमानः सधूममिवोद्गारमुद्गिरत्यम्लान्वितं, गुल्मावकाशश्चास्य दह्यते दूयते धूप्यते ऊष्मायते स्विद्यति क्लिद्यति शिथिल इव स्पर्शासहोऽल्परोमाञ्चश्च भवति; ज्वरभ्रमदवथुपिपासागलतालुमुखशोषप्रमोहविड्भेदाश्चैनमुपद्रवन्ति; हरितहारिद्रत्वङ्नखनयनवदनमूत्रपुरीषश्च भवति; निदानोक्तानि चास्य नोपशेरते, विपरीतान्युपशेरत इति पित्तगुल्मः॥९॥

रौक्ष्यानुगते चामाशये इति रूक्षणहेतुभी रूक्षीकृते इत्यर्थः; किंवा रौक्ष्यानुगते चामाशये सति वमनं सेवमानस्येति योजनीयम्। आमाशयैकदेशे संवर्त्यैतिवचनात् पित्तगुल्मस्य कफगुल्मस्य च बस्तिः स्थानं न भवतीति दर्शयति; वचनं हि— "नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः" (वि.अ.२) इति; वातगुल्मस्य तु बस्तिरपि स्थानं भवति, अत एव तत्र सामान्येन महास्रोत इति कृतं, महास्रोतोग्रहणेन च बस्तिरपि गृह्यते; तथा वातगुल्म एव 'हृदि बस्तौ' इत्यादि कृतम्। दाहदूयनादयः पित्तवेदनाविशेषा असकृद्व्याख्याताः। दवथुः 'धक्धक्' इति लोके कथ्यते॥८-९॥

तैरेव तु कर्शनैः कर्शितस्यात्यशनादतिस्निग्धगुरुमधुरशीताशनात् पिष्टेक्षुक्षीरतिलमाषगुडविकृतिसेवनान्मन्दकमद्यातिपानाद्धरितकातिप्रणनयादानूपौदकग्राम्यमांसातिभक्षणात् सन्धारणादबुभुक्षस्य चातिप्रगाढमुदपानात् सङ्क्षोभणाद्वा शरीरस्य श्लेष्मा सह मारुतेन प्रकोपमापद्यते॥१०॥

तं प्रकुपितं मारुत आमाशयैकदेशे संवर्त्य तानेव वेदनाप्रकारानुपजनयति य उक्ता वातगुल्मे; श्लेष्मा त्वस्य शीतज्वरारोचकाविपाकाङ्गमर्दहर्षहृद्रोगच्छर्दिनिद्रालस्यस्तैमित्यगौरवशिरोभितापानुपजनयति, अपि च गुल्मस्य स्थैर्यगौरवकाठिन्यावगाढसुप्तताः, तथा कासश्वासप्रतिश्यायान् राजयक्ष्माणं चातिप्रवृद्धः, श्वैत्यं त्वङ्नखनयनवदनमूत्रपुरीषेषूपजनयति, निदानोक्तानि चास्य नोपशेरते, विपरीतानि चोपशेरत इति श्लेष्मगुल्मः॥११॥

श्लेष्मगुल्मे अबुभुक्षस्येति अबुभुक्षितस्य; 'अतिसुहितस्य' इति वा पाठः। यद्यपि राजयक्ष्मा त्रिदोषजः, तथाऽपि कफगुल्म एव रोगमहिम्ना अजनितदोषत्रयेण जन्यत इति बोद्धव्यम्॥१०-११॥

त्रिदोषहेतुलिङ्गसन्निपाते तु सान्निपातिकं गुल्ममुपदिशन्ति कुशलाः। स विप्रतिषिद्धोपक्रमत्वादसाध्यो निचयगुल्मः॥१२॥

विप्रतिषिद्धोपक्रमत्वादिति परस्परं वातादिविरुद्धोपक्रमत्वात्। इह च विप्रतिषिद्धोपक्रमत्वं विकृतिविषमसन्निपातेन बोद्धव्यम्। तेन, साध्यत्रिदोषज्वरादौ वातादिविरुद्धोपक्रमत्वं सदपि नासाध्यतामापादयति॥१२॥

शोणितगुल्मस्तु खलु स्त्रिया एव भवति न पुरुषस्य, गर्भकोष्ठार्तवागमनवैशेष्यात्। पारतन्त्र्यादवैशारद्यात् सततमुपचारानुरोधाद्वा वेगानुदीर्णानुपरुन्धत्या आमगर्भे वाऽप्यचिरपतितेऽथवाऽप्यचिरप्रजाताया ऋतौ वा वातप्रकोपणान्यासेवमानायाः क्षिप्रं वातः प्रकोपमापद्यते॥१३॥

स प्रकुपितो योनिमुखमनुप्रविश्यार्तवमुपरुणद्धि, मासि मासि तदार्तवमुपरुध्यमानं कुक्षिमभिवर्धयति। तस्याः शूलकासातीसारच्छर्द्यरोचकाविपाकाङ्गमर्दनिद्रालस्यस्तैमित्यकफप्रसेकाः समुपजायन्ते, स्तनयोश्च स्तन्यम्, ओष्ठयोः स्तनमण्डलयोश्च कार्ष्ण्यम्, अत्यर्थं ग्लानिश्चक्षुषोः, मूर्च्छा, हृल्लासः, दोहदः, श्वयथुश्च पादयोः, ईषच्चोद्गमो रोमराज्याः, योन्याश्चाटालत्वम्, अपि च योन्या दौर्गन्ध्यमास्रावश्चोपजायते, केवलश्चास्या गुल्मः पिण्डित एव स्पन्दते, तामगर्भां गर्भिणीमित्याहुर्मूढाः॥१४॥

शोणितगुल्मे स्त्रिया एवेति वचनादेव न पुरुषस्येति लब्धे पुनर्न पुरुषस्येति वचनं स्पष्टार्थम्। गर्भार्थः कोष्ठो गर्भकोष्ठस्तस्मिन् गर्भकोष्ठे य आर्तवस्यागमनरूपो विशेषो रक्तगुल्मकारणं, स स्त्रिया एव भवति; तेनैवंरूप आर्तवप्रतिबन्धजन्यः शोणितगुल्मः पुरुषस्य न भवति। सामान्यशोणितदुष्टिजन्यस्तु पुरुषस्यापि भवति; तथाहि वक्ष्यति— "कफो वाते जितप्राये पित्तं शोणितमेव च। यदि कुप्यति वा तस्य क्रियमाणे चिकित्सिते" (चि.अ.५) इत्यादि; तथा 'गुल्मोपकुशवीसर्प' (सू.अ.२४) इत्यादयो 'रक्तजा गदाः' इत्युक्तम्। पारतन्त्र्यादिहेतुत्रयं वेगविधारणे, पारतन्त्र्यादेव स्त्रियो वेगं विधारयन्ति। अवैशारद्यम् अज्ञानं; तेन, वेगविधारणेन महान् व्याधिर्भवतीत्यज्ञानाद्वेगं विधारयन्ति। उपचारानुरोधादिति भर्त्राद्युपचारपरत्वात्। योनिमुखमिति गर्भाशयद्वारम्। स्तनयोः स्तन्यमिति रोगप्रभावादेव बोद्धव्यम्। आर्तवरोधलक्षणस्य व्याधेरयं प्रभावो यत् स्तन्यं करोति, दृष्टत्वात्। तेन, यदुच्यते— "स्त्रिया ह्यापन्नसत्त्वायास्त्रिधा रसः

सम्पद्यते— स्वशरीरपुष्टये, स्तन्याय, गर्भाभिवृद्धये च" (शा.अ.६) इति वचनाद् "गर्भ एव स्तन्यं भवति" तन्निरस्तं मन्तव्यम्। दोहदशब्देनेह नार्या उच्चावचभावतृष्णायोगो दोहदाभिधानो ज्ञेयः। यदुक्तं **क्षारपाणिना**— "दोहदिनी वा स्यान्नारी शोणितगुल्मिनी" इति। न त्विह द्वैहृद्यकृतो दोहदोऽभिप्रेतः, स हि गर्भहृदयस्य मातृहृदयेन सम्बन्धाद्भवति; वचनं हि— "मातृजं ह्यस्य हृदयं, तदस्य मातृहृदयेन सम्बद्धं भवति रसवाहिनीभिः संवाहिनीभिः, तस्मात्तयोस्ताभिर्भक्तिः सम्पद्यते" (शा.अ.४) इति; शोणितगुल्मे च चेतना नास्ति, तेन नैवंरूपमिह द्वैहृद्यं दोहदम्। तेन गर्भभ्रान्त्या यत्किञ्चिदभ्यवहारेच्छादिलक्षणं दोहदं तस्या भवति, असत्यपि विषसम्बन्धे यथा शङ्काविषाद्विषलिङ्गानि भवन्ति; वचनं हि— "शङ्काविषेणोपहताः कुर्वन्ति विषलक्षणम्" इति। आटालत्वं विस्तृतत्वं; योनिविस्तारेण च रोमराज्या अपि विस्तरणं वितन्यमानचर्मरोम्णा चैवोपपन्नम्। केवलः स्पन्दत इति नैकदेशेन; गर्भो ह्येकदेशेनापि स्पन्दते, तेनैतल्लक्षणं गर्भशङ्काव्यावर्तकम्। ननु यदुक्तं रक्तगुल्मे— "समगर्भलिङ्गः" इति, तथा "मासे व्यतीते दशमे चिकित्स्यः" (चि.अ.५) इति; तदनुपपन्नं, यतो गर्भाद्विशिष्टं पिण्डितस्पन्दनं विद्यत एव; तथा नवत्वं सुखसाध्यताहेतुत्वेनोक्तम्, इह च कथं कालातिक्रमेणोपक्रमणीयत्वमुच्यते? ब्रूमः— समगर्भलिङ्गत्वं तावद्भूरिगर्भसमलिङ्गताभिप्रायेणोक्तं; किंवा, समस्यावैकारिकस्य दशमासिकपर्यन्तस्य गर्भस्य लिङ्गानि यस्य स समगर्भलिङ्गः, तेन वैकारिकसुप्तनागोदरादेर्लक्षणं नेह भवतीति दर्शयति। दशममासचिकित्स्यत्वं चेह व्याधिमहिम्ना बोद्धव्यं, दशममास एवायं शिथिलीभूतः सन् चिकित्स्यो भवतीति व्याधिप्रभावः। दृष्टा च व्याधिप्रभावकृता कालापेक्षा— "ज्वरे पेयाः कषायाश्च सर्पिः क्षीरं विरेचनम्। षडहे षडहे देयम्" इत्यादिषु। यत्तु समगर्भलिङ्गत्वेन गर्भशङ्कानिरासार्थं रक्तगुल्मस्य दशममासापेक्षणं; तन्न, दशममासादर्वागपि पिण्डितस्पन्दनेन रक्तगुल्मस्यावधारणम्, तथा दशममासादूर्ध्वमपि गर्भावस्थानस्य दृष्टत्वेन गर्भशङ्कानपगमाच्च; वक्ष्यति हि दशममासादूर्ध्वमवस्थानं गर्भस्य— "वैकारिकमत ऊर्ध्वमवस्थानं" (शा.अ.४) इति॥१३-१४॥

एषां तु खलु पञ्चानां गुल्मानां प्रागभिनिर्वृत्तेरिमानि पूर्वरूपाणि भवन्ति; तद्यथा— अनन्नाभिलषणम्, अरोचकाविपाकौ, अग्निवैषम्यं, विदाहो भुक्तस्य, पाककाले चायुक्त्या छर्द्युद्गारौ, वातमूत्रपुरीषवेगानां चाप्रादुर्भावः, प्रादुर्भूतानां चाप्रवृत्तिरीषदागमनं वा, वातशूलाटोपान्त्रकूजनापरिहर्षणातिवृत्तपुरीषताः, अबुभुक्षा, दौर्बल्यं, सौहित्यस्य चासहत्वमिति॥१५॥

तद्यथेत्यादिना पूर्वरूपाण्याह। अयुक्त्येति छर्द्युद्गारकारणमन्तरेण व्याधिप्रभावादेवेत्यर्थः। अतिवृत्तपुरीषता उदावर्तः॥१५॥

सर्वेष्वपि खल्वेतेषु गुल्मेषु न कश्चिद्वाताद्दते सम्भवति गुल्मः।
तेषां सान्निपातिकमसाध्यं ज्ञात्वा नैवोपक्रमेत, एकदोषजे तु यथास्वमारम्भं प्रणयेत्, संसृष्टांस्तु साधारणेन कर्मणोपचरेत्। यच्चान्यदप्यविरुद्धं मन्येत तदप्यवचारयेद्विभज्य गुरुलाघवमुपद्रवाणां, गुरूनुपद्रवांस्त्वरमाणश्चिकित्सेज्जघन्यमितरान्। त्वरमाणस्तु विशेषमनुपलभमानो गुल्मेष्वात्ययिके कर्मणि वातचिकित्सितं प्रणयेत्, स्नेहस्वेदौ वातहरौ स्नेहोपसंहितं च मृदु विरेचनं बस्तींश्च; अम्ललवणमधुरांश्च रसान् युक्त्याऽवचारयेत्। मारुते ह्युपशान्ते स्वल्पेनापि प्रयत्नेन शक्योऽन्योऽपि दोषो नियन्तुं गुल्मेष्विति॥१६॥

भवति चात्र—
गुल्मिनामनिलशान्तिरुपायैः सर्वशो विधिवदाचरितव्या।
मारुते ह्यवजितेऽन्यमुदीर्णं दोषमल्पमपि कर्म निहन्यात्॥१७॥

पित्तादिकृतेष्वपि तु गुल्मेषु सम्प्राप्तिसिद्धस्य वातस्य प्राधान्यमाह— सर्वेष्वपीत्यादि। साधारणेनेति संसृष्टोभयदोषप्रत्यनीकेन। यच्चान्यदपीति संसर्गे एकदोषोपशमकमपि। अविरुद्धमिति उपद्रवाणां

गुरूणामविरुद्धम्। विभज्येति गुरुलाघवं विभज्य। तेनैकदोषप्रशमनमपि तदेव कर्तव्यं यद्गुरूपद्रवप्रशमनं भवतीति भावः। एतदेवाह— गुरूनित्यादि। सर्वगुल्मानां वातमूलत्वेन वातनिरपेक्षचिकित्साविशेषानुपलम्भे वातचिकित्सैव त्वरया कर्तव्येत्याह— त्वरमाणस्त्वित्यादि। आत्ययिके कर्मणि 'क्रियमाणे' इति शेषः। अल्पमपीति कर्मविशेषणम्॥ १६-१७॥

तत्र श्लोकः—

सङ्ख्या निमित्तं रूपाणि पूर्वरूपमथापि च।
दिष्टं निदाने गुल्मानामेकदेशश्च कर्मणाम्॥ १८॥

सङ्ग्रहे एकदेशश्च कर्मणामिति चिकित्सितानाम्॥ १८॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते निदानस्थाने गुल्मनिदानं नाम तृतीयोऽध्यायः॥ ३॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां निदानस्थाने गुल्मनिदानं नाम तृतीयोऽध्यायः॥ ३॥

चतुर्थोऽध्यायः।

अथातः प्रमेहनिदानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

त्रिदोषकोपनिमित्ता विंशतिः प्रमेहा भवन्ति विकाराश्चापरेऽपरिसङ्ख्येयाः। तत्र यथा त्रिदोषप्रकोपः प्रमेहानभिनिर्वर्तयति तथाऽनुव्याख्यास्यामः॥३॥

दक्षाध्वरे गुल्ममनु प्रमेहोत्पादात् प्रमेहाभिधानं; वचनं हि— "हविःप्राशान्मेहकुष्ठयोर्जन्म" (नि.अ.८) इति। त्रिदोषप्रकोपनिमित्ता इति सर्वमेहेष्वेव त्रिदोषाः कारणम्, अधिकत्वाच्च श्लैष्मिकादिव्यपदेश इति दर्शयति। **सुश्रुते**ऽप्युक्तं— "सर्व एव मेहाः सर्वदोषजाः" (नि.अ.६) इति। विकारा इति प्रमेहलिङ्गोपद्रवरूपाः; किंवा, अन्येऽपि ये केचन त्रिदोषजास्ते ग्राह्याः॥१-३॥

इह खलु निदानदोषदूष्यविशेषेभ्यो विकारविघातभावाभावप्रतिविशेषा भवन्ति। यदा ह्येते त्रयो निदानादिविशेषाः परस्परं नानुबध्नन्त्यथवा कालप्रकर्षादबलीयांसोऽथवाऽनुबध्नन्ति न तदा विकाराभिनिर्वृत्तिः, चिराद्वाऽप्यभिनिर्वर्तन्ते, तनवो वा भवन्त्ययथोक्तसर्वलिङ्गा वा; विपर्यये विपरीताः; इति सर्वविकारविघातभावाभावप्रतिविशेषाभिनिर्वृत्तिहेतुर्भवत्युक्तः॥४॥

इहेत्यादौ निदानादीनां विशेषाः परस्परानुबन्धित्वादयोऽग्रे वक्ष्यमाणा ज्ञेयाः। विकाराणां विघातस्योत्पत्तिप्रतिबन्धस्य भावो विघातभावः, विकाराणां विघातस्याभावो विकारजननमिति विकारविघातभावाभावौ, तयोः प्रतिविशेषा विकारविघातभावाभावप्रतिविशेषाः। तत्र विकाराणां विघातभावस्य प्रतिविशेषाः— विकाराजननं, तथा चिरेण च जननम्, अणुविकारजननं वा, असर्वलिङ्गविकारजननं वाऽग्रे वक्ष्यमाणम्। विघाताभावप्रतिविशेषास्तु विकाराजननादिविपर्ययेणाग्रे

वक्ष्यमाणाः। उक्तफक्किकार्थं व्याकरोति— यदेत्यादि। परस्परं नानुबध्नन्ति परस्परं प्रतिकूला भवन्ति, अनुबन्धो ह्यनुकूलेऽभिप्रेतः। तत्र तदेव निदानं दोषमनुबध्नाति, यद्भूयःसामान्याददविरोधेन दोषं दूषयति। दोषस्य दूष्यानुबन्धित्वं यद्— दूष्यं व्याधिकारणं सामान्यगुणत्वादिधर्मयोगाददविरोधेन दूषयति। तथा दूष्यस्य च दोषानुबन्धित्वं यद्— दोषस्य दूषणं प्रति शिथिलत्वसमानगुणत्वादिनाऽऽनुकूल्येनावस्थानम्। तथा दोषस्य चेदमेव निदानानुबन्धित्वं यत्— निदानं दोषजननं प्रति समानगुणत्वं, समानगुणतया हि दोषो निदानस्य व्याधिजननं प्रत्यनुकूलो भवति। एतदुदाहरणानां च विपर्ययेणाननुबन्धो बोद्धव्यः। निदानस्य च दोषाननुबन्धः समानासमानगुणयोगात् किञ्चिद्दोषजनने बोद्धव्यः, सर्वथा दोषवैपरीत्ये तथा दोषजननं प्रत्युदासीनत्वे च निदानस्य निदानत्वमेव न स्यात्; जनकं हि निदानमुच्यते। अथवा कालप्रकर्षादिति अनुबध्नन्तीति सम्बन्धः; कालप्रकर्षादनुबध्नन्तीति कालप्रकर्षात् परस्परं निदानादयोऽनुगुणा भवन्ति यदा, तदा विकारा चिरादभिनिर्वर्तन्त इति ज्ञेयम्। यदा परस्परं नानुबध्नन्ति, न तदा विकाराभिनिर्वृत्तिर्भवतीति योजनीयम्। कालप्रकर्षाच्चानुबन्धो निदानस्य दोषेण तदा भवति, यदा हेतुर्विच्छेदं कृत्वा पुनः सेव्यते; काल एव वा चिरेण समानगुणतया हेतुरूपः प्राप्यत इत्यादि तर्क्यम्। अबलीयांसोऽथवाऽनुबध्नन्तीति निदानं यदाऽल्पं भवति तदा स्तोकदोषं करोति, दोषश्च स्तोकः स्तोकं च दूष्यं दूषयतीत्यादि ज्ञेयम्। यदा चा(वाऽ)बलीयांसोऽनुबध्नन्ति, तदा तनवो वा विकारा भवन्ति, अयथोक्तसर्वलिङ्गा वा भवन्तीति योज्यं; तनवः अल्पमात्राः, अयथोक्तसर्वलिङ्गा इति येन प्रकारेण लिङ्गान्युक्तानि न तेन प्रकारेण सर्वाणि लिङ्गानि भवन्तीत्यर्थः। एवमेते निदानादीनामननुबन्धविशेषकृता विकारविघातभावस्य प्रतिविशेषा उक्ताः। सम्प्रति निदानादीनां परस्परानुबन्धविशेषकृतान् विकाराणां विघाताभावविशेषानाह— विपर्यये विपरीता इति। विपर्यय इति निदानादीनामनुबन्धे तथा शीघ्रानुबन्धे तथा बलवतां चानुबन्धे; विपरीता इति निर्वर्तमाना विकाराः, तथा शीघ्रं निर्वर्तमानाः, तथा महान्तो यथोक्तसर्वलिङ्गाश्चेति यथासङ्ख्यं बोद्धव्यम्। उपसंहरति— इतीत्यादि। एतच्च प्रकरणं

सर्वविकारसाधारणमपि प्रमेहस्य परस्परानुबन्धिभिरेव निदानादिभिर्जन्यत्वं भवतीति ख्यापयितुं प्रमेहनिदाने कृतम्॥४॥

तत्रेमे त्रयो निदानादिविशेषाः श्लेष्मनिमित्तानां प्रमेहाणामाश्वभिनिर्वृत्तिकरा भवन्ति; तद्यथा— हायनकयवकचीनकोद्दालकनैषधेत्कटमुकुन्दकमहाव्रीहिप्रमोदकसुगन्धकानां नवानामतिवेलमतिप्रमाणेन चोपयोगः, तथा सर्पिष्मतां नवहरेणुमाषसूप्यानां, ग्राम्यानूपौदकानां च मांसानां, शाकतिलपललपिष्टान्नपायसकृशराविलेपीक्षुविकाराणां, क्षीरनवमद्यमन्दकदधिद्रवमधुरतरुणप्रायाणां चोपयोगः, मृजाव्यायामवर्जनं, स्वप्नशयनासनप्रसङ्गः, यश्च कश्चिद्विधिरन्योऽपि श्लेष्ममेदोमूत्रसञ्जननः, स सर्वो निदानविशेषः॥५॥

सम्प्रति प्रकृते कफजादिमेहे परस्परानुबन्धिनो निदानादिविशेषानाह— तत्रेत्यादि। इह कफ एवाग्रेऽभिधीयते, भूरिप्रमेहकर्तृत्वात्। हायनकादयो धान्यविशेषाः। अतिवेलमिति पुनः पुनः। हरेणुः वर्तुलकलायः। तिलतण्डुलमाषकृतमन्नं कृशरा। मृजा उद्वर्तनम्। सर्वः स निदानविशेष इति एवंभूतमेव निदानं प्रमेहकर्तुः श्लेष्मणः कारणमित्यर्थः॥५॥

बहुद्रवः श्लेष्मा दोषविशेषः॥६॥

बहुद्रवः श्लेष्मा दोषविशेष इति बहुद्रव एव कफो मेहजनको नाल्पद्रव इति॥६॥

बह्वबद्धं मेदो मांसं शरीरजक्लेदः शुक्रं शोणितं वसा मज्जा लसीका रसश्चौजःसङ्ख्यात इति दूष्यविशेषाः॥७॥

अबद्धमिति असंहतम्। अत्र तु बहुत्वमघनत्वं च यथायोग्यतया बोद्धव्यम्। तेन, मेदसि मांसे वसामज्ज्ञोश्च द्वयमपि, शेषेषु बहुत्वम्। ओजःसङ्घात इति ओजोरूप एव। वक्ष्यति हि प्रमेहचिकित्सिते — "मज्जा रसौजः पिशितं च दूष्याः" (चि.अ.५) इति। इतिशब्दो बह्वबद्धमेदआदीन् प्रत्यवमृशति; किंवा 'सङ्घाताः' इति पाठः सुगमः॥७॥

त्रयाणामेषां निदानादिविशेषाणां सन्निपाते क्षिप्रं श्लेष्मा प्रकोपमापद्यते, प्रागतिभूयस्त्वात्; स प्रकुपितः क्षिप्रमेव शरीरे विसृतिं लभते, शरीरशैथिल्यात्; स विसर्पञ् शरीरे मेदसैवादितो मिश्रीभावं गच्छति, मेदसश्चैव बह्वबद्धत्वान्मेदसश्च गुणैः समानगुणभूयिष्ठत्वात्; स मेदसा मिश्रीभवन् दूषयत्येनत्, विकृतत्वात्; स विकृतो दुष्टेन मेदसोपहितः शरीरक्लेदमांसाभ्यां संसर्गं गच्छति, क्लेदमांसयोरतिप्रमाणाभिवृद्धत्वात्; स मांसे मांसप्रदोषात् पूतिमांसपिडकाः शराविकाकच्छपिकाद्याः सञ्जनयति, अप्रकृतिभूतत्वात्; शरीरक्लेदं पुनर्दूषयन् मूत्रत्वेन परिणमयति, मूत्रवहानां च स्रोतसां वङ्क्षणबस्तिप्रभवाणां मेदःक्लेदोपहितानि गुरूणि मुखान्यासाद्य प्रतिरुध्यते; ततः प्रमेहांस्तेषां स्थैर्यमसाध्यतां वा जनयति, प्रकृतिविकृतिभूतत्वात्॥८॥

सन्निपाते मेलके। प्रकोपमापद्यत इति प्रमेहकरणायोद्यतो भवति। कुतः प्रमेहकरणायोद्यतो भवतीत्याह— प्रागतिभूयस्त्वात्। प्रागिति उत्पादकाल एव। यस्मात् प्रमेहकरणं प्रत्यभिमुखो भूयांश्च कफो भूतस्तत इत्यर्थः। प्रमेहनिदानेन हि कफोऽयं प्रमेहकरणाभिमुख एव जनितो भूरिश्च; ततो भूरित्वात् तथा प्रमेहकरणशक्तियोगाच्च तथा प्रकुप्यतीति युक्तम्। विसृतिं विसरणम्। मेदसश्च गुणानां गुणैः समानगुणभूयिष्ठत्वादित्यादि।— मेदसो गुणानां मधुरस्नेहगौरवादीनां श्लेष्मणो गुणैर्गुरुशीतादिभिर्भूरिसामान्यादित्यर्थः; समानं हि समानेन मिलतीति भावः। विकृतत्वादितिवचनेन प्रकृतेन श्लेष्मणा सम्बन्धो मेदोदूषको न भवति, किन्तर्हि विकृतेनैवेति दर्शयति। अतिप्रमाणवृद्धत्वादिति अतिशयितप्रमाणयोगेन वृद्धत्वात्; न गुणातियोगमात्रेण वृद्धत्वमिह,

किन्तर्ह्यवयवोपचयेनेत्यर्थः। पूतिमांसवत्यः पिडकाः पूतिमांसपिडकाः। अप्रकृतिभूतत्वादिति मांसप्रदोषेण नानाविधशराविकादिजनकत्वशक्तित्वादितीह बोद्धव्यम्। तेन, अप्रकृतभूतत्वादितिवचनं हि विशेषार्थत्वान्न पुनरुक्तम्। आसाद्य प्रतिरुध्यत इति गत्वाऽवतिष्ठते। प्रकृतिविकृतिभूतत्वादिति प्रकृतिभूतैर्गुणैः सर्वैरेव विकृतत्वात्; सर्व एव यस्माच्छ्लेष्मणो गुणा विकृतास्तस्मात् प्रकोपप्रकर्षात् स्थिरो भवति, अतिप्रकर्षात्त्वसाध्य इत्यर्थः। किंवा प्रकृतिभूतः श्लेष्मा समाने दूष्ये मेदोवसादौ, विकृतिभूतश्चासमाने शोणितादौ; तेन समानासमानत्वादित्यर्थः। तथा च समानदूष्यप्राप्त्या बलित्वम्, असमानदूष्यप्राप्त्या च विरुद्धोपक्रमत्वं कफस्य भवति; ततश्च स्थैर्यमसाध्यता वा युक्तेति मन्तव्यम्॥८॥

शरीरक्लेदस्तु श्लेष्ममेदोमिश्रः प्रविशन् मूत्राशयं मूत्रत्वमापद्यमानः श्लैष्मिकैरेभिर्दशभिर्गुणैरुपसृज्यते वैषम्ययुक्तैः; तद्यथा— श्वेतशीतमूर्तपिच्छिलाच्छस्निग्धगुरुमधुरसान्द्रप्रसादमन्दैः, तत्र येन गुणेनैकेनानेकेन वा भूयस्तरमुपसृज्यते तत्समाख्यं गौणं नामविशेषं प्राप्नोति॥९॥

ते तु खल्विमे दश प्रमेहा नामविशेषेण भवन्ति; तद्यथा— उदकमेहश्च, इक्षुवालिकारसमेहश्च, सान्द्रमेहश्च, सान्द्रप्रसादमेहश्च, शुक्लमेहश्च, शुक्रमेहश्च, शीतमेहश्च, सिकतामेहश्च, शनैर्मेहश्च, आलालमेहश्चेति॥१०॥

ते दश प्रमेहाः साध्याः; समानगुणमेदःस्थानकत्वात्, कफस्य प्राधान्यात्, समक्रियत्वाच्च॥११॥

सम्प्रति यथा कफमेहाः कफगुणयोगाद्दश भवन्ति तथा प्राह— शरीरेत्यादि। वैषम्यमिह वृद्धिकृतमेव बोद्धव्यं, क्षयरूपवैषम्यस्यैवंरूपव्याध्यजनकत्वात्। वैषम्य एव वृद्धवृद्धतरत्वादिना हानिवृद्धी बोद्धव्ये; तेन श्वेतादिगुणवृद्ध्या ये शुक्रमेहादय उक्ताः, तेष्वपीतरे श्लेष्मगुणा हानिवृद्धिरूपवैषम्ययुक्ताः सन्तीत्यर्थः। किंवा वैषम्ये सति क्वचिद्द्वयोः क्वचित्त्रयाणां क्वचिच्चतुर्णां गुणानां वृद्धिर्भवतीति दर्शयति।

तेन गुणसङ्ख्योत्कर्षापकर्षाद्धानिवृद्धी ज्ञेये। नचेह श्वेतादिदशगुणयोगाद्यथासङ्ख्यं दश प्रमेहाः, किन्तु व्यस्तसमस्तगुणयोगाच्च; अत एवाह— येन गुणेनैकैकेनानेकेन वेत्यादि। सान्द्रप्रसादशब्देनैक एव गुणो गणनीयः; सान्द्रमेहव्यपदेशस्तु सान्द्रप्रसादगुणैकदेशेनोद्धृतेन ज्ञेयः। तत्समाख्यमित्यादौ तत्समाख्यं वा गौणं वा नामविशेषं प्राप्नोतीति योजनीयम्। तद्गुणस्य समा आख्या यस्य तत् तत्समाख्यं नाम, यथा— शीतमेह-शुक्लमेह-सान्द्रमेहेषु; अत्र हि शीतादिगुणाख्ययैव मेहा व्यपदिश्यन्ते, इतरेषु तूदकमेहादिषु न श्वेतादिगुणसञ्ज्ञातुल्यं नाम, किं तर्हि श्लेष्मणो नैकगुणयुक्तोदकादितुल्यत्वेन गुणयोगप्रवृत्तत्वाद्गौणमुदकमेह इति; अच्छसितशीतादिकफगुणयोगाद्गौणमुदकमेह इति नाम भवति। एवमन्यत्राप्यनुसरणीयम्। उदकादयस्त्विह कफगुणमेलकलक्षणार्थास्तत्तत्कफगुणयुक्ता उपात्ताः सञ्ज्ञाकरणार्थम्॥९-११॥

तत्र श्लोकाः श्लेष्मप्रमेहविशेषविज्ञानार्था भवन्ति—॥१२॥

अच्छं बहु सितं शीतं निर्गन्धमुदकोपमम्।
श्लेष्मकोपान्नरो मूत्रमुदमेही प्रमेहति॥१३॥
अत्यर्थमधुरं शीतमीषत्पिच्छिलमाविलम्।
काण्डेक्षुरसमङ्काशं श्लेष्मकोपात् प्रमेहति॥१४॥
यस्य पर्युषितं मूत्रं सान्द्रीभवति भाजने।
पुरुषं कफकोपेन तमाहुः सान्द्रमेहिनम्॥१५॥
यस्य संहन्यते मूत्रं किञ्चित् किञ्चित् प्रसीदति।
सान्द्रप्रसादमेहीति तमाहुः श्लेष्मकोपतः॥१६॥
शुक्लं पिष्टनिभं मूत्रमभीक्ष्णं यः प्रमेहति।
पुरुषं कफकोपेन तमाहुः शुक्लमेहिनम्॥१७॥
शुक्राभं शुक्रमिश्रं वा मुहुर्मेहति यो नरः।

शुक्रमेहिनमाहुस्तं पुरुषं श्लेष्मकोपतः॥१८॥

अत्यर्थमधुरं शीतं मूत्रं मेहति यो भृशम्।

शीतमेहिनमाहुस्तं पुरुषं श्लेष्मकोपतः॥१९॥

मूर्तान्मूत्रगतान् दोषानणून्मेहति यो नरः।

सिकतामेहिनं विद्यात्तं नरं श्लेष्मकोपतः॥२०॥

मन्दं मन्दमवेगं तु कृच्छ्रं यो मूत्रयेच्छनैः।

शनैर्मेहिनमाहुस्तं पुरुषं श्लेष्मकोपतः॥२१॥

तन्तुबद्धमिवालालं पिच्छिलं यः प्रमेहति।

आलालमेहिनं विद्यात्तं नरं श्लेष्मकोपतः॥२२॥

इत्येते दश प्रमेहाः श्लेष्मप्रकोपनिमित्ता व्याख्याता भवन्ति॥२३॥

विशेषविज्ञानार्था भवन्तीति परस्परभिन्नलक्षणप्रतिपादका इत्यर्थः। उदकोपममिति उदकवर्णादितुल्यम्। ननु, इक्षुवालिकामेहे काण्डेक्षुरससङ्काशमिति किमित्युच्यते, इक्षुवालिकाकाण्डेक्ष्वोरर्थान्तरत्वात्। नैवम्, इक्षुवालिकारसस्य तथा काण्डेक्षुरसस्य चैकरूपताप्रतिपादनार्थमुभयोरुपादानं; किंवा, काण्डेक्षुरसतुल्योऽपि तथेक्षुवालिकारसतुल्यश्चेक्षुवालिकामेहो भवतीत्युभयोपादानाद्दर्शयति। संहन्यते स्त्यानीभवति। मूर्तानिति कठिनान्। दोषानिति जातौ बहुवचनं, येन दोषोऽत्रैक एव प्रभूतः कफः। तन्तुबद्धं तन्तुवद्दीर्घमित्यर्थः। लालामिवालालं, समन्ताल्लालारूपमित्यर्थः। प्रति प्रति मेहं च श्लेष्मकोपत इत्यादिवचनं सुखग्रहणार्थम्। नचेह वाच्यम्— यत्— यथा श्लेष्मगुणा दश प्रमेहाञ्जनयन्ति, तथा किमित्यपरानपि गुणसंसर्गाद्विकल्पान्तरेण न कुर्वन्तीति; यतो भावस्वभावोऽयं— यथा दृष्ट एव परं कल्प्यते नादृष्टः; नहि सत्यपि भूतसंसर्गभूयस्त्वे रसभूयस्त्वं भवतीति व्यवस्थितमेव॥१२-२३॥

उष्णाम्ललवणक्षारकटुकाजीर्णभोजनोपसेविनस्तथाऽतितीक्ष्णातपाग्निसन्तापश्रम क्रोधविषमाहारोपसेविनश्च तथाविधशरीरस्यैव क्षिप्रं पित्तं प्रकोपमापद्यते, तत्तु प्रकुपितं तयैवानुपूर्व्या प्रमेहानिमान् षट् क्षिप्रतरमभिनिर्वर्तयति॥२४॥

तेषामपि तु खलु पित्तगुणविशेषेणैव नामविशेषा भवन्ति; तद्यथा— क्षारमेहश्च, कालमेहश्च, नीलमेहश्च, लोहितमेहश्च, माञ्जिष्ठमेहश्च, हारिद्रमेहश्चेति॥२५॥

ते षड्भिरेव क्षाराम्ललवणकटुकविस्रोष्णैः पित्तगुणैः पूर्ववद्युक्ता भवन्ति॥२६॥

उष्णेत्यादिना पित्तमेहनिदानम्। षट् क्षिप्रतरमिति श्लेष्मप्रमेहापेक्षया; श्लेष्मणो हि क्षिप्रकारि पित्तं, तेन क्षिप्रतरोत्पादो युक्तः। पूर्ववद्युक्ता भवन्तीति वैषम्यहानिवृद्धियुक्तैरित्यर्थः॥२४-२६॥

सर्व एव ते याप्याः संसृष्टदोषमेदःस्थानत्वाद्विरुद्धोपक्रमत्वाच्चेति॥२७॥

तत्र श्लोकाः पित्तप्रमेहविशेषविज्ञानार्था भवन्ति—॥२८॥

गन्धवर्णरसस्पर्शैर्यथा क्षारस्तथाविधम्।
पित्तकोपान्नरो मूत्रं क्षारमेही प्रमेहति॥२९॥
मसीवर्णमजस्रं यो मूत्रमुष्णं प्रमेहति।
पित्तस्य परिकोपेण तं विद्यात् कालमेहिनम्॥३०॥
चाषपक्षनिभं मूत्रमम्लं मेहति यो नरः।
पित्तस्य परिकोपेण तं विद्यान्नीलमेहिनम्॥३१॥
विस्रं लवणमुष्णं च रक्तं मेहति यो नरः।
पित्तस्य परिकोपेण तं विद्याद्रक्तमेहिनम्॥३२॥

मञ्जिष्ठोदकसङ्काशं भृशं विस्रं प्रमेहति।

पित्तस्य परिकोपात्तं विद्यान्माञ्जिष्ठमेहिनम्॥३३॥

हरिद्रोदकसङ्काशं कटुकं यः प्रमेहति।

पित्तस्य परिकोपात्तं विद्याद्धारिद्रमेहिनम्॥३४॥

इत्येते षट् प्रमेहाः पित्तप्रकोपनिमित्ता व्याख्याता भवन्ति॥३५॥

संसृष्टदोषमेदःस्थानत्वादिति संसृष्टं सन्निकृष्टं दोषस्य पित्तस्य मेदसश्च स्थानं यस्मात्; पित्तस्य ह्यामाशयः स्थानं, तथा मेदसोऽपि यत् स्थानं वपावहनं, तदप्यामाशयैकदेश एव; तेन दोषदूष्ययोः स्थानप्रत्यासत्त्या दूषणं नित्यं प्रत्यासन्नत्वाद्दुर्जयमिति भावः। किंवा संसृष्टदोषं मेदोरूपं स्थानं यस्य स तथा, एष विरुद्धोपक्रमत्वे हेतुः। तेन, यस्मात् पित्तरूपेण दोषेण सम्बद्धं मेदोरूपं स्थानं, तस्माद्विरुद्धोपक्रमता। यद्धि पित्तस्य मधुरशीतादि पथ्यं, तदपथ्यं मेदसः; यच्च मेदसः कटुकादि पथ्यं, तदपथ्यं पित्तस्य। चकाराद्व्याधिप्रभावाच्च याप्यत्वमिति दर्शयति॥२७-३५॥

कषायकटुतिक्तरूक्षलघुशीतव्यवायव्यायामवमनविरेचनास्थापन-शिरोविरेचनातियोगसन्धारणा-नशनाभिघातातपोद्वेगशोकशोणिता-तिषेकजागरणविषमशरीरन्यासानुपसेवमानस्य तथाविधशरीर-स्यैव क्षिप्रं वातः प्रकोपमापद्यते॥३६॥

स प्रकुपितस्तथाविधे शरीरे विसर्पन् यदा वसामादाय मूत्रवहानि स्रोतांसि प्रतिपद्यते तदा वसामेहमभिनिर्वर्तयति; यदा पुनर्मज्जानं मूत्रबस्तावाकर्षति तदा मज्जमेहमभिनिर्वर्तयति; यदा तु लसीकां मूत्राशयेऽभिवहन्मूत्रमनुबन्धं च्योतयति लसीकातिबहुत्वाद्विक्षेपणाच्च वायोः खल्वस्यातिमूत्रप्रवृत्तिसङ्गं करोति, तदा स मत्त इव गजः क्षरत्यजस्रं मूत्रमवेगं, तं हस्तिमेहिनमाचक्षते;

ओजः पुनर्मधुरस्वभावं, तद् यदा रौक्ष्याद्वायुः कषायत्वेनाभिसंसृज्य मूत्राशयेऽभिवहति तदा मधुमेहं करोति॥३७॥

रूक्षेत्यादि वातमेहस्य निदानम्। मूत्रबस्तावाकर्षति मूत्रबस्तौ स्थित आकर्षति, अर्थान्मूत्रबस्तिमेव नयति। लसीका मांसत्वगन्तरे उदकभागः। वक्ष्यति हि शारीरे— "यन्मांसत्वगन्तरे उदकं, तल्लसीकाशब्दं लभते" (शा.अ.७) इत्यादि। अनुबन्धमिति अविच्छेदेन। च्योतयतीति पातयति। रौक्ष्याद्वायुः कषायत्वेनाभिसंसृज्येति मधुरमप्योजो वायुः प्रभावात् कषायरसयुक्तं कृत्वा रौक्ष्यान्मूत्राशयेऽभिवहति, मूत्राशयं रौक्ष्याच्छेदयित्वा रूक्षं च कृत्वा नयत्योजः; स्वमहिम्ना च वायुरोजः कषायं करोति, यतो वातो हि वृद्धः प्रभावात् कषायरसं करोति॥३६-३७॥

इमांश्चतुरः प्रमेहान् वातजानसाध्यानाचक्षते भिषजः, महात्ययिकत्वाद्विरुद्धोपक्रमत्वाच्चेति॥३८॥

तेषामपि पूर्ववद्गुणविशेषेण नामविशेषा भवन्ति; तद्यथा— वसामेहश्च, मज्जमेहश्च, हस्तिमेहश्च, मधुमेहश्चेति॥३९॥

तत्र श्लोका वातप्रमेहविशेषविज्ञानार्था भवन्ति—॥४०॥

वसामिश्रं वसाभं वा मुहुर्मेहति यो नरः।
वसामेहिनमाहुस्तमसाध्यं वातकोपतः॥४१॥
मज्जानं सह मूत्रेण मुहुर्मेहति यो नरः।
मज्जमेहिनमाहुस्तमसाध्यं वातकोपतः॥४२॥
हस्ती मत्त इवाजस्रं मूत्रं क्षरति यो भृशम्।
हस्तिमेहिनमाहुस्तमसाध्यं वातकोपतः॥४३॥
कषायमधुरं पाण्डु रूक्षं मेहति यो नरः।
वातकोपादसाध्यं तं प्रतीयान्मधुमेहिनम्॥४४॥

इत्येते चत्वारः प्रमेहा वातप्रकोपनिमित्ता व्याख्याता भवन्ति॥४५॥

एवं त्रिदोषप्रकोपनिमित्ता विंशतिः प्रमेहा व्याख्याता भवन्ति॥४६॥

महात्ययिकत्वादिति मज्जप्रभृतिसारभूतधातुक्षयकरत्वात्। विरुद्धोपक्रमत्वं तु यद्वायोः स्निग्धादि पथ्यं, तन्मेदसोऽपथ्यमित्यादि ज्ञेयम्॥३८-४६॥

त्रयस्तु खलु दोषाः प्रकुपिताः प्रमेहानभिनिर्वर्तयिष्यन्त इमानि पूर्वरूपाणि दर्शयन्ति; तद्यथा— जटिलीभावं केशेषु, माधुर्यमास्यस्य, करपादयोः सुप्ततादाहौ, मुखतालुकण्ठशोषं, पिपासाम्, आलस्यं, मलं काये, कायच्छिद्रेषूपदेहं, परिदाहं सुप्ततां चाङ्गेषु, षट्पदपिपीलिकाभिश्च शरीरमूत्राभिसरणं, मूत्रे च मूत्रदोषान्, विस्रं शरीरगन्धं, निद्रां, तन्द्रां च सर्वकालमिति॥४७॥

त्रयस्त्विति त्रयोऽपीत्यर्थः। तेन, सर्वप्रमेहाणामप्येतदेव समानं पूर्वरूपमिति दर्शयति॥४७॥

उपद्रवास्तु खलु प्रमेहिणां तृष्णातीसारज्वरदाहदौर्बल्यारोचकाविपाकाः पूतिमांसपिडकालजीविद्रध्यादयश्च तत्प्रसङ्गाद्भवन्ति॥४८॥

तत्र साध्यान् प्रमेहान् संशोधनोपशमनैर्यथार्हमुपपादयंश्चिकित्सेदिति॥४९॥

तत्प्रसङ्गाद्भवन्तीति प्रमेहात्यनुबन्धाद्भवन्तीत्यर्थः॥४८-४९॥

भवन्ति चात्र—

गृध्नुमभ्यवहार्येषु स्नानचङ्क्रमणद्विषम्।
प्रमेहः क्षिप्रमभ्येति नीडद्रुममिवाण्डजः॥५०॥

मन्दोत्साहमतिस्थूलमतिस्निग्धं महाशनम्।
मृत्युः प्रमेहरूपेण क्षिप्रमादाय गच्छति॥५१॥

यस्त्वाहारं शरीरस्य धातुसाम्यकरं नरः।

सेवते विविधाश्चान्याश्चेष्टाः स सुखमश्नुते॥५२॥

यादृशे पुरुषे प्रमेहो भवति प्रायस्तमाह— गृध्नुमित्यादि।— गृध्नुं लुब्धम्। नीडद्रुमः पक्षिणां वासवृक्षः। मृत्युः प्रमेहरूपेणेत्यादिवचनान्मन्दोत्साहादियुक्ते प्रमेहो जातोऽसाध्य एव भवतीति दर्शयति। विविधाश्चान्याश्चेष्टा इति धातुसाम्यकरा इत्यर्थः॥५०-५२॥

तत्र श्लोकाः—

हेतुर्व्याधिविशेषाणां प्रमेहाणां च कारणम्।

दोषधातुसमायोगो रूपं विविधमेव च॥५३॥

दश श्लेष्मकृता यस्मात् प्रमेहाः षट् च पित्तजाः।

यथा च वायुश्चतुरः प्रमेहान् कुरुते बली॥५४॥

साध्यासाध्यविशेषाश्च पूर्वरूपाण्युपद्रवाः।

प्रमेहाणां निदानेऽस्मिन् क्रियासूत्रं च भाषितम्॥५५॥

सङ्ग्रहे व्याधिविशेषाणामित्यनेन 'इह खलु' इत्यादिग्रन्थं सङ्गृह्णाति। साध्यासाध्यविशेषा इत्यत्रासाध्यविशेषत्वेन पित्तजानां याप्यानां ग्रहणम्॥५२-५५॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते निदानस्थाने प्रमेहनिदानं नाम चतुर्थोऽध्यायः॥४॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां निदानस्थाने प्रमेहनिदानं नाम चतुर्थोऽध्यायः॥४॥

पञ्चमोऽध्यायः।

अथातः कुष्ठनिदानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

प्रमेहमनु प्रागुत्पत्तौ कुष्ठोत्पादात् कुष्ठनिदानमुच्यते। वचनं हि— "हविःप्राशान्मेहकुष्ठयोः" (नि.अ.८) इति॥१-२॥

सप्त द्रव्याणि कुष्ठानां प्रकृतिर्विकृतिमापन्नानि भवन्ति। तद्यथा— त्रयो दोषा वातपित्तश्लेष्माणः प्रकोपणविकृताः, दूष्याश्च शरीरधातवस्त्वङ्मांसशोणितलसीकाश्चतुर्धा दोषोपघातविकृता इति। एतत् सप्तानां सप्तधातुकमेवङ्गतमाजननं कुष्ठानाम्, अतःप्रभवाण्यभिनिर्वर्तमानानि केवलं शरीरमुपतपन्ति॥३॥

सप्त द्रव्याणीति त्रयो दोषाश्चत्वारि दूष्याणि। प्रकृतिरिति कारणमित्यर्थः। सप्तद्रव्याणां विशेषणं— विकृतिमापन्नानीति। किंवा 'प्रकृतिविकृतिमापन्नानि' इति पाठः, तदा प्रकृत्या कुष्ठकारणेन विकृतिमापन्नानीत्यर्थः। एतेन च यदा कुष्ठजनकहेतुव्यतिरेकेण वातादीनां विकृतिर्भवति न तदा कुष्ठोत्पादो भवति, किन्तु विसर्पोत्पाद इति दर्शयति; विसर्पे हि "रक्तं लसीका त्वङ्मांसं दूष्यं दोषास्त्रयो मलाः। सर्व एव प्रकुप्यन्ति विसर्पाणां समुद्भवे" (चि.अ.२१) इति वचनादेत एव सप्त विकृताः कारणमित्युक्तम्। यद्यपि कुष्ठविसर्पयोर्दोषदूष्यकृतं साम्यमस्ति, तथाऽपि विसर्पणशीलेन रक्तप्रधानेन च दोषेण विसर्पजन्म, अन्यथा तु कुष्ठजन्मेति व्याधिभेदोत्पत्तिः। अत एव "विविधं सर्पति यतो विसर्पस्तेन सञ्ज्ञितः" (चि.अ.२१) इत्युक्तम्। तथा, विशिष्टशोणितदुष्टिवशादेव विसर्पे प्रबला वेदना भवति, तथा रक्तचिकित्सायाः प्राधान्योपदेशाच्च रक्तप्राधान्यं विसर्पे ज्ञेयम्। वचनं हि— "एकतस्तानि सर्वाणि रक्तमोक्षणमेकतः" (चि.अ.२१) इति। अन्ये तु ब्रुवते— विसर्पे नावश्यं दोषदूष्यसप्तकदुष्टिः, किन्तु सप्तानां तत्र दुष्टिर्योग्यतया दर्श्यते, कुष्ठे तु सर्वत्र प्रतिनियमेन सप्तकदुष्टिरिति। यथा कुष्ठारम्भका दोषाः कुप्यन्ति यथा च दूष्याणि, तदाह— तद्यथेत्यादि। प्रकोपणविकृता इति

कुष्ठनिदानप्रकोपणविकृताः; अन्यथा प्रकोपणवचनमनर्थकं स्यात्, विना प्रकोपणं व्याधिजनकविकृत्यभावात्। दोषोपघातविकृता इत्यनेन दोषोपघातादेव धातूनां विकृतिर्भवतीति दर्शयति, न दोषमन्तरा धातवो दूष्यन्तीत्यर्थः। किंवा, कुष्ठकारणानां धातूनां क्षयवृद्धिमात्ररूपविकृतिं निराकृत्य दोषाभिसम्बन्धरूपां दुष्टिं ग्राहयति। सप्तधातुकं सप्तधातुमेलकः। एवंगतमिति उक्तक्रमेण विकृतिं गतम्। आजननं कारणम्। अतःप्रभवाणीति एतत्कारणभूतानि। अभिनिर्वर्तमानानीति अभितः प्रसर्पमाणानि। केवलं कृत्स्नं दूष्यचतुष्टयातिरिक्तमपीत्यर्थः। एतेन, प्रथमोत्पत्तौ कुष्ठे चतुर्धातुदुष्टिनियमः, उत्पन्नस्य त्वस्थिसिरादिदूषणमपि भवतीति दर्शयति। तत्र **सुश्रुते** कुष्ठस्य प्रथमं त्वगाश्रयस्य पश्चादुत्तरोत्तरधातूनामनुगमनमुक्तम्— "एवं कुष्ठं समुत्पन्नं त्वचि कालप्रकर्षतः। क्रमेण धातून् व्याप्नोति" (सु.नि.अ.५) इत्यादिना ग्रन्थेन, तदिहाप्यविरुद्धमेव। येन, सर्वकुष्ठेषु प्रथमं त्वच्येव वैकृतं भवति विशेषेण, पश्चाद्वैशेषिकी दुष्टिः कालप्रकर्षाद्रक्तादिषु भवति। चतुर्धातुदुष्टिश्चेह कुष्ठोत्पादे सामान्यदुष्ट्यभिप्रायेणोक्ता, वैशेषिकी तु दुष्टिस्तेषां क्रमेणैव भवति। वैशेषिकदुष्टिश्चेह 'केवलं शरीरमुपतपन्ति' इति वचनाद्व्याख्येया। अत एव **सुश्रुते** वैशेषिकदुष्ट्यभिप्रायेणैव— "कण्डूर्विपूयकश्चैव कुष्ठे शोणितसंश्रये" (सु.नि.अ.५) इत्यादिना विशिष्टदुष्टिलक्षणमुक्तम्। इह तु या सामान्येन चतुर्धातुदुष्टिरुक्ता न सा तल्लक्षणयुक्ता, किन्तु कुष्ठोत्पादमात्रज्ञेया; तेन न विरोधः॥३॥

न च किञ्चिदस्ति कुष्ठमेकदोषप्रकोपनिमित्तम्, अस्ति तु खलु समानप्रकृतीनामपि कुष्ठानां दोषांशांशविकल्पानुबन्धस्थानविभागेन वेदनावर्णसंस्थानप्रभावनामचिकित्सितविशेषः। स सप्तविधोऽष्टादशविधोऽपरिसङ्ख्येयविधो वा भवति। दोषा हि विकल्पनैर्विकल्प्यमाना विकल्पयन्ति विकारान्, अन्यत्रासाध्यभावात्। तेषां विकल्पविकारसङ्ख्यानेऽतिप्रसङ्गमभिसमीक्ष्य सप्तविधमेव कुष्ठविशेषमुपदेक्ष्यामः॥४॥

सम्प्रति त्रिदोषजन्यत्वेऽपि सर्वकुष्ठानां यथा वातिकादिव्यपदेशो भवति तदाह— न च किञ्चिदित्यादि। समानप्रकृतीनामिति अवान्तरविकल्परहिततुल्यवातादिसप्तकारणानाम्, अवान्तरभेदाभावे हि कारणानां कार्यस्याप्येकरूपत्वमेव स्यात्। दोषांशांशविकल्पस्य तथा स्थानस्य च विभागेन वेदनाविशेषः कुष्ठे भवतीति वाक्यार्थः। दोषाणामंशमंशं प्रति विकल्पोंऽशांशविकल्पः; क्वचिद्वायुः स्वस्य रूक्षांशेन प्रकुपितो भवति, क्वचिच्छैत्यांशेनेत्यादि। तथा दोषदूष्यरूपस्थानविभागेन च वेदनाविशेषो भवति; वचनं हि— "तत्र रसादिस्थानेषु प्रकुपितानां दोषाणां यस्मिन् यस्मिन् स्थाने ये ये व्याधयो भवन्ति" (सू.अ.२८) इत्यादि। स्थानं च यद्यपि चतुर्विधदूष्यरूपमिह नियतं, तथाऽप्येष दोषस्यैव दूष्ये व्याप्त्यादिकृतः स्थानविभागो ज्ञेयः। तत्र वेदनाविशेषः— "कापालं तोदबहुलंः" (चि.अ.७) इत्यादि, वर्णविशेषः— "यत् काकणन्तिकावर्णं" (चि.अ.७) इत्यादि, संस्थानविशेषः— "यदृष्यजिह्वासंस्थानं" (चि.अ.७) इत्यादि, प्रभावविशेषः— साध्यतासाध्यतादि, नामविशेषः— कापाल इत्यादि। यतश्च समानेऽपि हि कारणे दोषांशांशबलविकल्पस्थानविभागेन वेदनादिविशेषः कुष्ठभेदकोऽस्ति, अतः सप्तविध इत्यादि योजनीयम्। सप्तविध इति अत्रैव वक्ष्यमाणमहाकुष्ठभेदेन, अष्टादशविधस्तु चिकित्सावक्ष्यमाणभेदेन, अपरिसङ्ख्येयस्तु वेदनाद्यवान्तरभेदेन। कुतोऽपरिसङ्ख्याता एव विकल्पा भवन्तीत्याह— दोषा हीत्यादि। विकल्पनैरिति विविधभेदविकल्पनैरंशांशविकल्पादिभिः, विकल्प्यमाना भिद्यमानाः, विकल्पयन्ति भेदयन्ति; व्याधिकारणदोषभेदात् कार्यस्यापि व्याधेर्भेदो बहुविधो भवतीति भावः। सोऽयं दोषभेदकृतो भेदोऽसाध्ये व्याधौ नेह क्रियत इत्याह— अन्यत्रेत्यादि। असाध्यमिह प्रत्याख्येयमभिप्रेतं, याप्यभेदो ह्यसाध्यस्य क्रियत एव यापनार्थम्। एवं मन्यते— प्रत्याख्येये व्याधौ सन्नपि दोषभेदकृतो भेदोऽचिकित्स्यत्वेन चिकित्साविशेषाप्रवर्तकत्वान्नेह क्रियते, साध्ये तु चिकित्साभेदार्थं क्रियत इति युक्तम्। सम्प्रतीतरप्रकारत्यागं सहेतुकं दर्शयन् सप्तविधाभिधानं प्रतिजानीते— तेषामित्यादि। विकल्पैः सर्वैर्विकारकथनं विकल्पविकारसङ्ख्यानम्। अतिप्रसङ्गमिति अत्यभिधानदोषप्रसङ्गम्। ननु, यदि सप्तविधकुष्ठेऽपरैकादशचिकित्सावक्ष्यमाणकुष्ठान्तर्भावो भवति, तदा सप्तविधत्वं तथाऽष्टादशविधत्वं चेति विधाद्वयं भवति; यथा ज्वराणामेकविधत्वद्विविधत्वादि, अत्र

हि सर्वास्वेव विधासु सर्वान्तर्भावोऽस्ति; न चेह सप्तमहाकुष्ठे क्षुद्रकुष्ठप्रवेशोऽस्ति, किञ्चैवं क्षुद्रकुष्ठाप्रवेशे कथमिहाचार्यो निदाने सप्तकुष्ठाभिधानेन कृती स्यात्? उच्यते— इह सप्तविधकुष्ठाभिधानेनैकदोषजद्विदोषजत्रिदोषजकुष्ठाभिधानं कृतं— 'वातेऽधिकतरे कापालकुष्ठं' इत्यादिना, न चैतत्प्रकारत्रयात् प्रकारान्तरं क्षुद्रकुष्ठानामप्यस्ति; तेन क्षुद्रकुष्ठेषु यत् कुष्ठं यद्दोषजं वक्तव्यं तस्येहोक्ततद्दोषलक्षणयुक्तत्वेनावरोधो व्याख्येयः, परं क्षुद्रकुष्ठे महाकुष्ठोक्तदोषलक्षणानामल्पत्वं भवतीति ज्ञेयम्। अत्र "चर्माख्यमेककुष्ठं तु किटिमं सविपादिकम्। कुष्ठं त्वलसकं ज्ञेयं प्रायो वातकफात्मकम्" (चि.अ.७) इत्यादि चिकित्सिते वक्ष्यमाणग्रन्थानुरोधात् क्षुद्रकुष्ठान्तर्भावो व्याख्येयः॥४॥

इह वातादिषु त्रिषु प्रकुपितेषु त्वगादींश्चतुरः प्रदूषयत्सु वातेऽधिकतरे कपालकुष्ठमभिनिर्वर्तते, पित्ते त्वौदुम्बरं, श्लेष्मणि मण्डलकुष्ठं, वातपित्तयोर्ऋष्यजिह्वं, पित्तश्लेष्मणोः पुण्डरीकं, श्लेष्ममारुतयोः सिध्मकुष्ठं, सर्वदोषाभिवृद्धौ काकणकमभिनिर्वर्तते; एवमेष सप्तविधः कुष्ठविशेषो भवति। स चैष भूयस्तरतमतः प्रकृतौ विकल्प्यमानायां भूयसीं विकारविकल्पसङ्ख्यामापद्यते॥५॥

कुष्ठानां कापालादिसञ्ज्ञाः कपालादिसादृश्यप्रयुक्तास्तथा शास्त्रव्यवहारसिद्धाश्च बोद्धव्याः; नहि सिध्मसञ्ज्ञायामन्वयोऽस्ति, तेन शास्त्रव्यवहारसिद्धैव सिध्मसञ्ज्ञा। प्रकृतौ विकल्प्यमानायामिति कुष्ठजनककारणे भिद्यमाने। विकल्पसङ्ख्या भेदरूपसङ्ख्या। इह च क्षुद्रकुष्ठानभिधानमुक्तन्यायेन महुकुष्ठान्तर्गतत्वादेवेति बोद्धव्यम्॥५॥

तत्रेदं सर्वकुष्ठनिदानं समासेनोपदेक्ष्यामः— शीतोष्णव्यत्यासमनानुपूर्व्योपसेवमानस्य तथा सन्तर्पणापतर्पणाभ्यवहार्यव्यत्यासं, मधुफाणितमत्स्यलकुचमूलककाकमाचीः सततमतिमात्रमजीर्णे च समश्नतः, चिलिचिमं च पयसा, हायनकयवकचीनकोद्दालककोरदूषप्रायाणि चान्नानि

क्षीरदधितक्रकोलकुलत्थमाषातसीकुसुम्भस्नेहवन्ति, एतैरेवातिमात्रं सुहितस्य च व्यवायव्यायामसन्तापानत्युपसेवमानस्य, भयश्रमसन्तापोपहतस्य च सहसा शीतोदकमवतरतः, विदग्धं चाहारजातमनुल्लिख्य विदाहीन्यभ्यवहरतः, छर्दिं च प्रतिघ्नतः, स्नेहांश्चातिचरतः, त्रयो दोषाः युगपत् प्रकोपमापद्यन्ते; त्वगादयश्चत्वारः शैथिल्यमापद्यन्ते; तेषु शिथिलेषु दोषाः प्रकुपिताः स्थानमधिगम्य सन्तिष्ठमानास्तानेव त्वगादीन् दूषयन्तः कुष्ठान्यभिनिर्वर्तयन्ति॥६॥

शीतोष्णव्यत्यासं शीतोष्णपरिवर्तनम्। अनानुपूर्व्यैति यथोक्तक्रमत्यागेन; क्रमत्यागश्चोष्णं निषेव्य सहसा शीतसेवा, तद्विपर्ययश्च; तथा अनुचिते काले शीतोष्णसेवा। एवं सन्तर्पणापतर्पणाभ्यवहार्यव्यत्यासमपि अनानुपूर्व्योपसेव्यमानस्येति ज्ञेयम्। चिलिचिमस्तन्त्रकृताऽऽत्रेयभद्रकाप्यीये दर्शितो रोहितभेदः। स्थानमधिगम्येति कुष्ठजननानुगुणं शिथिलत्वगादिस्थानं प्राप्य; किंवा स्थानमिति जनयितव्यकुष्ठशरीरदेशं प्राप्येत्यर्थः। सन्तिष्ठमाना इति वचनेन स्थिरा एव दोषाः कुष्ठजनका भवन्ति, न हि सरणशीलास्तु इति दर्शयति॥६॥

तेषामिमानि पूर्वरूपाणि भवन्ति; तद्यथा— अस्वेदनमतिस्वेदनं पारुष्यमतिश्लक्ष्णता वैवर्ण्यं कण्डूर्निस्तोदः सुप्तता परिदाहः परिहर्षो लोमहर्षः खरत्वमूष्मायणं गौरवं श्वयथुर्वीसर्पागमनमभीक्ष्णं च काये कायच्छिद्रेषूपदेहः पक्वदग्धदष्टभग्नक्षतोपस्खलितेष्वतिमात्रं वेदना स्वल्पानामपि च व्रणानां दुष्टिरसंरोहणं चेति॥७॥

अस्वेदनादिपूर्वरूपं प्रभावात्। परिहर्षो झिनझिनिका॥७॥

ततोऽनन्तरं कुष्ठान्यभिनिर्वर्तन्ते, तेषामिदं वेदनावर्णसंस्थानप्रभावनामविशेषविज्ञानं भवति; तद्यथा— रूक्षारुणपरुषाणि विषमविसृतानि खरपर्यन्तानि तनून्युद्वृत्तबहिस्तनूनि सुप्तवत्सुप्तानि

हृषितलोमाचितानि निस्तोदबहुलान्यल्पकण्डूदाहपूयलसीकान्याशुगतिसमुत्थानान्याशुभेदीनि जन्तुमन्ति कृष्णारुणकपालवर्णानि च कपालकुष्ठानीति विद्यात्(१);

ताम्राणि ताम्रखररोमराजीभिरवनद्धानि बहलानि बहुबहलपूयरक्तलसीकानि कण्डूक्लेदकोथदाहपाकवन्त्याशुगतिसमुत्थानभेदीनि ससन्तापक्रिमीणि पक्वोदुम्बरफल-वर्णान्यौदुम्बरकुष्ठानीति विद्यात्(२);

स्निग्धानि गुरूण्युत्सेधवन्ति श्लक्ष्णस्थिरपीतपर्यन्तानि शुक्लरक्तावभासानि शुक्लरोमराजीसन्तानानि बहुबहलशुक्लपिच्छिलस्रावीणि बहुक्लेदकण्डूक्रिमीणि सक्तगतिसमुत्थानभेदीनि परिमण्डलानि मण्डलकुष्ठानि विद्यात्(३);

परुषाण्यरुणवर्णानि बहिरन्तःश्यावानि नीलपीतताम्रावभासान्याशुगतिसमुत्थानान्यल्पकण्डूक्लेदक्रिमीणि दाहभेदनिस्तोद(पाक)बहुलानि शूकोपहतोपमवेदनान्युत्सन्नमध्यानि तनुपर्यन्तानि कर्कशपिडकाचितानि दीर्घपरिमण्डलान्यृष्यजिह्वाकृतीनि ऋष्यजिह्वानीति विद्यात् (४);

शुक्लरक्तावभासानि रक्तपर्यन्तानि रक्तराजीसिरासन्ततान्युत्सेधवन्ति बहुबहलरक्तपूयलसीकानि कण्डूक्रिमिदाहपाकवन्त्याशुगतिसमुत्थानभेदीनि पुण्डरीकपलाशसङ्काशानि पुण्डरीकाणीति विद्यात् (५);

परुषारुणानि विशीर्णबहिस्तनून्यन्तःस्निग्धानि शुक्लरक्तावभासानि बहून्यल्पवेदनान्यल्पकण्डूदाहपूयलसीकानि लघुसमुत्थानान्यल्पभेदक्रिमीण्यलाबुपुष्पसङ्काशानि सिध्मकुष्ठानीति विद्यात् (६);

काकणन्तिकावर्णान्यादौ पश्चात्तु सर्वकुष्ठलिङ्गसमन्वितानि पापीयसा सर्वकुष्ठलिङ्गसम्भवेनानेकवर्णानि काकणानीति विद्यात्। तान्यसाध्यानि, साध्यानि पुनरितराणि॥८॥

उद्वृत्तबहिस्तनूनीति उच्छलीकृतबाह्यदेहानि। सुप्तवत् सुप्तानि अत्यर्थास्पर्शज्ञानीत्यर्थः। कपालः स्थाल्यादिखण्डः। सक्तानि चिरभावीनि गत्यादीनि येषां ते तथा। ऋष्यजिह्वलक्षणे बहिरिति कुष्ठपर्यन्ते, अन्तरिति विकृतमध्यमुच्यते। ऋष्यो हरिणविशेषः। पुण्डरीकपलाशशब्देन पद्मपुष्पदलमिह। विशीर्णबहिस्तनूनीत्यत्र तनुशब्दः प्रदेशे वर्तते; तेन विशीर्णपर्यन्तदेशानीत्यर्थः। सिध्मकुष्ठं यथोक्तलक्षणं सिध्मपुष्पिकाव्यतिरिक्तमेव ब्रुवते; सिध्मपुष्पिकाभिप्रायेण च **सुश्रुत** सिध्मकुष्ठं क्षुद्रकुष्ठेषु पठितम्। दद्रु तु **सुश्रुते** महाकुष्ठे पठितमपीह क्षुद्रकुष्ठे पठितमुत्तरोत्तरधात्वनुप्रवेशाभावात् तथाऽत्यर्थपीडारहितत्वाच्च, **सुश्रुते** तु तदनुबन्धित्वप्रकर्षान्महाकुष्ठे पठितम्। सर्वकुष्ठलिङ्गसमन्वितानीत्येतेतावतैवार्थे लब्धे पुनः पापीयसा सर्वकुष्ठलिङ्गसम्भवेनेतिवचनाद्यदेव पापीयः कुष्ठलिङ्गं, तदेव काकणके भवति नान्यदिति दर्शयति। पापीयसेति अत्यर्थपीडाकृता। किंवा पापीयसेत्यादिपुनर्वचनेन सर्वकुष्ठलिङ्गानां काकणके पापारब्धत्वेनासाध्यतामत्यर्थपीडाकर्तृतां च दर्शयति॥८॥

तत्र यदसाध्यं तदसाध्यतां नातिवर्तते, साध्यं पुनः किञ्चित् साध्यतामतिवर्तते कदाचिदपचारात्। साध्यानि हि षट् काकणकवर्ज्यान्यचिकित्स्यमानान्यपचारतो वा दोषैरभिष्यन्दमानान्य-साध्यतामुपयान्ति॥९॥

कदाचिदित्यनेनाग्रे वक्ष्यमाणसचिकित्स्यमानतापक्षान्तरं दर्शयति। अपचारतो वेति उत्पन्नेऽपि कुष्ठे निदानसेवनात्। अभिष्यन्दमानानीति आपूर्यमाणानि॥९॥

साध्यानामपि ह्युपेक्ष्यमाणानां त्वङ्मांसशोणितलसीकाकोथक्लेदसंस्वेदजाः क्रिमयोऽभिमूर्च्छन्ति; ते भक्षयन्तस्त्वगादीन् दोषाः पुनर्दूषयन्त इमानुपद्रवान् पृथक् पृथगुत्पादयन्ति— तत्र वातः

श्यावारुणवर्णं परुषतामपि च रौक्ष्यशूलशोषतोदवेपथुहर्षसङ्कोचायासस्तम्भसुप्तिभेदभङ्गान्, पित्तं दाहस्वेदक्लेदकोथस्रावपाकरागान्, श्लेष्मा त्वस्य श्वैत्यशैत्यकण्डूस्थैर्यगौरवोत्सेधोपस्नेहोपलेपान्, क्रिमयस्तु त्वगादींश्चतुरः सिराः स्नायूश्चास्थीन्यपि च तरुणान्याददते॥१०॥

अस्यां चैवावस्थायामुपद्रवाः कुष्ठिनं स्पृशन्ति; तद्यथा— प्रस्रवणमङ्गभेदः पतनान्यङ्गावयवानां तृष्णाज्वरातीसारदाहदौर्बल्यारोचकाविपाकाश्च, तथाविधमसाध्यं विद्यादिति॥११॥

दोषाः पुनर्दूषयन्त इति त्वगादीनेव। तरुणानीति कोमलानि नासास्थ्यादीनि। आददते भक्षयन्ति॥१०-११॥

भवन्ति चात्र—

साध्योऽयमिति यः पूर्वं नरो रोगमुपेक्षते।
स किञ्चित्कालमासाद्य मृत एवावबुध्यते॥१२॥
यस्तु प्रागेव रोगेभ्यो रोगेषु तरुणेषु वा।
भेषजं कुरुते सम्यक् स चिरं सुखमश्नुते॥१३॥
यथा ह्यल्पेन यत्नेन छिद्यते तरुणस्तरुः।
स एवातिप्रवृद्धस्तु छिद्यतेऽतिप्रयत्नतः॥१४॥
एवमेव विकारोऽपि तरुणः साध्यते सुखम्।
विवृद्धः साध्यते कृच्छ्रादसाध्यो वाऽपि जायते॥१५॥

तत्र श्लोकः—

सङ्ख्या द्रव्याणि दोषाश्च हेतवः पूर्वलक्षणम्।
रूपाण्युपद्रवाश्चोक्ताः कुष्ठानां कौष्ठिके पृथक्॥१६॥

किञ्चित्कालमिति असाध्यव्याधिकालम्। मृत एवेति मरणोपकण्ठगतः। अवबुध्यत इत्यत्र 'साध्यव्याध्युपेक्षाफलं मृत्युम्' इति शेषः॥१२-१६॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते निदानस्थाने कुष्ठनिदानं नाम पञ्चमोऽध्यायः॥५॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां निदानस्थाने कुष्ठनिदानं नाम पञ्चमोऽध्यायः॥५॥

षष्ठोऽध्यायः।

अथातः शोषनिदानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

ज्वरनिदानोक्तसम्बन्धाद्राजयक्ष्मनिदानमुच्यते॥१-२॥

इह खलु चत्वारि शोषस्यायतनानि भवन्ति; तद्यथा— साहसं सन्धारणं क्षयो विषमाशनमिति॥३॥

आयतनानीति कारणानि। सङ्ख्येयसाहसादिनिर्देशादेव सङ्ख्यायां लब्धायां चत्वारीति पुनर्वचनं साहसादीनामवान्तरबलवद्विग्रहादिभेदेऽप्येकजातीयताप्रतिपादनार्थम्॥३॥

तत्र साहसं शोषस्यायतनमिति यदुक्तं तदनुव्याख्यास्यामः— यदा पुरुषो दुर्बलो हि सन् बलवता सह विगृह्णाति, अतिमहता वा धनुषा व्यायच्छति, जल्पति वाऽप्यतिमात्रम्, अतिमात्रं वा भारमुद्वहति, अप्सु वा प्लवते चातिदूरम्, उत्सादनपदाघातने वाऽतिप्रगाढमासेवते, अतिप्रकृष्टं वाऽध्वानं द्रुतमभिपतति, अभिहन्यते वा, अन्यद्वा किञ्चिदेवंविधं विषममतिमात्रं वा व्यायामजातमारभते, तस्यातिमात्रेण कर्मणोरः क्षण्यते। तस्योरः क्षतमुपप्लवते वायुः। स तत्रावस्थितः श्लेष्माणमुरःस्थमुपसङ्गृह्य पित्तं च दूषयन् विहरत्यूर्ध्वमधस्तिर्यक् च। तस्य योंऽशः शरीरसन्धीनाविशति तेनास्य जृम्भाऽङ्गमर्दो ज्वरश्चोपजायते, यस्त्वामाशयमभ्युपैति तेन रोगा भवन्ति उरस्या अरोचकश्च, यः कण्ठमभिप्रपद्यते कण्ठस्तेनोद्ध्वंस्यते स्वरश्चावसीदति, यः प्राणवहानि स्रोतांस्यन्वेति तेन श्वासः प्रतिश्यायश्च जायते, यः शिरस्यवतिष्ठते शिरस्तेनोपहन्यते; ततः क्षणनाच्चैवोरसो विषमगतित्वाच्च वायोः कण्ठस्य चोद्ध्वंसनात् कासः सततमस्य सञ्जायते, स

कासप्रसङ्गादुरसि क्षते शोणितं ष्ठीवति, शोणितागमनाच्चास्य दौर्बल्यमुपजायते; एवमेते साहसप्रभवाः साहसिकमुपद्रवाः स्पृशन्ति। ततः स उपशोषणैरेतैरुपद्रवैरुपद्रुतः शनैः शनैरुपशुष्यति। तस्मात् पुरुषो मतिमान् बलमात्मनः समीक्ष्य तदनुरूपाणि कर्माण्यारभेत कर्तुं; बलसमाधानं हि शरीरं, शरीरमूलश्च पुरुष इति॥४॥

भवति चात्र—

साहसं वर्जयेत् कर्म रक्षञ्जीवितमात्मनः।
जीवन् हि पुरुषस्त्विष्टं कर्मणः फलमश्नुते॥५॥

पदाघातनं पद्भ्यामुन्मर्दनम्। अतिप्रकृष्टमिति अतिदूरम्। उरःक्षतमुपप्लवते व्याप्नोतीत्यर्थः। उरःस्थमिति स्वभावादेवोरःस्थम्। उरस्या इति उरोगता हृद्द्रवशूलादयः। आमाशयगतेन चोरस्यरोगकरणमुरसोऽप्यामाशयप्रत्यासन्नत्वात्। बलेन सम्यगाधीयते धार्यत इति बलसमाधानं शरीरम्। शरीरमूलश्च पुरुष इति संयोगपुरुष इत्यर्थः॥४-५॥

सन्धारणं शोषस्यायतनमिति यदुक्तं तदनुव्याख्यास्यामः— यदा पुरुषो राजसमीपे भर्तुः समीपे वा गुरोर्वा पादमूले द्यूतसभमन्यं वा सतां समाजं स्त्रीमध्यं वा समनुप्रविश्य यानैर्वाऽप्युच्चावचैरभियान् भयात् प्रसङ्गाद्ध्रीमत्त्वाद्घृणित्वाद्वा निरुणद्ध्यागतान् वातमूत्रपुरीषवेगान् तदा तस्य सन्धारणाद्वायुः प्रकोपमापद्यते, स प्रकुपितः पित्तश्लेष्माणौ समुदीर्योर्ध्वमधस्तिर्यक् च विहरति; ततश्चांशविशेषेण पूर्ववच्छरीरावयवविशेषं प्रविश्य शूलमुपजनयति, भिनत्ति पुरीषमुच्छोषयति वा, पार्श्वे चातिरुजति, अंसाववमृद्नाति, कण्ठमुरश्चावधमति, शिरश्चोपहन्ति, कासं श्वासं ज्वरं स्वरभेदं प्रतिश्यायं चोपजनयति; ततः स उपशोषणैरेतैरुपद्रवैरुपद्रुतः शनैः शनैरुपशुष्यति। तस्मात् पुरुषो

मतिमानात्मनः शारीरेष्वेव योगक्षेमकरेषु प्रयतेत विशेषेण; शरीरं ह्यस्य मूलं, शरीरमूलश्च पुरुषो भवति॥६॥

भवति चात्र—

सर्वमन्यत् परित्यज्य शरीरमनुपालयेत्।
तदभावे हि भावानां सर्वाभावः शरीरिणाम्॥७॥

समाजमिति सभाम्। उच्चावचैरिति उच्चनीचैः। अभियानिति गच्छन्। भयादित्यादि राजसमीपादीषु यथायोग्यतया बोद्धव्यम्। योगेन ये क्षेमकरास्ते योगक्षेमकराः, ते चेह मूत्रपुरीषाविधारणादयः। विशेषेणेतिवचनाच्छारीरेष्वेव विशेषेण यत्नं कुर्यान्मानसयोगक्षेमापेक्षयेति दर्शयति। आत्मन इति पदं परशरीरयोगक्षेमापेक्षया स्वशरीरयोगक्षेमकरणस्योपादेयतादर्शनार्थम्। अथ कथं मानसयोगक्षेमापेक्षया तथा परशरीरयोगक्षेमापेक्षया स्वशरीरयोगक्षेमः श्रेष्ठ इत्याह— शरीरमित्यादि। अस्य पुरुषस्य। सर्वपुरुषार्थेषु कर्तव्येषु यस्माच्छरीरं मूलमिति कारणं, तस्मात् स्वशरीरयोगक्षेममेवाचरेद्विशेषेण, पश्चात् परशरीरमानसयोगक्षेममित्यर्थः। स्वशरीरे ह्युपहते परशरीरोपकारस्तथाऽध्यात्मिकशुभचिन्ता च व्याकुला भवतीति भावः। किंवा, योगाः शरीरस्य बलवर्णाद्युत्कर्षयोगाः, क्षेमाश्चानागताबाधप्रतिषेधाः, तेषु। ननु यद्येवमाध्यात्मिकेऽपि भावे शरीरं मूलं, तत् किं पुरुषोऽप्रधानमेव? नेत्याह— शरीरमूलश्च पुरुष इति। शरीरस्याप्युत्पत्तौ धर्माधर्मसहायो भोक्ता सुखदुःखानामात्मा मूलं कारणमित्यर्थः। मूलशब्दश्चायं भावप्रधानः; तेन शरीरमूलत्वं यस्यात्मनः स 'शरीरमूलः' इति पुंलिङ्गनिर्देश उपपन्नः। सर्वाभाव इति धर्मादिचतुर्वर्गाभाव इत्यर्थः॥६-७॥

क्षयः शोषस्यायतनमिति यदुक्तं तदनुव्याख्यास्यामः— यदा पुरुषोऽतिमात्रं शोकचिन्तापरिगतहृदयो भवति, ईर्ष्योत्कण्ठाभयक्रोधादिभिर्वा समाविश्यते, कृशो वा सन् रूक्षान्नपानसेवी भवति, दुर्बलप्रकृतिरनाहारोऽल्पाहारो वा भवति, तदा तस्य हृदयस्थायी रसः क्षयमुपैति; स तस्योपक्षयाच्छोषं प्राप्नोति, अप्रतीकाराच्चानुबध्यते यक्ष्मणा यथोपदेक्ष्यमाणरूपेण (१);

हृदयस्थायी रस इति धातुरूपोऽन्नरसपोष्य इत्यर्थः; अन्ये तु, हृदयस्थायी रस इति ओजो ब्रुवते। यथोपदेक्ष्यमाणरूपेणेति 'सन्धयः शिथिलीभवन्ति' इत्यादिग्रन्थवक्ष्यमाणलक्षणेन॥(१)॥

यदा वा पुरुषोऽतिहर्षादतिप्रसक्तभावः स्त्रीष्वतिप्रसङ्गमारभते, तस्यातिमात्रप्रसङ्गाद्रेतः क्षयमेति। क्षयमपि चोपगच्छति रेतसि यदि मनः स्त्रीभ्यो नैवास्य निवर्तते, तस्य चातिप्रणीतसङ्कल्पस्य मैथुनमापद्यमानस्य न शुक्रं प्रवर्ततेऽतिमात्रोपक्षीणरेतस्त्वात्, तथाऽस्य वायुर्व्यायच्छमानशरीरस्यैव धमनीरनुप्रविश्य शोणितवाहिनीस्ताभ्यः शोणितं प्रच्यावयति, तच्छुक्रक्षयादस्य पुनः शुक्रमार्गेण शोणितं प्रवर्तते वातानुसृतलिङ्गम्। अथास्य शुक्रक्षयाच्छोणितप्रवर्तनाच्च सन्धयः शिथिलीभवन्ति, रौक्ष्यमुपजायते, भूयः शरीरं दौर्बल्यमाविशति, वायुः प्रकोपमापद्यते; स प्रकुपितो वशिकं शरीरमनुसर्पन्नुदीर्य श्लेष्मपित्ते परिशोषयति मांसशोणिते, प्रच्यावयति श्लेष्मपित्ते संरुजति पार्श्वे, अवमृद्नात्यंसौ, कण्ठमुद्ध्वंसति, शिरः श्लेष्माणमुपक्लेश्य प्रतिपूरयति श्लेष्मणा, सन्धींश्च प्रपीडयन् करोत्यङ्गमर्दमरोचकाविपाकौ च, पित्तश्लेष्मोत्क्लेशात् प्रतिलोमगत्वाच्च वायुर्ज्वरं कासं श्वासं स्वरभेदं प्रतिश्यायं चोपजनयति; स कासप्रसङ्गादुरसि क्षते शोणितं ष्ठीवति, शोणितगमनाच्चास्य दौर्बल्यमुपजायते, ततः स उपशोषणैरेतैरुपद्रवैरुपद्रुतः शनैः शनैरुपशुष्यति। तस्मात् पुरुषो मतिमानात्मनः शरीरमनुरक्षञ्छुक्रमनुरक्षेत्। परा ह्येषा फलनिर्वृत्तिराहारस्येति॥८॥

भवति चात्र—

आहारस्य परं धाम शुक्रं तद्रक्ष्यमात्मनः।

क्षयो ह्यस्य बहून् रोगान्मरणं वा नियच्छति॥९॥

सम्प्रति क्षयेषु शोषकारणेषु प्रायः शोषजनकत्वेन प्रधानं शुक्रक्षयं शोषकारणं यदा वेत्यादिना प्राह। अतिप्रणीतसङ्कल्पस्येति अतिमहता प्रयत्नेन कृतध्वजोच्छ्रायस्य। व्यायच्छमानस्येति व्यवायमाचरतः। वातानुसृतलिङ्गमिति वातलिङ्गयुक्तं दुष्टवातलिङ्गयुक्तमिति यावत्। शरीरं कर्मभूतं, दौर्बल्यं कर्तृभूतम्, आविशतीति योजना। वशिकमिति शून्यं, शुक्रशोणितक्षयाद्रिक्तमित्यर्थः; एतच्च हेतुगर्भविशेषणम्; एतेन यस्माद्वशिकं शरीरं, तस्मादनुसर्पतीत्यर्थः। परा फलनिर्वृत्तिरिति श्रेष्ठा आहारफलसम्पत्तिरित्यर्थः। परं धाम इति उत्कृष्टसारम्; उत्कृष्टत्वं च शुक्रस्यातिप्रसादरूपत्वात्। एतच्च शोषकारणेषु क्षयेषु केवलशुक्रक्षयोपसंहरणं प्राधान्यात्, नान्यशोषहेत्वभावादिति बोद्धव्यम्। रूक्षाद्यन्नपानसेवाजनितो रक्तादिक्षयोऽपि राजयक्ष्मकारणत्वेनोक्तः॥८-९॥

विषमाशनं शोषस्यायतनमिति यदुक्तं, तदनुव्याख्यास्यामः— यदा पुरुषः पानाशनभक्ष्यलेह्योपयोगान् प्रकृतिकरणसंयोगराशिदेशकालोपयोगसंस्थोपशयविषमानासेवते, तदा तस्य तेभ्यो वातपित्तश्लेष्माणो वैषम्यमापद्यन्ते; ते विषमाः शरीरमनुसृत्य यदा स्रोतसामयनमुखानि प्रतिवार्यावतिष्ठन्ते तदा जन्तुर्यद्यदाहारजातमाहरति तत्तदस्य मूत्रपुरीषमेवोपजायते भूयिष्ठं नान्यस्तथा शरीरधातुः; स पुरीषोपष्टम्भाद्वर्तयति, तस्माच्छुष्यतो विशेषेण पुरीषमनुरक्ष्यं तथाऽन्येषामतिकृशदुर्बलानां; तस्यानाप्यायमानस्य विषमाशनोपचिता दोषाः पृथक् पृथगुपद्रवैर्युञ्जन्तो भूयः शरीरमुपशोषयन्ति। तत्र वातः शूलमङ्गमर्दं कण्ठोद्ध्वंसनं पार्श्वसंरुजनमंसावमर्दं स्वरभेदं प्रतिश्यायं चोपजनयति; पित्तं ज्वरमतीसारमन्तर्दाहं च; श्लेष्मा तु प्रतिश्यायं शिरसो गुरुत्वमरोचकं कासं च, स कासप्रसङ्गादुरसि क्षते शोणितं निष्ठीवति, शोणितगमनाच्चास्य दौर्बल्यमुपजायते। एवमेते विषमाशनोपचितास्त्रयो दोषा राजयक्ष्माणमभिनिर्वर्तयन्ति। स तैरुपशोषणैरुपद्रवैरुपद्रुतः शनैः शनैः

शुष्यति। तस्मात् पुरुषो मतिमान् प्रकृतिकरणसंयोगराशिदेशकालोपयोगसंस्थोपशयाद-विषममाहारमाहरेत्॥१०॥

भवति चात्र—

हिताशी स्यान्मिताशी स्यात्कालभोजी जितेन्द्रियः।
पश्यन् रोगान् बहून् कष्टान् बुद्धिमान् विषमाशनात्॥११॥

प्रकृतिकरणादयो रसविमाने प्रपञ्चनीयाः। अत्र चोपशयशब्देन उपयोक्ता यो रसविमाने वक्तव्यः स एव गृह्यते। यतस्तत्रोक्तं— "उपयोक्ता पुनर्यस्तमाहारमाहरति, यदायत्तमोकसात्म्यम्" (वि.अ.१) इति। अनेन हि तत्रोपयोक्तृपरीक्षया सात्म्यमेव परीक्ष्यत इत्युक्तम्। अयनमुखानीति गतिद्वाराणि; अयनं गतिः। परिवार्येति अवरुध्य। तथा सर्वेषामत्यर्थकृशदुर्बलानां पुरीषमनुरक्ष्यमिति योजना। एनमेव चार्थं वक्ष्यति— "शोषी मुञ्चति गात्राणि पुरीषस्रंसनादति(पि)। सर्वधातुक्षयार्तस्य बलं तस्य हि विड्बलम्" (चि.अ.८) इति। कासप्रसङ्गादिति कासातिसम्बन्धादित्यर्थः॥१०-११॥

एतैश्चतुर्भिः शोषस्यायतनैरुपसेवितैर्वातपित्तश्लेष्माणः प्रकोपमापद्यन्ते। ते प्रकुपिता नानाविधैरुपद्रवैः शरीरमुपशोषयन्ति। तं सर्वरोगाणां कष्टतमत्वाद्राजयक्ष्माणमाचक्षते भिषजः; यस्माद्वा पूर्वमासीद्भगवतः सोमस्योडुराजस्य तस्माद्राजयक्ष्मेति॥१२॥

कष्टतमत्वादित्यत्र चकारो लुप्तनिर्दिष्टो द्रष्टव्यः; तेन कष्टतमत्वाच्च तथा चन्द्रमसः प्रागुत्पन्नत्वाच्चेति हेतुद्वयं ज्ञेयम्। यदा कष्टतमत्वात्तदा 'राजेव यक्ष्मा राजयक्ष्मेति' निरुक्तिर्बोद्धव्या। उडुराजस्येति वचनाद् राजसञ्ज्ञत्वं सोमस्य दर्शयति; ततश्च 'राज्ञो यक्ष्मा राजयक्ष्मा' इति निरुक्तिर्भवति॥१२॥

तस्येमानि पूर्वरूपाणि भवन्ति; तद्यथा— प्रतिश्यायः, क्षवथुरभीक्ष्णं, श्लेष्मप्रसेकः, मुखमाधुर्यम्, अनन्नाभिलाषः, अन्नकाले चायासः, दोषदर्शनमदोषेष्वल्पदोषेषु वा भावेषु पात्रोदकान्नसूपापूपोपदंशपरिवेशकेषु, भुक्तवतश्चास्य हृल्लासः, तथोल्लेखनमप्याहारस्यान्तरान्तरा, मुखस्य पादयोश्च शोफः, पाण्योश्चावेक्षणमत्यर्थम्, अक्ष्णोः श्वेतावभासता चातिमात्रं, बाह्वोश्च प्रमाणजिज्ञासा, स्त्रीकामता, निर्घृणित्वं, बीभत्सदर्शनता चास्य काये, स्वप्ने चाभीक्ष्णं दर्शनमनुदकानामुदकस्थानानां शून्यानां च ग्रामनगरनिगमजनपदानां शुष्कदग्धभग्नानां च वनानां कृकलासमयूरवानरशुकसर्पकाकोलूकादिभिः संस्पर्शनमधिरोहणं यानं वा श्वोष्ट्रखरवराहैः केशास्थिभस्मतुषाङ्गारराशीनां चाधिरोहणमिति (शोषपूर्वरूपाणि भवन्ति)॥१३॥

पूर्वरूपेषु प्रतिश्यायादिः प्रायः कफयुक्तपूर्वरूपोत्पादो वायुनाऽपि प्रधानेन क्रियमाणे शोषे उरःस्थश्लेष्मसंसर्गाद्बोद्धव्यः; यतश्च प्रायेण कफोऽत्र स्थानमहिम्ना प्रकुपितो भवति, तेन शोषं कफप्रधानलिङ्गत्वेन श्लेष्मरोग इति च ब्रुवते। अदोषेष्विति पात्रादिविशेषणम्। पाण्योश्चावेक्षणादिपूर्वरूपं प्रभावात्। बीभत्सदर्शनता काय इति कायस्य विवर्णविगन्धत्वादिना। निगमो नगरविशेषो बहुवसतिः; जनपदं मण्डलम्। अधिरोहणं चेति कृकलासादीनामेव शरीराधिरोहणम्। स्वप्ने श्वोष्ट्रखरगमनं चेहादिङ्नियमेन बोद्धव्यं, तेन रिष्टं न भवति; यत्तु वक्ष्यति— "श्वभिरुष्ट्रैः खरैर्वाऽपि याति यो दक्षिणां दिशम्" इत्यादि, तद्दक्षिणदिङ्नियतत्वाद्रिष्टं ज्ञेयम्। यत्र पूर्वरूपं स्वप्नरूपमस्ति राजयक्ष्मोन्मादादौ तत्रोच्यते, ज्वरादौ त्वविद्यमानत्वान्नोच्यते। यत्तु रिष्टं रिष्टाधिकारे ज्वरादीनां स्वप्नरूपं पूर्वरूपं वक्ष्यति— "प्रेतैः सह पिबेन् मद्यं" (इं.अ.५) इत्यादिना, तद्रिष्टमेव॥१३॥

अत ऊर्ध्वमेकादशरूपाणि तस्य भवन्ति; तद्यथा— शिरसः परिपूर्णत्वं, कासः, श्वासः, स्वरभेदः, श्लेष्मणश्छर्दनं, शोणितष्ठीवनं, पार्श्वसंरोजनम्, अंसावमर्दः, ज्वरः, अतीसारः, अरोचकश्चेति॥१४॥

एकादशरूपाणीतिवचनेन एकादशरूपाण्येव सम्पूर्णराजयक्ष्मणि भवन्तीति दर्शयति। कासश्वासादयश्च ये एकादशरूपा उदाहरणार्थं व्याख्याता न ते प्रतिनियमार्थं, तेन चिकित्सिते वक्ष्यमाणमेकादशरूपचतुष्टयं भिन्नलक्षणं न विरोधि॥१४॥

तत्रापरिक्षीणबलमांसशोणितो बलवानजातारिष्टः सर्वैरपि शोषलिङ्गैरुपद्रुतः साध्यो ज्ञेयः। बलवानुपचितो हि सहत्वाद्व्याध्यौषधबलस्य कामं सुबहुलिङ्गोऽप्यल्पलिङ्ग एव मन्तव्यः॥१५॥

अपरिक्षीणबलाभिधानेऽपि बलवानिति पदं सहजबलयुक्तत्वोपदर्शनार्थं; सहजबलो ह्युपक्षीणबलोऽप्यक्षीणबलवद्भवतीति भावः। सहत्वाद्व्याध्यौषधबलस्येति यस्माद्बलवान् व्याधिबलं तथौषधबलं च सहते, तेन न ताभ्याममभिभूयत इत्यर्थः। अल्पलिङ्ग एवेति अल्पलिङ्ग इव सुखसाध्य इत्यर्थः॥१५॥

दुर्बलं त्वतिक्षीणबलमांसशोणितमल्पलिङ्गमजातारिष्टमपि बहुलिङ्गं जातारिष्टं च विद्यात्, असहत्वाद्व्याध्यौषधबलस्य; तं परिवर्जयेत्, क्षणेनैव हि प्रादुर्भवन्त्यरिष्टानि, अनिमित्तश्चारिष्टप्रादुर्भाव इति॥१६॥

तत्र श्लोकः—

समुत्थानं च लिङ्गं च यः शोषस्यावबुध्यते।
पूर्वरूपं च तत्त्वेन स राज्ञः कर्तुमर्हति॥१७॥

बहुलिङ्गं जातारिष्टं च विद्यादिति बहुलिङ्गमिवासाध्यं तथा जातारिष्टमिव मारकं विद्यादित्यर्थः। ननु, रिष्टं विना मरणं नास्ति, वचनं हि— "मरणं चापि तन्नास्ति यन्नारिष्टपुरःसरम्" (इं.अ.२) इति, तत् कथमजातारिष्टो जातारिष्ट इवादूरमरणत्वेनेह ज्ञातव्य इत्याह— क्षणेन हीत्यादि। असाध्ये हि रिष्टं भवति, असाध्यता च बलमांसक्षयकृताऽस्त्येव; तेन, अवश्यं रिष्टेन भवितव्यमित्यर्थः। अथाजातारिष्टे

कारणासेवयाऽरिष्टं न भविष्यत्येवेत्याह— अनिमित्ततश्चारिष्टप्रादुर्भाव इति। न हि रिष्टं दृष्टं किञ्चित्कारणान्तरमपेक्षते, किन्त्वनिमित्तत एव भवति। तेन हेत्वसेवयाऽप्यरिष्टोत्पादो भविष्यतीति कृत्वा आश्वासः कर्तव्यः; किञ्चनिमित्तमेवारिष्टं भवति तेन रिष्टानुत्पादे सति नाश्वासः कर्तव्य इत्यर्थः॥ १६-१७॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते निदानस्थाने शोषनिदानं नाम षष्ठोऽध्यायः॥६॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां निदानस्थाने शोषनिदानं नाम षष्ठोऽध्यायः॥६॥

सप्तमोऽध्यायः।

अथात उन्मादनिदानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

औत्पादिकं शोषमभिधाय दक्षयज्ञे कुष्ठानन्तरोत्पन्नमुन्मादं ब्रूते। वचनं हि—"भयत्रासशोकैरुन्मादापस्माराणाम्" (नि.अ.८) इति॥१-२॥

इह खलु पञ्चोन्मादा भवन्ति; तद्यथा— वातपित्तकफसन्निपातागन्तुनिमित्ताः॥३॥

तत्र दोषनिमित्ताश्चत्वारः पुरुषाणामेवंविधानां क्षिप्रमभिनिर्वर्तन्ते; तद्यथा— भीरूणामुपक्लिष्टसत्त्वानामुत्सन्नदोषाणां समलविकृतोपहितान्यनुचितान्याहारजातानि वैषम्ययुक्तेनोपयोगविधिनोपयुञ्जानानां तन्त्रप्रयोगमपि विषममाचरतामन्याश्च शरीरचेष्टा विषमाः समाचरतामत्युपक्षीणदेहानां व्याधिवेगसमुद्भ्रमितानामुपहतमनसां वा कामक्रोधलोभ-हर्षभयमोहायासशोकचिन्तोद्वेगादिभिर्भूयोऽभिघाताभ्याहतानां वा मनस्युपहते बुद्धौ च प्रचलितायाम-भ्युदीर्णा दोषाः प्रकुपिता हृदयमुपसृत्य मनोवहानि स्रोतांस्यावृत्य जनयन्त्युन्मादम्॥४॥

उपक्लिष्टसत्त्वानामिति रजस्तमोभ्यामुपहतेचेतसाम्। उत्सन्नदोषाणामिति प्रवृद्धोद्भ्रान्तदोषाणाम्। समलैः अशुचिभिः, विकृतैः वैरोधिकैः, उपहितानि मिश्रीकृतानीति समलविकृतोपहितानि; किंवा समलैः मलिनैः, विकृतैः कुष्ठिव्यङ्गादिभिः परिजनैः, उपहितानि उपढौकितानीति समलविकृतोपहितानि। वैषम्ययुक्तेनोपयोगविधिनेति यः प्रकृतिकरणादिराहारोपयोगविधिर्वक्तव्यः, तेन वैषम्ययुक्तेन; वैषम्यं च प्रकृत्यादीनामशस्तत्वं प्रकृतिगुरुत्वादिभिः कृतं ज्ञेयम्। तन्त्रं शरीरं, तस्य

परिपालनार्थं सद्वृत्तोक्तः प्रयोगः; शरीरचेष्टाशब्देन तु गमनादि गृह्यते, तेन न पौनरुक्त्यम्। तन्त्रशब्दः शरीरे वर्तते; यदुक्तं— "तन्त्रयन्त्रेषु भिन्नेषु तमोऽन्त्यं प्रविविक्षताम्" (इ.अ.१२) इति। व्याधिवेगसमुद्भ्रमितानामिति व्याधिबलेनाप्रकृतिस्थितानाम्। उपहतमनसामिति कामादिभिः सम्बध्यते। भूय इति पुनः पुनः। उपसृत्येति व्याप्य॥३-४॥

उन्मादं पुनर्मनोबुद्धिसञ्ज्ञाज्ञानस्मृतिभक्तिशीलचेष्टाचारविभ्रमं विद्यात्॥५॥

उन्मादप्रत्यात्मलक्षणमाह— उन्मादं पुनरित्यादि। विभ्रममिति मनःप्रभृतिभिः प्रत्येकं सम्बध्यते। अत्र मनोविभ्रमाच्चिन्त्यानर्थान्न चिन्तयते, अचिन्त्यांश्च चिन्तयते; उक्तं हि— "मनसश्च चिन्त्यमर्थः" (सू.अ.८) इति। बुद्धिविभ्रमात्तु नित्यमनित्यमिति, प्रियं चाप्रियमिति पश्यति; वचनं हि— "विषमाभिनिवेशो यो नित्यानित्ये प्रियाप्रिये। ज्ञेयः स बुद्धिविभ्रंशः, समं बुद्धिर्हि पश्यति" (शा.अ.१) इति। सञ्ज्ञां ज्ञानं, तद्विभ्रमादग्न्यादिदाहं न बुध्यते; किंवा सञ्ज्ञा नामोल्लेखेन ज्ञानम्। स्मृतिविभ्रमात्तु न स्मरति, अयथावद्वा स्मरति। भक्तिरिच्छा, तद्विभ्रमाच्च यत्रेच्छा पूर्वमासीत्तत्रानिच्छा भवति। शीलविभ्रमादक्रोधनः क्रोधनो भवति। चेष्टाविभ्रमादनुचितचेष्टो भवति। आचारः शास्त्रशिक्षाकृतो व्यवहारः; तद्विभ्रमादशौचाद्याचरति॥५॥

तस्येमानि पूर्वरूपाणि; तद्यथा— शिरसः शून्यता, चक्षुषोराकुलता, स्वनः कर्णयोः, उच्छ्वासस्याधिक्यम्, आस्यसंस्रवणम्, अनन्नाभिलाषारोचकाविपाकाः, हृद्ग्रहः, ध्यानायाससम्मोहोद्वेगाश्चास्थाने, सततं लोमहर्षः, ज्वरश्चाभीक्ष्णम्, उन्मत्तचित्तत्वम्, उदर्दित्वम्, अर्दिताकृतिकरणं च व्याधेः, स्वप्ने चाभीक्ष्णं दर्शनं भ्रान्तचलितानवस्थितानां रूपाणामप्रशस्तानां च तिलपीडकचक्राधिरोहणं वातकुण्डलिकाभिश्चोन्मथनं निमज्जनं च कलुषाणामम्भसामावर्ते चक्षुषोश्चापसर्पणमिति (दोषनिमित्तानामुन्मादानां पूर्वरूपाणि भवन्ति)॥६॥

अस्थाने इत्यविषये; तेन अध्यानविषये ध्यानम्, असम्मोहविषये च मोह इत्यादि ज्ञेयम्। उन्मत्तचित्तत्वमिति उद्भ्रान्तचित्तत्वम्। उदर्दितत्वमिति ऊर्ध्वकाये पीडितत्वम्। अर्दिताकृतिकरणं च व्याधेरिति अर्दितस्य व्याधेराकृतिकरणं; तेनार्धवक्त्रभ्रमणादिकरणमित्यर्थः। किंवा व्याधेरिति प्रथमोक्तेन तस्येत्यनेन सम्बध्यते, तेन तस्य व्याधेर्बुद्ध्यादिभ्रमरूपस्योन्मादस्य यथोक्तानि पूर्वरूपाणीति योजना। चक्षुषोश्चापसर्पणमिति चक्षुर्व्यपगम इत्यर्थः॥६॥

ततोऽनन्तरमेवमुन्मादाभिनिर्वृत्तिरेव। तत्रेदमुन्मादविशेषविज्ञानं भवति; तद्यथा— परिसरणमजस्रम्, अक्षिभ्रुवौष्ठांसहन्वग्रहस्तपादाङ्गविक्षेपणमकस्मात्, सततमनियतानां च गिरामुत्सर्गः, फेनागमनमास्यात्, अभीक्ष्णं स्मितहसितनृत्यगीतवादित्रसम्प्रयोगाश्चास्थाने, वीणावंशशङ्खशम्यातालशब्दानुकरणमसाम्ना, यानमयानैः, अलङ्करणमनलङ्कारिकैर्द्रव्यैः, लोभश्चाभ्यवहार्येष्वलब्धेषु, लब्धेषु चावमानस्तीव्रमात्सर्यं च, कार्श्यं, पारुष्यम्, उत्पिण्डितारुणाक्षता, वातोपशयविपर्यासादनुपशयता च; इति वातोन्मादलिङ्गानि भवन्ति(१);

अमर्षः, क्रोधः, संरम्भश्चास्थाने, शस्त्रलोष्टकशाकाष्ठमुष्टिभिरभिहननं स्वेषां परेषां वा, अभिद्रवणं, प्रच्छायशीतोदकान्नाभिलाषः, सन्तापश्चातिवेलं, ताम्रहरितहारिद्रसंरब्धाक्षता, पित्तोपशयविपर्यासादनुपशयता च; इति पित्तोन्मादलिङ्गानि भवन्ति(२);

स्थानमेकदेशे, तूष्णींभावः, अल्पशश्चङ्क्रमणं, लालाशिङ्घाणकस्रवणम्, अनन्नाभिलाषः, रहस्कामता, बीभत्सत्वं, शौचद्वेषः, स्वप्ननित्यता, श्वयथुरानने, शुक्लस्तिमितमलोपदिग्धाक्षत्वं, श्लेष्मोपशयविपर्यासादनुपशयता च; इति श्लेष्मोन्मादलिङ्गानि भवन्ति(३);

त्रिदोषलिङ्गसन्निपाते तु सान्निपातिकं विद्यात्; तमसाध्यमाचक्षते कुशलाः॥७॥

ततोऽनन्तरमेवेतिवचनात् पूर्वरूपानन्तरं शीघ्रमेवोन्मादो भवतीति दर्शयति; अन्ये रोगा यथा पूर्वरूपे भूतेऽपि चिरेण भवन्ति, न तथोन्माद इत्यर्थः। उन्मादविशेषविज्ञानमिति वाताद्युन्मादलिङ्गमित्यर्थः। परिसरणं भ्रमणम्। शम्या दक्षिणहस्तेन वादनं, तालस्तु वामहस्तेन वादनं; यदुक्तं **विशाखिना**— "शम्या दक्षिणहस्तेन, वामहस्तेन तालकः। उभाभ्यां वादनं यत्तु सन्निपातः स उच्यते" इति। असाम्नेति उच्चैः। अयानैरिति हस्त्यादियानव्यतिरिक्तैः। लब्धेषु चावमान इति प्राप्तेष्वभ्यवहार्येष्वाहार्येष्वनुपयोगोऽवधीरणं च; न केवलमवमानः, किन्तु तीव्रं मात्सर्यं च; अभ्यवहार्यं लब्ध्वा न कस्यचिद्दातुमिच्छतीत्यर्थः। वाते उपशय उपशयहेतुः स्नेहादिर्वातोपशयः, तस्य विपर्यासो रूक्षादिः, तेनानुपशयिता असुखमित्यर्थः। चकाराद्वातानुगुणस्नेहाद्युपशयता च गृह्यते। अमर्ष इत्यादि पित्तोन्मादलिङ्गम्। संरम्भ आरभटी। स्वेषामिति आत्मीयानाम्। कफोन्मादलिङ्गे रहो विजनम्॥७॥

साध्यानां तु त्रयाणां साधनानि— स्नेहस्वेदवमनविरेचनास्थापनानुवासनोपशमननस्तःकर्मधूमधूपनाञ्जनावपीडप्रधमनाभ्यङ्गप्रदेहपरिषेकानुलेपनवधबन्धनावरोधनवित्रासनविस्मापनविस्मारणापतर्पणसिराव्यधनानि, भोजनविधानं च यथास्वं युक्त्या, यच्चान्यदपि किञ्चिन्निदानविपरीतमौषधं कार्यं तदपि स्यादिति॥८॥

भवति चात्र—

उन्मादान् दोषजान् साध्यान् साधयेद्भिषगुत्तमः।
अनेन विधियुक्तेन कर्मणा यत् प्रकीर्तितम्॥९॥

अवरोधनं तमोग्रहावरोधनादि। विधियुक्तेनेति उन्मादचिकित्सिते प्रपञ्चवक्ष्यमाणविधियुक्तेनेत्यर्थः॥८-९॥

यस्तु दोषनिमित्तेभ्य उन्मादेभ्यः समुत्थानपूर्वरूपलिङ्गवेदनोपशयविशेषसमन्वितो भवत्युन्मादस्तमागन्तुकमाचक्षते। केचित् पुनः पूर्वकृतं कर्माप्रशस्तमिच्छन्ति तस्य निमित्तम्। तस्य च हेतुः प्रज्ञापराध एवेति भगवान् पुनर्वसुरात्रेयः। प्रज्ञापराधाद्ध्ययं देवर्षिपितृगन्धर्वयक्षराक्षसपिशाच-गुरुवृद्धसिद्धाचार्यपूज्यानवमत्याहितान्याचरति, अन्यद्वा किञ्चिदेवंविधं कर्माप्रशस्तमारभते; तमात्मना हतमुपघ्नन्तो देवादयः कुर्वन्त्युन्मत्तम्॥१०॥

केचित् पुनरित्यादौ 'तस्य निमित्तं' इतिपदमावृत्य पूर्वेण परेण च योजनीयम्। तत्र प्रज्ञापराध एव तस्य निमित्तमिति ब्रुवता अप्रशस्तप्राक्तनकर्मजन्यत्वं न प्रतिक्षिप्यते, यतः प्राक्तनमपि हि कर्म प्रज्ञापराधजमेव। किंवा, तस्य निमित्तं प्रज्ञापराध एवेत्यनेन तस्येत्यप्रशस्तकर्मणोऽपि प्रज्ञापराध एव कारणमिति दर्श्यते; तेन कर्मजस्य प्रज्ञापराधान्तर्निविष्टत्वमुच्यते। आत्मना हतमिति आत्मना कृतेनाशुभकर्मणा हतम्। उपघ्नन्त इत्यावेशं कुर्वन्तः॥१०॥

तत्र देवादिप्रकोपनिमित्तेनागन्तुकोन्मादेन पुरस्कृतस्येमानि पूर्वरूपाणि भवन्ति; तद्यथा—देवगोब्राह्मणतपस्विनां हिंसारुचित्वं, कोपनत्वं, नृशंसाभिप्रायता, अरतिः, ओजोवर्णच्छायाबलवपुषामुपतप्तिः, स्वप्ने च देवादिभिरभिभर्त्सनं प्रवर्तनं चेति; ततोऽनन्तरमुन्मादाभिनिर्वृत्तिः॥११॥

पुरस्कृतस्येति अभिशपनीयतया व्यवस्थापितस्य। नृशंसाभिप्रायता परापकाररुचित्वम्। ओजस उपतप्त्या ओजःकार्यबलादिरहितः। प्रवर्तनं प्रेरणम्॥११॥

तत्रायमुन्मादकराणां भूतानामुन्मादयिष्यतामारम्भविशेषो भवति; तद्यथा— अवलोकयन्तो देवा जनयन्त्युन्मादं, गुरुवृद्धसिद्धमहर्षयोऽभिशपन्तः, पितरो दर्शयन्तः, स्पृशन्तो गन्धर्वाः, समाविशन्तो यक्षाः, राक्षसास्त्वात्मगन्धमाघ्रापयन्तः, पिशाचाः पुनरारुह्य वाहयन्तः॥१२॥

दर्शयन्त इत्यत्र 'आत्मानम्' इति शेषः॥१२॥

तस्येमानि रूपाणि भवन्ति; तद्यथा— अत्यात्मबलवीर्यपौरुषपराक्रमग्रहणधारण-स्मरणज्ञानवचनविज्ञानानि, अनियतश्चोन्मादकालः॥१३॥

अत्यात्मशब्दो बलादिभिः प्रत्येकमभिसम्बध्यते। आत्मानमतिरिच्येति अत्यात्म; तेनात्माननुरूपबलादियोगो भवतीत्यर्थः॥१३॥

उन्मादयिष्यतामपि खलु देवर्षिपितृगन्धर्वयक्षराक्षसपिशाचानां गुरुवृद्धसिद्धानां वा एष्वन्तरेष्वभिगमनीयाः पुरुषा भवन्ति; तद्यथा— पापस्य कर्मणः समारम्भे, पूर्वकृतस्य वा कर्मणः परिणामकाले, एकस्य वा शून्यगृहवासे चतुष्पथाधिष्ठाने वा, सन्ध्यावेलायामप्रयतभावे वा पर्वसन्धिषु वा मिथुनीभावे, रजस्वलाभिगमने वा, विगुणे वाऽध्ययनबलिमङ्गलहोमप्रयोगे, नियमव्रतब्रह्मचर्यभङ्गे वा, महाहवे वा, देशकुलपुरविनाशे वा, महाग्रहोपगमने वा, स्त्रिया वा प्रजननकाले, विविधभूताशुभाशुचिस्पर्शने वा, वमनविरेचनरुधिरस्रावे, अशुचेरप्रयतस्य वा चैत्यदेवायतनाभिगमने वा, मांसमधुतिलगुडमद्योच्छिष्टे वा, दिग्वाससि वा, निशि नगरनिगमचतुष्पथोप-वनश्मशानाघातनाभिगमने वा, द्विजगुरुसुरयतिपूज्याभिधर्षणे वा, धर्माख्यानव्यतिक्रमे वा, अन्यस्य वा कर्मणोऽप्रशस्तस्यारम्भे, इत्यभिघातकाला व्याख्याता भवन्ति॥१४॥

पर्वसन्धिः अमावास्या पौर्णमासी च। दिग्वाससीति नग्ने। निशीत्यादौ पुनश्चतुष्पथवचनं निशि पुनरन्येन सहापि चतुष्पथगमनप्रदर्शनार्थम्; एकस्येत्यादौ तु दिवाऽप्येकस्य चतुष्पथगमनं ब्रुवते। धर्माख्यानव्यतिक्रम इति अविधिना धर्मप्रकाशने॥ १४॥

त्रिविधं तु खलून्मादकराणां भूतानामुन्मादने प्रयोजनं भवति; तद्यथा— हिंसा, रतिः, अभ्यर्चनं चेति। तेषां तं प्रयोजनविशेषमुन्मत्ताचारविशेषलक्षणैर्विद्यात्। तत्र हिंसार्थिनोन्माद्यमानोऽग्निं प्रविशति, अप्सु निमज्जति, स्थलाच्छ्वभ्रे वा पतति, शस्त्रकशाकाष्ठलोष्टमुष्टिभिर्हन्त्यात्मानम्, अन्यच्च प्राणवधार्थमारभते किञ्चित्, तमसाध्यं विद्यात्; साध्यौ पुनर्द्वावितरौ॥ १५॥

रतिः क्रीडा। अभ्यर्चनं पूजा। उन्मत्ताचारविशेषलक्षणैर्विद्यादिति उन्मत्तस्याचारविशेषरूपै-र्लक्षणैर्हिंसार्थाद्युन्मादितं विद्यात्। तत्र हिंसार्थिनोन्मादितो हिंसानुगुणमग्नि-प्रवेशाद्याचरति, रत्यर्थिना चोन्मादितः क्रीडार्थं प्रचरति, पूजार्थिना गृहीतो पूजां चेष्टते। इह च देवादिवचनेन देवाद्यनुचरा देवादिसधर्माणो ग्राह्याः, देवादयस्तु न मानुषानाविशन्ति। उक्तं हि **सुश्रुते**— “न ते मनुष्यैः सह संविशन्ति नवा मनुष्यान् क्वचिदाविशन्ति। ये त्वाविशन्तीति वदन्ति मोहात्ते भूतविद्याविषयादपोह्याः” (सु.उ.तं.अ.६१) इत्यादि। हिंसार्थिगृहीतस्यासाध्यत्वेन तद्विज्ञानार्थं सामान्योक्तान्यपि लक्षणानि शृङ्गग्राहिकया ब्रूते॥ १५॥

तयोः साधनानि मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमव्रतप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपात-गमनादीनि॥ १६॥

एवमेते पञ्चोन्मादा व्याख्याता भवन्ति॥ १७॥

तयोरित्यादौ गमनं देवतीर्थादिगमनम्॥१६-१७॥

ते तु खलु निजागन्तुविशेषेण साध्यासाध्यविशेषेण च प्रविभज्यमानाः पञ्च सन्तो द्वावेव भवतः। तौ च परस्परमनुबध्नीतः कदाचिद्यथोक्तहेतुसंसर्गात्। तयोः संसृष्टमेव पूर्वरूपं भवति, संसृष्टमेव च लिङ्गम्। तत्रासाध्यसंयोगं साध्यासाध्यसंयोगं चासाध्यं विद्यात्, साध्यं तु साध्यसंयोगम्। तस्य साधनं साधनसंयोगमेव विद्यादिति॥१८॥

ताविति तौ निजागन्तू। परस्परमनुबध्नीतः कदाचिदिति न सर्वदा। यथोक्तहेतुसंसर्गादिति निजागन्तुहेतुमेलकात्। तत्रेति निजागन्तुहेतुसंसर्गे। असाध्यसंयोगमिति यदा त्रिदोषजोन्मादे हिंसार्थिना देवादिनाऽनुबन्धो भवति, तदाऽसाध्ययोः संयोगो भवति। साध्यासाध्यसंयोगस्तु एकदोषजे उन्मादे हिंसार्थ्युन्मादयोगात्तथा रत्यर्थोन्मादे त्रिदोषोन्मादानुबन्धाच्चेत्यादि ज्ञेयम्। साध्यसंयोगस्य साध्यरूपतयैव साध्यतायां सिद्धायां पुनः साध्यमितिवचनं साध्यरूपविकारान्तरसम्बन्धे विकारभूयस्त्वेनासाध्यशङ्काप्रतिषेधार्थम्। साधनसंयोगमेवेति निजागन्तुसाधनमेलकमित्यर्थः॥१८॥

भवन्ति चात्र—

नैव देवा न गन्धर्वा न पिशाचा न राक्षसाः।
न चान्ये स्वयमक्लिष्टमुपक्लिश्नन्ति मानवम्॥१९॥
ये त्वेनमनुवर्तन्ते क्लिश्यमानं स्वकर्मणा।
न स तद्धेतुकः क्लेशो न ह्यस्ति कृतकृत्यता॥२०॥

सम्प्रति देवाद्युन्मादहेतुपरिहारार्थं देवाद्युन्मादेऽपि प्रकृतमेव कर्म कारणं दर्शयति— नैवेत्यादि। अनुवर्तन्त इतिवचनाद्दुष्कृतकर्मप्रेरिता एव देवादयोऽशुभकर्माणमभिनिविशन्तीति दर्शयति; यदि ह्येवमेव देवादयः कर्मनिरपेक्षा उन्मत्तं कुर्युस्तदा सर्वानेव कुर्युरिति भावः। न स तद्धेतुकः क्लेश इति नासौ देवादिकृत उन्माद इत्यर्थः। अथ कथं देवाद्यावेशजनितोऽप्ययं न देवादिकृत इत्याह— नह्यस्ति कृतकृत्यतेति; न यस्मादशुभकर्मणा कृते उन्मादे पुनर्देवादिकृत्यत्वमस्ति, न हि कृतं पुनः क्रियते, देवादयश्च कर्मपराधीना एवेति भावः। किंवा, 'नह्यस्य कृतकृत्यता' इति पाठः। तत्र कृतेनैव प्राक्तनकर्मणा उन्मादितो न कृत्यः करणीयः पुरुषो भवति; अन्यथा, सर्वेषामेवाविशेषेण देवाद्युन्मादः स्यात्; तस्माद्येनैवोन्मादफलजनकं कर्म कृतं, स एव देवादिभिः कर्मपराधीनैरभिगम्यते; अनेनाभिप्रायेणाह— नह्यस्य कृतकृत्यतेति।— अकृतपापकर्मणो न देवाद्यभिगमनीयताऽस्तीत्यर्थः। यस्माद्देवादयोऽत्र कर्मपराधीनास्तस्माद्देवादयो नोपालम्भ्याः॥१९-२०॥

प्रज्ञापराधात् सम्भूते व्याधौ कर्मज आत्मनः।
नाभिशंसेद्बुधो देवान्न पितॄन्नापि राक्षसान्॥२१॥
आत्मानमेव मन्येत कर्तारं सुखदुःखयोः।
तस्माच्छ्रेयस्करं मार्गं प्रतिपद्येत नो त्रसेत्॥२२॥
देवादीनामपचितिर्हितानां चोपसेवनम्।
ते च तेभ्यो विरोधश्च सर्वमायत्तमात्मनि॥२३॥

तत्र श्लोकः—

सङ्ख्या निमित्तं प्राग्रूपं लक्षणं साध्यता न च।
उन्मादानां निदानेऽस्मिन् क्रियासूत्रं च भाषितम्॥२४॥

न च देवादिभ्यो भेतव्यमित्याह— प्रज्ञापराधादित्यादि। नाभिशंसेदिति नोपालभेत। आत्मानमित्यादौ आत्मैव शुभाशुभकर्मकरणात् सुखदुःखयोर्यथासङ्ख्यं कारणं भवतीति वाक्यार्थः। नो त्रसेदिति देवादिभ्यः, एवमेवामी शुभकर्माणमपि गृह्णन्तीति कृत्वा नो त्रसेत्। अपचितिः पूजा। ते चेत्यादौ ते चेति देवापचितिहितोपसेवने। तेभ्यो विरोधश्चेति तेभ्यो देवादिभ्यो विरोधो यतो भवत्यशुभकर्मभ्यः, तत् सर्वमात्मन्यायत्तम्। एतेन, आत्माधीनमेवेदमुन्मादकारणस्य परिवर्जनं परिसेवनं च दर्शयति॥२१-२४॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते निदानस्थाने उन्मादनिदानं नाम सप्तमोऽध्यायः॥७॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां निदानस्थाने उन्मादनिदानं नाम सप्तमोऽध्यायः॥७॥

अष्टमोऽध्यायः।

अथातोऽपस्मारनिदानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

उन्मादानन्तरं प्रागुत्पत्तावपस्मारोत्पादादपस्मारनिदानमुच्यते॥१-२॥

इह खलु चत्वारोऽपस्मारा भवन्ति वातपित्तकफसन्निपातनिमित्ताः॥३॥

चत्वार इति वचनमागन्तुसम्बन्धेऽप्यपस्माराणां चतुष्कप्रतिपादनार्थम्; अपस्मारो हि नोन्मादवत् स्वतन्त्रेणागन्तुना क्रियते॥३॥

त एवंविधानां प्राणभृतां क्षिप्रमभिनिर्वर्तन्ते; तद्यथा—रजस्तमोभ्यामुपहतचेतसामुद्भ्रान्तविषमबहुदोषाणां समलविकृतोपहितान्यशुचीन्यभ्यवहारजातानि वैषम्ययुक्तेनोपयोगविधिनोपयुञ्जानानां तन्त्रप्रयोगमपि च विषममाचरतामन्याश्च शरीरचेष्टा विषमाः समाचरतामत्युपक्षयाद्वा दोषाः प्रकुपिता रजस्तमोभ्यामुपहतचेतसामन्तरात्मनः श्रेष्ठतममायतनं हृदयमुपसृत्योपरि तिष्ठन्ते, तथेन्द्रियायतनानि च। तत्र चावस्थिताः सन्तो यदा हृदयमिन्द्रियायतनानि चेरिताः कामक्रोधभयलोभमोहहर्षशोकचिन्तोद्वेगादिभिः सहसाऽभिपूरयन्ति, तदा जन्तुरपस्मरति॥४॥

उद्भ्रान्तविषमबहुदोषाणामिति अत्रोद्भ्रान्तत्वेनोन्मार्गित्वं, विषमत्वेन कदाचिदपस्मारवेगकर्तृत्वं दर्श्यते। समलेत्यादि उन्मादव्याख्यानतुल्यम्। अत्युपक्षयाद्वेति अत्युपक्षीणदेहत्वादित्यर्थः; उन्मादनिदानेऽपि समलविकृतेत्यादिग्रन्थे 'अत्युपक्षीणदेहानां' (नि.अ.७) इत्युक्तम्।

श्रेष्ठतमायतनमिति अनेनान्योऽपि शरीरदेशोऽन्तरात्मनः स्थानं, हृदयं तु श्रेष्ठतमं, तत्रैव चेतनाविशेषनिबन्धनादिति दर्शयति। उपसृत्येति व्याप्य। उपरि तिष्ठन्ते इति हृदयस्योपरि इन्द्रियायतनानि चोपसृत्य तिष्ठन्ते इति योजना। 'पर्यवतिष्ठन्ते' इति पाठो व्यक्त एव। तत्रावस्थिता इति हृदये इन्द्रियायतनेषु च लीनत्वेनावस्थिताः। ते च लीनाः सन्तः कामादिभिरीरिताः पुनर्हृदयमिन्द्रियायतनानि च विशेषेण पूरयन्ति यदा, तदा अपस्मरति अपस्मारवेगयुक्तो भवतीति वाक्यार्थः॥४॥

अपस्मारं पुनः स्मृतिबुद्धिसत्त्वसम्प्लवाद्बीभत्सचेष्टमावस्थिकं तमः प्रवेशमाचक्षते॥५॥

अपस्मारप्रत्यात्मलक्षणमाह— अपस्मारं पुनरित्यादि। सम्प्लवादिति विकृतिगमनात्। बीभत्सा फेनवमनाङ्गभङ्गादिरूपा चेष्टा यस्मिन् तद्बीभत्सचेष्टम्। आवस्थिकं तमःप्रवेशमिति कादाचित्कं तमःप्रवेशं; तमःप्रवेशोऽज्ञानसाधर्म्यात्, अपस्मारवेगवान् हि तमःप्रवेशे इव न किञ्चिद्बुध्यते॥५॥

तस्येमानि पूर्वरूपाणि भवन्ति; तद्यथा— भ्रूव्युदासः सततमक्ष्णोर्वैकृतमशब्दश्रवणं लालासिङ्घाणप्रस्रवणमनन्नाभिलषणमरोचकाविपाकौ हृदयग्रहः कुक्षेराटोपो दौर्बल्यमस्थिभेदोऽङ्गमर्दो मोहस्तमसो दर्शनं मूर्च्छा भ्रमश्चाभीक्ष्णं स्वप्ने च मदनर्तनव्यधनव्यथनवेपनपतनादीनीति॥६॥

ततोऽनन्तरमपस्माराभिनिर्वृत्तिरेव॥७॥

अशब्दश्रवणमिति अविद्यमानशब्दश्रवणशब्दम्। आटोपः गुडगुडाशब्दविशेषो वातजन्यः श्रूयत इत्यर्थः॥६-७॥

तत्रेदमपस्मारविशेषविज्ञानं भवति; तद्यथा— अभीक्ष्णमपस्मरन्तं, क्षणेन सञ्ज्ञां प्रतिलभमानम्, उत्पिण्डिताक्षम्, असाम्ना विलपन्तम्, उद्वमन्तं फेनम्, अतीवाध्मातग्रीवम्, आविद्धशिरस्कं, विषमविनताङ्गुलिम्, अनवस्थितपाणिपादम्, अरुणपरुषश्यावनखनयनवदनत्वचम्, अनवस्थितचपलपरुषरूक्षरूपदर्शिनं, वातलानुपशयं, विपरीतोपशयं च वातेनापस्मरन्तं विद्यात्॥ (१)॥

अभीक्ष्णमपस्मरन्तं क्षणेन सञ्ज्ञां प्रतिलभमानम्, अवकूजन्तम्, आस्फालयन्तं भूमिं, हरितहारिद्रताम्रनखनयनवदनत्वचं, रुधिरोक्षितोग्रभैरवादीप्तरुषितरूपदर्शिनं, पित्तलानुपशयं,विपरीतोपशयं च पित्तेनापस्मरन्तं विद्यात्॥ (२)॥

चिरादपस्मरन्तं, चिराच्च सञ्ज्ञां प्रतिलभमानं, पतन्तम्, अनतिविकृतचेष्टं, लालामुद्वमन्तं, शुक्लनखनयनवदनत्वचं, शुक्लगुरुस्निग्धरूपदर्शिनं, श्लेष्मलानुपशयं, विपरीतोपशयं च श्लेष्मणाऽपस्मरन्तं विद्यात्॥ (३)॥

समवेतसर्वलिङ्गमपस्मारं सान्निपातिकं विद्यात्, तमसाध्यमाचक्षते॥ (४)॥

इति चत्वारोऽपस्मारा व्याख्याताः॥८॥

तत्रेदमित्यादि। विशेषविज्ञानं वाताद्यपस्मारलिङ्गमित्यर्थः। क्षणेन सञ्ज्ञां प्रतिलभमानमिति वातापस्मारे शीघ्रं प्रबोधो भवतीति दर्शयति। आध्मातग्रीवमिति पूरितस्तब्धग्रीवम्। आविद्धशिरस्कमिति वक्रशिरस्कम्। अनवस्थितचपलरूपदर्शनं पतनकाले ज्ञेयं, पतितस्तु न बुध्यत एव। एवमन्यत्रापि रूपदर्शनं बोद्धव्यम्। **सुश्रुते**ऽपि पतनकाल एव रूपदर्शनमुक्तं; यथा— “यो

ब्रूयाद्विकृतं सत्त्वं कृष्णं मामनुधावति। ततो मे चित्तनाशः स्यात् सोऽपस्मारोऽनिलात्मकः" (सु.उ.अ.६१) इत्यादि। पित्तापस्मारे यद्यपि विशेषलक्षणे क्षणेन सञ्ज्ञां प्रतिलभमानमित्युक्तं, तथाऽपि वातिकापेक्षया कालप्रकर्षोऽत्र ज्ञेयः; पित्तादपि हि वायुः शीघ्रकारी भवति। उग्रं हिंसकमिव, भैरवं तु अहिंसकमपि भयजनकं श्मशानादि, आदीप्तं ज्वलितम्। चिरादपस्मरन्तमिति भूयसा कालेनापस्मारवेगवन्तम्॥८॥

तेषामागन्तुरनुबन्धो भवत्येव कदाचित्, तमुत्तरकालमुपदेक्ष्यामः। तस्य विशेषविज्ञानं यथोक्तलिङ्गैर्लिङ्गाधिक्यमदोषलिङ्गानुरूपं च किञ्चित्॥९॥

भवत्येवेत्यत्र एवकारोऽत्यन्तायोगव्यवच्छेदे; यथा— नीलं सरोजं भवत्येव, न च न भवति। कदाचिदिति पदं त्वत्यन्तायोगव्यवच्छेदार्थतामेव द्योतयति। एतेन, सर्वापस्मारे भूतसम्बन्धो भवति, न च स्वतन्त्रोऽपस्मारो भौतिको भवतीति दर्शयति। उत्तरकालमिति चिकित्सिते, यद्यपि चापस्मारचिकित्सितेऽपि प्रपञ्चो न वक्तव्यः, तथाऽपि तत्रोन्मादविध्यतिदेशादुन्मादोक्तविस्तार एवेति कृत्वा इहोक्तं— 'तमुत्तरकालमुपदेक्ष्यामः' इति; उक्तं हि— "यस्यानुबन्धं त्वागन्तुं दोषलिङ्गाधिकाकृतिम्। पश्येत्तस्य भिषक्कुर्यादागन्तून्मादभेषजम्" (चि.अ.१०) इति। यथोक्तलिङ्गैरिति पञ्चमीस्थाने तृतीया, तेन यथोक्तापस्मारलिङ्गेभ्यो लिङ्गाधिक्यं लिङ्गातिरिक्तत्वं; तच्चादोषलिङ्गानुरूपं दोषलिङ्गासदृशमित्यर्थः। किञ्चिदिति न सर्वं, किन्तु स्तोकं दोषलिङ्गविलक्षणं लिङ्गमागन्त्वनुबन्धे भवति। एतेन च स्वातन्त्र्येणागन्त्वपस्मारसम्भवो न भवतीति दर्शयति; यदि हि स्वतन्त्र एवागन्तुः स्यात्तदा न स्तोकमागन्तुलिङ्गं स्यात्, किन्तु सर्वमेव॥९॥

हितान्यपस्मारिभ्यस्तीक्ष्णानि संशोधनान्युपशमनानि च यथास्वं, मन्त्रादीनि चागन्तुसंयोगे॥१०॥

हितानीत्यादिना चिकित्सासूत्रमाह। उपशमनानि च हितानीति योजना॥१०॥

तस्मिन् हि दक्षाध्वरध्वंसे देहिनां नानादिक्षु विद्रवतामभिद्रवणतरणधावनप्लवनलङ्घनाद्यैर्देहविक्षोभणैः पुरा गुल्मोत्पत्तिरभूत्, हविष्प्राशात् प्रमेहकुष्ठानां, भयत्रासशोकैरुन्मादानां, विविधभूताशुचिसंस्पर्शादपस्माराणां, ज्वरस्तु खलु महेश्वरललाटप्रभवः, तत्सन्तापाद्रक्तपित्तम्, अतिव्यवायात् पुनर्नक्षत्रराजस्य राजयक्ष्मेति॥११॥

भवन्ति चात्र—

अपस्मारो हि वातेन पित्तेन च कफेन च।

चतुर्थः सन्निपातेन प्रत्याख्येयस्तथाविधः॥१२॥

साध्यांस्तु भिषजः प्राज्ञाः साधयन्ति समाहिताः।

तीक्ष्णैः संशोधनैश्चैव यथास्वं शमनैरपि॥१३॥

यदा दोषनिमित्तस्य भवत्यागन्तुरन्वयः।

तदा साधारणं कर्म प्रवदन्ति भिषग्विदः॥१४॥

सम्प्रत्युक्तानां गदानामुत्पत्तिमाह— तस्मिन्नित्यादि। यद्यपि च ज्वर एव तत्र प्रथम उत्पन्नस्तथाऽप्यसौ पृथगेव रुद्रक्रोधरूप उत्पन्न इति कृत्वा पश्चादुच्यते, गुल्मादयस्तु यज्ञध्वंसानन्तरकालभूता एकसामग्रीजातत्वेन प्रथममुच्यन्ते; ज्वरस्य तु सर्वप्रथमोत्पत्तिर्ज्वरनिदान एवोक्तेति भावः। पुरा इति आद्युत्पत्तौ। ललाटप्रभव इति ललाटभवक्रोधाग्निप्रभव इत्यर्थः। अन्वयः अनुबन्धः। साधारणमिति दोषप्रत्यनीकं वमनादि, देवादिप्रत्यनीकं च बलिमङ्गलादि॥११-१४॥

सर्वरोगविशेषज्ञः सर्वौषधविशारदः।

भिषक् सर्वामयान् हन्ति न च मोहं निगच्छति॥१५॥

निदानस्थानोक्तसर्वरोगज्ञानफलमाह— सर्वेत्यादि। न च मोहं निगच्छतीति निदानस्थानाद्यनुक्तेऽपि प्रमेये सूक्ष्मेऽपि बहुदृष्टत्वेन न मोहं गच्छति, किन्तु तदप्यूह्यत इत्यर्थः॥१५॥

इत्येतदखिलेनोक्तं निदानस्थानमुत्तमम्।१६।

अखिलेनेति यावन्निदानस्थानतया व्याध्यष्टकं प्रतिज्ञातं तावदखिलेनोक्तम्। तेन चिकित्सास्थानवक्तव्यनिदानाभिधानान्न न्यूनत्वं; यच्च ज्वरादिनिदानमपि पुनर्वक्तव्यं तदस्यैव प्रपञ्च इति भावः॥—

निदानार्थकरो रोगो रोगस्याप्युपलभ्यते॥१६॥

तद्यथा— ज्वरसन्तापाद्रक्तपित्तमुदीर्यते।

रक्तपित्ताज्ज्वरस्ताभ्यां शोषश्चाप्युपजायते॥१७॥

प्लीहाभिवृद्ध्या जठरं जठराच्छोथ एव च।

अर्शोभ्यो जठरं दुःखं गुल्मश्चाप्युपजायते॥१८॥

प्रतिश्यायाद्भवेत् कासः कासात् सञ्जायते क्षयः।

क्षयो रोगस्य हेतुत्वे शोषस्याप्युपलभ्यते॥१९॥

सम्प्रति निदानप्रकरणाद्रोगाणामपि केषांचिद्व्याधिं प्रति कारणत्वं यत् सम्भवति, तद्वक्तुमाह— निदानार्थेत्यादि। निदानस्यार्थः प्रयोजनं व्याधिजननं, तत् करोतीति निदानार्थकरः; व्याधिजनक

इत्यर्थः। निदानरूप इति वक्तव्ये यन्निदानार्थकर इति ब्रूते, तेन व्याधिना व्याध्यन्ते क्रियमाणेऽपि मूलभूतव्याधिजनक एव हेतुर्व्याधिजन्येऽपि व्याधौ मूलव्याधिजननावान्तरव्यापारो निदानमिति दर्शयति। तेन, रोगजन्येऽपि रोगे मूलभूतासात्म्येन्द्रियार्थादि कारणत्रयमेव कारणं भवतीति न चतुर्थकारणान्तरापत्तिरित्यतिप्रसङ्गो वाच्यः; ज्वरकारणान्येव हि उष्णादीन्यतिमात्राणि ज्वरमभिनिर्वर्त्य रक्तपित्तमपि कारणान्तरवर्धितशक्तीनि जनयन्तीत्याद्यनुसरणीयम्। गुल्मश्चाप्युपजायते इति अर्शोभ्य एव। कासात् सञ्जायते क्षय इति कासाद्धातुक्षयो जायते, स च धातुक्षयो रोगस्य शोषाभिधानस्य हेतुरुपलभ्यत इति योजना॥ १६-१९॥

ते पूर्वं केवला रोगाः पश्चाद्धेत्वर्थकारिणः।
उभयार्थकरा दृष्टास्तथैवैकार्थकारिणः॥ २०॥

ननु यत्र रोगस्य कारणं रोगो भवति, तत्र किं कारणभूतरोगोऽप्रधानमेवेत्याशङ्क्याह— ते पूर्वमित्यादि। — ते ज्वरादयो रक्तपित्ताद्युत्पादात् पूर्वं केवलाः सन्तो रोगा एव रुजाकर्तृत्वेन स्वयमेव प्रधाना इति; पश्चाद्धेत्वर्थकारिण इति पश्चाद्रक्तपित्ताद्युत्पादका भवन्तीत्यर्थः। अथैवमपि रक्तपित्तादिकं जनयित्वा ज्वरादयो हेतुवद्रोगरूपा भवन्ति न वेत्याह— उभयेत्यादि। उभयार्थकरा इति हेत्वर्थं रक्तपित्तादिजननरूपं, रोगार्थं च पीडालक्षणं कुर्वन्ति; न व्याध्यन्तरजननमात्रं कृत्वा निवर्तन्त इत्यर्थः। प्रकारान्तरमाह— तथैवैकार्थकारिण इति। एकस्यैव हेतोरर्थं कुर्वन्तीति एकार्थकारिणः॥ २०॥

कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यति।
न प्रशाम्यति चाप्यन्यो हेत्वर्थं कुरुतेऽपि च॥ २१॥

एतदेव पक्षद्वयं प्रातिलोम्येन विवृणोति— कश्चिद्धीत्यादि। अत्र यो हेत्वर्थं व्याधिजननं कृत्वा प्रशाम्यति, स एकार्थकारी; यस्तु हेत्वर्थं व्याध्यन्तरजननं कृत्वा स्वयमप्यनुवर्तते, स उभयार्थकारी; यदा कासं समारभ्यापि स्वयमनुवर्तते, तदा प्रतिश्यायः स्वयं च रुजाकर्तृत्वेन रोगार्थकरः, कासजनकत्वेन हेत्वर्थकरश्च भवति; यदा तु कासं जनयित्वा स्वयं निवर्तते, तदा कासकाले निवृत्तत्वात् हेत्वर्थमात्रं करोतीत्युदाहार्यम्॥२१॥

एवं कृच्छ्रतमा नृणां दृश्यन्ते व्याधिसङ्कराः।
प्रयोगापरिशुद्धत्वात्तथा चान्योन्यसम्भवात्॥२२॥

व्याधिसङ्करा व्याधिमेलकाः। कुतः पुनरेवं भवतीत्याह— प्रयोगेत्यादि।— प्रयोगापरिशुद्धत्वं यथा— आमातीसारे स्तम्भनं कृतं दोषं संस्तभ्य शूलानाहाध्मानादि जनयति। हेत्वन्तरमाह— अन्योन्यसम्भवादिति; परस्परकारणरूपत्वादित्यर्थः। प्रतिश्यायो हि स्वरूपेणैव कासस्य कारणं, स च राजयक्ष्मण इत्यादि॥२२॥

प्रयोगः शमयेद्व्याधिं योऽन्यमन्यमुदीरयेत्।
नासौ विशुद्धः, शुद्धस्तु शमयेद्यो न कोपयेत्॥२३॥

प्रयोगापरिशुद्धिं विवृणोति— प्रयोग इत्यादि। न कोपयेदिति व्याध्यन्तरं न कुर्यादित्यर्थः। अन्योन्यसम्भवश्च ज्वरसन्तापाद्रक्तपित्तमुदीर्यत इत्यादिनैवोक्त इति न पुनर्विव्रियते॥२३॥

एको हेतुरनेकस्य तथैकस्यैक एव हि।
व्याधेरेकस्य चानेको बहूनां बहवोऽपि च॥२४॥

ज्वरभ्रमप्रलापाद्या दृश्यन्ते रूक्षहेतुजाः।

रूक्षेणैकेन चाप्येको ज्वर एवोपजायते॥२५॥

हेतुभिर्बहुभिश्चैको ज्वरो रूक्षादिभिर्भवेत्।

रूक्षादिभिर्ज्वराद्याश्च व्याधयः सम्भवन्ति हि॥२६॥

हेतुप्रकरणाद्धेतुधर्मान्तरमाह— एको हेतुरित्यादि। एतत्पक्षचतुष्टयोदाहरणान्याह— ज्वरेत्यादि। यद्यपि रूक्षं बहूनां कारणं, तथाऽपि देशकालादिवशात् कदाचिदेकस्यैव ज्वरस्य कारणं भवतीति ज्ञेयम्। रूक्षादिभिरिति रूक्षोष्णलवणादिभिः। ज्वराद्या इति ज्वररक्तपित्तगुल्माद्याः॥२४-२६॥

लिङ्गं चैकमनेकस्य तथैवैकस्य लक्ष्यते।

बहून्येकस्य च व्याधेर्बहूनां स्युर्बहूनि च॥२७॥

विषमारम्भमूलानां लिङ्गमेकं ज्वरो मतः।

ज्वरस्यैकस्य चाप्येकः सन्तापो लिङ्गमुच्यते॥२८॥

विषमारम्भमूलैश्च ज्वर एको निरुच्यते।

लिङ्गैरेतैर्ज्वरश्वासहिक्काद्याः सन्ति चामयाः॥२९॥

लिङ्गस्यापि हेतोरिव चातुर्विध्यमाह— लिङ्गमित्यादि। तथैवैकस्य लक्ष्यत इति एकं लिङ्गमिति सम्बन्धः। विषमारम्भमूलानामिति विषमारम्भप्रथमानां; विषमारम्भविसर्गित्वमूष्मणो वैषम्यमित्याद्युक्तज्वरलिङ्गानामित्यर्थः। ज्वरं ह्येकं (सन्तापात्मकं) दृष्ट्वा विषमारम्भविसर्गित्वादयोऽस्य भूता भविष्यन्ति वर्तन्त इति वा लिङ्ग्यते। ज्वर एको निरुच्यत इति ज्ञायत इत्यर्थः। लिङ्गैरेतैरित्यादि। एतैर्विषमारम्भविसर्गित्वाद्यैर्ज्वरादयः सन्ति 'युक्ता' इति शेषः। विषमारम्भादयो हि वातज्वरे तथा वातश्वासे वातहिक्कायां वा यथासम्भवं दृश्यन्त एव॥२७-२९॥

एका शान्तिरनेकस्य तथैवैकस्य लक्ष्यते।

व्याधेरेकस्य चानेका बहूनां बह्व्य एव च॥३०॥

शान्तिरामाशयोत्थानां व्याधीनां लङ्घनक्रिया।

ज्वरस्यैकस्य चाप्येका शान्तिर्लङ्घनमुच्यते॥३१॥

तथा लघ्वशनाद्याश्च ज्वरस्यैकस्य शान्तयः।

एताश्चैव ज्वरश्वासहिक्कादीनां प्रशान्तयः॥३२॥

एतच्चातुर्विध्यं चिकित्सायामपि ब्रूते— एकेत्यादि॥३०-३२॥

सुखसाध्यः सुखोपायः कालेनाल्पेन साध्यते।

साध्यते कृच्छ्रसाध्यस्तु यत्नेन महता चिरात्॥३३॥

याति नाशेषतां व्याधिरसाध्यो याप्यसञ्ज्ञितः।

परोऽसाध्यः क्रियाः सर्वाः प्रत्याख्येयोऽतिवर्तते॥३४॥

नासाध्यः साध्यतां याति साध्यो याति त्वसाध्यताम्।

पादापचाराद्दैवाद्वा यान्ति भावान्तरं गदाः॥३५॥

चिकित्साभिधानप्रसङ्गेन चिकित्साप्रवृत्तिविषयं साध्यभेदं तथा चिकित्सानिवृत्तिविषयं चासाध्यभेदमाह — सुखेत्यादि।— सुखोपाय इति सुखलभ्यवैद्याद्युपायः; किंवा, सुखोपायः सन् साध्यते अल्पेनैव यत्नेन साध्यत इत्यर्थः। याति नाशेषतामिति न सर्वथा निवर्तते। परोऽसाध्य इति याप्यापेक्षया उत्कृष्टोऽसाध्यः। अस्यैव विवरणं— प्रत्याख्येय इति। क्रियाः चिकित्साः। भावान्तरमिति सुखसाध्यः कृच्छ्रसाध्यो भवति, कृच्छ्रश्च याप्यः, याप्यश्च प्रत्याख्येय इति॥३३-३५॥

वृद्धिस्थानक्षयावस्थां रोगाणामुपलक्षयेत्।

सुसूक्ष्मामपि च प्राज्ञो देहाग्निबलचेतसाम्॥३६॥

व्याध्यवस्थाविशेषान् हि ज्ञात्वा ज्ञात्वा विचक्षणः।

तस्यां तस्यामवस्थायां चतुःश्रेयः प्रपद्यते॥३७॥

व्याधेः सुखसाध्यत्वाभिधानप्रसङ्गेन वृद्ध्याद्यवस्थान्तरमाह— वृद्धीत्यादि। न केवलं रोगाणां किन्तु देहाग्निबलचेतसामपिवृद्धिस्थानक्षयावस्थामुपलक्षयेदिति योजना। एतद्व्याध्यवस्थाज्ञानप्रयोजनमाह— व्याध्यवस्थेत्यादि। चतुःश्रेय इति चतुश्रेयःकारकं चिकित्सितं, प्रपद्यते बुध्यत इत्यर्थः॥३६-३७॥

प्रायस्तिर्यग्गता दोषाः क्लेशयन्त्यातुरांश्चिरम्।

तेषु न त्वरया कुर्याद्देहाग्निबलवित् क्रियाम्॥३८॥

प्रयोगैः क्षपयेद्वा तान् सुखं वा कोष्ठमानयेत्।

ज्ञात्वा कोष्ठप्रपन्नांस्तान् यथासन्नं हरेद्बुधः॥३९॥

व्याधिप्रकारानभिधाय चिकित्सोपयुक्तान् दोषप्रकारानाह— प्राय इत्यादि। तिर्यग्गताश्च दोषा उन्मार्गगतत्वेन न सम्यक् शीघ्रं वा भेषजेन योजयितुं पार्यन्ते, तेन चिरं क्लेशयन्तीति युक्तम्। देहाग्निबलविदित्यनेन तिर्यग्गतदोषे त्वरया भूरि भेषजप्रयोगेण क्रियमाणा चिकित्सा देहमग्निबलं च हन्तीति सूचयति। प्रयोगैरिति अल्पमात्रदीर्घकालप्रयोगैः। सुखं वेति सुखं यथा भवति तथा आसन्नं हरेदित्यर्थः; यच्छोधनं वमनादि यत्रामाशयादिगते दोषे आसन्नं हरणयोग्यतया भवति, तेन हरेदित्यर्थः॥३८-३९॥

ज्ञानार्थं यानि चोक्तानि व्याधिलिङ्गानि सङ्ग्रहे।

व्याधयस्ते तदात्वे तु लिङ्गानीष्टानि नामयाः॥४०॥

सम्प्रति निदाने लिङ्गत्वेनोक्तानां व्याधीनां पृथग्व्याधित्वमपि भवतीत्याह— ज्ञानार्थमित्यादि। सङ्ग्रह इति व्याधिनिदानादिसङ्ग्रहे। ये निदानस्थाने ज्ञानार्थं प्रधानभूतज्वरादिज्ञानार्थं व्याधयः सन्ति, तेऽविपाकारुच्यादयः स्वातन्त्र्येणोत्पद्यमाना व्याधय एव व्याधित्वेनैव व्यपदेष्टव्या इत्यर्थः। तदात्वे तु लिङ्गानीति यदा ज्वरादिपरतन्त्रा जायन्तेऽरुच्यादयः, तदा पारतन्त्र्याल्लिङ्गान्येव ते, नामयाः; आमयो हि स्वतन्त्रः स्वचिकित्साप्रशमनीयो भवतीत्यायुर्वेदस्थितिः, ज्वरलिङ्गरूपास्त्वरुच्यादयो ज्वरचिकित्साप्रशमनीया एवेति भावः॥४०॥

विकारः प्रकृतिश्चैव द्वयं सर्वं समासतः।

तद्धेतुवशगं हेतोरभावान्नानुवर्तते॥४१॥

सम्प्रति निदानाधिकृतस्य हेतोर्विभवमाह— विकार इत्यादि। विकारः वैषम्यम्। प्रकृतिः साम्यम्। सर्वमिति अनेन शारीरं तथाऽऽध्यात्मिकं चोपसङ्गृह्णाति। हेतुवशगमिति हेत्वधीनोत्पादम्। एतेन, आरोग्यरूपप्रकृत्यर्थिना साम्यहेतुः सेवनीयः, तथा विकाररूपरोगपरिहारार्थिना च विकारहेतुर्वर्जनीयः। न च वाच्यं— यद्— दध्यादिशोथजननहेतोरुपरमेऽपि तज्जनितशोथानुवृत्तिदर्शनान्मृषैतद्वचनं— 'हेतोरभावान्नानुवर्तते' इति, यत उपरतेऽपि दध्यादौ दध्यादिजनितो दोषसन्तानः शोथादिजनकस्तत्रानुवर्तत एव॥४१॥

तत्र श्लोकाः—

हेतवः पूर्वरूपाणि रूपाण्युपशयस्तथा।

सम्प्राप्तिः पूर्वमुत्पत्तिः सूत्रमात्रं चिकित्सितात्॥४२॥

ज्वरादीनां विकाराणामष्टानां साध्यता न च।

पृथगेकैकशश्चोक्ता हेतुलिङ्गोपशान्तयः॥४३॥

हेतुपर्यायनामानि व्याधीनां लक्षणस्य च।

निदानस्थानमेतावत् सङ्ग्रहेणोपदिश्यते॥४४॥

सङ्ग्रहे 'सूत्रमात्रं चिकित्सितात्' इत्यन्तेनापस्माराध्यायार्थसङ्ग्रह उक्त इति बोद्धव्यम्। 'ज्वरादीनां' इत्यादिग्रन्थेन तु निदानस्थानोक्तार्थसङ्ग्रहं करोति। यद्यपि ज्वरस्य ज्वरनिदानेऽसाध्यता नोक्ता, तथाऽपि 'अष्टानां' इतिपदं 'छत्रिणो गच्छन्ति' इति न्यायेन बोद्धव्यम्। किंवा, अष्टानां हेतुलिङ्गोपशान्तय इति न्यायेन बोद्धव्यम्। किंवा, अष्टानां हेतुलिङ्गोपशान्तय इति योजनीयम्; असाध्यता यथायोग्यतयैव बोद्धव्या। पृथक्त्वेन चैकैकशश्चेति पृथगेकैकशः। तेन, पृथक्त्वेन सर्वसाधारणहेत्वादयो निदानस्थानादावुक्ताः, तथैकैकशश्च ज्वरादीनां हेतुलिङ्गोपशान्तयः स्वे स्वे अध्याये उक्ताः। अत्र च लिङ्गग्रहणेन पूर्वलिङ्गग्रहणम्, उपशान्तिग्रहणेन चोपशयग्रहणं, सम्प्राप्तेस्तु प्रतिरोगमभिधानादग्रहणं व्याख्येयम्। हेतुपर्यायनामानीति 'हेतुर्निमित्तं' (नि.अ.१) इत्यादिना, व्याधिपर्यायनामानीति तथा लक्षणपर्यायनामानीति चाद्याध्यायोक्तान्येव ज्ञेयानि; सम्प्राप्तेस्तु 'सम्प्राप्तिर्जातिरागतिः' (नि.अ.१) इति नामकथनं लक्षणप्रयोजकमेव प्रायः, तेनेह न सङ्ग्रहीतम्। किंवा हेतव इत्यादिस्थानसङ्ग्रह एव, अपस्माराध्यायार्थसङ्ग्रहस्तु स्थानसङ्ग्रहेणैवाव्यवहितेन कृतत्वान्न पुनः पृथक्कृतः। तत्र हेतव इत्यादि सर्वरोगहेत्वादिसङ्ग्रहणम्। अस्मिन् पक्षे पृथक्त्वेनेति ज्वरादीनामित्यनेन सम्बध्यते, एकैकशश्चेति हेतुलिङ्गोपशयशान्तिभिः सम्बध्यते। सङ्ग्रहेणेति वचनाच्चिकित्सितप्रपञ्चनीयं निदानं सूचयति। केचिदत्र निदीयते निबध्यते हेत्वादिपञ्चकमनेनेति निदानमिति निदानशब्दव्युत्पत्तिं कुर्वन्ति, निदानशब्देन च गवां दोहनकालनिबन्धनरज्जुरुच्यते इति ब्रुवते। ज्वरनिदाने च निदानशब्दो व्याकृत एव॥४२-४४॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते निदानस्थाने अपस्मारनिदानं नामाष्टमोऽध्यायः।

निदानस्थानं समाप्तम्।

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां निदानस्थानेऽपस्मारनिदानं नामाष्टमोऽध्यायः॥८॥

निदानस्थानव्याख्या समाप्ता।

विमानस्थानम्।

प्रथमोऽध्यायः।

अथातो रसविमानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

निदाने ज्ञातहेत्वादिपञ्चकस्य चिकित्सोपयोगितया दोषभेषजादिविशेषज्ञानमपेक्षितं भवति, अतो वक्ष्यमाणदोषभेषजादिविशेषज्ञापकं विमानस्थानं ब्रूते। तत्रापि च दोषभेषजयोः प्राधान्यात्तद्विशेषज्ञापकं रसविमानं प्रथमं ब्रूते। इमं च स्थानसम्बन्धं स्वयमेव दर्शयिष्यति। विशेषेण मीयते ज्ञायते दोषभेषजाद्यनेनेति विमानं, दोषभेषजादीनां प्रभावादिविशेष इत्यर्थः; एवंभूतं विमानमभिधेयतया यत्र तिष्ठति तद्विमानस्थानम्। रसविमानमधिकृत्य कृतोऽध्यायो रसविमानम्॥१-२॥

इह खलु व्याधीनां निमित्तपूर्वरूपरूपोपशयसङ्ख्याप्राधान्यविधिविकल्प बलकालविशेषाननुप्रविश्यानन्तरं दोषभेषजदेशकालबलशरीरसाराहार सात्म्यसत्त्वप्रकृतिवयसां मानमवहितमनसा यथावज्ज्ञेयं भवति भिषजा, दोषादिमानज्ञानायत्तत्वात् क्रियायाः। न ह्यमानज्ञो दोषादीनां भिषग् व्याधिनिग्रहसमर्थो भवति। तस्माद्दोषादिमानज्ञानार्थं विमानस्थानमुपदेक्ष्यामोऽग्निवेश!॥३॥

इह खल्वित्यादिना स्थानसम्बन्धमाह। इह सम्प्राप्तिभेदसङ्ख्याप्राधान्यादिग्रहणेनैव सम्प्राप्तिमुपदिशन् सङ्ख्यादिभेदेन सर्वैव सम्प्राप्तिः कथिता भवतीति दर्शयति। निमित्तादीनां तु न तादृशो भेदोऽल्पग्रन्थवक्तव्योऽस्ति, येन भेदेन तेऽपीह कथ्येरन्, अतस्ते सामान्येनैवोक्ताः। अनुप्रविश्येति

बुद्ध्या। दोषादयः सूत्रस्थान एव प्रपञ्चिताः। मानमिति प्रभावादिविशेषः। एतज्ज्ञाने हेतुमाह— दोषादीत्यादि। क्रियाया इति चिकित्सायाः॥३॥

तत्रादौ रसद्रव्यदोषविकारप्रभावान् वक्ष्यामः। रसास्तावत् षट्— मधुराम्ललवणकटुतिक्तकषायाः। ते सम्यगुपयुज्यमानाः शरीरं यापयन्ति, मिथ्योपयुज्यमानास्तु खलु दोषप्रकोपायोपकल्पन्ते॥४॥

अध्यायार्थं वक्तुं प्रतिजानीते— तत्रादावित्यादि। यद्यपि च दोषभेषजेत्यादौ दोषापेक्षत्वाद्भेषजस्य दोष आदौ कृतः, तथाऽपीह रसद्रव्यरूपभेषजस्यापेक्षितरोगप्रशमकर्तृत्वेन तथा दोषस्यापि च रसद्रव्ययोरेव कारणत्वेन भेषजशब्दसूचिते रसद्रव्ये एवाग्रे कृते, पश्चात्तु दोषग्रहणगृहीतौ दोषविकारौ। प्रकृष्टो भावः प्रभावः शक्तिरित्यर्थः; स चेहाचिन्त्यश्चिन्त्यश्च ग्राह्यः। येन, 'तत्र खल्वनेकरसेषु' इत्यादिना द्रव्यविकारयोः प्रभावं रसद्वारा दोषद्वारा च चिन्त्यमपि वक्ष्यति। यापयन्तीति साम्येनावस्थापयन्ति। मिथ्याशब्द इहायोगातियोगमिथ्यायोगेषु वर्तते॥४॥

दोषाः पुनस्त्रयो वातपित्तश्लेष्माणः। ते प्रकृतिभूताः शरीरोपकारका भवन्ति, विकृतिमापन्नास्तु खलु नानाविधैर्विकारैः शरीरमुपतापयन्ति॥५॥

दोषा इति शारीरदोषाः। पुनःशब्दो मानसदोषं व्यावर्तयति॥५॥

तत्र दोषमेकैकं त्रयस्त्रयो रसा जनयन्ति, त्रयस्त्रयश्चोपशमयन्ति। तद्यथा— कटुतिक्तकषाया वातं जनयन्ति, मधुराम्ललवणास्त्वेनं शमयन्ति; कट्वम्ललवणाः पित्तं जनयन्ति, मधुरतिक्तकषायास्त्वेनच्छमयन्ति; मधुराम्ललवणाः श्लेष्माणं जनयन्ति, कटुतिक्तकषायास्त्वेनं शमयन्ति॥६॥

रसानामसंसृष्टानां कर्माह— तत्रेत्यादि। अनेन च रसकर्मोपदेशेन दोषाणामपि तत्तद्रसोत्पाद्यत्वं तथा तत्तद्रसोपशमनीयत्वमुक्तं भवति। कटुतिक्तकषाया वातं जनयन्तीति असति परिपन्थिनीति ज्ञेयं, तेनार्कागुरुगुडूच्यादीनां तिक्तानामपि वाताजनकत्वे न दोषः। तत्र ह्युष्णवीर्यता परिपन्थिनी विद्यते, तेन न ते वातं जनयन्तीत्याद्यनुसरणीयम्। एनमिति पदेन यश्च कट्वादिजो वायुस्तमेव मधुरादयः सर्वात्मवैपरीत्याद्विशेषेण शमयन्तीति दर्शयति; जागरणादिजे हि वायौ जागरणादिविपरीताः स्वप्नादय एव विशेषेण पथ्याः। एवं पित्तश्लेष्मणोरपि एनदेनंशब्दयोस्तात्पर्यं दर्शयति॥६॥

रसदोषसन्निपाते तु ये रसा यैर्दोषैः समानगुणाः समानगुणभूयिष्ठा वा भवन्ति ते तानभिवर्धयन्ति, विपरीतगुणा विपरीतगुणभूयिष्ठा वा शमयन्त्यभ्यस्यमाना इति। एतद्व्यवस्थाहेतोः षट्त्वमुपदिश्यते रसानां परस्परेणासंसृष्टानां, त्रित्वं च दोषाणाम्॥७॥

अथ कया युक्त्या रसा दोषाञ्जनयन्ति शमयन्ति चेत्याह रसदोषेत्यादि। सन्निपाते इति अन्तःशरीरमेलके। तुशब्दो विशेषे, तेन विपरीतगुणा एव विशेषेण विपरीतगुणभूयिष्ठापेक्षया शमयन्तीति दर्शयति। रसानां तु यथा उपचाराद्गुणा भवन्ति तदभिहितं “गुणागुणाश्रया नोक्ताः” (सू.अ.२६) इत्यादिना सूत्रे। अभ्यस्यमाना इति न सकृदुपयुज्यमानाः। अथ कस्माद्रसदोषसंसर्गभूयस्त्वं परित्यज्य रसषट्त्वं दोषत्रित्वं चोच्यते? इत्याह— इत्येतदित्यादि। व्यवस्थेति रसदोषसंसर्गप्रपञ्चसङ्क्षेपः। परस्परेणासंसृष्टानामिति पदं दोषाणामित्यनेनापि योज्यम्॥७॥

संसर्गविकल्पविस्तरो ह्येषामपरिसङ्ख्येयो भवति, विकल्पभेदापरिसङ्ख्येयत्वात्॥८॥

रसदोषसंसर्गप्रपञ्चानभिधाने हेतुमाह— संसर्गेत्यादि। यस्मात् संसर्गभेदविस्तरोऽपरिसङ्ख्येयस्तस्मात् षट्त्वं त्रित्वं चोच्यते। विकल्पभेदापरिसङ्ख्येयत्वादिति संसर्गविकल्पस्य भेदो विजातीयप्रकारः, तस्यापरिसङ्ख्येयत्वात्। एतेन, यथा रसानामवान्तरव्यक्तिभेदेऽपि मधुरत्वादिसामान्ययोगान्मधुरादिव्यपदेशेन षट्त्वमुच्यते; तथा मधुराम्लमधुरलवणादिसंसर्गाणामपि सत्यप्यवान्तरभेदे सामान्येनोपसङ्ग्रहं कृत्वा त्रिषष्टित्वसङ्ख्यानियमो भविष्यतीति निरस्यते, यतो मधुराम्लादिसंसर्गेऽपि विजातीयो मधुरतरमधुरतमादिभेदकृतो भेदोऽपरिसङ्ख्येयो भवति। वचनं हि— "रसास्तरतमाभ्यां तां सङ्ख्यामतिपतन्ति हि" (सू.अ.२६) इति॥८॥

तत्र खल्वनेकरसेषु द्रव्येष्वनेकदोषात्मकेषु च विकारेषु रसदोषप्रभावमेकैकश्येनाभिसमीक्ष्य ततो द्रव्यविकारयोः प्रभावतत्त्वं व्यवस्येत्॥९॥

अथ कथं तर्हि संसृष्टानां रसानां दोषाणां च प्रभावो ज्ञेय इत्याह— तत्र खल्वित्यादि। तत्र चानेकरसद्रव्यस्यानेकदोषविकारस्य च प्रत्येकरसदोषप्रभावमेलकेन प्रभावं कथयन् रससंसर्गदोषसंसर्गयोरपि तादृशमेव प्रभावं कथयति, यतो रसदोषसंसर्गप्रभावावत्र द्रव्यविकाराश्रयित्वाद्रसदोषयोर्द्रव्यविकारप्रभावत्वेनोच्येते। अनेन न्यायेन साक्षादनुक्तोऽपि एकरसद्रव्यैकदोषविकारयोरपि प्रभावोऽसंसृष्टरसदोषप्रभावकथनादुक्त एव ज्ञेयः। एकैकश्येनाभिसमीक्ष्येति प्रत्येकमुक्तरसादिप्रभावेणानेकरसं द्रव्यमनेकदोषं च विकारं समुदितप्रभावमभिसमीक्ष्य॥९॥

न त्वेवं खलु सर्वत्र। न हि विकृतिविषमसमवेतानां नानात्मकानां परस्परेण चोपहतानामन्यैश्च विकल्पनैर्विकल्पितानामवयवप्रभावानुमानेनैव समुदायप्रभावतत्वमध्यवसातुं शक्यम्॥१०॥

अयं च रसदोषप्रभावद्वारा द्रव्यविकारप्रभावनिश्चयो न सर्वत्र द्रव्ये विकारे चेत्याह— न त्वेवं खलु सर्वत्रेति। अत्रैव हेतुमाह— नहीत्यादिनाऽध्यवसातुं शक्यमित्यन्तेन। विकृतिविषमसमवेतानामिति विकृतिसमवेतानां तथा विषमसमवेतानां चेति विकृतिविषमसमवेतानाम्। समवेतानामिति मिलितानां रसानां दोषाणां च। तत्र रसस्य विकृतिसमवायो यथा— मधुरे तण्डुलीयके; मधुरो हि प्रकृत्या स्नेहवृष्यत्वादिकरः, तण्डुलीयके तु विकृतिसमवेतत्वेन तन्न करोति। विषमसमवेतास्तु तिले कषायकटुतिक्तमधुराः; यदि हीमे रसाः समया मात्रया समवेताः स्युस्ततस्तिलोऽपि पित्तश्लेष्महरस्त्रिदोषहरो वा स्यात्, पित्तकफकरस्त्वयं; तेनात्र रसानां क्वचित् कर्तृत्वमकर्तृत्वं च क्वचिदिति वैषम्यमुन्नीयते। नानात्मकानामित्यादिहेतुत्रयं तु विकृतिसमवायविषमसम-वाययोरेवोपलम्भकम्। तेन, नानात्मकत्वादिभिर्विकृति-समवायविषमसमवायौ भवतः। नानात्मकानामिति नानारूपहेतुजनितानां; तेन हेतुभेदबलादेव रसदोषयोर्विकृतो विषमो वा मेलको भवतीत्यर्थः। किंवा, नानात्मकानामिति नानाप्रमाणानाम्। एवं च नानाप्रमाणत्वं विषमसमवाये हेतुः। परस्परेण चोपहतानामिति अन्योन्यमुपघातितगुणानाम्। परस्परगुणोपघातस्तु यद्यपि दोषाणां प्रायो नास्त्येव, तथाऽप्यदृष्टवशात् क्वचिद्भवतीति ज्ञेयं; रसानां तु प्रबलेनान्योपघातो भवत्येव। अन्यैश्च विकल्पनैरिति अन्यैश्च भेदकैः, तत्र रसस्य भेदकाः स्वरसकल्कादयः; एकस्यैव हि द्रव्यस्य कल्पनाविशेषेण गुणान्तराणि भवन्ति। दोषस्य तु दूष्यान्तराण्येव गुणान्तरयोगाद्भेदकानि भवन्ति। यदुक्तं— "स एव कुपितो दोषः समुत्थानविशेषतः। स्थानान्तरगतश्चैव विकारान् कुरुते बहून्" (सू.अ.१८) इति। अस्मिन् व्याख्याने रसानां दोषाणां च य उत्कर्षापकर्षकृतो विषमसमवायः पृथगुच्यते, स न युज्यते; यतो विषमसमवायेऽप्युत्कृष्टस्य रसस्य तथा दोषस्य चोत्कृष्टा गुणा अपकृष्टस्य चापकृष्टा गुणा भवन्तीति कृत्वाऽवयवप्रभावाननुमानेनैव समुदायप्रभावानुमानं शक्यम्। अथोच्येत— विषममेलके रसस्य दोषस्य च न त एव गुणा उत्कृष्टा अपकृष्टा वा भवन्ति किन्तु गुणान्तरमेव भवति, हन्त तर्हि विकृत एवायं समवायो विसदृशकार्यकारणत्वात्। तदेवं दूषणदर्शनादन्यथा व्याख्यायते— यत्— द्विविधो मेलको भवति रसानां दोषाणां च प्रकृत्यनुगुणः,

प्रकृत्यननुगुणश्च; तत्र यो मिलितानां प्राकृतगुणानुपमर्देन मेलको भवति, स प्रकृतिसमसमवायशब्देनोच्यते; यस्तु प्राकृतगुणोपमर्देन भवति, स विकृतिविषमसमवायोऽभिधीयते; विकृत्या हेतुभूतया विषमः प्रकृत्यननुगुणः समवायो विकृतिविषमसमवाय इत्यर्थः। अत्रैव विकृतिविषमसमवाये नानात्मकत्वादिहेतुत्रयं यथाविवृतमेव योजनीयम्। ये तु विकृतिविषमसमवायौ पृथगेव कुर्वन्ति, विषमसमवायस्य वैषम्यतारतम्येनातिबहुप्रपञ्चितत्वाद् विषमावयवगुणानुमानं दुःशकमिति कृत्वा, तदपि द्रव्यविकारप्रभावेणैव व्यपदिशन्ति॥१०॥

तथायुक्ते हि समुदये समुदायप्रभावतत्त्वमेवमेवोपलभ्य ततो द्रव्यविकारप्रभावतत्त्वं व्यवस्येत्॥११॥

अथ कथं तर्हि विकृतिविषमसमवायप्रभावज्ञानमित्याह— तथायुक्ते हीत्यादि। तथायुक्ते समुदय इति विकृतिविषमसमवाये। समुदयप्रभावतत्त्वमिति मेलकप्रभावतत्त्वम्। समधृते हि मधुसर्पिषि सूर्यावर्ताख्ये वा दोषसमुदये न संयुज्यमानमधुघृतगुणक्रमागतं मारकत्वं, न च वातादिदोषप्रभावगतं सूर्यवृद्ध्या वर्धिष्णुत्वं सूर्यावर्तस्य, किं तु संयोगमहिमकृतमेवेत्यर्थः। यच्च गतिद्वयं दोषरसमेलकस्य, तेन प्रकृतिसमसमवायरूपं सन्निपातं ज्वरनिदाने दोषलिङ्गमेलकेनैवोक्तवान्। यदुक्तं— "पृथगुक्तलक्षणसंसर्गाद्वान्द्विकमन्यतमं सान्निपातिकं वा ज्वरं विद्यात्" (नि.अ.१) इति। यस्तु विकृतिविषमसमवेतस्त्रिदोषकृतो ज्वरस्तस्य चिकित्सिते— "क्षणे दाहः क्षणे शीतं" (चि.अ.३) इत्यादिना लक्षणमुक्तम्। न हि श्यावरक्तकोठोत्पत्त्यादि तत्रोक्तं वातादिज्वरे क्वचिदस्ति। एवं रसेऽपि यत्राम्राते मधुरत्वं प्रकृतिसमसमवेतं, तत्राम्रातं मधुरमेतन्मात्रमेवोक्तं; तेन, मधुरसामान्यगुणागतं तस्य वातपित्तहरत्वमपि लभ्यत एव। यत्र वार्ताके कटुतिक्तत्वेन वातकरत्वं प्राप्तमपि च विकृतिविषमसमवायात्तन्न भवति, तत्राचार्येण "वार्ताकं वातघ्नं" (सू.अ.२७) इत्युक्तमेव। एवमित्यादि तत्तदुदाहरणं शास्त्रप्रसृतमनुसरणीयम्। यत्तु प्रकृतिसमसमवायकृतरसदोषगुणद्वारा प्राप्तमपि द्रव्यगुणं विकारलक्षणं च ब्रूते, तत् प्रकर्षार्थं स्पष्टार्थं चेति ज्ञेयम्॥११॥

तस्माद्रसप्रभावतश्च द्रव्यप्रभावतश्च दोषप्रभावतश्च विकारप्रभावतश्च तत्त्वमुपदेक्ष्यामः॥१२॥

उपसंहरति— तस्मादित्यादि। तत्त्वमिति रसादिप्रभावतत्त्वम्। यत्तु पूर्वं "तत्रादौ रसद्रव्यदोषविकारप्रभावानुपदेक्ष्यामः" इत्यनेन रसादिप्रभावव्याख्यानप्रतिज्ञानं कृतं, तत्तु रसप्रभावानुमानेनैव द्रव्यप्रभावकथनात्, तथा दोषप्रभावेण च विकारप्रभावकथनाच्चरितार्थं स्यात्। इह तु विकृतिविषमसमवायात्मके द्रव्ये विकारे वा रसदोषप्रभावानुमानेन न द्रव्यविकारप्रभावानुमानमस्तीति कृत्वा पृथक् पृथग्रसादिप्रभावतत्त्वाभिधानप्रतिज्ञानमिति न पौनरुक्त्यम्। इह द्रव्याणां वीर्यप्रभाव-विपाकप्रभावौ च द्रव्यप्रभावे रसप्रभावे वाऽन्तर्भावनीयौ। तत्र यौ रसानुगुणौ वीर्यविपाकप्रभावौ, तौ रसे; यौ तु रसक्रमोक्तवीर्यविपाकविपरीतौ वीर्यविपाकौ, तौ द्रव्यप्रभावे बोद्धव्यौ। उपदेक्ष्याम इति निखिलेन तन्त्रेण रसादिप्रभावतत्त्वं पृथगुपदेक्ष्याम इत्यर्थः; रसादिप्रभावः प्रपञ्चेन निखिले तन्त्र एव वक्तव्यः॥१२॥

तत्रैष रसप्रभाव उपदिष्टो भवति। द्रव्यप्रभावं पुनरुपदेक्ष्यामः। तैलसर्पिर्मधूनि वातपित्तश्लेष्मप्रशमनार्थानि द्रव्याणि भवन्ति॥१३॥

सङ्क्षेपभिधानमेतदेवेति दर्शयन्नाह— तत्रैष इत्यादि। एष इति 'रसाः षड्' इत्यादिना 'तत्त्वमुपदेक्ष्यामः' इत्यन्तेन ग्रन्थेनोक्त इत्यर्थः। उपदिष्टो भवतीति सङ्क्षेपेण कथितो भवति। अन्ये तु 'तत्रैष रसप्रभाव उद्दिष्टो भवति' इति पठन्ति। अस्मिन् पक्षे द्रव्यदोषविकारप्रभावोऽपि योऽत्र उद्दिष्टः सोऽपि रसद्वारा, तेन रसस्यैव प्रपञ्चाभिहितत्वात्तस्यैवाभिधानमुपसंहरति न द्रव्यादीनामिति ज्ञेयम्। द्रव्यप्रभावमित्यादौ पुनरिति सामान्येन द्रव्यप्रभावकथनात् पुनः शृङ्गग्राहिकया तैलादिद्रव्यप्रभावं कथयिष्याम इत्यर्थः। प्रशमनार्थानीति प्रशमनप्रयोजनानि॥१३॥

तत्र तैलं स्नेहौष्ण्यगौरवोपपन्नत्वाद्वातं जयति सततमभ्यस्यमानं; वातो हि रौक्ष्यशैत्यलाघवोपपन्नो विरुद्धगुणो भवति, विरुद्धगुणसन्निपाते हि भूयसाऽल्पमवजीयते, तस्मात्तैलं वातं जयति सततमभ्यस्यमानम्। सर्पिः खल्वेवमेव पित्तं जयति, माधुर्याच्छैत्यान्मन्दत्वाच्च; पित्तं ह्यमधुरमुष्णं तीक्ष्णं च। मधु च श्लेष्माणं जयति, रौक्ष्यात्तैक्ष्ण्यात् कषायत्वाच्च; श्लेष्मा हि स्निग्धो मन्दो मधुरश्च। यच्चान्यदपि किञ्चिद्द्रव्यमेवं वातपित्तकफेभ्यो गुणतो विपरीतं स्यात्तच्चैताञ्जयत्यभ्यस्यमानम्॥१४॥

सततमभ्यस्यमानमिति अविच्छेदेनोपयुज्यमानम्। विरुद्धगुण इति तैलगुणेभ्यो विपरीतगुणः। विरुद्धगुणसन्निपाते इति विरुद्धगुणयोर्मेलके। ननु विरुद्धगुणयोर्मध्ये भूयसाऽल्पं जीयते, तत् कथं तैलं वातं जयति? न ह्यस्य वातं प्रति भूयस्त्वं युक्तमित्याह— सततमभ्यस्यमानमिति। सततोपयोगेन हि तैलं वातादधिकं भवति, तेन वातं जयतीत्यर्थः। सर्पिः खल्वेवमेवेति सर्पिरपि सततमभ्यस्यमानमित्यर्थः। अमधुरमिति रौक्ष्यलाघवावृष्यत्वादिना मधुरविपरीतं कटुरसमित्यर्थः। इह च प्रभावशब्देन सामान्येन द्रव्यशक्तिरुच्यते, नाचिन्त्यशक्तिः; तेन तैलादीनां स्नेहौष्ण्यादिगुणादपि वातादिशमनं द्रव्यप्रभावादेव भवति। सर्पिषि च यद्यपि मधुरो रसः पित्तप्रशमे व्याप्रियते, तथाऽपि माधुर्यशैत्यमन्दत्वैः पित्तशमनं सर्पिःकार्यमेव, तेन द्रव्यप्रभाव एव वाच्यः। यदा तु रसद्वारा कार्यं द्रव्यस्य चिन्त्यते, तदा रसप्रभाव इति व्यपदेशो भवति। एवं कषायानुरसे मधुनि च समाधानं वाच्यम्। अन्ये तु ब्रुवते— यत्— तैलादीनां वातादिशमनत्वं प्रत्यचिन्त्य एव प्रभावोऽयमुच्यते; तत्र च तैलवातशमनत्वं प्रत्यचिन्त्य एव प्रभावोऽयमुच्यते; तत्र च तैलवातयोर्विरुद्धगुणयोर्मेलके तैलमेव वातं जयति, न तु वातस्तैलमिति तैलस्याचिन्त्यप्रभावः; एवं सर्पिर्मधुनोरपि पित्तश्लेष्महरणे प्रभावाज्ज्ञेये। एतच्चान्ये नेच्छन्ति, यतस्तैलादीनां सततमभ्यस्यमानमिति पदेनाधिक्यमेव वातादिजयकारणमुक्तं; तथा यच्चान्यदपि किञ्चिद्द्रव्यमित्यादिग्रन्थेन द्रव्याचिन्त्यप्रभावं परित्यज्य सामान्येन गुणवैपरीत्यमेवाभ्यासाद्वातादिजयहेतुरुच्यते॥१४॥

अथ खलु त्रीणि द्रव्याणि नात्युपयुञ्जीताधिकमन्येभ्यो द्रव्येभ्यः; तद्यथा— पिप्पली, क्षारः, लवणमिति॥१५॥

अभ्यस्यद्रव्यं प्रभावोदाहरणार्थमभिधायानभ्यस्यानाह— अथेत्यादि। अधिकमन्येभ्य इति वचनादन्यदपि चित्रकभल्लातकाद्येवंजातीयं नात्युपयोक्तव्यं, पिप्पल्यादिद्रव्यं त्वन्येभ्योऽप्यधिकमत्युपयोगे वर्जनीयमिति दर्शयति॥१५॥

पिप्पल्यो हि कटुकाः सत्यो मधुरविपाका गुर्व्यो नात्यर्थं स्निग्धोष्णाः प्रक्लेदिन्यो भेषजाभिमताश्चताः सद्यः; शुभाशुभकारिण्यो भवन्ति; आपातभद्राः, प्रयोगसमसाद्गुण्यात्; दोषसञ्चयानुबन्धाः;— सततमुपयुज्यमाना हि गुरुप्रक्लेदित्वाच्छ्लेष्माणमुत्क्लेशयन्ति, औष्ण्यात् पित्तं, न च वातप्रशमनायोपकल्पन्तेऽल्पस्नेहोष्णभावात्; योगवाहिन्यस्तु खलु भवन्ति; तस्मात् पिप्पलीर्नात्युपयुञ्जीत॥१६॥

'कटुकाः सत्यो मधुरविपाकाः' इत्यादि पिप्पलीगुणकथनमनभ्यासप्रयोगे दोषवैपरीत्येन दोषप्रशमनोपदर्शनार्थं; तथा, अत्यभ्यासे 'गुरुप्रक्लेदित्वाच्छ्लेष्माणमुत्क्लेशयन्ति' इत्यादिग्रन्थवक्तव्यदोषकरणयोग्यतोपदर्शनार्थं च। भेषजाभिमताश्च सद्य इति च्छेदः। सद्य इति अनभ्यासे। शुभाशुभकारिण्यो भवन्तीति सद्यः शुभकारिण्यः, अत्यभ्यासप्रयोगे त्वशुभकारिण्यः। एतदेव शुभाशुभकारित्वं दर्शयति— आपातभद्रा इत्यादिना। प्रयोगसमसाद्गुण्यादिति समस्य प्रयोगस्य सद्गुणत्वात्, समेऽल्पकाले अल्पमात्रे च पिप्पल्यादिप्रयोगे सद्गुण भवन्तीत्यर्थः। दोषसञ्चयानुबन्धोऽत्युपयोगो यासां ता दोषसञ्चयानुबन्धाः। एतदेव दोषसञ्चयानुबन्धत्वं विवृणोति— सततमित्यादि। पिप्पलीधर्मकथनप्रस्तावाद्गुणान्तरमाह— योगवाहिन्यस्त्वित्यादि। योगवाहित्वेन कटुकानामपि पिप्पलीनां वृष्यप्रयोगेषु योगः, तथा ज्वरगुल्मकुष्ठहरादिप्रयोगेषु ज्वरादीन् हन्ति

पिप्पली। अयं च पिप्पल्यतियोगनिषेधोऽपवादं परित्यज्य ज्ञेयः। तेन, पिप्पलीरसायनप्रयोगस्तथा गुल्मादिषु च पिप्पलीवर्धमानकप्रयोगो न विरोधमावहति। उक्ते हि विषये यथोक्तविधानेन निर्दोषा एव पिप्पल्य इति ऋषिवचनादुन्नीयते। अन्ये तु, अन्नसंस्करणे पिप्पल्यादीनामतिप्रयोगो निषिध्यते, न तु स्वातन्त्र्येणेति ब्रुवते। सततमुपयुज्यमाना इति अतिमात्रत्वेन तथा सततप्रयोगेण चेति ज्ञेयम्॥१६॥

क्षारः पुनरौष्ण्यतैक्ष्णयलाघवोपपन्नः क्लेदयत्यादौ पश्चाद्विशोषयति, स पचनदहनभेदनार्थमुपयुज्यते; सोऽतिप्रयुज्यमानः केशाक्षिहृदयपुंस्त्वोपघातकरः सम्पद्यते। ये ह्येनं ग्रामनगरनिगमजनपदाः सततमुपयुञ्जते त आन्ध्यषाण्ढ्यखालित्यपालित्यभाजो हृदयापकर्तिनश्च भवन्ति, तद्यथा— प्राच्याश्चीनाश्च; तस्मात् क्षारं नात्युपयुञ्जीत॥१७॥

हृदयापकर्तिन इति हृदयपरिकर्तनरूपवेदनायुक्ताः॥१७॥

लवणं पुनरौष्ण्यतैक्ष्ण्योपपन्नम्, अनतिगुरु, अनतिस्निग्धम्, उपक्लेदि, विस्रंसनसमर्थम्, अन्नद्रव्यरुचिकरम्, आपातभद्रं प्रयोगसमसाद्गुण्यात्, दोषसञ्चयानुबन्धं, तद्रोचनपाचनोपक्लेदनविस्रंसनार्थमुपयुज्यते। तदत्यर्थमुपयुज्यमानं ग्लानिशैथिल्यदौर्बल्याभिनिर्वृत्तिकरं शरीरस्य भवति। ये ह्येनद्ग्रामनगरनिगमजनपदाः सततमुपयुञ्जते, ते भूयिष्ठं ग्लास्नवः शिथिलमांसशोणिता अपरिक्लेशसहाश्च भवन्ति। तद्यथा— बाह्लीकसौराष्ट्रिकसैन्धवसौवीरकाः; ते हि पयसाऽपि सह लवणमश्नन्ति। येऽपीह भूमेरत्यूषरा देशास्तेष्वोषधिवीरुद्वनस्पतिवानस्पत्या न जायन्तेऽल्पतेजसो वा भवन्ति, लवणोपहतत्वात्। तस्माल्लवणं नात्युपयुञ्जीत। ये ह्यतिलवणसात्म्याः पुरुषास्तेषामपि खालित्यपालित्यानि वलयश्चाकाले भवन्ति॥१८॥

ग्लानिः मांसापचयो हर्षक्षयो वा। न केवलं लवणातियोगशरीरोपघातकरः; किन्तु भूमेरप्युपघातकर इत्याह— येऽपीहेत्यादि। ऊषरा इति लवणप्रधानाः। लवणं नात्युपयुञ्जीतेति नातिमात्रं लवणं सततमुपयुञ्जीत, अन्नद्रव्यसंस्कारकं तु स्तोकमात्रमभ्यासेनाप्युपयोजनीयमेव। बाह्लीकादिव्यतिरिक्तेऽपि देशे येऽतिलवणमश्नन्ति तेषामपि दोषानाह— ये हीत्यादि। एतेन चान्यत्रापि देशेऽतिमात्रलवणसात्म्यानां लवणात्युपयोगकृत एव शैथिल्यादिदोष उन्नीयते, न देशस्वभावकृतः॥ १८॥

तस्मात्तेषां तत्सात्म्यतः क्रमेणापगमनं श्रेयः। सात्म्यमपि हि क्रमेणोपनिवर्त्यमानमदोषमल्पदोषं वा भवति॥ १९॥

तेषामिति अतिक्षारलवणसात्म्यानाम्। तत्सात्म्यत इति अतिमात्रक्षारादतिमात्रलवणाच्च सात्म्यात्। क्रमेणेति नवेगान्धारणीयोक्तसात्म्यपरित्यागक्रमेण। इह च सात्म्यशब्देनौकसात्म्यमभिप्रेतम्। अल्पदोषमदोषं वेति पक्षद्वयेऽत्यर्थसात्म्यमल्पदोषं भवति, अन्यत्त्वदोषमिति व्यवस्था॥ १९॥

सात्म्यं नाम तद् यदात्मन्युपशेते; सात्म्यार्थो ह्युपशयार्थः। तत्त्रिविधं प्रवरावरमध्यविभागेन; सप्तविधं तु रसैकैकत्वेन सर्वरसोपयोगाच्च। तत्र सर्वरसं प्रवरम्, अवरमेकरसं, मध्यं तु प्रवरावरमध्यस्थम्। तत्रावरमध्याभ्यां सात्म्याभ्यां क्रमेणैव प्रवरमुपपादयेत् सात्म्यम्। सर्वरसमपि च सात्म्यमुपपन्नः प्रकृत्याद्युपयोक्त्रष्टमानि सर्वाण्याहारविधिविशेषायतनान्यभिसमीक्ष्य हितमेवानुरुध्येत॥ २०॥

सात्म्यं नामेति ओकसात्म्यं नामेत्यर्थः। (ओकादिति अभ्यासात्।) उपशयार्थ इति उपशयशब्दाभिधेय इत्यर्थः। तदिति ओकसात्म्यम्। त्रिविधमिति प्रवरावरमध्यभेदेन। सप्तविधन्तु एकैकरसेन षट्, संसृष्टरसोपयोगाच्चैकम्, एवं सप्तविधम्। संसृष्टशब्देन द्विरसादयः षड्रसपर्यन्ता

गृह्यन्ते। प्रवरावरमध्यस्थमिति द्विरसादिपञ्चरसपर्यन्तम्। अवरमध्यमाभ्यां लक्षितः पुरुषः। प्रवरमिति सर्वरसम्। सात्म्यमुपपादयेत् अभ्यसेदित्यर्थः। क्रमेणेति यथोक्ताभ्यासक्रमेण। उपपादितसर्वरससात्म्येनापि चाहारः प्रशस्तप्रकृत्यादिसम्पन्न एव कर्तव्य इत्याह— सर्वरसमित्यादि। अभिसमीक्ष्येति हिताहितत्वेन विचार्य। हितमेवेति पदेन यदेव प्रकृत्यादिना हितं तदेवानुरुध्येत सेवेतेत्यर्थः॥२०॥

तत्र खल्विमान्यष्टावाहारविधिविशेषायतनानि भवन्ति; तद्यथा— प्रकृतिकरणसंयोगराशि-देशकालोपयोगसंस्थोपयोक्त्रष्टमानि (भवन्ति)॥२१॥

आहारस्य विधिः प्रकारो विधानं वा इत्याहारविधिः, तस्य विशेषो हितत्वमहितत्वं च, तस्यायतनानि हेतूनीत्याहारविधिविशेषायतनानि। आहारप्रकारस्य हितत्वमहितत्वं च प्रकृत्यादिहेतुकमित्यर्थः। उपयोक्ता अष्टमो येषां तान्युपयोक्त्रष्टमानि॥२१॥

तत्र प्रकृतिरुच्यते स्वभावो यः, स पुनराहारौषधद्रव्याणां स्वाभाविको गुर्वादिगुणयोगः; तद्यथामाषमुद्गयोः, शूकरैणयोश्च॥(१)॥

उक्तानि प्रकृत्यादीना विभजते— तत्रेत्यादिना। स्वाभाविक इति संस्काराद्यकृतः। माषमुद्गयोरिति प्रकृत्या माषे गुरुत्वं, मुद्गे च लघुत्वं; शूकरे गुरुत्वं, एणे च लघुत्वम्॥१॥

करणं पुनः स्वाभाविकानां द्रव्याणामभिसंस्कारः। संस्कारो हि गुणान्तराधानमुच्यते। ते गुणास्तोयाग्निसन्निकर्षशौचमन्थनदेशकालवासनभावनादिभिः कालप्रकर्षभाजनादिभिश्चाधीयन्ते॥(२)॥

द्रव्याणामिति वक्तव्ये स्वाभाविकानामिति यत् करोति, तेनोत्पत्तिकाले जनकभूतैः स्वगुणारोपणं, संस्कारस्तूत्पन्नस्यैव तोयादिना गुणान्तराधानमिति दर्शयति। तच्च प्राकृतगुणोपमर्देनैव क्रियते, यथा— तोयाग्निसन्निकर्षशौचैस्तण्डुलस्थं गौरवमुपहत्य लाघवमन्ने क्रियते। यदुक्तं— "सुधौतः प्रस्रुतः स्विन्नः सन्तप्तश्चौदनो लघुः" (सू.अ.२७)। तथा रक्तशाल्यादेर्लघोरप्यग्निसंयोगादिना लाघवं वर्धते। मन्थनाद्गुणाधानं यथा "शोथकृद्दधि शोथघ्नं सस्नेहमपि मन्थनात्" इति। देशेन यथा "भस्मराशेरधः स्थापयेत्" (चि.अ.१पा.१) इत्यादौ। वासनेन गुणाधानं यथा— अपामुत्पलादिवासनेन सुगन्धानुकरणम्। भावनया च स्वरसादिकृतया स्थितस्यैवामलकादेर्गुणस्योत्कर्षो भवति। कालप्रकर्षाद्यथा— "पक्षाज्जातरसं पिबेत्" (चि.अ.१५) इत्यादि। भाजनेन यथा— "त्रैफलेनायसीं पात्रीं कल्केनालेपयेत्" (चि.अ.१,पा.३) इत्यादौ। आदिग्रहणात् पेषणाभिमन्त्रणादि गृह्यते। ननु, संस्काराधेयेन गुणेन कथं स्वाभाविकगुणनाशः क्रियते, यतः "स्वभावो निष्प्रतिक्रियः" इत्युक्तं; यदि हि संस्कारेण स्वाभाविकगुरुत्वं प्रतिक्रियते, तदा "स्वभावो निष्प्रतिक्रियः" इति कथं? ब्रूमः— "स्वभावो निष्प्रतिक्रियः" इति स्वभावो भावानामुत्पत्तौ नान्यथा क्रियते। तेन, जातिप्रतिबद्धं माषादीनां गुरुत्वं न तज्जातौ स्फोटयितुं पार्यते, संस्कारेण तु तदन्यथाकरणमनुमतमेव दृष्टत्वात्। कश्चित्तु गुणो द्रव्याणां संस्कारादिनाऽपि नान्यथा क्रियते, यथा— वह्नेरौष्ण्यं, वायोश्चलत्वं, तैलस्य स्नेह इत्यादि। एते हि यावद्द्रव्यभाविन एव गुणाः। गौरवादयस्तु पुराणधान्यादिष्वप्यपगमदर्शनान्न यावद्द्रव्यभाविनः। उक्तं हि— "गुणो द्रव्यविनाशाद्वा विनाशमुपगच्छति। गुणान्तरोपधानाद्वा" इति। यत्र तु संस्कारेण व्रीहेर्लाजलक्षणं द्रव्यान्तरमेव जन्यते, तत्र गुणान्तरोत्पादः सुष्ठ्वेव॥(२)॥

संयोगः पुनर्द्वयोर्बहूनां वा द्रव्याणां संहतीभावः, स विशेषमारभते, यं पुनर्नैकैकशो द्रव्याण्यारभन्ते; तद्यथा— मधुसर्पिषोः, मधुमत्स्यपयसां च संयोगः॥(३)॥

संयोगमाह— संयोगस्त्वित्यादि। स विशेषमारभत इति संयुज्यमानद्रव्यैकदेशोऽदृष्टं कार्यमारभत इत्यर्थः। यं नैकैकश इति यं विशेषं प्रत्येकमसंयुज्यमानानि द्रव्याणि नारभन्त इत्यर्थः। मधुसर्पिषी हि प्रत्येकममारके मिलिते तु मारके भवतः, क्षीरमत्स्यादिसंयोगश्च कुष्ठादिकरो भवति। संयोगस्त्विह प्रधान्येनैवोपलभ्यमानद्रव्यमेलको विवक्षितः, तेन भावनादिष्वपि यद्यपि संयोगोऽस्ति, तथाऽपि तत्र भावनाद्रव्याणां प्राधान्येनानुपलब्धेर्न संयोगेन ग्रहणम्॥ (३)॥

राशिस्तु सर्वग्रहपरिग्रहौ मात्रामात्रफलविनिश्चयार्थः। तत्र सर्वस्याहारस्य प्रमाणग्रहणमेकपिण्डेन सर्वग्रहः, परिग्रहः पुनः प्रमाणग्रहणमेकैकश्येनाहारद्रव्याणाम्। सर्वस्य हि ग्रहः सर्वग्रहः, सर्वतश्च ग्रहः परिग्रह उच्यते॥ (४)॥

राशिः प्रमाणम्। मात्रामात्रफलविनिश्चयार्थं इति मात्रावदाहारस्यौषधस्य च यत् फलं शुभम्, अमात्रस्य हीनस्यातिरिक्तस्य वा यत् फलमशुभम्। यदुक्तं— "तस्य ज्ञानार्थमुचितप्रमाणमनुचितप्रमाणं च राशिसञ्ज्ञं भवति"। सर्वग्रहं विवृणोति— तत्रेत्यादि। सर्वस्येति मिश्रीकृतस्यान्नमांससूपादेरेकपिण्डेन मानम्। परिग्रहं विवृणोति— परिग्रहः पुनरित्यादि। एकैकश्येनेति अन्नस्य कुडवः, सूपस्य पलं, मांसस्य द्विपलमित्याद्यवयवमानपूर्वकं समुदायमानम्। सर्वग्रहे प्रत्यवयवमाननियमो नास्ति; तेन येन केनचिदाहारेण प्रत्येकमनियतमानेन सम्पूर्णाहारमात्रानियमनं सर्वग्रहः। एतदेव शब्दव्युत्पत्त्या दर्शयति— सर्वस्य हीत्यादि। सर्वत इति प्रत्येकावयवत इत्यर्थः॥ (४)॥

देशः पुनः स्थानं; स द्रव्याणामुत्पत्तिप्रचारौ देशसात्म्यं चाचष्टे॥ (५)॥

देशं विभजते— देश इत्यादि। स्थानग्रहणेनाहारद्रव्यस्य तथा भोक्तुश्च स्थानं दर्शयति। आचष्ट इति द्रव्यस्योत्पत्तिप्रचारादिकृतगुणज्ञानहेतुर्भवति। तत्रोत्पत्त्या— हिमवति जातं गुणवद्भवति, मरौ जातं लघु भवति, इत्यादि। प्रचारेण लघुभक्ष्याणां प्राणिनां तथा धन्वप्रचारिणां बहुक्रियाणां च लाघवं, विपर्यये च गौरवं गृह्यते। देशसात्म्येन च देशविपरीतगुणं सात्म्यं गृह्यते; यथा— आनूपे उष्णरूक्षादि, धन्वनि च शीतस्निग्धादि, ओकसात्म्यं तु उपयोक्तृग्रहणेन गृहीतम्॥ (५)॥

कालो हि नित्यगश्चावस्थिकश्च; तत्रावस्थिको विकारमपेक्षते, नित्यगस्तु ऋतुसात्म्यापेक्षः॥ (६)॥

नित्यग इति अहोरात्रादिरूपः। आवस्थिक इति रोगित्वबाल्याद्यवस्थाविशेषित इत्यर्थः। विकारमपेक्षत इति बाल्यादिकृतं तु श्लेष्मविकारं ज्वरादिकं चाहारनियमार्थमपेक्षत इत्यर्थः। ऋतुसात्म्यं हि ऋतुमपेक्षत इति ऋतुसात्म्यापेक्षः॥ ६॥

उपयोगसंस्था तूपयोगनियमः; स जीर्णलक्षणापेक्षः॥ (७)॥

एवमाहारोपयोगः कर्तव्य एवं न कर्तव्य इत्युपयोगनियमः, स जीर्णलक्षणापेक्ष इति प्राधान्येनोक्तः। तेनेह 'अजल्पन्नहसन्नातिद्रुतं नातिविलम्बितम्' इत्याद्युपयोगनियममप्यपेक्षत एव; अजीर्णभोजने तु महांस्त्रिदोषकोपलक्षणो दोषो भवतीत्ययमेवोदाहृतः॥ (७)॥

उपयोक्ता पुनर्यस्तमाहारमुपयुङ्क्ते, यदायत्तमोकसात्म्यम्। इत्यष्टावाहारविधिविशेषायतनानि व्याख्यातानि भवन्ति॥ २२॥

यदायत्तमोकसात्म्यमिति भोक्तृपुरुषापेक्षं ह्यभ्याससात्म्यं भवति; कस्यचिद्धि किञ्चिदेवाभ्यासात् पथ्यमपथ्यं वा सात्म्यं भवति॥ २२॥

एषां विशेषाः शुभाशुभफलाः परस्परोपकारका भवन्ति; तान् बुभुत्सेत, बुद्ध्वा च हितेप्सुरेव स्यात्; नच मोहात् प्रमादाद्वा प्रियमहितमसुखोदर्कमुपसेव्यमाहारजातमन्यद्वा किञ्चित्॥ २३॥

एषामित्यादौ शुभफला विशेषा अशुभफलाश्च परस्परोपकारका भवन्तीति ज्ञेयम्। तत्र प्रकृत्या लाघवादिः शुभफलः, गुर्वादिश्चाशुभफलः। करणाद्याधेयोऽपि विशेषः शास्त्रोक्तः शुभः, निषिद्धस्त्वशुभः। देशासात्म्यं निन्दितदेशभवत्वादि च द्रव्यस्याशुभफलम्। एवं कालासात्म्यमशुभफलं चाजीर्णभोजनादि, तथा ओकासात्म्यं चाशुभमशुभफलमिति ज्ञेयं; विपरीतं तु शुभफलम्। मोहादिति अज्ञानात्, प्रमादादिति ज्ञात्वाऽपि रागादित्यर्थः। प्रियमिति तदात्वमात्रप्रियम्। अहितमित्यस्य विवरणम्— असुखोदर्कमिति।— असुखं दुःखरूपम्, उदर्क उत्तरकालीनं फलं, यस्य स तथा। अन्यद्वेति भेषजविहारादि॥ २३॥

तत्रेदमाहारविधिविधानमरोगाणामातुराणां चापि केषाञ्चित् काले प्रकृत्यैव हिततमं भुञ्जानानां भवति — उष्णं, स्निग्धं, मात्रावत्, जीर्णे वीर्याविरुद्धम्, इष्टे देशे, इष्टसर्वोपकरणं, नातिद्रुतं, नातिविलम्बितम्, अजल्पन्, अहसन्, तन्मना भुञ्जीत, आत्मानमभिसमीक्ष्य सम्यक्॥ २४॥

तत्रेत्यादौ इदमिति वक्ष्यमाणम्। आहारविधिर्विधीयते येनोष्णस्निग्धादिना वक्ष्यमाणेन तदाहारविधिविधानम्। आतुराणां च केषाञ्चिदिति पदेन रक्तपित्तिनां शीतमेव, कफरोगिणां रूक्षमेव हितमित्यादिविपर्ययं दर्शयति। केषाञ्चिद्भुञ्जानानामिदमाहारविधिविधानं हिततमं भवतीति योजना। प्रकृत्यैवेति स्वभावेनैव हिततमं हिततममित्युक्तं; तेन यत् प्रकृत्या हितं तत् कदाचिदेव कञ्चिदेव

पुरुषमासाद्याहितं भवति, तच्च कादाचित्कत्वादनादृतं; तेन प्रायिकत्वादेनं हिततमं वक्ष्याम इति भावः। उष्णमित्यादौ सम्यगिति छेदः॥ २४॥

तस्य साद्गुण्यमुपदेक्ष्यामः— उष्णमश्नीयात्; उष्णं हि भुज्यमानं स्वदते, भुक्तं चाग्निमौदर्यमुदीरयति, क्षिप्रं जरां गच्छति, वातमनुलोमयति, श्लेष्माणं च परिह्रासयति; तस्मादुष्णमश्नीयात्॥ (१)॥

स्निग्धमश्नीयात्; स्निग्धं हि भुज्यमानं स्वदते, भुक्तं चानुदीर्णमग्निमुदीरयति, क्षिप्रं जरां गच्छति, वातमनुलोमयति, शरीरमुपचिनोति, दृढीकरोतीन्द्रियाणि, बलाभिवृद्धिमुपजनयति, वर्णप्रसादं चाभिनिर्वर्तयति; तस्मात् स्निग्धमश्नीयात्॥ (२)॥

तस्येति उष्णादिगुणयुक्तस्यान्नस्य। साद्गुण्यमिति प्रशस्तगुणयोगिताम्। परिह्रासयतीति भिन्नसङ्घातं करोति॥ (१-२)॥

मात्रावदश्नीयात्; मात्रावद्धि भुक्तं वातपित्तकफानपीडयदायुरेव विवर्धयति केवलं, सुखं गुदमनुपर्यैति, न चोष्माणमुपहन्ति, अव्यथं च परिपाकमेति; तस्मान्मात्रावदश्नीयात्॥ (३)॥

मात्रावदिति प्रशंसायां मतुप्; तेन प्रशस्तमात्रमित्यर्थः। अपीडयदिति अनतिमात्रत्वेन स्वस्थानस्थितं सद्वातादीन् स्थानापीडनादप्रकोपयत्। गुदमनुपर्यैतीति परिणतं सदनुरूपतया निःसरतीत्यर्थः। ऊष्माणं वह्निम्॥ (३)॥

जीर्णेऽश्नीयात्; अजीर्णे हि भुञ्जानस्याभ्यवहृतमाहारजातं पूर्वस्याहारस्य रसमपरिणतमुत्तरेणाहार-रसेनोपसृजत् सर्वान् दोषान् प्रकोपयत्याशु, जीर्णे तु भुञ्जानस्य स्वस्थानस्थेषु दोषेष्वग्नौ चोदीर्णे जातायां च बुभुक्षायां विवृतेषु च स्रोतसां मुखेषु विशुद्धे चोद्गारे हृदये विशुद्धे वातानुलोम्ये विसृष्टेषु च

वातमूत्रपुरीषवेगेष्वभ्यवहृतमाहारजातं सर्वशरीरधातूनप्रदूषयदायुरेवाभिवर्धयति केवलं; तस्माज्जीर्णेऽश्नीयात्॥ (४)॥

पूर्वस्येति दिनान्तरकृतस्य। अपरिणतमिति असम्यग्जातम्। आहाररसेनेति आहारपरिणामगतेन मधुराधिना; किंवा आहारजेन रसेन। स्वस्थानस्थेषु दोषेष्वित्यादि जीर्णाहारस्य लक्षणम्॥ (४)॥

वीर्याविरुद्धमश्नीयात्; अविरुद्धवीर्यमश्नन् हि विरुद्धवीर्याहारजैर्विकारैर्नोपसृज्यते; तस्माद्वीर्याविरुद्धमश्नीयात्॥ (५)॥

विरुद्धवीर्याहारजैरिति कुष्ठान्ध्यविसर्पाद्यैरात्रेयभद्रकाप्यीयोक्तैः॥ (५)॥

इष्टे देशे इष्टसर्वोपकरणं चाश्नीयात्; इष्टे हि देशे भुञ्जानो नानिष्टदेशजैर्मनोविघातकरैर्भावैर्मनोविघातं प्राप्नोति, तथैवेष्टैः सर्वोपकरणैः; तस्मादिष्टे देशे तथेष्टसर्वोपकरणं चाश्नीयात्॥ (६)॥

मनोविघातकरैर्भावैरिति त्रिविधकुक्षीये (वि.अ.२) वक्ष्यमाणैः कामादिभिश्चित्तोपतापकरैश्चित्तविकारैरित्यर्थः। तथेष्टैश्च सर्वोपकरणैर्भुञ्जानो मनोविघातं न प्राप्नोतीति योजना; अनिष्टभोजनादेर्मनोविघातो भवति॥ (६)॥

नातिद्रुतमश्नीयात्; अतिद्रुतं हि भुञ्जानस्योत्स्नेहनमवसादनं भोजनस्याप्रतिष्ठानं च, भोज्यदोषसाद्गुण्योपलब्धिश्च न नियता; तस्मान्नातिद्रुतमश्नीयात्॥ (७)॥

उत्क्लेहनम् उन्मार्गगमनम्। अवसदनम् अवसादः। अप्रतिष्ठानं हृदयस्थत्वेन कोष्ठाप्रवेशः। भोज्यगतानां दोषाणां केशादीनां, साद्गुण्यस्य च स्वादुत्वादेः, उपलब्धिर्न नियता भवति कदाचिदुपलभ्यते कदाचिन्नेति। तत्र दोषानुपलब्ध्या सदोषस्यैव भक्षणं, साद्गुण्यानुपलब्ध्या च प्रीत्यभावः॥(७)॥

नातिविलम्बितमश्नीयात्; अतिविलम्बितं हि भुञ्जानो न तृप्तिमधिगच्छति, बहु भुङ्क्ते, शीतीभवत्याहारजातं, विषमं च पच्यते; तस्मान्नातिविलम्बितमश्नीयात्॥(८)॥

विषमं च पच्यत इति चिरकालभोजनेनाग्निसम्बन्धस्य वैषम्यादिति भावः॥(८)॥

अजल्पन्नहसन् तन्मना भुञ्जीत; जल्पतो हसतोऽन्यमनसो वा भुञ्जानस्य त एव हि दोषा भवन्ति, य एवातिद्रुतमश्नतः; तस्मादजल्पन्नहसंस्तन्मना भुञ्जीत॥(९)॥

य एवातिद्रुतमश्नतो दोषा इति उत्क्लेहनादयः॥(९)॥

आत्मानमभिसमीक्ष्य भुञ्जीत सम्यक्; इदं ममोपशेते इदं नोपशेत इत्येवं विदितं ह्यस्यात्मन आत्मसात्म्यं भवति; तस्मादात्मानमभिसमीक्ष्य भुञ्जीत सम्यगिति॥२५॥

नोपशेत इतीत्यत्र इतिशब्देन सात्म्यासात्म्यविधानोपदर्शकेन विचारफलमोकसात्म्यसेवनं दर्शयति। आत्मन इति पदेनात्मनैवात्मसात्म्यं प्रतिपुरुषं ज्ञायते, न शास्त्रोपदेशेनेति दर्शयति॥२५॥

भवति चात्र—

रसान् द्रव्याणि दोषांश्च विकारांश्च प्रभावतः।

वेद यो देशकालौ च शरीरं च स नो भिषक्॥२६॥

अध्यायोक्तरसप्रभावादिज्ञानं स्तौति— रसानित्यादि। स नो भिषगिति नोऽस्माकं सम्मत इत्यर्थः॥२६॥

तत्र श्लोकौ—

विमानार्थो रसद्रव्यदोषरोगाः प्रभावतः।

द्रव्याणि नातिसेव्यानि त्रिविधं सात्म्यमेव च॥२७॥

आहारायतनान्यष्टौ भोज्यसाद्गुण्यमेव च।

विमाने रससङ्ख्याते सर्वमेतत् प्रकाशितम्॥२८॥

दोषविकारौ च यद्यपि त्रिविधकुक्षीये (वि.अ.२) प्रभावविस्तारेण वक्तव्यौ, तथाऽपीह सङ्क्षेपेणोक्तावेव; तेन दोषविकारप्रभावावप्युक्ताविति यदुच्यते सङ्ग्रहे तत् साधु। तैलादिद्रव्यत्रयकथनं च द्रव्यप्रभावगृहीतमिति कृत्वा न पृथक् सङ्ग्रहे पठितम्॥२७-२८॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते विमानस्थाने रसविमानं नाम प्रथमोऽध्यायः॥१॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां विमानस्थाने रसविमानं नाम प्रथमोऽध्यायः॥१॥

द्वितीयोऽध्यायः।

अथातस्त्रिविधकुक्षीयं विमानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

रसविमाने राशिरुक्तः, तस्य राशेर्मात्रामात्रावतः फलप्रपञ्चं दोषविकारप्रपञ्चं दर्शयितुं त्रिविधकुक्षीयोऽभिधीयते॥१-२॥

त्रिविधं कुक्षौ स्थापयेदवकाशांशमाहारस्याहारमुपयुञ्जानः; तद्यथा— एकमवकाशांशं मूर्तानामाहारविकाराणाम्, एकं द्रवाणाम्, एकं पुनर्वातपित्तश्लेष्मणाम्; एतावतीं ह्याहारमात्रामुपयुञ्जानो नामात्राहारजं किञ्चिदशुभं प्राप्नोति॥३॥

त्रिविधमिति त्रिप्रकारम्। अवकाशांशमिति कोष्ठावकाशभागम्। आहारस्येति आहारनिमित्तमित्यर्थः। तेन द्वाववकाशावाहारस्य वक्तव्यौ, एकस्तु दोषाणामिति त्रिविधं वक्ष्यमाणमुक्तम्। दोषावकाशस्थापनं ह्याहारोपकारकत्वादाहारस्येत्युच्यते, दोषावकाशानवस्थाने ह्याहारो दोषैर्दूष्यत इति वक्तव्यम्। किंवा, आहारस्यावकाशांशमामाशयरूपं कुक्षौ वक्ष्यमाणविभागेन त्रिविधं स्थापयेदित्यर्थः। कुक्ष्यंशभागं यथाकर्तव्यमाह— तद्यथेत्यादि। मूर्तानामिति आश्यखाद्यानां, द्रवाणामिति लेह्यपेयानाम्। इह चांशशब्दो न समप्रविभागे वर्तते, किन्तु यथोचितविभागे; तेन मूर्तानां बहुभागो भवतीति ज्ञेयम्। वातपित्तश्लेष्मणां यद्यपि भिन्नानि स्थानानि, तथाऽपि मूर्ताहारादिभागापेक्षया मिलितानां किञ्चित्स्थानं भवतीत्येकत्वेनाध्यारोप्यात्र एकमिति कृतम्। ननु कुक्ष्यंशविभागेन कृतेऽप्याहारे प्रकृतिगुर्वादिदुष्टद्रव्यजदोषो दृश्यत इत्याह— नामात्राहारजमिति; प्रकृत्यादिदोषकृतं तु प्राप्नोत्येवेत्यर्थः॥३॥

न च केवलं मात्रावत्त्वादेवाहारस्य कृत्स्नमाहारफलसौष्ठवमवाप्तुं शक्यं, प्रकृत्यादीनामष्टानामाहारविधिविशेषायतनानां प्रविभक्तफलत्वात्॥४॥

तदेव स्फोरयति— न चेत्यादि। सौष्ठवं सुष्ठुत्वं भाद्रक्यमित्यर्थः। प्रविभक्तफलत्वादिति प्रविभिन्नफलत्वात्॥४॥

तत्रायं तावदाहारराशिमधिकृत्य मात्रामात्राफलविनिश्चयार्थः प्रकृतः। एतावानेव ह्याहारराशिविधिविकल्पो यावन्मात्रावत्त्वममात्रावत्त्वं च॥५॥

तत्र मात्रावत्त्वं पूर्वमुद्दिष्टं कुक्ष्यंशविभागेन, तद्भूयो विस्तरेणानुव्याख्यास्यामः। तद्यथा— कुक्षेरप्रणीडनमाहारेण, हृदयस्यानवरोधः, पार्श्वयोरविपाटनम्, अनतिगौरवमुदरस्य, प्रीणनमिन्द्रियाणां, क्षुत्पिपासोपरमः, स्थानासनशयनगमनोच्छ्वासप्रश्वासहास्यसङ्कथासु सुखानुवृत्तिः, सायं प्रातश्च सुखेन परिणमनं, बलवर्णोपचयकरत्वं च; इति मात्रावतो लक्षणमाहारस्य भवति॥६॥

कुक्ष्यंशविभागेनेति एकमवकाशांशं मूर्तानामित्यादिना। उद्दिष्टमिति सङ्क्षेपेण कथितम्। सायं प्रातश्चेतिवचनात् सायं भोजने कृते यदि प्रातः, प्रातश्च कृते यदि सायं, सुखेन परिणमनं तथा स्थानासनादिषु सुखानुवृत्तिर्भवति, तदा मात्रावद्भोजनमनेन कृतमिति ज्ञेयम्॥५-६॥

अमात्रावत्त्वं पुनर्द्विविधमाचक्षते— हीनम्, अधिकं च। तत्र हीनमात्रमाहारराशिं बलवर्णोपचयक्षयकरमतृप्तिकरमुदावर्तकरमनायुष्यवृष्यमनौजस्यं शरीरमनोबुद्धीन्द्रियोपघातकरं सारविधमनमलक्ष्म्यावहमशीतेश्च वातविकाराणामायतनमाचक्षते, अतिमात्रं पुनः सर्वदोषप्रकोपणमिच्छन्ति कुशलाः। यो हि मूर्तानामाहारजातानां सौहित्यं गत्वा द्रवैस्तृप्तिमापद्यते

भूयस्तस्यामाशयगता वातपित्तश्लेष्माणोऽभ्यवहारेणातिमात्रेणातिप्रपीड्यमानाः सर्वे युगपत् प्रकोपमापद्यन्ते, ते प्रकुपितास्तमेवाहारराशिमपरिणतमाविश्य कुक्ष्येकदेशमन्नाश्रिता विष्टम्भयन्तः सहसा वाऽप्युत्तराधराभ्यां मार्गाभ्यां प्रच्यावयन्तः पृथक् पृथगिमान् विकारानभिनिर्वर्तयन्त्यतिमात्रभोक्तुः। तत्र वातः शूलानाहाङ्गमर्दमुखशोषमूर्च्छाभ्रमा-ग्निवैषम्यपार्श्वपृष्ठकटिग्रहसिराकुञ्चनस्तम्भनानि करोति, पित्तं पुनर्ज्वरातीसारा-न्तर्दाहतृष्णामदभ्रमप्रलपनानि, श्लेष्मा तु छर्द्यरोचकाविपाकशीतज्वरा-लस्यगात्रगौरवाणि॥७॥

सारविधमनमिति रोगभिषग्जितीये (वि.अ.८) वक्ष्यमाणत्वक्सारादिविधमनम्। आहारविकाराणामिति करणे सौहित्ययोगात् षष्ठी। द्रवैस्तृप्तिमिति भूयःपदविशेषणादतितृप्तिमित्यर्थः। आमाशयगता इति वचनेनाग्निसहाय(समान)स्यैव वायोः कोपो भवति, न पक्वाशयगतस्येति दर्शयति। कुक्ष्येकदेशमन्नाश्रिताः सह दूषितेनाहारेणेत्यर्थः॥७॥

न च खलु केवलमतिमात्रमेवाहारराशिमामप्रदोषकरमिच्छन्ति, अपि तु खलु गुरुरूक्षशीतशुष्कद्विष्ट-विष्टम्भिविदाह्यशुचिविरुद्धानामकाले चान्नपानानामुपसेवनं, कामक्रोधलोभमोहेर्ष्याह्री-शोकमानोद्वेगभयोपतप्तमनसा वा यदन्नपानमुपयुज्यते, तदप्याममेव प्रदूषयति॥८॥

भवति चात्र—

मात्रयाऽप्यभ्यवहृतं पथ्यं चान्नं न जीर्यति।
चिन्ताशोकभयक्रोधदुःखशय्याप्रजागरैः॥९॥

अतिमात्राशनजन्यत्वेनामप्रदोषे वक्तव्येऽन्यतश्च यत आमप्रदोषो भवति तमाह— न च खल्वित्यादि। कामादिभिर्मानस उपघातः प्रभावादेवान्नं दूषयति। एवमशुच्यप्यन्नमशुचित्वेन ज्ञातं मनस

उपघातकत्वादामदूषकं भवति। आमस्यापक्वस्याहारस्य प्रदोष आमप्रदोषः। आममेव प्रदूषयतीति अत्र कर्मकर्तृत्वे 'अच्', दुष्टं भवतीत्यर्थः; किंवा, आमममपक्वं सद्दुष्टदोषसम्पर्काच्छरीरं दूषयतीति ज्ञेयम्॥८-९॥

तं द्विविधमामप्रदोषमाचक्षते भिषजः— विसूचिकाम्, अलसकं च॥१०॥
तत्र विसूचिकामूर्ध्वं चाधश्च प्रवृत्तामदोषां यथोक्तरूपां विद्यात्॥११॥

द्विविधमित्यादौ अलसक एव दण्डालसकामविषयोरवरोधो ज्ञेयः; तयोरपि हि दोषोऽप्रवर्तमानत्वादलसीभूत एव भवति॥१०-११॥

अलसकमुपदेक्ष्यामः— दुर्बलस्याल्पाग्नेर्बहुश्लेष्मणो वातमूत्रपुरीषवेगविधारिणः स्थिरगुरुबहुरूक्षशीतशुष्कान्नसेविनस्तदन्नपानमनिलप्रपीडितं श्लेष्मणा च विबद्धमार्गमतिमात्रप्रलीनमलसत्वान्न बहिर्मुखीभवति, ततश्छर्द्यतीसारवर्ज्यान्यामप्रदोषलिङ्गान्यभिदर्शयत्यतिमात्राणि। अतिमात्रप्रदुष्टाश्च दोषाः प्रदुष्टामबद्धमार्गास्तिर्यग्गच्छन्तः कदाचिदेव केवलमस्य शरीरं दण्डवत् स्तम्भयन्ति, ततस्तं दण्डालसकमसाध्यं ब्रुवते। विरुद्धाध्यशनाजीर्णाशनशीलिनः पुनरामदोषमामविषमित्याचक्षते भिषजः, विषसदृशलिङ्गत्वात्; तत् परमसाध्यम्, आशुकारित्वाद्विरुद्धोपक्रमत्वाच्चेति॥१२॥

अलसकमुपदेक्ष्याम इत्यादिना पुनर्विशेषहेतुः प्रायोऽभिनिर्वर्तक उच्यते, सामान्येन त्वतिमात्राहाररूप उक्त एवेति ज्ञेयम्। अनिलप्रपीडितं श्लेष्मणा च विबद्धमार्गमिति दोषद्वयव्यापारवचनाद्वातश्लेष्मणोरलसके प्राधान्यमुच्यते, पित्तं तु सामान्यवचनसिद्धमप्रधानमस्त्येव तृष्णामदभ्रमादिलिङ्गमिति ज्ञेयम्। प्रदुष्टामबद्धमार्गा इति अत्रापक्व आहारोऽन्नरसो वा अपक्व आम

उच्यते। केवलं कृत्स्नम्। विरुद्धाध्यशनाजीर्णाशनशीलिन इति विरुद्धाशनम्, अध्यशनम्, अजीर्णाशनं च; अजीर्णस्यापक्वस्याशनमजीर्णाशनम्, अजीर्णे भोजनस्याध्यशनशब्देन लब्धत्वात्। आमदोषमामविषमाचक्षत इत्यत्र विषसदृशलिङ्ग एवामप्रदोषोऽभिप्रेतः, अत एव विषसदृशलिङ्गत्वादित्युक्तम्। विरुद्धोपक्रमत्वादिति आमापेक्षया यदुष्णं क्रियते तद्विषविरुद्धं, यच्च विषापेक्षया शीतं क्रियते तदामविरुद्धम्। विषसदृशता चामस्यामजनकहेतुविशेषप्रभावाद्भवति मधुघृतसमसंयोग इव विषत्वम्॥१२॥

तत्र साध्यमामं प्रदुष्टमलसीभूतमुल्लेखयेदादौ पाययित्वा सलवणमुष्णं वारि, ततः स्वेदनवर्तिप्रणिधानाभ्यामुपाचरेदुपवासयेच्चैनम्। विसूचिकायां तु लङ्घनमेवाग्रे विरिक्तवच्चानुपूर्वी। आमप्रदोषेषु त्वन्नकाले जीर्णाहारं पुनर्दोषावलिप्तामाशयं स्तिमितगुरुकोष्ठमनन्नाभिलाषिणमभिसमीक्ष्य पाययेद्दोषशेषपाचनार्थमौषधमग्निसन्धुक्षणार्थं च, नत्वेवाजीर्णाशनम्; आमप्रदोषदुर्बलो ह्यग्निर्न युगपद्दोषमौषधमाहारजातं च शक्तः पक्तुम्। अपि चामप्रदोषाहारौषधविभ्रमोऽतिबलत्वादुपरतकायाग्निं सहसैवातुरमबलमतिपातयेत्। आमप्रदोषजानां पुनर्विकाराणामपतर्पणेनैवोपरमो भवति, सति त्वनुबन्धे कृतापतर्पणानां व्याधीनां निग्रहे निमित्तविपरीतमपास्यौषधमातङ्कविपरीतमेवावचारयेद्यथास्वम्। सर्वविकाराणामपि च निग्रहे हेतुव्याधिविपरीतमौषधमिच्छन्ति कुशलाः, तदर्थकारि वा। विमुक्तामप्रदोषस्य पुनः परिपक्वदोषस्य दीप्ते चाग्नावभ्यङ्गास्थापनानुवासनं विधिवत् स्नेहपानं च युक्त्या प्रयोज्यं प्रसमीक्ष्य दोषभेषजदेशकालबलशरीराहारसात्म्यसत्त्वप्रकृतिवयसामवस्थान्तराणि विकारांश्च सम्यगिति॥१३॥

वर्तिरिति फलवर्तिः। आनुपूर्वीति पेयादिक्रम इत्यर्थः। जीर्णाहारमिति विसूचिकालसकयोरेवाहारस्य जीर्णतां दर्शयति। दोषावलिप्तामाशयस्तिमितगुरुकोष्ठत्वादि पुरुषविशेषणमपि लक्षणं ज्ञेयम्। न त्वजीर्णाशनमिति पुनर्निषेधकरणेनाजीर्णाशने प्रमादादजीर्णप्रशमनाभिप्रायेण क्रियमाणभेषजस्य

महात्ययतां 'दोषदुर्बलो ह्यग्निः' इत्यादिना वक्ष्यमाणां दर्शयति। कृतापतर्पणानामित्यनेन दोषाणामामताक्षयं सूचयति; सम्यक्कृते ह्यपतर्पणे नामानुबन्धोऽस्ति। ततश्च निरामदोषारब्धे विसूचिकालसकव्यवस्थिते शूलज्वरादौ आतङ्कविपरीतं निरामशूलज्वरादिहरमेव युज्यते। यथास्वमिति यद्यस्य शूलादेरातङ्कस्य विपरीतं तत्तत्र कार्यमित्यर्थः। आतङ्कविपरीतशब्देन च तदर्थकारि गृहीतं मन्तव्यम्। अत एवोत्तरत्र 'तदर्थकारि वा' इति सर्वविकारभेषजकथने उपपन्नं भवति; अन्यथा कथमिहानभिहितं तदर्थकारि तत्राप्रस्तुतमुच्यते। विमुक्तामप्रदोषस्येत्यादिनाऽभ्यङ्गादिविधानं व्याधिजनितातिदौर्बल्यादिदोषप्रशमनार्थम्॥१३॥

भवति चात्र—

आहारविध्यायतनानि चाष्टौ सम्यक् परीक्ष्यात्महितं विदध्यात्।

अन्यश्च यः कश्चिदिहास्ति मार्गो हितोपयोगेषु भजेत तं च॥१४॥

अनुक्तविध्युपग्रहार्थमाह— अन्यश्चेत्यादि। अन्यश्चेति ग्रहण्यतिसारादिवक्ष्यमाणामदोषक्षयकरो भेषजरूपो मार्ग इहामप्रदोषे हित इति सम्बन्धः॥१४॥

अशितं खादितं पीतं लीढं च क्व विपच्यते।

एतत्त्वां धीर! पृच्छामस्तन्न आचक्ष्व बुद्धिमन्॥१५॥

इत्यग्निवेशप्रमुखैः शिष्यैः पृष्टः पुनर्वसुः।

आचचक्षे ततस्तेभ्यो यत्राहारो विपच्यते॥१६॥

नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः।

अशितं खादितं पीतं लीढं चात्र विपच्यते॥१७॥

आमाशयगतः पाकमाहारः प्राप्य केवलम्।

पक्वः सर्वाशयं पश्चाद्धमनीभिः प्रपद्यते॥१८॥

तत्र श्लोकः—

तस्य मात्रावतो लिङ्गं फलं चोक्तं यथायथम्।

अमात्रस्य तथा लिङ्गं फलं चोक्तं विभागशः॥१९॥

आमाशयप्रमाणोपदर्शनार्थं च गुरुपृच्छोत्तरग्रन्थमाह— अशितमित्यादि। सर्वाश्रयमिति सर्वशरीरम्॥१४-१९॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते विमानस्थाने त्रिविधकुक्षीयविमानं नाम द्वितीयोऽध्यायः॥२॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां विमानस्थाने त्रिविधकुक्षीयविमानं नाम द्वितीयोऽध्यायः॥२॥

तृतीयोऽध्यायः।

अथातो जनपदोद्ध्वंसनीयं विमानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

द्विविधो हेतुर्व्याधिजनकः प्राणिनां भवति— साधारणः, असाधारणश्च; तत्रासाधारणं प्रतिपुरुषनियतं वातादिजनकमाहाराद्यभिधाय बहुजनसाधारणं वातजलदेशकालरूपं साधारणरोगकारणमभिधातुं जनपदोद्ध्वंसनीयोऽभिधीयते॥१-२॥

जनपदमण्डले पञ्चालक्षेत्रे द्विजातिवराध्युषिते काम्पिल्यराजधान्यां भगवान् पुनर्वसुरात्रेयोऽन्तेवासिगणपरिवृतः पश्चिमे घर्ममासे गङ्गातीरे वनविचारमनुविचरञ्छिष्यमग्निवेशमब्रवीत्॥३॥

जनपदवसत्युपलक्षितं मण्डलं जनपदमण्डलं, 'पञ्चालक्षेत्रे' इति तस्य विशेषणम्। द्विजातिवराध्युषित इति वचनेन महाजनसेवितेऽपि देशेऽधर्मवशाज्जनपदोद्ध्वंसो वक्ष्यमाणो भवतीति दर्शयति। पश्चिमे घर्ममास इति ज्येष्ठे। वनविचारमनुविचरन्निति वनं विचर्य विचर्यानुविचरन्नित्यर्थः॥३॥

दृश्यन्ते हि खलु सौम्य! नक्षत्रग्रहगणचन्द्रसूर्यानिलानलानां दिशां चाप्रकृतिभूतानामृतुवैकारिका भावाः, अचिरादितो भूरपि च न यथावद्रसवीर्यविपाकप्रभावमोषधीनां प्रतिविधास्यति, तद्वियोगाच्चातङ्कप्रायता नियता। तस्मात् प्रागुद्ध्वंसात् प्राक् च भूमेर्विरसीभावादुद्धरध्वं सौम्य! भैषज्यानि यावन्नोपहतरसवीर्यविपाकप्रभावाणि भवन्ति। वयं चैषां रसवीर्यविपाकप्रभावानुपयोक्ष्यामहे ये

चास्माननुकाङ्क्षन्ति, यांश्च वयमनुकाङ्क्षामः। न हि सम्यगुद्धतेषु सौम्य! भैषज्येषु सम्यग्विहितेषु सम्यक् चावचारितेषु जनपदोद्ध्वंसकराणां विकाराणां किञ्चित् प्रतीकारगौरवं भवति॥४॥

ऋतुविकाराय भूता ऋतुवैकारिकाः; ऋतुविकारश्चोपलक्षणं, तेन जलदेशवातविकाराय भूता इति मन्तव्यं; यतो भूम्यादीनामपि विकृतिं वक्ष्यति। किंवा ऋत्वननुरूपा ऋतुवैकारिकाः; तेन, ऋत्वननुरूपलक्षणमेव नक्षत्रादीनां विकृतिरित्युक्तं भवति; ग्रीष्मे हि नक्षत्राणि निर्मलानि भवन्ति, तानि यदि तुषारच्छन्नानि ग्रीष्मे भवन्ति, तदा विकृतानि भवन्तीति बोद्धव्यम्। भूरपि चेत्यपिवचनाज्जलानिलौ च ग्राहयति; तेन, भूस्तावदोषधीनां प्रधानं कारणं, सा रसादीन्न प्रतिविधास्यति; जलवातावपि चौषधीनां रसादीन्न प्रतिविधास्यत इत्युक्तं भवति। प्रतिविधास्यतीति जनयिष्यति। उद्धरध्वमिति बहुवचनं बह्वन्तेवासियुक्ताग्निवेशाभिप्रायेण; अग्निवेशस्तु प्रधानत्वेनैक एवेति 'अग्निवेश' इतिपदेन तथा 'सौम्य' इतिपदेन सम्बोध्यते; भेषजोद्धरणं तु बहुभिरेव कर्तव्यमित्यभिप्रायेण बहुवचनम्। भवति हि प्रधानं सम्बोध्य गणसम्पाद्यक्रियायां बहुवचनं; यथा— सेनापते युध्यध्वमिति। अन्ये तु सौम्यपदं भेषजविशेषणं कुर्वन्ति। ये चास्माननुकाङ्क्षन्ति ये चास्मान् भिषजोऽनुकाङ्क्षन्तीत्यर्थः, यांश्च वयमनुकाङ्क्षामश्चिकित्स्यत्वेन। एतेन, ये वैद्यमनुकाङ्क्षन्ति ते वैद्यप्रियत्वेन साध्याः, असाध्या हि वैद्यद्विष उक्ताः; वैद्याश्च यानिच्छन्ति ते साध्यरोगा एव, असाध्यान् हि वैद्या नेच्छन्ति। एतेनान्येषामपि येषां भेषजसाध्या रोगास्ते आसामोषधीनां रसादीनुपयोक्ष्यन्तीत्यर्थः। यदि च ये अस्मद्गताः, यांश्च वयं प्रयोजनवशादनुगताः, ते उपयोक्ष्यन्तीति व्याख्यायते, तदा आत्रेयस्य पक्षरागित्वेनाप्तत्वं न सम्भवति, "सर्वप्रजानां पितृवच्छरण्यः" (चि.अ.५) इति वचनाच्चास्य नीरागत्वमुक्तम्॥४॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच— उद्धृतानि खलु भगवन्! भैषज्यानि, सम्यग्विहितानि, सम्यगवचारितानि च; अपि तु खलु जनपदोद्ध्वंसनमेकेनैव व्याधिना युगपदसमानप्रकृत्याहारदेहबलसात्म्यसत्त्ववयसां मनुष्याणां कस्माद्भवतीति॥५॥

उद्धृतानीति वचनमभूते भूतवच्चेति प्रयोगाद्बोद्धव्यं, यथा— अचिरकर्तव्ये कृतमिति वदन्ति; न हि वचनकाल एव ओषधीनामुद्धरणं सम्भवतीति। एकेनेति एकजातीयेन। असमानप्रकृत्यादीनां समानकारणाभावान्न तुल्यरूपो व्याधिर्भवितुमर्हतीति प्रश्नार्थः॥५॥

तमुवाच भगवानात्रेयः— एवमसामान्यावतामप्येभिरग्निवेश! प्रकृत्यादिभिर्भावैर्मनुष्याणां येऽन्ये भावाः सामान्यास्तद्वैगुण्यात् समानकालाः समानलिङ्गाश्च व्याधयोऽभिनिर्वर्तमाना जनपदमुद्ध्वंसयन्ति। ते तु खल्विमे भावाः सामान्या जनपदेषु भवन्ति; तद्यथा— वायुः, उदकं, देशः, काल इति॥६॥

समानलिङ्गा इति तुल्यलिङ्गाः॥६॥

तत्र वातमेवंविधमनारोग्यकरं विद्यात्; तद्यथा—यथर्तुविषममतिस्तिमितमतिचलमतिपरुषमतिशीतमत्युष्णमतिरूक्षमत्यभिष्यन्दिनमतिभैरवारावमतिप्रतिहतपरस्परगतिमतिकुण्डलिनम सात्म्यगन्धबाष्पसिकतापांशुधूमोपहतमिति (१);

उदकं तु खल्वत्यर्थविकृतगन्धवर्णरसस्पर्शं क्लेदबहुलमपक्रान्तजलचरविहङ्गमुपक्षीणजलेशयमप्रीतिकरमपगतगुणं विद्यात् (२);

देशं पुनः प्रकृतिविकृतवर्णगन्धरसस्पर्शं क्लेदबहुलमुपसृष्टं सरीसृपव्यालमशकशलभ-मक्षिकामूषकोलूकश्माशानिकशकुनिजम्बूकादिभिस्तृणोलूपोपवनवन्तं प्रतानादिबहुलमपूर्ववदव-पतितशुष्कनष्टशस्यं धूम्रपवनं प्रध्मातपतत्रिगणमुत्क्रुष्टश्वगणमुद्भ्रान्तव्यथित-विविधमृगपक्षिसङ्घमुत्सृष्टनष्टधर्मसत्यलज्जाचारशीलगुणजनपदं शश्वत्क्षुभितोदीर्णसलिलाशयं प्रततोल्कापातनिर्घातभूमिकम्पमतिभयारावरूपं रूक्षताम्रारुणसिताभ्रजालसंवृतार्कचन्द्रतारकमभीक्ष्णं ससम्भ्रमोद्वेगमिव सत्रासरुदितमिव सतमस्कमिव गुह्यकाचरितमिवाक्रन्दितशब्दबहुलं चाहितं विद्यात् (३); कालं तु खलु यथर्तुलिङ्गाद्विपरीतलिङ्गमतिलिङ्गं हीनलिङ्गं चाहितं व्यवस्येत् (४); इमानेवंदोषयुक्तांश्चतुरो भावाञ्जनपदोद्ध्वंसकरान् वदन्ति कुशलाः; अतोऽन्यथाभूतांस्तु हितानाचक्षते॥ ७॥

विगुणेष्वपि खल्वेतेषु जनपदोद्ध्वंसकरेषु भावेषु भेषजेनोपपाद्यमानानामभयं भवति रोगेभ्य इति॥८॥

यथर्तुविषममिति ऋत्वननुरूपम्। अपगतगुणमिति जीवनपिपासाहरत्वाद्युक्तजलगुणरहितम्। प्रकृतिवर्णादेर्विकृता वर्णादयो यस्य देशस्य तं प्रकृतिविकृतवर्णगन्धरसस्पर्शम्। श्माशानिकशकुनिः गृध्रः। अपूर्ववदिति परिचितमप्युपहतत्वेनापूर्वमिव दृश्यते। उत्सृष्टाश्च नष्टाश्च धर्मसत्यलज्जागुणा जनैर्यत्र स तथा; तत्र ये धर्मादियुक्तास्ते उत्सृजन्ति धर्मादीनि, ये तु धर्मादीनि सर्वथा अज्ञानान्नाचरन्ति तान् प्रति नष्टान्येव धर्मादीनि। गुह्यकाक्रान्तो हि देशो यथा आक्रन्दनशब्दबहुलो भवति तादृशम्॥७-८॥

भवन्ति चात्र—

वैगुण्यमुपपन्नानां देशकालानिलाम्भसाम्।
गरीयस्त्वं विशेषेण हेतुमत् सम्प्रवक्ष्यते॥९॥
वाताज्जलं जलाद्देशं देशात् कालं स्वभावतः।

विद्याद्दुष्परिहार्यत्वाद्गरीयस्तरमर्थवित्॥१०॥

वाय्वादिषु यथोक्तानां दोषाणां तु विशेषवित्।

प्रतीकारस्य सौकर्ये विद्याल्लाघवलक्षणम्॥११॥

वैगुण्यमित्यादिना दुष्टानां वातादीनां यस्य य उत्कर्षो येन च हेतुना तदाह। स्वभावतो दुष्परिहार्यत्वादिति स्वभावादेव वातापेक्षया जलं दुष्परिहरं भवति, जलाच्च देशः, देशाच्च कालः। वातो हि निवातदेशसेवया दुष्टः परिह्रियते, न तथा जलं, तद्धि देहवृत्त्यर्थमवश्यं सेव्यं; जलमपि च यदि महता प्रयत्नेन त्यज्यते, देशस्तु जलापेक्षया दुष्परिहरो भवति, तद्व्यतिरेकेणावस्थातुमशक्यत्वात्; देशोऽपि यदि देशान्तरगमनेन त्यज्यते, कालस्तु सर्वथा त्यक्तुमशक्य इति सर्वेष्वेव गरीयान्। 'गरीयः परम्' इति पाठे यद्यतः परं, तत्ततो गरीयो विद्यादिति योजना। एतद्विपर्ययेण लाघवमाह— वाय्वादिष्वित्यादि। प्रतीकारस्य सौकर्य इति यथोक्तविधया वातादिपरित्यागस्य सुकरत्वेनेत्यर्थः॥९-११॥

चतुर्ष्वपि तु दुष्टेषु कालान्तेषु यदा नराः।

भेषजेनोपपाद्यन्ते न भवन्त्यातुरास्तदा॥१२॥

येषां न मृत्युसामान्यं सामान्यं न च कर्मणाम्।

कर्म पञ्चविधं तेषां भेषजं परमुच्यते॥१३॥

रसायनानां विधिवच्चोपयोगः प्रशस्यते।

शस्यते देहवृत्तिश्च भेषजैः पूर्वमुद्धृतैः॥१४॥

सत्यं भूते दया दानं बलयो देवतार्चनम्।

सद्वृत्तस्यानुवृत्तिश्च प्रशमो गुप्तिरात्मनः॥१५॥

हितं जनपदानां च शिवानामुपसेवनम्।

सेवनं ब्रह्मचर्यस्य तथैव ब्रह्मचारिणाम्॥१६॥

सङ्कथा धर्मशास्त्राणां महर्षीणां जितात्मनाम्।

धार्मिकैः सात्त्विकैर्नित्यं सहास्या वृद्धसम्मतैः॥१७॥

इत्येतद्भेषजं प्रोक्तमायुषः परिपालनम्।

येषामनियतो मृत्युस्तस्मिन् काले सुदारुणे॥१८॥

येषां न मृत्युसामान्यमिति न मृत्युजनकदैवसाम्यं येषामस्तीत्यर्थः। सामान्यं न च कर्मणामिति नच मारककर्मसामान्यं येषामस्तीत्यर्थः। केचिद्धि सम्भूयैव जन्मान्तरे ग्रामदाहादिकम कुर्वते स्म, तत्कर्मबलात् संहतमृत्यव एव भवन्ति; किंवा पृथगपि मारकं कर्म कृतं केषाञ्चिदेककालं विपच्यमानं भवति, तेऽपि समकालभृत्यवो भवन्ति। तत्र, न मृत्युसामान्यमित्यनेनोत्पन्नरिष्टत्वादेव केचिदसाध्या इति दर्शयति, न कर्मसामान्यमित्यनेन केचिच्चाजातरिष्टा अपि नियतमारककर्मवशादसाध्या भवन्तीति दर्शयति; किंवा न मृत्युसामान्यमित्यनेन च मारको व्याधिः साधारण उच्यते, न कर्मसामान्यमित्यनेन च मारकव्याधिजनकं कर्मोच्यते। पूर्वमुद्धतैरिति व्यापत्तेः पूर्वं गृहीतैः। गुप्तिः मन्त्रादिना रक्षा। अनियत इति वचनेन दुर्बलकर्मारब्धो हि मृत्युः पार्यत एवैवं प्रतिकर्तुमिति दर्शयति॥१२-१८॥

इति श्रुत्वा जनपदोद्ध्वंसने कारणानि पुनरपि भगवन्तमात्रेयमग्निवेश उवाच— अथ खलु भगवन्! कुतोमूलमेषां वाय्वादीनां वैगुण्यमुत्पद्यते? येनोपपन्ना जनपदमुद्ध्वंसयन्तीति॥१९॥

तमुवाच भगवानात्रेयः— सर्वेषामप्यग्निवेश! वाय्वादीनां यद्वैगुण्यमुत्पद्यते तस्य मूलमधर्मः, तन्मूलं वाऽसत्कर्म पूर्वकृतं; तयोर्योनिः प्रज्ञापराध एव। तद्यथा— यदा वै देशनगरनिगमजनपदप्रधाना धर्ममुत्क्रम्याधर्मेण प्रजां वर्तयन्ति, तदाश्रितोपाश्रिताः पौरजनपदा व्यवहारोपजीविनश्च तमधर्ममभिवर्धयन्ति, ततः सोऽधर्मः प्रसभं धर्ममन्तर्धत्ते, ततस्तेऽन्तर्हितधर्माणो देवताभिरपि त्यज्यन्ते; तेषां तथाऽन्तर्हितधर्मणामधर्मप्रधानानामपक्रान्तदेवतानामृतवो व्यापद्यन्ते; तेन

नापो यथाकालं देवो वर्षति न वा वर्षति विकृतं वा वर्षति, वाता न सम्यगभिवान्ति, क्षितिर्व्यापद्यते, सलिलान्युपशुष्यन्ति, ओषधयः स्वभावं परिहायापद्यन्ते विकृतिं; तत उद्ध्वंसन्ते जनपदाः स्पृश्याभ्यवहार्यदोषात्॥२०॥

कुतोमूलं किम्मूलमित्यर्थः। तस्य मूलमधर्म इति ऐहिकमधर्मं दर्शयति। तन्मूलं वेति तस्य वातादिवैगुण्यस्य मूलं पूर्वकृतं वा कर्म। तेनैहिको वाऽधर्मो जन्मान्तरकृतो वाऽधर्मो वातादिवैगुण्यस्य कारणमिति ब्रूते। तद्यदा देशेत्यादिना त्वैहिकमेवाधर्मं यद्वक्ष्यति हेतुतया तत् प्रत्यक्षत्वेन स्फुटसिद्धान्तार्थं, नतु जन्मान्तरकृताधर्मस्याकारणत्वेनेति ज्ञेयम्। तयोरिति ऐहिकजन्मान्तरीययोरधर्मयोः। योनिरिति कारणम्। स्पृश्याभ्यवहार्यदोषादिति स्पृश्यस्य वा जलादेरभ्यवहार्यस्य च कृत्स्नस्य दुष्टत्वात्। एतच्च प्राधान्येन ज्ञेयं; तेन दुष्टपवनगन्धदोषोऽपि ज्ञेयः, असात्म्यगन्धोऽपि दुष्टवाते उक्तः॥१९-२०॥

तथा शस्त्रप्रभवस्यापि जनपदोद्ध्वंसस्याधर्म एव हेतुर्भवति। येऽतिप्रवृद्धलोभक्रोधमोहमानास्ते दुर्बलानवमत्यात्मस्वजनपरोपघाताय शस्त्रेण परस्परमभिक्रामन्ति, परान् वाऽभिक्रामन्ति, परैर्वाऽभिक्राम्यन्ते॥२१॥

शस्त्रप्रभवस्यापीति बहुजनमारकस्य शस्त्रप्रभवस्येत्यर्थः। आत्मस्वजनपरोपघातायेति अत्र आत्मनः स्वजनस्य परस्य चोपघातो भवति प्राय इत्यर्थः॥२१॥

रक्षोगणादिभिर्वा विविधैर्भूतसङ्घैस्तमधर्ममन्यद्वाऽप्यपचारान्तरमुपलभ्याभिहन्यन्ते॥२२॥

राक्षसाद्युत्सादोऽपि जनानामधर्मकृत एव भवतीत्याह— रक्षोगणेत्यादि। अन्यद्वा अपचारान्तरमिति यथोक्ताधर्मकारणादन्यदधर्मकारणमशौचादीत्यर्थः॥२२॥

तथाऽभिशापप्रभवस्याप्यधर्म एव हेतुर्भवति। ये लुप्तधर्माणो धर्मादपेतास्ते गुरुवृद्धसिद्धर्षिपूज्यानवमत्याहितान्याचरन्ति; ततस्ताः प्रजा गुर्वादिभिरभिशप्ता भस्मतामुपयान्ति प्रागेवानेकपुरुषकुलविनाशाय, नियतप्रत्ययोपलम्भादनियताश्चापरे॥२३॥

प्रागेवेति झटिति, अनेकपुरुषकुलविनाशायाभिशप्ता भस्मतां यान्तीत्यर्थः। नियतप्रत्ययोपलम्भादनियताश्चापरे भस्मतां यान्तीति योजना। अनियता अमिलिता इत्यर्थः। प्रतिनियतपुरुषाभिशापात् प्रतिनियता एव भस्मतां यान्ति, न सर्वे जना इत्यर्थः॥२३॥

प्रागपि चाधर्मादृते नाशुभोत्पत्तिरन्यतोऽभूत्। आदिकाले ह्यदितिसुतसमौजसोऽतिविमलविपुलप्रभावाः प्रत्यक्षदेवदेवर्षिधर्मयज्ञविधिविधानाः शैलसारसंहतस्थिरशरीराः प्रसन्नवर्णेन्द्रियाः पवनसमबलजवपराक्रमाश्चारुस्फिचोऽभिरूपप्रमाणाकृतिप्रसादोपचयवन्तः सत्यार्जवानृशंस्यदानदमनियमतपोपवासब्रह्मचर्यव्रतपरा व्यपगतभयरागद्वेषमोहलोभक्रोधशोकमानरोगनिद्रातन्द्राश्रमक्लमालस्यपरिग्रहाश्च पुरुषा बभूवुरमितायुषः। तेषामुदारसत्त्वगुणकर्मणामचिन्त्यरसवीर्यविपाकप्रभावगुणसमुदितानि प्रादुर्बभूवुः शस्यानि सर्वगुणसमुदितत्वात् पृथिव्यादीनां कृतयुगस्यादौ। भ्रश्यति तु कृतयुगे केषाञ्चिदत्यादानात् साम्पन्निकानां सत्त्वानां शरीरगौरवमासीत्, शरीरगौरवाच्छ्रमः, श्रमादालस्यम्, आलस्यात् सञ्चयः, सञ्चयात् परिग्रहः, परिग्रहाल्लोभः प्रादुरासीत् कृते। ततस्त्रेतायां लोभादभिद्रोहः, अभिद्रोहानृतवचनम्, अनृतवचनात् कामक्रोधमानद्वेषपारुष्याभिघातभयतापशोकचिन्तोद्वेगादयः प्रवृत्ताः। ततस्त्रेतायां धर्मपादोऽन्तर्धानमगमत्। तस्यान्तर्धानात् युगवर्षप्रमाणस्य पादह्रासः, पृथिव्यादेश्च

गुणपादप्रणाशोऽभूत्। तत्प्रणाशकृतश्च शस्यानां स्नेहवैमल्यरसवीर्यविपाकप्रभावगुणपादभ्रंशः। ततस्तानि प्रजाशरीराणि हीयमानगुणपादैराहारविहारैरयथापूर्वमुपष्टभ्यमानान्यग्निमारुतपरीतानि प्राग्व्याधिभिर्ज्वरादिभिराक्रान्तानि। अतः प्राणिनो ह्रासमवापुरायुषः क्रमश इति॥२४॥

आद्याविर्भावे च रोगाणामधर्म एव कारणमित्याह— प्रागपि चेत्यादि। यज्ञः यज्ञदेवता, विधिः यज्ञविधायको वेदः, विधानं यज्ञकर्म। जवः वेगः। परिग्रहः ममता। अमितमिवातिबहुत्वेनायुर्येषां ते अमितायुषः। सत्ये हि चतुर्वर्षशतमायुः; यदुक्तं भगवता व्यासेन— "पुरुषाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः। कृते" इति। साम्पन्निकानाम् ईश्वराणाम्। कृते इति कृतयुगस्य शेषे। हीयमानगुणपादैरिति यथा यथा त्रेतायाः क्षयो भवति, तथा तथा आहारविहारगुणपादह्रासो भवन्नास्त इति दर्शयति। विहारोऽपि चाधर्मवतां हीनगुणो भवति, तेन न यथावच्छरीरोपष्टम्भनं करोति। उपष्टभ्यमानानीति धातुसाम्येन पाल्यमानानि॥२४॥

भवतश्चात्र—

युगे युगे धर्मपादः क्रमेणानेन हीयते।
गुणपादश्च भूतानामेवं लोकः प्रलीयते॥२५॥
संवत्सरशते पूर्णे याति संवत्सरः क्षयम्।
देहिनामायुषः काले यत्र यन्मानमिष्यते॥२६॥
इति विकाराणां प्रागुत्पत्तिहेतुरुक्तो भवति॥२७॥

संवत्सरशते पूर्णे इति संवत्सरेण शततमेंऽशे पूर्णे। यत्र यन्मानमिष्यत इति यत्र युगे यन्मानमिष्यते, तस्य शततमेंऽशे पूर्णे वर्ष एकः क्षयं याति। तेन, कलौ शतवर्षायुषि यदा शततमोंऽशो याति क्षयं तदा नवनवतिः परमायुर्भवतीत्याद्यनुसरणीयम्॥२५-२७॥

एवंवादिनं भगवन्तमग्निवेश उवाच— किन्नु खलु भगवन्! नियतकालप्रमाणमायुः सर्वं न वेति॥२८॥

तं भगवानुवाच—

इहाग्निवेश! भूतानामायुर्युक्तिमपेक्षते।

दैवे पुरुषकारे च स्थितं ह्यस्य बलाबलम्॥२९॥

दैवमात्मकृतं विद्यात् कर्म यत् पौर्वदैहिकम्।

स्मृतः पुरुषकारस्तु क्रियते यदिहापरम्॥३०॥

बलाबलविशेषोऽस्ति तयोरपि च कर्मणोः।

दृष्टं हि त्रिविधं कर्म हीनं मध्यममुत्तमम्॥३१॥

तयोरुदारयोर्युक्तिर्दीर्घस्य च सुखस्य च।

नियतस्यायुषो हेतुर्विपरीतस्य चेतरा॥३२॥

मध्यमा मध्यमस्येष्टा कारणं शृणु चापरम्।

युक्तिमपेक्षत इति दैवपुरुषकारयोर्योगमपेक्षते नियतत्वेऽनियतत्वे चेत्यर्थः। बलं चाबलं च बलाबलं; तत्रायुषो नियतत्वेन बलम्, अनियतत्वेनाबलं ज्ञेयम्। यद्यपि पौर्वदैहिकं कर्मास्थिरत्वेन गतं, तथाऽपि तज्जनितादृष्टस्य विद्यमानत्वात् तद्द्वारा तत्कर्म कारणं भवत्येवेह जन्मन्यपि। पुरुषकारस्त्विह जन्मनि कृतं कर्म सामान्येनोच्यते। तत्र बलिमङ्गलादि अदृष्टजननत्वाद् व्याप्रियते, तथा भेषजादि रसरुधिरादिद्वारा॥२८-३२॥—

दैवं पुरुषकारेण दुर्बलं ह्युपहन्यते॥३३॥

दैवेन चेतरत् कर्म विशिष्टेनोपहन्यते।

दृष्ट्वा यदेके मन्यन्ते नियतं मानमायुषः॥३४॥

कर्म किञ्चित् क्वचित् काले विपाके नियतं महत्।
किञ्चित्त्वकालनियतं प्रत्ययैः प्रतिबोध्यते॥३५॥

उदारयोरिति प्रशस्तत्वेनोत्तमयोः। दीर्घस्येति रसायनादिना शतादपि दीर्घस्य; सुखस्येति नीरोगत्वेन; नियतस्येति युगनियतस्य, कलौ वर्षशतप्रमाणस्येत्यर्थः; शतादर्वाङ्निनियतमपीह नियतशब्देनोच्यते; तेन न तत्र तस्य दैवपुरुषकारजन्यत्वं घटते, तथाऽपि तस्याप्रशस्तदैवपुरुषकारजन्यत्वात् दैवपुरुषकारजन्यत्वं भवतीति युक्तं; किञ्चानियतायुष एव पुरुषा रसायनाधिकारिणो भवन्ति, नियतायुषं प्रति रसायनस्याकिञ्चित्करत्वात्; रसायनादिकृतं चायुरनियतं प्रशस्तत्वेन प्रशस्तदैवपुरुषकारजन्यं भवतीति युक्तम्। किंवा, दीर्घत्वे सति नियतस्यायुषो हेतुरिति योजना; तेन युगनियतं च शतवर्षं, तथा तदधिकं चानियतं महता कर्मणैव क्रियते; पुरुषकारेण तु महताऽस्य सुखित्वं रोगानुपघातात् क्रियते; रसायनेन च जरादिव्याधिप्रतिघातः क्रियते; रसायनलभ्यमप्यायुर्बलवत्कर्मनियतमेवेति भावः। विपरीतस्य दीर्घत्वेनानियतस्य तथा रोगयुक्तत्वेनासुखस्य। इतरेति हीनयोर्दैवपुरुषकारयोर्युक्तिरित्यर्थः। मध्यमामध्यमस्य दीर्घत्वेनादीर्घत्वेनानियतस्य, तथा सुखासुखत्वेनानियतस्यायुषो मध्यमयोः कर्मणोर्युक्तिरित्यर्थः। कारणमिति दैवपुरुषकारयोः परस्परबाधने उपपत्तिमित्यर्थः। दैवमित्यादि। दुर्बलमायुर्जननं दैवं बलवता मारकेण दृष्टापथ्यभोजनादिना विपरीतमरणकार्यजननादुपहन्यते; विशिष्टेन बलवता, इतरत् कर्म दृष्टं पुरुषकाराख्यम्, उपहन्यते पराभूयते। एतद्दैवकर्तृकदृष्टपराभवदर्शनाद्दैवनियतमेव सर्वमायुरिति केचिन्मन्यन्त इत्याह— दृष्ट्वेत्यादि। यदि दृष्टमायुः कारणं स्यात्, न तदा भेषजैः सम्यगुपपादितानां मृत्युः स्यात्; यतश्च सत्यपि चिकित्सिते कर्मवशात्तु मृत्युर्भवति; तेन, यत्रापि चिकित्सा जीवयतीति मन्यन्ते, तत्रापि कर्मैवास्ति जीवनकारणमिति दृष्टशक्तित्वादवधारयाम इति भावः। दैवपुरुषकारयोरुभयोरपि बाध्यत्वं दर्शयन्नेकान्तेन नियतायुःपक्षं व्युदस्यति— कर्मेत्यादि। न क्वचित् कर्म न भवति; यदुच्यते— "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि। अवश्यमेव भोक्तव्यं कृतं

कर्म शुभाशुभम्" इति। किञ्चित्त्वकालनियतमिति, यथा— इदं मारकं कर्म न तु क्वचित्काले पञ्चविंशवर्षादौ नियतं, तेन यस्मिन् काले पुरुषकाराख्यं दृष्टकर्मानुगुणं प्राप्नोति तस्मिन् काले सहकारिसान्निध्योपबृंहितबलं मारयति, यदा तु दृष्टमपथ्यसेवादि न प्राप्नोति न तदा मारयति, प्रत्ययैः प्रतिबोध्यत इति दृष्टकारणैरुद्रिक्तं क्रियते। ये तु ब्रुवते— किञ्चित् कर्म कालनियतं यदा पच्यते, तस्मिन् काले पच्यत एवेति कालनियमः; विपाकनियतं तु— इदं कर्म विपच्यत एव, न तु विपच्यत इति न; कालविपाकनियतं तु यथा— इदं कर्म अस्मिन्नेव काले विपच्यत एवेति; एतच्च कालविपाकनियतत्वाद्बलवदुच्यते; एतदेव दृष्टाबाधनीयमिति; तेषां मते, अभुक्तमपि क्षीयते दुर्बलकर्म प्रायश्चित्तादिनेति बोद्धव्यं, परं विपर्ययेऽपि तदा किञ्चित्त्वविपाककालनियतमिति वक्तव्यं स्यात्; किञ्चित्त्वकालनियतमिति वचनात्तु कालनियतमपि॥३३-३५॥

तस्मादुभयदृष्टत्वादेकान्तग्रहणमसाधु। निदर्शनमपि चात्रोदाहरिष्यामः— यदि हि नियतकालप्रमाणमायुः सर्वं स्यात्, तदाऽऽयुष्कामाणां न मन्त्रौषधिमणिमङ्गलबल्यु-पहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनाद्याः क्रिया इष्टयश्च प्रयोज्येरन्; नोद्भ्रान्तचण्डचपलगोजोष्ट्रखरतुरगमहिषादयः पवनादयश्च दुष्टाः परिहार्याः स्युः, न प्रपातगिरिविषमदुर्गाम्बुवेगाः, तथा न प्रमत्तोन्मत्तोद्भ्रान्तचण्डचपलमोहलोभाकुलमतयः, नारयः, न प्रवृद्धोऽग्निः, च विविधविषाश्रयाः सरीसृपोरगादयः, न साहसं, नादेशकालचर्या, न नरेन्द्रप्रकोप इति; एवमादयो हि भावा नाभावकराः स्युः, आयुषः सर्वस्य नियतकालप्रमाणत्वात्। न चानभ्यस्ताकालमरणभयनिवारकाणामकालमरणभयमागच्छेत् प्राणिनां, व्यर्थाश्चारम्भकथाप्र-योगबुद्धयः स्युर्महर्षीणां रसायनाधिकारे, नापीन्द्रो नियतायुषं शत्रुं वज्रेणाभिहन्यात्, नाश्विनावार्तं भेषजेनोपपादयेतां, न महर्षयो यथेष्टमायुस्तपसा प्राप्नुयुः, न च विदितवेदितव्या महर्षयः ससुरेशाः सम्यक् पश्येयुरुपदिशेयुराचरेयुर्वा। अपि च सर्वचक्षुषामेतत् परं यदैन्द्रं चक्षुः, इदं चाप्यस्माकं तेन प्रत्यक्षं; यथा— पुरुषसहस्राणामुत्थायोत्थायाहवं कुर्वतामकुर्वतां चातुल्यायुष्ट्वं, तथा

जातमात्राणामप्रतीकारात् प्रतीकाराच्च, अविषविषप्राशिनां चाप्यतुल्यायुष्ट्वमेव, न च तुल्यो योगक्षेम उदपानघटानां चित्रघटानां चोत्सीदतां; तस्माद्धितोपचारमूलं जीवितम्, अतो विपर्ययान्मृत्युः। अपि च देशकालात्मगुणविपरीतानां कर्मणामाहारविकाराणां च क्रमोपयोगः सम्यक्, त्यागः सर्वस्य चातियोगायोगमिथ्यायोगानां, सर्वातियोगसन्धारणम्, असन्धारणमुदीर्णानां च गतिमतां, साहसानां च वर्जनम्, आरोग्यानुवृत्तौ हेतुमुपलभामहे सम्यगुपदिशामः सम्यक् पश्यामश्चेति॥३६॥

अतः परमुत्तरमुपसंहरति— तस्मादित्यादि। उभयदृष्टत्वादिति दैवस्य पुरुषकारेण, तथा पुरुषकारस्य दैवेन बाधदर्शनात्। एकान्तग्रहणमिति नियतमेवायुरिति तथा अनियतमेवायुः सर्वमिति चेत्यर्थः। निदृश्यतेऽभिमतः पक्षः साध्यतेऽनेनेति निदर्शनं युक्तिरित्यर्थः। अत्रेति अनैकान्तिकपक्षे। यदीत्यादिना प्रकरणेनायुर्जनकस्य दृष्टस्य हेतोः सेवा तथा आयुर्विघातकस्य हेतोरसेवा सर्वप्रामाणिकजनाविवादसिद्धा दृश्यते। सा च सर्वा यदि नियतमायुः स्यात्तदा अकिञ्चित्करी स्यात्, अनियते चायुषि किञ्चित्करी स्यात्; तस्मादनियतमप्यायुर्भवतीति भावः। न च सर्वत्रैवादृष्टमेव कारणं दृष्टमकिञ्चित्करमेवेति वदतो दृष्टस्यापि त्रिवृतादेर्विरेकादिकर्तृत्वं व्यक्तमेव; अदृष्टस्यैव तु कारणत्वं दृष्टेकार्यानुपपत्तेः कल्पनीयं; तेनादृष्टस्य कारणत्वं दृष्टकारणमूलमित्यर्थः; न च दृष्टकारणोच्छेदः कल्पयितुमपि पार्यते। इष्टयः यज्ञाः। अत्यर्थसर्पणशीला उरगाः सरीसृपोरगाः। आचरेयुर्वा 'भेषजम्' इति शेषः। चक्षुषां परमिति अत्यर्थाभ्रान्तत्वेन। अतुल्यायुष्ट्वमिति ये आहवं कुर्वते ते शस्त्रेण म्रियन्ते, ये तु न कुर्वते ते शस्त्रेण न प्रायो म्रियन्ते। प्रतीकारादप्रतीकारा-च्चातुल्यायुष्ट्वमिति योजना। न च तुल्य इत्यादौ चित्रघटो यश्चित्रित इव स्थाप्यते, स हि पानीयवहनादिप्रत्यवायहेत्वभावाच्चिरं तिष्ठति; उदपानघटस्तु जलसम्बन्धात् तथा वहनसमये पतनादिना च शीघ्रमुत्सीदति। हितोपचारमूलमिति हितोपचारमूलमपि। क्रमोपयोगः सम्यगिति योजना। सर्वातियोगसन्धारणं सर्वातियोगानां वर्जनम्॥३६॥

अतः परमग्निवेश उवाच— एवं सत्यनियतकालप्रमाणायुषां भगवन्! कथं कालमृत्युरकालमृत्युर्वाभवतीति॥३७॥

एवं सतीत्यादि। यत्तावत् कालनियतं तस्याकाले मरणाभावादेव नाकालमृत्युरस्ति, यत्त्वकालनियतं तस्याप्यनियतत्वात् कथं कालमृत्युरकालमृत्युर्वा भवति? अनियते ह्यायुषि कालनियमो नास्ति, नियतकालाच्चार्वागकालमृत्युरुच्यत इति पृच्छार्थः॥३७॥

तमुवाच भगवानात्रेयः— श्रूयतामग्निवेश! यथा यानसमायुक्तोऽक्षः प्रकृत्यैवाक्षगुणैरुपेतः स च सर्वगुणोपपन्नो वाह्यमानो यथाकालं स्वप्रमाणक्षयादेवावसानं गच्छेत्, तथाऽऽयुः शरीरोपगतं बलवत्प्रकृत्या यथावदुपचर्यमाणं स्वप्रमाणक्षयादेवावसानं गच्छति; स मृत्युः काले। यथा च स एवाक्षोऽतिभाराधिष्ठितत्वाद्विषमपथादपथादक्षचक्रभङ्गाद्वाह्यवाहकदोषादणिमोक्षादनुपाङ्गात् पर्यसनाच्चान्तराऽवसानमापद्यते, तथाऽऽयुरप्ययथाबलमारम्भादयथाग्न्यभ्यवहरणाद्विषमाभ्यावहरणाद्विषमशरीरन्यासादतिमैथुनादसत्संश्रयादुदीर्णवेगविनिग्रहाद्विधार्यवेगाविधारणाद्भूतविषवाय्वग्न्युपतापादभिघातादाहारप्रतीकारविवर्जनाच्चान्तराऽवसानमापद्यते, स मृत्युरकाले; तथा ज्वरादीनप्यातङ्कान्मिथ्योपचरितानकालमृत्यून् पश्याम इति॥३८॥

यथाकालमिति यावता कालेन प्रत्यवायशून्यस्याक्षस्य क्षयो भवति तस्मिन्नेवेत्यर्थः। स्वप्रमाणक्षयादेवेति युगानुरूपवर्षशतादिप्रमाणक्षयादित्यर्थः। अपथादिति सर्वथा अमार्गगमनात्। अणिमोक्षादिति कीलमोक्षात्। अनुपाङ्गादिति स्नेहादानात्। पर्यसनात् परिक्षेपात्। मिथ्योपचरितानिति असम्यक्चिकित्सतान्। अकालमृत्यूनिति अकालमृत्युकरान्॥३८॥

अथाग्निवेशः पप्रच्छ— किन्नु खलु भगवन्! ज्वरितेभ्यः पानीयमुष्णं प्रयच्छन्ति भिषजो भूयिष्ठं न तथा शीतम्, अस्ति च शीतसाध्योऽपि धातुर्ज्वरकर इति॥३९॥

सम्प्रति मिथ्योपचारश्रुत्या उष्णतोयं ज्वरेऽप्याग्नेये मिथ्योपचारः स्यादित्याशङ्क्याह— किंन्वित्यादि। शीतसाध्योऽपिधातुः पित्तमुष्णरूपमित्यर्थः। पानीयं यस्मात् सर्वज्वरितेभ्यो दीयते, तस्मात् पानीयमेवात्र पृच्छति॥३९॥

तमुवाच भगवानात्रेयः— ज्वरितस्य कायसमुत्थानदेशकालानभिसमीक्ष्य पाचनार्थं पानीयमुष्णं प्रयच्छन्ति भिषजः। ज्वरो ह्यामाशयसमुत्थः, प्रायो भेषजानि चामाशयसमुत्थानां विकाराणां पाचनवमनापतर्पणसमर्थानि भवन्ति; पाचनार्थं च पानीयमुष्णं, तस्मादेतज्ज्वरितेभ्यः प्रयच्छन्ति भिषजो भूयिष्ठम्। तद्धि तेषां पीतं वातमनुलोमयति, अग्निं चोदर्यमुदीरयति, क्षिप्रं जरां गच्छति, श्लेष्माणं परिशोषयति, स्वल्पमपि च पीतं तृष्णाप्रशमनायोपकल्पते; तथायुक्तमपि चैतन्नात्यर्थोत्सन्नपित्ते ज्वरे सदाहभ्रमप्रलापातिसारे वा प्रदेयम्, उष्णेन हि दाहभ्रमप्रलापातिसारा भूयोऽभिवर्धन्ते, शीतेन चोपशाम्यन्तीति॥४०॥

उत्सन्नपित्ते प्रवृद्धपित्ते॥४०॥

भवति चात्र—

शीतेनोष्णकृतान् रोगाञ्छमयन्ति भिषग्विदः।
ये तु शीतकृता रोगास्तेषामुष्णं भिषग्जितम्॥४१॥

न केवलं ज्वरे एव शीतोष्णसमुत्थत्वभेदेन उष्णशीतोपचारः, किन्तु सर्वत्रैव व्याधावेवमित्याह— शीतेनेत्यादि। भिषजश्च ते ज्ञानवन्तश्चेति भिषग्विदः॥४१॥

एवमितरेषामपि व्याधीनां निदानविपरीतं भेषजं भवति; यथा— अपतर्पणनिमित्तानां व्याधीनां नान्तरेण पूरणमस्ति शान्तिः, तथा पूरणनिमित्तानां व्याधीनां नान्तरेणापतर्पणम्॥४२॥

अपतर्पणमपि च त्रिविधं— लङ्घनं, लङ्घनपाचनं, दोषावसेचनं चेति॥४३॥

तत्र लङ्घनमल्पबलदोषाणां, लङ्घनेन ह्यग्निमारुतवृद्ध्या वातातपपरीतमिवाल्पमुदकमल्पो दोषः प्रशोषमापद्यते; लङ्घनपाचने तु मध्यबलदोषाणां, लङ्घनपाचनाभ्यां हि सूर्यसन्तापमारुताभ्यां पांशुभस्मावकिरणैरिव चानतिबहूदकं मध्यबलो दोषः प्रशोषमापद्यते; बहुदोषाणां पुनर्दोषावसेचनमेव कार्यं, न ह्यभिन्ने केदारसेतौ पल्वलाप्रसेकोऽस्ति, तद्वद्दोषावसेचनम्॥४४॥

न केवलं शीतोष्णसमुत्थयोरेव परं हेतुविपर्ययेण चिकित्सा, किन्त्वपतर्पणादिजेऽपि हेतुविपरीतेनेत्याह— एवमित्यादि। अपतर्पणसन्तर्पणाभ्यां च सर्वं चिकित्सितं गृहीतं, न ह्यपतर्पणसन्तर्पणाभ्यां विनाऽन्यद्विधानान्तरमस्ति चिकित्सायाः; येन सर्व एवोपक्रमाः सन्तर्पणापतर्पणभेदा एव। अत एव विशेषज्ञानार्थमपतर्पणभेदानाह— अपतर्पणमित्यादि। लङ्घनपाचनमितिवचनेन यत्र पाचनं क्रियते तत्रावश्यं स्तोकमात्रया लङ्घनमपिक्रियत इति दर्शयति, पाचनकाले हि यदि बृंहणं क्रियते तदा बृंहणेनाग्नेः प्रतिकूलेन पाचनं न स्यादित्यर्थः। अवकिरणैरिवेत्यत्र इवशब्दोऽनतिबहूदकमिवेत्येवंरूपो ज्ञेयः। अन्यद्वेति लङ्घनादि बृंहणादि च॥४२-४४॥

दोषावसेचनमन्यद्वा भेषजं प्राप्तकालमप्यातुरस्य नैवंविधस्य कुर्यात्। तद्यथा— अनपवादप्रतीकारस्याधनस्यापरिचारकस्य वैद्यमानिनश्चण्डस्यासूयकस्य तीव्राधर्मारुचेरतिक्षीणबल-मांसशोणितस्यासाध्यरोगोपहतस्य मुमूर्षुलिङ्गान्वितस्य चेति। एवंविधं ह्यातुरमुपचरन् भिषक् पापीयसाऽयशसा योगमृच्छतीति॥४५॥

अनपवादप्रतीकारो वाच्यप्रतीकारः। अधनस्यानुपकरणत्वेन न चिकित्सा पार्यते कर्तुमित्यर्थः। वैद्यमानी दुरभिमानाद्वैद्योपदेशं न करोति। तीव्राधर्मरुचेः प्रतिक्रियायामधर्मो भवति, न च चिकित्सा सिध्यत्यधर्मप्रतिबन्धात्। मुमूर्षुलिङ्गान्वितस्येति रिष्टयुक्तस्य। पापीयसेति पापहेतुना पापजनकेनायशसा॥४५॥

भवति चात्र—

तदात्वे चानुबन्धे वा यस्य स्यादशुभं फलम्।
कर्मणस्तन्न कर्तव्यमेतद्बुद्धिमतां मतम्॥४६॥
(अल्पोदकद्रुमो यस्तु प्रवातः प्रचुरातपः।
ज्ञेयः स जाङ्गलो देशः स्वल्परोगतमोऽपि च॥४७॥
प्रचुरोदकवृक्षो यो निवातो दुर्लभातपः।
अनूपो बहुदोषश्च, समः साधारणो मतः॥४८॥)

अनुबन्धे वेति उत्तरकालम्। केचिदल्पोदकद्रुमो यस्त्वित्यादिग्रन्थं जाङ्गलादिदेशलक्षणमत्र पठन्ति॥४६-४८॥

तत्र श्लोकाः—

पूर्वरूपाणि सामान्या हेतवः सस्वलक्षणाः।
देशोद्ध्वंसस्य भैषज्यं हेतूनां मूलमेव च॥४९॥

प्राग्विकारसमुत्पत्तिरायुषश्च क्षयक्रमः।

मरणं प्रति भूतानां कालाकालविनिश्चयः॥५०॥

यथा चाकालमरणं यथायुक्तं च भेषजम्।

सिद्धं यात्यौषधं येषां न कुर्याद्येन हेतुना॥५१॥

तदात्रेयोऽग्निवेशाय निखिलं सर्वमुक्तवान्।

देशोद्ध्वंसनिमित्तीये विमाने मुनिसत्तमः॥५२॥

सङ्ग्रहे पूर्वरूपाणीति नक्षत्रादिविकाराः। सस्वलक्षणाः सस्वविकृतिलक्षणाः, तच्च लक्षणं तत्र वातमेवंविधमित्यादिना प्रोक्तम्। यथायुक्तं च भेषजं सिद्धिं यातीति अनेनोष्णपानीयदानोपपत्त्या सर्वं सङ्गृहीतम्॥४९-५२॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते विमानस्थाने जनपदोद्ध्वंसनीयविमानं नाम तृतीयोऽध्यायः॥३॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां विमानस्थाने जनपदोद्ध्वंसनीयविमानं नाम तृतीयोऽध्यायः॥३॥

चतुर्थोऽध्यायः।

अथातस्त्रिविधरोगविशेषविज्ञानीयं विमानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

जनपदोद्ध्वंसनीयेऽविशेषेण सर्वेऽपि रोगा उक्ताः, तेषां विशेषो यथा ज्ञातव्यस्तदुपदेष्टुं त्रिविधरोगविशेषविज्ञानीयोऽभिधीयते॥१-२॥

त्रिविधं खलु रोगविशेषविज्ञानं भवति; तद्यथा आप्तोपदेशः, प्रत्यक्षम्, अनुमानं चेति॥३॥

रोगाणां विशेषो यथा वक्ष्यमाणो विज्ञायते येन तद्रोगविशेषविज्ञानम्, उपदेशप्रत्यक्षानुमानरूपं प्रमाणत्रयम्। अत्र तु युक्तेरनुमानान्तर्गतत्वादेव न पृथक्करणम्। एतच्च प्रमाणत्रयं क्वचिद्रोगे मिलितं, क्वचिद्द्वयं, क्वचिदेकं परीक्षायां वर्तते; येन, नान्तरे वह्निमान्द्यादौ प्रत्यक्षमवश्यं व्याप्रियते॥३॥

तत्राप्तोपदेशो नामाप्तवचनम्। आप्ता ह्यवितर्कस्मृतिविभागविदो निष्प्रीत्युपतापदर्शिनश्च। तेषामेवंगुणयोगाद्यद्वचनं तत् प्रमाणम्। अप्रमाणं पुनर्मत्तोन्मत्तमूर्खरक्तदुष्टादुष्टवचनमिति; प्रत्यक्षं तु खलु तद्यत् स्वयमिन्द्रियैर्मनसा चोपलभ्यते। अनुमानं खलु तर्को युक्त्यपेक्षः॥४॥

तिस्रैषणीये प्रथममनुमानादिलक्षणान्युक्तानि, पुनरिह 'तत्रोपदेशो नाम' इत्यादिनाऽऽप्तोपदेशादिलक्षणाभिधानं प्रकरणागतत्वात् क्रियते, प्राकरणिको ह्यर्थोऽनुच्यमानो न्यूनो भवति। अवितर्केत्यादि।— वितर्कः कथन्ता अनिश्चितज्ञानमिति यावत्, स्मृतिः स्मरणज्ञानं, विभाग एकदेशः; एतद्विपर्ययान्निश्चयेनानुभवेन च कार्त्स्न्येन च ये भावान् जानते, तेऽवितर्कस्मृतिविभागविदः।

वितर्कादिवेदी तु नाप्तः, प्रतिपाद्यवस्त्वशेषविशेषाविज्ञानात्। स्मृतिज्ञानं च यद्यपि प्रमाणमूलमेव, तथाऽपि वर्तमानक्षणे स्मृतिज्ञानविषयार्थस्य नावश्यविद्यमानतेति न तत् प्रमाणमिति भावः; किंवा, स्मृतिज्ञानं स्मृतिशास्त्रजं ज्ञानं गणितज्ञानं च; एतच्च ज्ञानद्वयं साक्षादर्थादर्शकं दुरवबोधेन मिथ्याज्ञानत्वसम्भवादप्रमाणमपीति नोपादेयम्। अथ सम्यग्ज्ञानवन्तोऽपि रागादिवशादन्यथा व्याहरन्तीत्याह— निष्प्रीत्युपतापदर्शिन इति।— निष्प्रीत्या निरुपतापेन च द्रष्टुं शीलं येषां ते तथा। एतेन यथार्थदर्शी निर्दोषश्चाप्तो भवतीत्युक्तं भवति। एवम्भूतं चाप्तत्वं कस्यचिद्ब्रह्मादेः सर्वत्रैव भवति, लौकिकस्य तु यस्मिन्नेव विषये वितर्कादि न भवति तत्रैवोपदेशः प्रमाणमिति ज्ञेयम्। अप्रमाणमिति नावश्यं प्रमाणतयाऽवधार्यते, रागादिदुष्टत्वादित्यर्थः। दुष्टश्चासावदुष्टश्चेति दुष्टादुष्टः, तेन पिता हि पुत्रस्य दुष्टोऽप्यदुष्टत्वादाप्त एव भवति; किंवा दुष्टो वञ्चकः। स्वयमिन्द्रियैर्मनसा चेत्यनेन यदात्मनेन्द्रियैश्चक्षुरादिभिरव्यवधानेन गृह्यते रूपादि तत् प्रत्यक्षमिति बाह्यं प्रत्यक्षं गृह्णाति; मनसा चेत्यनेन च मनसाऽव्यवधानेन यदुपलभ्यते सुखादि, तच्च मानसं प्रत्यक्षं गृह्णाति। तर्कोऽत्राप्रत्यक्षं ज्ञानम्। युक्तिः सम्बन्धोऽविनाभाव इत्यर्थः; तेनाविनाभावजं परोक्षज्ञानमनुमानमित्यर्थः॥४॥

त्रिविधेन खल्वनेन ज्ञानसमुदायेन पूर्वं परीक्ष्य रोगं सर्वथा सर्वमथोत्तरकालमध्यवसानमदोषं भवति, न हि ज्ञानावयवेन कृत्स्ने ज्ञेये ज्ञानमुत्पद्यते। त्रिविधे त्वस्मिन् ज्ञानसमुदये पूर्वमाप्तोपदेशाज्ज्ञानं, ततः प्रत्यक्षानुमानाभ्यां परीक्षोपपद्यते। किं ह्यनुपदिष्टं पूर्वं यत्तत् प्रत्यक्षानुमानाभ्यां परीक्षमाणो विद्यात्। तस्माद्द्विविधा परीक्षा ज्ञानवतां प्रत्यक्षम्, अनुमानं च; त्रिविधा वा सहोपदेशेन॥५॥

ज्ञानसमुदायेनेति ज्ञानसमुदायः प्रमाणसङ्घातः; तेन समुदायेन 'अयमेवं रोगः' इत्येवम्भूतनिश्चयोऽध्यवसानम्। त्रिविधे त्वित्यादि। ज्ञायतेऽनेनेति ज्ञानं प्रमाणम्। प्रथममाप्तोपदेशो व्याधिं बोधयति, ततश्चाप्तोपदिष्टं व्याधिं प्रत्यक्षानुमानाभ्यां यथोक्तलिङ्गादिपरीक्षया निश्चिनोति; आगमानुपदिष्टे च व्याधौ अवैद्य इव न प्रत्यक्षेणानुमानेन च व्याधिमुपलभत इत्याह— किं

ह्यनुपदिष्टमित्यादि। एवं मन्यते— व्याधिविशेषास्तावद्दुरधिगमनीयाः, नोपदेशमन्तरेण शक्या विज्ञातुं, येऽधिगतवैद्यकशास्त्रास्ते प्रतिपादयन्त्येव व्याधिविशेषान्; तस्मादागमेन ये व्याधीनां हेत्वादिविशेषाः प्रतिपादितास्तान् प्रत्यक्षानुमानाभ्यामुपलभमानो व्याधिं निश्चिनोति; अनुपदेशवांस्तानुपलभमानोऽपि हेत्वादिविशेषानशिक्षितरत्नपरीक्षो यथा रत्नानां विशेषं पश्यन्नपि नावधारयति रत्नविशेषं, तथा नावधारयति व्याधिविशेषमिति भावः। ज्ञानवतामिति आप्तोपदेशवताम्। त्रिविधा वेत्यनेन व्याधिपरीक्षासमये ह्याप्तोपदेशोऽपि व्याप्रियते ग्रहणीमार्दवस्वप्नदर्शनादिप्रतिपत्तौ, तथा दुरधिगमस्थानसंश्रयादिप्रतिपत्तौ, तथा कोष्ठमृदुदारुणत्वादिपरीक्षायां चातुरवचनरूपाप्तोपदेशोऽपि व्याप्रियत इति दर्शयति॥५॥

तत्रेदमुपदिशन्ति बुद्धिमन्तः— रोगमेकैकमेवंप्रकोपणमेवंयोनिमेवमुत्थानमेवमात्मानमेवम-धिष्ठानमेवंवेदनमेवं संस्थानमेवंशब्दस्पर्शरूप-रसगन्धमेवमुपद्रवमेवंवृद्धिस्थानक्षयसमन्वितमेव-मुदर्कमेवन्नामानमेवंयोगं विद्यात्; तस्मिन्निियं प्रतीकारार्था प्रवृत्तिरथवा निवृत्तिरित्युपदेशाज्ज्ञायते॥६॥

तत्रेत्यादिनाऽऽप्तोपदेशगम्यमाह। प्रकोपणं वायो रूक्षत्वादिहेतुः। योनिः वातादयः। आत्मा स्वभावः; यथा— रोहिण्या दारुणत्वं, सन्न्यासस्य शीघ्रोपक्रमणीयत्वादि। अधिष्ठानं शरीरमवयवा मनश्च। इयं प्रतीकारार्था प्रवृत्तिः, यथा— ज्वरे लङ्घनपाचनाद्यर्था प्रवृत्तिः। निवृत्तिश्च प्रतीकारार्था यथा— नवज्वरे दिवास्वप्नस्नानादौ निवृत्तिरित्यादि मन्तव्यम्॥६॥

प्रत्यक्षतस्तु खलु रोगतत्त्वं बुभुत्सुः सर्वैरिन्द्रियैः सर्वानिन्द्रियार्थानातुरशरीरगतान् परीक्षेत, अन्यत्र रसज्ञानात्; तद्यथा— अन्त्रकूजनं, सन्धिस्फुटनमङ्गुलीपर्वणां च, स्वरविशेषांश्च, ये चान्येऽपि केचिच्छरीरोपगताः शब्दाः स्युस्ताञ्छ्रोत्रेण परीक्षेत; वर्णसंस्थानप्रमाणच्छायाः, शरीरप्रकृतिविकारौ, चक्षुर्वैषयिकाणि यानि चान्यान्यनुक्तानि तानि चक्षुषा परीक्षेत; रसं तु खल्वातुरशरीरगत-मिन्द्रियवैषयिकमप्यनुमानादवगच्छेत्, न ह्यस्य प्रत्यक्षेण ग्रहणमुपपद्यते, तस्मादातुरपरिप्रश्नेनै-

वातुरमुखरसं विद्यात्, यूकापसर्पणेन त्वस्य शरीरवैरस्यं, मक्षिकोपसर्पणेन शरीरमाधुर्यं, लोहितपित्तसन्देहे तु किं धारिलोहितं लोहितपित्तं वेति श्वकाकभक्षणाद्धारिलोहित-मभक्षणाल्लोहितपित्तमित्यनुमातव्यम्, एवमन्यानप्यातुरशरीरगतान् रसाननुमिमीत; गन्धांस्तु खलु सर्वशरीरगतानातुरस्य प्रकृतिवैकारिकान् घ्राणेन परीक्षेत; स्पर्शं च पाणिना प्रकृतिविकृतियुक्तम्। इति प्रत्यक्षतोऽनुमानादुपदेशतश्च परीक्षणमुक्तम्॥७॥

अङ्गुलीपर्वणां च स्फुटनमिति सम्बन्धः। अन्येऽपि चेति कासहिक्काशब्दादयः। यानि चान्यानीत्यनेन लक्षणप्रभादीनि गृह्यन्ते। यूकापसर्पणेन शरीरवैरस्यमिति विरसाद्धि शरीराद्यूका अपसर्पन्ति; एवं यूकाद्यनपसर्पणेन प्राकृतरसयुक्तं शरीरमनुमातव्यम्। धारिलोहितमिति जीवशोणितमित्यर्थः; श्वकाकभक्षणादिज्ञेयं यद्धारि रक्तं तत् पित्तादुष्टत्वेनाविरसं श्वादयो भक्षयन्ति, नतु पित्तदुष्टं रक्तपित्तमिति भावः। अत्र एवंशब्दस्पर्शरूपरसगन्धमित्युपदेशं कृत्वा शब्दानन्तरं चक्षुर्ग्राह्यं रूपं दर्शयञ् शब्दादिपरीक्षायाश्च क्रमनियमाभावं सूचयति॥७॥

इमे तु खल्वन्येऽप्येवमेव भूयोऽनुमानज्ञेया भवन्ति भावाः। तद्यथा— अग्निं जरणशक्त्या परीक्षेत, बलं व्यायामशक्त्या, श्रोत्रादीनि शब्दाद्यर्थग्रहणेन, मनोऽर्थाव्यभिचरणेन, विज्ञानं व्यवसायेन, रजःसङ्गेन, मोहमविज्ञानेन, क्रोधमभिद्रोहेण, शोकं दैन्येन, हर्षमामोदेन, प्रीतिं तोषेण, भयं विषादेन, धैर्यमविषादेन, वीर्यमुत्थानेन, अवस्थानमविभ्रमेण, श्रद्धामभिप्रायेण, मेधां ग्रहणेन, सञ्ज्ञां नामग्रहणेन, स्मृतिं स्मरणेन, ह्रियमपत्रपेण, शीलमनुशीलेन, द्वेषं प्रतिषेधेन, उपधिमनुबन्धेन, धृतिमलौल्येन, वश्यतां विधेयतया, वयोभक्तिसात्म्यव्याधिसमुत्थानानि कालदेशोपशयवेदनाविशेषेण, गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां, दोषप्रमाणविशेषमपचारविशेषेण, आयुषः क्षयमरिष्टैः, उपस्थितश्रेयस्त्वं कल्याणाभिनिवेशेन, अमलं सत्त्वमविकारेण, ग्रहण्यास्तु मृदुदारुणत्वं स्वप्नदर्शनमभिप्रायं द्विष्टेष्टसुखदुःखानि चातुरपरिप्रश्नेनैव विद्यादिति॥८॥

भूयोऽनुमानज्ञेया इत्यनेनानुमानगम्यतया वक्ष्यमाणा केचिदग्निबलादय आतुरोपदेशगम्या अपि भवन्तीति सूचयति। मनोऽर्थाव्यभिचरणेनेति सतीन्द्रियाणामर्थसम्बन्धे यदिदं कदाचिच्छब्दं प्रत्येति, कदाचिद्रसमित्याद्ययौगपद्येन सर्वार्थान् प्रत्येति, तेनास्ति कारणानन्तरमिन्द्रियार्थग्राहकं मन इत्यनुमीयते। ज्ञानं व्यवसायेनेति व्यवसायः प्रवृत्तिः, यथा— पेयजले पानार्था प्रवृत्तिः; तेनानुमीयते जलज्ञानमस्य जातं, कथमन्यथा ज्ञानकार्यार्थक्रियायां प्रवर्तत इति। रजः सङ्गेनेति नार्यादिसङ्गेन तत्कारणं रजोऽनुमीयते। अभिद्रोहः परपीडार्था प्रवृत्तिः। दैन्यं रोदनादि। आमोदः नृत्यगीतवादित्राद्युत्सवकरणम्। तोषः मुखनयनप्रसादादिः; एतेन प्रीतिस्तोषमात्रं, हर्षस्तु प्रीतिविशेषो मनउद्रेककारक इत्युक्तं भवति। धैर्यं विपद्यपि मनसोऽदैन्यम्। वीर्यम् आरब्धदुष्करकार्येष्वव्यावृत्तिर्मनसः। उत्थानेनेति क्रियारम्भेण। अवस्थानं स्थिरमतित्वम्। अविभ्रमेणेति अभ्रान्त्या। श्रद्धाम् इच्छाम्। अभिप्रायेणेति अभ्यर्थनेन। ग्रहणेनेति ग्रन्थादिधारणेन। स्मृतिमिति स्मृतिजनकं संस्कारं; स्मरणेन हि तत्कारणं संस्कारोऽनुमीयते। ह्रियमिति लज्जाम्। अपत्रपेणेति लज्जिताकारेण। शीलमिति सहजं वस्तुषु रागम्। अनुशीलनेनेति अनुशीलनं सन्ततशीलनं तेन; सततं यमर्थं सेवते तच्छीलोऽयमित्यनुमीयते। प्रतिषेधेनेति व्यावृत्त्या। उपेत्य धीयते इति उपधिः छद्म इत्यर्थः, तमनुबन्धेनेत्युत्तरकालीनफलेन; उत्तरकालं हि भ्रात्रादिवधेन फलेन ज्ञायते— यदयमुन्मत्तच्छद्मप्रचारी चन्द्रगुप्त इति। विधेयतयेति विधेयप्रचारेण।

वयःप्रभृतीनि व्याधिसमुत्थानान्तानि चत्वारि यथासङ्ख्यं कालादिविशेषेण ज्ञायन्ते। तत्र कालविशेषेण षोडशवर्षादिना वयो बाल्यादि ज्ञायते; देशेन तु भक्तिरिच्छा ज्ञायते, यथा हि— अयं मध्यदेशीयस्तेनास्य गोधूममाषादिष्विच्छाऽनुमीयते; यस्माच्चेदमस्योपशेते तेनेदमस्य सात्म्यमिति ज्ञायते; वेदनाविशेषेण व्याधिसमुत्थानं ज्ञायते, यथा— यस्मादयं सन्तापवेदनावान् तस्मादस्य ज्वरव्याधिसमुत्थानं भूतमित्यादि ज्ञेयम्।

गूढलिङ्गमितिविशेषणेनागूढलिङ्गे व्याधौ लिङ्गैरेवावधारिते नोपशयानुपशयाभ्यां परीक्षा करणीयेति दर्शयति। अपचारविशेषेणेति महताऽपचारेण भूरिदोषो भवति, स्वल्पेण स्वल्प इति। कल्याणाभिनिवेशेनेति श्रेयस्करमार्गानुष्ठानेन; एतद्धि अचिरभाविश्रेयसामेव भवति। सत्त्वमिति सत्त्वगुणोद्रेकम्। अविकारेणेति रागद्वेषविकाराभावेन। परिप्रश्नेनैवेतिवचनेन यद्यपि ग्रहणीमार्दवाद्यनुमानादपि पार्यते ज्ञातुं, तथाऽप्यनुमानस्य बुद्धिप्रयासबहुत्वेनातुरपृच्छयैव सुखोपचाररूपया विद्याद् ग्रहणीमार्दवादीनीति दर्शयति। अभिप्रायः भोजनादीच्छा। द्विष्टेष्टशब्देन तु द्विष्टेप्सितप्रेष्यादिग्रहणम्॥८॥

भवन्ति चात्र—

आप्ततश्चोपदेशेन प्रत्यक्षकरणेन च।

अनुमानेन च व्याधीन् सम्यग्विद्याद्विचक्षणः॥९॥

सर्वथा सर्वमालोच्य यथासम्भवमर्थवित्।

अथाध्यवस्येत्तत्त्वे च कार्ये च तदनन्तरम्॥१०॥

कार्यतत्त्वविशेषज्ञः प्रतिपत्तौ न मुह्यति।

अमूढः फलमाप्नोति यदमोहनिमित्तजम्॥११॥

ज्ञानबुद्धिप्रदीपेन यो नाविशति तत्त्ववित्।

आतुरस्यान्तरात्मानं न स रोगांश्चिकित्सति॥१२॥

तत्र श्लोकौ—

सर्वरोगविशेषाणां त्रिविधं ज्ञानसङ्ग्रहम्।

यथा चोपदिशन्त्याप्ताः प्रत्यक्षं गृह्यते यथा॥१३॥

ये यथा चानुमानेन ज्ञेयास्तांश्चाप्युदारधीः।

भावांस्त्रिरोगविज्ञाने विमाने मुनिरुक्तवान्॥१४॥

यथासम्भवमित्यनेन सर्वत्र परीक्षणीये सर्वप्रमाणासम्भव इति दर्शयति। अथेत्यादि अथ प्रत्येकशब्दादिविषयपरीक्षानन्तरम्। तत्त्वे व्याधितत्त्वे, तथा कार्ये च तत्र साध्ये व्याधौ कर्तव्यलक्षणे, तदनन्तरमध्यवस्येत्; यद्युक्तं तत्त्वं भवति, यच्च कार्यमुक्तं, तत्राध्यवसायं निश्चयं कुर्यादित्यर्थः। अनन्तरमिति अविद्यमानान्तरयोग्यमित्यर्थः। कार्यतत्त्वविशेषाध्यवसायफलमाह— कार्येत्यादि। प्रतिपत्तिः कर्मणां यथार्हतयाऽनुष्ठानम्। अमूढ इति प्रतिपत्तावमूढ इत्यर्थः। ज्ञानं शास्त्रं, तत्कृता बुद्धिः ज्ञानबुद्धिः। आविशति बुद्ध्याऽवगाहत इत्यर्थः। अन्तरात्मानमिति वैद्यपक्षे अन्तःशरीरम्॥९-१४॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते विमानस्थाने त्रिविधरोगविशेषविज्ञानीयं विमानं नाम चतुर्थोऽध्यायः॥४॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां विमानस्थाने त्रिविधरोगविशेषविज्ञानीयं विमानं नाम चतुर्थोऽध्यायः॥४॥

पञ्चमोऽध्यायः।

अथातः स्रोतसां विमानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

पूर्वस्मिन्नध्याये परीक्षामभिधाय तत्परीक्षणीयं शरीरं दुष्टादुष्टस्रोतोविभागेन वक्तुं स्रोतसां विमानमुच्यते॥१-२॥

यावन्तः पुरुषे मूर्तिमन्तो भावविशेषास्तावन्त एवास्मिन् स्रोतसां प्रकारविशेषाः। सर्वे हि भावा पुरुषे नान्तरेण स्रोतांस्यभिनिर्वर्तन्ते, क्षयं वाऽप्यभिगच्छन्ति। स्रोतांसि खलु परिणाममापद्यमानानां धातूनामभिवाहीनि भवन्त्ययनार्थेन॥३॥

मूर्तिमन्त इति असर्वगतद्रव्यपरिमाणवन्तः, असर्वगतद्रव्यपरिमाणं हि मूर्तिरुच्यते। भावविशेषा इति उत्पत्तिमन्तो विशेषाः। अत्र हेतुमाह— सर्वे इत्यादि। अभिनिर्वर्तन्त इति सन्तानन्यायेन। स्रोतांसीत्यादि। खलुशब्दो हेतौ। परिणाममापद्यमानानामिति पूर्वपूर्वरसादिरूपतापरित्यागेनोत्तरोत्तररक्तादिरूपतामापद्यमानानाम्। अयनार्थेनेतिवचनान्न स्थिराणां धातूनामभिवाहीनि भवन्ति स्रोतांसि, किन्तु देशान्तरप्रापणेनाभिवाहीनि भवन्ति। एवं मन्यते— रक्तस्य वृद्धिः शोणितरूपतया परिणमता रसेन मिलितेन कर्तव्या, स च स्थानान्तरस्थस्य रसस्य रुधिरेण समं मेलको न गमनमार्गं स्रोतःसञ्ज्ञकमन्तरा भवति। अयं तावदभिसन्धिः— स्रोतःकारणिको हि धातूनां प्रायो रक्तादीनामुत्तरधातुपोषकभागपरिणामो भवति, तच्चाप्युत्तरधातुपोषणं नान्तरेण स्रोतो भवति; यश्च रक्ते न्यायः, स सर्वत्र शारीरे भावे; न चान्यस्रोतसाऽन्यधातुपुष्टिः सम्भवति, सर्वपोष्याणां भिन्नदेशत्वात्; न ह्यभिन्नेन स्रोतसा

भिन्नदेशवृक्षयोः सेचनमस्ति। मनस्तु यद्यपि नित्यत्वेन न पोष्यं, तथाऽपि तस्येन्द्रियप्रदेशगमनार्थं स्रोतोऽस्त्येव। तच्च मनःप्रभृतीनामतीन्द्रियाणां कृत्स्नमेव शरीरं स्रोतोरूपं वक्ष्यति। दोषाणां तु सर्वशरीरचरत्वेन यथास्थूलस्रोतोऽनभिधानेऽपि सर्वस्रोतांस्येव गमनार्थं वक्ष्यन्ते, सूक्ष्मजिज्ञासायां तु वातादीनामपि प्रधानभूता धमन्यः सन्त्येव; यदुक्तं **सुश्रुते**— "तासां वातवाहिन्यो दश" (सु.शा.अ.७) इत्यादि। नच चरके सुश्रुते इव धमनीसिरास्रोतसां भेदो विवक्षितः॥३॥

अपि चैके स्रोतसामेव समुदयं पुरुषमिच्छन्ति, सर्वगतत्वात् सर्वसरत्वाच्च दोषप्रकोपणप्रशमनानाम्। न त्वेतदेवं, यस्य हि स्रोतांसि, यच्च वहन्ति, यच्चावहन्ति, यत्र चावस्थितानि, सर्वं तदन्यत्तेभ्यः। अतिबहुत्वात् खलु केचिदपरिसङ्ख्येयान्याचक्षते स्रोतांसि, परिसङ्ख्येयानि पुनरन्ये॥४॥

सर्वगतत्वादिति स्रोतसां सर्वशरीरावयवगतत्वादित्यर्थः। सर्वसरत्वादित्युत्तरेण सम्बध्यते। दोषप्रकोपणमपथ्यं दोषप्रशमनं वा पथ्यं सर्वस्मिञ् शरीरप्रदेशे दोषरूपं सत् तथा भेषजरूपं सद्गच्छति; तेन सर्वत्र स्रोतो विद्यते; तेन स्रोतोमयः पुरुष इति पूर्वपक्षः। तं निषेधति— न त्वित्यादि। यस्य हि स्रोतांसि यद्घटितानीत्यर्थः, यच्च वहन्तीति यद्रसादि वहन्तीत्यर्थः, यच्चावहन्तीति यच्च पुष्यन्तीत्यर्थः, यत्र चावस्थितानीति यत्र मांसादौ सम्बद्धानीत्यर्थः, तत् सर्वं धमनीभ्योऽन्यत्; तस्मान्न स्रोतोरूप एव पुरुष इत्यर्थः॥४॥

तेषां तु खलु स्रोतसां यथास्थूलं कतिचित्प्रकारान्मूलतश्च प्रकोपविज्ञानतश्चानुव्याख्यास्यामः; ये भविष्यन्त्यलमनुक्तार्थज्ञानाय ज्ञानवतां, विज्ञानाय चाज्ञानवताम्। तद्यथा— प्राणोदकान्नरस-रुधिरमांसमेदोस्थिमज्जशुक्रमूत्रपुरीषस्वेदवहानीति; वातपित्तश्लेष्मणां पुनः सर्वशरीरचराणां सर्वाणि स्रोतांस्ययनभूतानि, तद्वदतीन्द्रियाणां पुनः सत्त्वादीनां केवलं चेतनावच्छरीरमयनभूतमधिष्ठानभूतं च। तदेतत् स्रोतसां प्रकृतिभूतत्वान्न विकारैरुपसृज्यते शरीरम्॥७॥

प्रकोपविज्ञानतश्चेति यथा स्रोतसां प्रकोपो विज्ञायते तथा व्याख्यास्याम इति योजना। अनुक्तार्थज्ञानायेति अनुक्तस्रोतोज्ञानाय। ज्ञानवतामिति अनुक्तार्थज्ञानसमर्थानाम्। ज्ञानवन्तो ह्यनेन लिङ्गेनानुक्तमपि स्रोतोऽनुमिमते। विज्ञानाय चाज्ञानवतामिति यथोक्तमात्रज्ञानाय च मन्दबुद्धीनामित्यर्थः। तद्वदिति सर्वशरीरचराणाम्। चेतनावच्छरीरमित्यनेनाचेत-नकेशनखादिप्रदेशंसत्त्वादिगमने निषेधति, दोषास्तु तत्रापि यान्तीति। अयनभूतमिति मार्गभूतम्। अधिष्ठानभूतमिति स्थानरूपम्॥६-७॥

तत्र प्राणवहानां स्रोतसां हृदयं मूलं महास्रोतश्च, प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा — अतिसृष्टमतिबद्धं कुपितमल्पाल्पमभीक्ष्णं वा सशब्दशूलमुच्छ्वसन्तं दृष्ट्वा प्राणवहान्यस्य स्रोतांसि प्रदुष्टानीति विद्यात्। उदकवहानां स्रोतसां तालुमूलं क्लोम च, प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा— जिह्वाताल्वोष्ठकण्ठक्लोमशोषं पिपासां चातिप्रवृद्धां दृष्ट्वोदकवहान्यस्य स्रोतांसि प्रदुष्टानीति विद्यात्। अन्नवहानां स्रोतसामामाशयो मूलं वामं च पार्श्वं, प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा— अनन्नाभिलषणमरोचकविपाकौ छर्दिं च दृष्ट्वाऽन्नवहान्यस्य स्रोतांसि प्रदुष्टानीति विद्यात्। रसवहानां स्रोतसां हृदयं मूलं दश च धमन्यः। शोणितवहानां स्रोतसां यकृन्मूलं प्लीहा च। मांसवहानां च स्रोतसां स्नायुर्मूलं त्वक् च। मेदोवहानां स्रोतसां वृक्कौ मूलं वपावहनं च। अस्थिवहानां स्रोतसां मेदो मूलं जघनं च। मज्जवहानां स्रोतसामस्थीनि मूलं सन्धयश्च। शुक्रवहानां स्रोतसां वृषणौ मूलं शेफश्च। प्रदुष्टानां तु खल्वेषां रसादिवहस्रोतसां विज्ञानान्युक्तानि विविधाशितपीतीये; यान्येव हि धातूनां प्रदोषविज्ञानानि तान्येव यथास्वं प्रदुष्टानां धातुस्रोतसाम्। मूत्रवहानां स्रोतसां बस्तिर्मूलं वङ्क्षणौ च, प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा— अतिसृष्टमतिबद्धं प्रकुपितमल्पाल्पमभीक्ष्णं वा बहलं सशूलं मूत्रयन्तं दृष्ट्वा मूत्रवहान्यस्य स्रोतांसि प्रदुष्टानीति विद्यात्। पुरीषवहानां स्रोतसां पक्वाशयो मूलं स्थूलगुदं च, प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा— कृच्छ्रेणाल्पाल्पं सशब्दशूलमतिद्रवमतिग्रथितमतिबहु चोपविशन्तं

दृष्ट्वा पुरीषवहान्यस्य स्रोतांसि प्रदुष्टानीति विद्यात्। स्वेदवहानां स्रोतसां मेदो मूलं लोमकूपाश्च, प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भवति; तद्यथा— अस्वेदनमतिस्वेदनं पारुष्यमतिश्लक्ष्णतामङ्गस्य परिदाहं लोमहर्षं च दृष्ट्वा स्वेदवहान्यस्य स्रोतांसि प्रदुष्टानीति विद्यात्॥८॥

प्राणवहानामिति प्राणसञ्ज्ञकवातवहानाम्। एतच्च प्राणाख्यविशिष्टस्य वायोर्विशिष्टस्रोतः, सामान्येन तु वायोः सर्वा एव धमन्य इति न विरोधः। मूलमिति प्रभवस्थानम्। अतिसृष्टं वा अतिबद्धं वेति विकल्पेन बोद्धव्यम्, अतिसृष्टातिबद्धयोरेकत्रासम्भवात्। अल्पाल्पं वा तथाऽभीक्ष्णं वेति च विकल्पः। क्लोम हृदयस्थपिपासास्थानम्। वपावहनं वपा उदरस्था स्निग्धवर्तिका यामाहुर्जनास्तैलवर्तिकेति। **सुश्रुते** तु "मेदोवहानां मूलं वृक्कौ कटी च" (सु.शा.अ.) इत्युक्तं; तदत्रातीन्द्रियार्थदर्शिगम्ये नास्मद्विधानां बुद्धयः प्रभवन्ति। अस्थ्यपि द्रवरूपमस्त्येव स्रोतोवाह्यमिति कृत्वा अस्थिवहानामित्युक्तम्। यद्यपि विविधाशितपीतीये रसादीनां दुष्टिलक्षणमुक्तं न रसादिस्रोतसां, तथाऽपि रसादिदुष्ट्या रसादिवहधमनीनामपि दुष्टेः साधारणत्वेनोक्तं— रसादिवहस्रोतसां विज्ञानान्युक्तानीति। ये तु ब्रुवते— रसादिदुष्टेरभिन्नैव तद्वहधमनीदुष्टिरिति, तेषां मते पृथग्धमनीदुष्ट्यभिधानमनुपपन्नं, तथा धमनीदुष्ट्या यद्धातुदुष्टिं वक्ष्यति "तेषां प्रकोपात् स्थानस्थाश्चैव" इत्यादिना तदनुपपन्नम्। धमनीदुष्ट्या तु तद्वाह्यदुष्टिरवश्यं भवतीति कृत्वा धातुदुष्टिलक्षणैरेवेह धमनीदुष्टिरुक्ता, रक्तादिधातुदुष्ट्यतिरिक्तं तु धमनीदुष्टिलक्षणम् "अतिप्रवृत्तिः" इत्यादिनाऽत्रैव वक्ष्यति। अस्वेदनादिकं स्वेदवहदुष्टिलक्षणं कुष्ठपूर्वरूपेऽप्यस्ति; तेन यत्रान्यत्कुष्ठपूर्वरूपदर्शनं भवति तत्र कुष्ठपूर्वरूपता निश्चेतव्या, एतावन्मात्रलक्षणोदये तु स्वेदवहधमनीदुष्टिरिति। धमनीनामिह मूलज्ञाने यद्यपि साक्षात् प्रयोजनं नोक्तं, तथाऽपि मूलोपघाताद्वृक्षाणामिव धमनीनां महानुपघातो भवतीति ज्ञेयम्, अत एव **सुश्रुते** स्रोतोमूलविद्धलक्षणान्युक्तानि॥८॥

स्रोतांसि, सिराः, धमन्यः, रसायन्यः, रसवाहिन्यः, नाड्यः, पन्थानः, मार्गाः, शरीरच्छिद्राणि, संवृतासंवृतानि, स्थानानि, आशयाः, निकेताश्चेति शरीरधात्ववकाशानां लक्ष्यालक्ष्याणां नामानि भवन्ति। तेषां प्रकोपात् स्थानस्थाश्चैव मार्गगाश्च शरीरधातवः प्रकोपमापद्यन्ते, इतरेषां प्रकोपादितराणि च। स्रोतांसि स्रोतांस्येव, धातवश्च धातूनेव प्रदूषयन्ति प्रदुष्टाः। तेषां सर्वेषामेव वातपित्तश्लेष्माणः प्रदुष्टा दूषयितारो भवन्ति, दोषस्वभावादिति॥९॥

स्रोतसां व्यवहारार्थं पर्यायानाह— स्रोतांसीत्यादि। संवृतासंवृतानीत्येका सञ्ज्ञा, तत्राग्रे संवृतानि मूलेऽसंवृतानि। स्थानादिपर्यायान् केचिद्धमनीमूलस्य पर्यायानाचक्षते; अन्ये त्वेतानपि धमनीपर्यायानाहुः, धमन्योऽपि हि रसादिस्थानं भवन्त्येवेति कृत्वा। स्थानस्था इति आशयस्थाः। मार्गगाश्चैवेति धमनीभिर्गच्छन्तः। इतरेषां चेत्यादिनोक्तमर्थं स्रोतांसि चेत्यादिना विवृणोति। स्रोतांसि धातवश्च दुष्टाः प्रत्यासन्नानि स्रोतांसि धात्वन्तराणि च स्वदोषसङ्क्रान्त्या दूषयन्तीत्यर्थः। दोषस्वभावादिति दोषाणामेवायं स्वभावो यद्दूषकत्वं, न धात्वन्तराणां; तेन धातुना दुष्टिर्धातुदुष्टिः धातुगतदोषकृतैव ज्ञेया॥९॥

भवन्ति चात्र—

क्षयात् सन्धारणाद्रौक्ष्याद्व्यायामात् क्षुधितस्य च।
प्राणवाहीनि दुष्यन्ति स्रोतांस्यन्यैश्च दारुणैः॥१०॥
औष्ण्यादामाद्भयात् पानादतिशुष्कान्नसेवनात्।
अम्बुवाहीनि दुष्यन्ति तृष्णायाश्चातिपीडनात्॥११॥
अतिमात्रस्य चाकाले चाहितस्य च भोजनात्।
अन्नवाहीनि दुष्यन्ति वैगुण्यात् पावकस्य च॥१२॥
गुरुशीतमतिस्निग्धमतिमात्रं समश्नताम्।
रसवाहीनि दुष्यन्ति चिन्त्यानां चातिचिन्तनात्॥१३॥

विदाहीन्यन्नपानानि स्निग्धोष्णानि द्रवाणि च।
रक्तवाहीनि दुष्यन्ति भजतां चातपानलौ॥ १४॥
अभिष्यन्दीनि भोज्यानि स्थूलानि च गुरूणि च।
मांसवाहीनि दुष्यन्ति भुक्त्वा च स्वपतां दिवा॥ १५॥
अव्यायामाद्दिवास्वप्नान्मेद्यानां चातिभक्षणात्।
मेदोवाहीनि दुष्यन्ति वारुण्याश्चातिसेवनात्॥ १६॥
व्यायामादतिसङ्क्षोभादस्थ्नामतिविघट्टनात्।
अस्थिवाहीनि दुष्यन्ति वातलानां च सेवनात्॥ १७॥
उत्पेषादत्यभिष्यन्दादभिघातात् प्रपीडनात्।
मज्जवाहीनि दुष्यन्ति विरुद्धानां च सेवनात्॥ १८॥
अकालयोनिगमनान्निग्रहादतिमैथुनात्।
शुक्रवाहीनि दुष्यन्ति शस्त्रक्षाराग्निभिस्तथा॥ १९॥
मूत्रितोदकभक्ष्यस्त्रीसेवनान्मूत्रनिग्रहात्।
मूत्रवाहीनि दुष्यन्ति क्षीणस्याभिक्षतस्य च॥ २०॥
सन्धारणादत्यशनादजीर्णाध्यशनात्तथा।
वर्चोवाहीनि दुष्यन्ति दुर्बलाग्नेः कृशस्य च॥ २१॥
व्यायामादतिसन्तापाच्छीतोष्णाक्रमसेवनात्।
स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा॥ २२॥

यथाक्रमं स्रोतसां दुष्टिकारणमाह— क्षयादित्यादि। दारुणैरित्यत्र 'कर्मभिः' इति शेषः। गुरूणि च भजतामिति पूर्वोक्तेन सम्बन्धः। मेद्यानां मेदुराणाम्। अकालयोनिगमनादिति अहर्षकालगमनात्, तथाऽनुचितयोनौ गमनात्। निग्रहादिति शुक्रवेगनिग्रहात्। मूत्रितेत्यादौ मूत्रवेगयुक्तस्य उदकादिसेवनादिति ज्ञेयम्॥ १०-२२॥

आहारश्च विहारश्च यः स्याद्दोषगुणैः समः।

धातुभिर्विगुणश्चापि स्रोतसां स प्रदूषकः॥२३॥

आहारश्चेत्यादिना सामान्येन सर्वस्रोतोदुष्टिमाह। दोषगुणैः सम इत्यनेन दोषातिवर्धकत्वं दर्शयति। क्षीणाश्च दोषा नान्यद्दुष्टिं कुर्वन्ति, किं तु स्वयमेव क्षीणस्वलिङ्गा भवन्तीत्यादि वेदितव्यम्। धातुभिर्विगुण इति धातुविरोधकस्वभाव इत्यर्थः, नतु धातुविपरीतगुणे विगुणः; दिवास्वप्नमेद्यादयो हि मेदसा समानगुणा एव मेदोदूषका उक्ताः॥२३॥

अतिप्रवृत्तिः सङ्गो वा सिराणां ग्रन्थयोऽपि वा।

विमार्गगमनं चापि स्रोतसां दुष्टिलक्षणम्॥२४॥

अतिप्रवृत्तिरित्यादिना सामान्येन स्रोतोदुष्टिलक्षणमाह। अतिप्रवृत्तिरिह स्रोतोवाह्यस्य रसादेर्बोद्धव्या; एवं सङ्गोऽपि रसादेरेव। विमार्गगमनं च यथा— मलस्य मूत्रमार्गगमनमित्यादि॥२४॥

स्वधातुसमवर्णानि वृत्तस्थूलान्यणूनि च।

स्रोतांसि दीर्घाण्याकृत्या प्रतानसदृशानि च॥२५॥

स्वधातुसमवर्णानीति वाह्यधातुतुल्यवर्णानि। प्रतानः लताप्रपञ्चः॥२५॥

प्राणोदकान्नवाहानां दुष्टानां श्वासिकी क्रिया।

कार्या तृष्णोपशमनी तथैवामप्रदोषिकी॥२६॥

विविधाशितपीतीये रसादीनां यदौषधम्।

रसादिस्रोतसां कुर्यात्तद्यथास्वमुपक्रमम्॥२७॥

मूत्रविड्स्वेदवाहानां चिकित्सा मौत्रकृच्छ्रिकी।

तथाऽतिसारिकी कार्या तथा ज्वरचिकित्सिकी॥२८॥

प्राणोदकेत्यादिना चिकित्सामाह। प्राणवहानां श्वासिकी, उदकवहानां तृष्णोपशमनी, अन्नवहानामामप्रदोषिकीति बोद्धव्यम्। मूत्रादिवहानामपि त्रयाणां मौत्रकृच्छ्रिक्यादयो यथासङ्ख्यं तिस्रश्चिकित्सा ज्ञेयाः॥२६-२८॥

तत्र श्लोकाः—

त्रयोदशानां मूलानि स्रोतसां दुष्टिलक्षणम्।
सामान्यं नामपर्यायाः कोपनानि परस्परम्॥२९॥
दोषहेतुः पृथक्त्वेन भेषजोद्देश एव च।
स्रोतोविमाने निर्दिष्टस्तथा चादौ विनिश्चयः॥३०॥
केवलं विदितं यस्य शरीरं सर्वभावतः।
शारीराः सर्वरोगाश्च स कर्मस्तु न मुह्यति॥३१॥

सङ्ग्रहे दुष्टिलक्षणं सामान्यं वाताद्यविशेषितं दुष्टिलक्षणमित्यर्थः, स्रोतोदुष्टिलक्षणानीह वातादिदोषभेदेन नोक्तानीत्यर्थः; वातादिविशेषेण चेह विस्तरभयाद्दुष्टिर्नोक्ता; तेन वातातिविशेषलिङ्गाधिक्या-द्दुष्टिर्निर्णेतव्या। आदौ विनिश्चय इति अध्यायादौ पुरुषस्य धमनीमयत्वादिवादनिश्चय इत्यर्थः। केवलमित्यादिना अत्रोक्तधमन्यादिभेदेन शरीरज्ञानस्योपादेयतामाह॥२९-३१॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते विमानस्थाने स्रोतोविमानं नाम पञ्चमोऽध्यायः॥५॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां विमानस्थाने स्रोतोविमानं नाम पञ्चमोऽध्यायः॥५॥

षष्ठोऽध्यायः।

अथातो रोगानीकं विमानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

पूर्वाध्याये स्रोतोरूपाधिष्ठानभेदेन रोगानभिधाय प्रभावादिभेदेन रोगानभिधातुं रोगानीकं विमानमुच्यते। रोगानीकमिति रोगसमूहः॥१-२॥

द्वे रोगानीके भवतः प्रभावभेदेन— साध्यम्, असाध्यं च; द्वे रोगानीके बलभेदेन— मृदु, दारुणं च; द्वे रोगानीके अधिष्ठानभेदेन— मनोऽधिष्ठानं, शरीराधिष्ठानं च; द्वे रोगानीके निमित्तभेदेन— स्वधातुवैषम्यनिमित्तम्, आगन्तुनिमित्तं च; द्वे रोगानीके आशयभेदेन— आमाशयसमुत्थं, पक्वाशयसमुत्थं चेति। एवमेतत् प्रभावबलाधिष्ठाननिमित्ताशयभेदाद्द्वैधं सद्भेदप्रकृत्यन्तरेण भिद्यमानमथवाऽपि सन्धीयमानं स्यादेकत्वं बहुत्वं वा। एकत्वं तावदेकमेव रोगानीकं, दुःखसामान्यात्; बहुत्वं तु दश रोगानीकानि प्रभावभेदादिना भवन्ति; बहुत्वमपि सङ्ख्येयं स्यादसङ्ख्येयं वा। तत्र सङ्ख्येयं तावद्यथोक्तमष्टोदरीये, अपरिसङ्ख्येयं पुनर्यथा— महारोगाध्याये रुग्वर्णसमुत्थानादीनामसङ्ख्येयत्वात्॥३॥

बलभेदेनेत्यत्र मृदु अल्पबलं, दारुणं तु महाबलं ज्ञेयम्। दारुणं किञ्चित्कालातिपातादेव बलवत्त्वान्मारयति। यदुक्तं— "सन्ति ह्येवंविधा रोगाः साध्या दारुणसम्मताः। ये हन्युरनुपक्रान्ता मिथ्यारम्भेण वा पुनः" (सू.अ.१८) इति। आमाशयसमुत्थत्वेन आमाशयाश्रयाः कफपित्तजाः सर्वे गदा गृह्यन्ते, पक्वाशयसमुत्थग्रहणेन सर्वे वातजाः; एवं सर्वविकारावरोधः। द्वैधं सदिति द्वैविध्यं सत्। भेदप्रकृत्यन्तरेणेति भेदकारणान्तरेण। अथवाऽपि सन्धीयमानमिति एकीक्रियमाणम्, एकबुद्धिकारकानुगतधर्मान्तरेणेति बोद्धव्यम्। दुःखसामान्यादिति दुःखकर्तृत्वेन सर्वरोगानुगतेन साधारणेन रूपेण सर्व एव रोगा एकरूपा भवन्ति। बहुत्वमपीति उक्तप्रभावभेदादिकृतत्वादपि बहुत्वमित्यर्थः। सङ्ख्येयत्वमष्टोदरीये "अष्टचत्वारिंशद्रोगाधिकरणान्यस्मिन् सङ्ग्रहे" (सू.अ.१९)

इत्यादिनोक्तम्। असङ्ख्येयत्वं महारोगाध्याये तथा त्रिशोफीये च "त एवापरिसङ्ख्येया भिद्यमाना भवन्ति हि। रुजावर्णसमुत्थानस्थानसंस्थाननामभिः" (सू.अ.१८) इत्यनेनोक्तम्॥३॥

न च सङ्ख्येयाग्रेषु भेदप्रकृत्यन्तरीयेषु विगीतिरित्यतो दोषवती स्यादत्र काचित् प्रतिज्ञा, न चाविगीतिरित्यतः स्याददोषवती। भेत्ता हि भेद्यमन्यथाभिनत्ति, अन्यथा पुरस्ताद्भिन्नं भेदप्रकृत्यन्तरेण भिन्दन् भेदसङ्ख्याविशेषमापादयत्यनेकधा, न च पूर्वं भेदाग्रमुपहन्ति। समानायामपि खलु भेदप्रकृतौ प्रकृतानुप्रयोगान्तरमपेक्ष्यम्। सन्ति ह्यर्थान्तराणि समानशब्दाभिहितानि, सन्ति चानर्थान्तराणि पर्यायशब्दाभिहितानि। समानो हि रोगशब्दो दोषेषु च व्याधिषु च; दोषा ह्यपि रोगशब्दमातङ्कशब्दं यक्ष्मशब्दं दोषप्रकृतिशब्दं विकारशब्दं च लभन्ते, व्याधयश्च रोगशब्दमातङ्कशब्दं यक्ष्मशब्दं दोषप्रकृतिशब्दं विकारशब्दं च लभन्ते। तत्र दोषेषु चैव व्याधिषु च रोगशब्दः समानः, शेषेषु तु विशेषवान्॥४॥

ननु सङ्ख्येयत्वमसङ्ख्येयत्वं च विरुद्धावेतौ धर्मौ, तथैकत्वमनेकत्वं चेति विरुद्धौ, तत् कथं विरुद्धत्वेन ख्यातौ धर्मावेकस्मिन् रोगे घटेतामित्याह— न चेत्यादि। सङ्ख्येयाग्रेष्विति सङ्ख्येयरोगपरिमाणेषु, अग्रशब्दः परिमाणे वर्तते; यथा— एकैकस्य भेदाग्रमपरिसङ्ख्येयं भवति, भेदसङ्ख्यारूपं परिमाणमित्यर्थः। भेदप्रकृत्यन्तरीयेष्विति भेदकारणान्तरभवेषु। विरुद्धा गीतिः विगीतिः कथनं; यथा— 'एकं चानेकं च तत्' इत्यादिका विरुद्धा गीतिः। अत इति यथोक्तविगीतियोगात्, न दोषवती काचित् प्रतिज्ञा; यथा— एकानेकरूपान्तरगमनरूपा अत्रोक्ता स्यादिति योजना। विगीतौ दोषाभावं दर्शयित्वा भेदकारणान्तरकृतायामविगीतावपि दोषो भवतीति दर्शयन्नाह— न चाविगीतिरित्यादि। यदि हि 'एकं रोगानीकं रुजासामान्यात्' इत्यभिधाय पुनः 'एकं रोगानीकं प्रभावभेदात्' इत्यविरुद्धा एकताख्यायिकाऽविगीतिः क्रियते, सा विरुद्धैव स्यात्; यतो न प्रभावभेदेन रोगाणामेकत्वमुपपन्नं, किन्तु द्वैधमेवेति भावः। विगीतौ दोषाभावे हेतुमाह— भेत्ता हीत्यादि।— भेत्ता पुरुषः, भेद्यं रोगम्,

अन्यथा द्वित्वादिना भिनत्ति, अन्यथा एकत्वेन पुरस्ताद्भेदितं चान्यथा भिनत्तीति। अस्यार्थं व्याकरोति — भेदप्रकृत्यन्तरेणेत्यादिना। अनेकधेति द्वे रोगानीके, तथा दश रोगानीकानीत्यादि। न च पूर्वं भेदाग्रं भेदप्रमाणमुपहन्ति। एवं मन्यते— यद्धर्मयोगविवक्षयैकत्वमुक्तं, तद्धर्मयोगविवक्षयैव यदि बहुत्वमप्युच्यते रोगाणां ततो विरोधो भवति, न हि तदेवैकं चानेकं चेत्युपपन्नं; यदा तु धर्मान्तरयोगविवक्षया बहुत्वमुच्यते, न तदा विरोधः; बहुत्वाभिधानकाले बहूनामेव रोगधर्माणां विवक्षितत्वात्; तेन रोगाणामेकत्वमेकधर्मविषयं, बहुत्वं च बहुधर्मविषयमिति नास्ति विरोधः। ननु यत्रासमानं भेदकारणं तत्र कारणान्तरकृतत्वादुक्तन्यायेन विगीतिः साध्वी भवतु, यत्र तु दश रोगानीकानि प्रभावादिद्वैविध्यादुच्यन्ते, तत्र कथं द्वे रोगानीके इति द्वित्वकृतं द्वैविध्यमभिधाय पुनर्द्वित्वादिभेदेनैव दशत्वमुच्यते? समानो ह्ययं द्विशब्दो द्वित्वे दशत्वे च रोगाणां हेतुरित्याह— समानायामपीति; समानशब्दाभिधेयत्वेनापाततः समानत्वेन प्रतिभासमानायामित्यर्थः। प्रकृतानुप्रयोगान्तरमपेक्ष्यमिति प्रकृतस्य समानशब्देनाभिहितस्य यद्भेदव्यापकं पश्चात्प्रयोगान्तरं, तदपेक्षणीयं विगीतिसमाधानार्थमित्यर्थः। एतेनैतद्दर्शयति— यद्यपि द्विशब्दो रोगप्रभावे तथा रोगबलादौ च समानः, तथाऽप्येकत्र 'प्रभावभेदात्' इत्यनुप्रयोगान्तरमपेक्ष्य प्रभावद्वैविध्ये वर्तते, तथा 'बलभेदात्' इत्यनुप्रयोगान्तरमपेक्ष्य च द्विशब्दो बलद्वैविध्ये वर्तत इत्यादि। तेनार्थान्तराभिधायिभिर्द्विशब्दैर्भिद्यमानस्य दशत्वमप्युपपन्नं तथा द्वित्वं चेति भावः। दृष्टान्तार्थमेकेन शब्देनानेकार्थाभिधानमाह— सन्ति हीत्यादि। अर्थान्तराणि पर्यायशब्दानभिहिता अर्थाः। तत्रोदाहरणमाह— समानो हीत्यादि।— दोषेषु व्याधिषु च समान उभयवाचकत्वेन तुल्यो रोगशब्दः; तेन रोगदोषसमानत्वेनाभिधेयसमानानां रोगातङ्कयक्ष्मादिशब्दानां सर्वेषामेव वक्ष्यमाणानां ग्रहणम्। शेषेष्विति हेत्वादिषु। विशेषवानिति अभिधानरूपविशेषवानित्यर्थः॥४॥

तत्र व्याधयोऽपरिसङ्ख्येया भवन्ति, अतिबहुत्वात्। दोषास्तु खलु परिसङ्ख्येया भवन्ति, अनतिबहुत्वात्। तस्माद्यथाचित्रं विकारानुदाहरणार्थम्, अनवशेषेण च दोषान् व्याख्यास्यामः। रजस्तमश्च मानसौ

दोषौ। तयोर्विकाराः कामक्रोधलोभमोहेर्ष्यामानमदशोकचित्तो(न्तो)द्वेगभयहर्षादयः। वातपित्तश्लेष्माणस्तु खलु शारीरा दोषाः। तेषामपि च विकारा ज्वरातीसारशोफशोषश्वासमेहकुष्ठादयः। इति दोषाः केवला व्याख्याता विकारैकदेशश्च॥५॥

तत्र खल्वेषां द्वयानामपि दोषाणां त्रिविधं प्रकोपणं; तद्यथा— असात्म्येन्द्रियार्थसंयोगः, प्रज्ञापराधः, परिणामश्चेति॥६॥

तत्रापि रोगशब्दाभिधेयतया समानेऽपि दोषे तथा विकारे च परिसङ्ख्येयापरिसङ्ख्येय(त्व)रूपा विगीतिरस्त्यथ चादोष इत्यभिप्रायेणाह— तत्रेत्यादि। एकैकस्मिन् दोषे बहवो विकारा भवन्तीत्यभिप्रायेण विकारापेक्षया दोषाणामनतिबहुत्वं ज्ञेयम्। यथाचित्रमिति यथाविन्यासं, तेन यानेव पूर्वाचार्या विकारानधिकतमत्वेनोक्तवन्तस्तानेव व्याख्यास्यामः; नतु सर्वान्, अशक्यत्वात्। किंवा, 'यथोचितम्' इति पाठः। अनवशेषेण च दोषानित्यनेन दोषा अनतिबहुत्वेनानवशेषेणाप्यभिधातुं शक्यन्त इति प्रकाशयति। तत्र मानसदोषविकारयोरनल्पवक्तव्यत्वेनाग्रेऽभिधानम्॥५-६॥

प्रकुपितास्तु खलु ते प्रकोपणविशेषाद्दूष्यविशेषाच्च विकारविशेषानभिनिर्वर्तयन्त्यपरिसङ्ख्येयान्॥७॥

ननु परिमिताद्दोषरूपात् कारणात् कथमपरिमिता विकारा भवन्तीत्याह— प्रकुपितास्त्वित्यादि। हेतुविशेषदुष्टो हि स एव दोषो दूष्यान्तरगतश्च विभिन्नशक्तियोगाद्बहून् विकारान् करोतीति युक्तमेव। उक्तं च— "स एव कुपितो दोषः समुत्थानविशेषतः। स्थानान्तरगतश्चैव विकारान् कुरुते बहून्" (सू.अ.१८) इति॥७॥

ते च विकाराः परस्परमनुवर्तमानाः कदाचिदनुबध्नन्ति कामादयो ज्वरादयश्च॥८॥

विकाराणां शारीरमानसानां परस्परं संसर्गमाह— ते च विकारा इत्यादि। अनुवर्तमाना इत्यनेन यदैव ज्वरादयः कामादयो वा बलवत्त्वेन चिरकालमनुवर्तन्ते, तदैवानुबध्नन्ति प्रायः; यदा तु स्तोककालावस्थायिनो भवन्ति, न तदा प्रायोऽनुबध्नन्तीत्यर्थः। किंवा, अनुवर्तमानाः परस्परबलमभिवर्धयन्तः। अत्र च परस्परशब्देन शारीराणां शारीरेण, मानसानां मानसेन, शारीराणां मानसेन, मानसानां शारीरेण चानुबन्धो ज्ञेयः॥८॥

नियतस्त्वनुबन्धो रजस्तमसोः परस्परं, न ह्यरजस्कं तमः प्रवर्तते॥९॥

विकारानुबन्धं दर्शयित्वा दोषानुबन्धमाह— नियतस्त्वित्यादि॥९॥

(प्रायः) शारीरदोषाणामेकाधिष्ठानीयानां सन्निपातः संसर्गो वा समानगुणत्वात्; दोषा हि दूषणैः समानाः॥१०॥

शारीरदोषानुबन्धमाह— शारीरेत्यादि। एकाधिष्ठानीयानामित्यनेनैकशरीराधिष्ठानप्रत्यासत्त्या च संसर्गा दोषाणां भवन्तीति दर्शयति। समानगुणत्वादिति हेतुं विवृणोति— दोषा हीत्यादि। दूषणैरिति हेतुभिः; प्रायो हि शारीराणां वातादीनां समान एव हेतुर्भवति; यथा— ह्यम्लं लवणं कटु च पित्तकरं; तत्राम्लं सकफं पित्तं करोति, लवणं च सपित्तं कफं करोति, कटु तु सवातं पित्तं करोति। तथा वसन्तः श्लेष्मकारकोऽप्यादानत्वेन वातपित्ते च करोति, तथा वर्षास्वपि पित्तं चीयमानं शरदि प्रकुप्य कफानुगतमेव कुप्यति, तथा ग्रीष्मो वातचयं रूक्षत्वेन कुर्वन् उष्णत्वेन मनाक् पित्तचयमपि करोतीत्यनुसरणीयम्॥१०॥

तत्रानुबन्ध्यानुबन्धकृतो विशेषः— स्वतन्त्रो व्यक्तलिङ्गो यथोक्तसमुत्थानप्रशमो भवत्यनुबन्ध्यः, तद्विपरीतलक्षणस्त्वनुबन्धः। अनुबन्ध्यलक्षणसमन्वितास्तत्र यदि दोषा भवन्ति तत्त्रिकं सन्निपातमाचक्षते, द्वयं वा संसर्गम्। अनुबन्ध्यानुबन्धविशेषकृतस्तु बहुविधो दोषभेदः। एवमेष सञ्ज्ञाप्रकृतो भिषजां दोषेषु व्याधिषु च नानाप्रकृतिविशेषव्यूहः॥११॥

एनमेव दोषानुबन्धमनुबन्ध्यानुबन्धभेदेन दर्शयितुमनुबन्ध्यानुबन्धलक्षणमेवाह— तत्रेत्यादि। अनुबन्ध्यस्य अनुबन्धस्य च विशेषोऽनुबन्ध्यानुबन्धविशेषः 'स्वतन्त्र' इत्यादिग्रन्थलक्षणीयः। स्वतन्त्र इत्यस्यैव विवरणं— व्यक्तलिङ्ग इत्यादि। यथोक्तसमुत्थानप्रशम इति स्वहेतुसमुत्थितः स्वचिकित्सयैव प्रशमनीयः। किंवा, स्वतन्त्र इत्येनापि स्वविकारकरणे प्राधान्यमुच्यते; स्वतन्त्रो हि दोषः प्रकोपकाले विकारान् करोति, अस्वतन्त्रस्तु स्वतन्त्रप्रकोपकाल एव विकारं प्रधानदोषेरितः सन् करोति। तद्विपरीतलक्षण इति अनेनाव्यक्तलिङ्गोऽस्वहेतुप्रकुपितः परचिकित्साप्रशमनीयश्चानुबन्ध हति लभ्यते; अनुबन्धो ह्यबलवत्त्वेन न लिङ्गं व्यक्तं करोति, तथा परहेतुना किञ्चिदनुगुणेन कृतः परचिकित्सयैव किञ्चिदनुगुणया शाम्यति। यथा— शरदि श्लेष्मा पित्तहेतुना जलाद्यम्लविपाकेन जन्यते, स च पित्तचिकित्सयैव तिक्तसर्पिरादिकया कफेऽप्यनुगुणया शाम्यति। द्वयं वाऽनुबन्ध्यलक्षणं प्राप्तं संसर्गमाचक्षत इति योजना। अनुबन्ध्यशब्दश्चायं व्यक्तलिङ्गतातिधर्मयुक्ते दोषे वर्तते। तेनाप्रधानानुगमनीये सन्निपाते अनुबन्धाभावेऽप्यनुबन्ध इति व्यपदेशो भवत्येव अनुबन्ध्यानुबन्धरूपसंसर्गविशेषेण कृतः। सञ्ज्ञाप्रकृत इति अनुबन्ध्यानुबन्धसन्निपातसंसर्गज्वरातिसारादिसञ्ज्ञाकृत इत्यर्थः। नानाप्रकृतिविशेषव्यूह इति यथोक्तनानाकारणविशेषकृतो ज्वरातिसारादिरूपो व्यधीनां दोषाणां च समूह इत्यर्थः। भिषजामितिपदेन च वैद्यानामेवेयं समयसिद्धाऽनुबन्ध्यादिसञ्ज्ञेति दर्शयति॥११॥

अग्निषु तु शारीरेषु चतुर्विधो विशेषो बलभेदेन भवति। तद्यथा— तीक्ष्णो, मन्दः, समो, विषमश्चेति। तत्र तीक्ष्णोऽग्निः सर्वापचारसहः, तद्विपरीतलक्षणस्तु मन्दः, समस्तु खल्वपचारतो विकृतिमापद्यतेऽनपचारतस्तु प्रकृताववतिष्ठते, समलक्षणविपरीतलक्षणस्तु विषम इति। एते चतुर्विधा भवन्त्यग्नयश्चतुर्विधानामेव पुरुषाणाम्। तत्र समवातपित्तश्लेष्मणां प्रकृतिस्थानां समा भवन्त्यग्नयः, वातलानां तु वाताभिभूतेऽग्न्यधिष्ठाने विषमा भवन्त्यग्नयः, पित्तलानां तु पित्ताभिभूते ह्यग्न्यधिष्ठाने तीक्ष्णा भवन्त्यग्नयः, श्लेष्मलानां तु श्लेष्माभिभूतेऽग्न्यधिष्ठाने मन्दा भवन्त्यग्नयः॥१२॥

दोषभेदविकारभेदमभिधाय शरीरस्थितेः प्रधानकारणस्याग्नेर्भेदमाह— अग्निष्वित्यादि। शारीरेष्विति सामान्यवचनेन सर्वशरीरगतानग्नीन् ग्राहयति, विवरणे तु जठराग्नेरेव 'तीक्ष्णोऽग्निः सर्वापचारसहः' इत्यादिना यच्चातुर्विध्यमुक्तं, तज्जठराग्नितीक्ष्णतादिमूलकमेव त्वगग्न्यादितीक्ष्णत्वादिकमिति ज्ञापयति। वचनं हि— "तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः" (चि.अ.१५) इति। यद्यपि समोऽग्निः शस्तत्वेनाग्रेऽभिधातुं युज्यते, तथाऽपि समतश्च तीक्ष्णस्यैव प्राधान्योपदर्शनार्थमिहाग्रेऽभिधानं; समस्य हि प्राधान्यं निर्विकारत्वेनैव सुस्थितं, तीक्ष्णस्य तु सर्वापचारसहत्वेन प्राधान्यम्। तद्विपरीतलक्षण इति स्वल्पापचारमपि यो न सहते, स मन्द इत्यर्थः। समलक्षणविपरीतलक्षण इति कदाचिद्विषमोऽपचारादपि न विक्रियते, कदाचिद्विक्रियते। समवातपित्तश्लेष्मणामित्युक्तेऽपि प्रकृतिस्थानामिति पदं वृद्धानां समवातपित्तश्लेष्मणां प्रतिषेधार्थम्। प्रकृतिशब्दस्य कारणाद्यनेकार्थताव्युदासार्थं समवातपित्तश्लेष्मणामिति कृतम्। वाताभिभूतेऽग्न्यधिष्ठाने इति वचनेन वातलानामपि यदैवाग्न्यधिष्ठानोपघातो वातेन क्रियते, तदैव वैषम्यं भवति। एवं पित्ताभिभूत इत्यादावपि व्याख्येयम्॥१२॥

तत्र केचिदाहुः— न समवातपित्तश्लेष्माणो जन्तवः सन्ति, विषमाहारोपयोगित्वान्मनुष्याणां; तस्माच्च वातप्रकृतयः केचित्, केचित् पित्तप्रकृतयः, केचित् पुनः श्लेष्मप्रकृतयो भवन्तीति। तच्चानुपपन्नं,

कस्मात् कारणात्? समवातपित्तश्लेष्माणं ह्यरोगमिच्छन्ति भिषजः, यतः प्रकृतिश्चारोग्यम्, आरोग्यार्था च भेषजप्रवृत्तिः, सा चेष्टरूपा, तस्मात् सन्ति समवातपित्तश्लेष्माणः; न खलु सन्ति वातप्रकृतयः पित्तप्रकृतयः श्लेष्मप्रकृतयो वा। तस्य तस्य किल दोषस्याधिक्यात् सा सा दोषप्रकृतिरुच्यते मनुष्याणां, न च विकृतेषु दोषेषु प्रकृतिस्थत्वमुपपद्यते, तस्मान्नैताः प्रकृतयः सन्ति; सन्ति तु खलु वातलाः पित्तलाः श्लेष्मलाश्च, अप्रकृतिस्थास्तु ते ज्ञेयाः॥१३॥

विषमाहारोपयोगित्वादिति नायं पुरुषस्तुलाधारधृतमिवाहारमुपयुङ्क्ते, तेनावश्यमत्र वातादिष्वन्यतमोऽपि दोषो विकृतो भवतीति भावः। समवातपित्तश्लेष्माणमित्यादिना अस्ति तावदारोग्यं पुरुषेषु वैद्यव्यवहारसिद्धमिति दर्शयति। तेन, यादृगिदं दोषाणां कलाकाष्ठादिवैषम्यं परित्यज्याविर्भूतविकाराकारित्वेनादूरान्तरं साम्यमिष्यते, तादृगेव प्रकृतावपि साम्यमस्त्येवेति भावः। अन्ये तु वैषम्यं नाद्रियन्त एव, व्यपदेश्यरोगाजनकत्वात्। दोषप्रकृतिरिति दुष्टदोषभाविता प्रकृतिरित्यर्थः॥१३॥

तेषां तु खलु चतुर्विधानां पुरुषाणां चत्वार्यनुप्रणिधानानि श्रेयस्कराणि भवन्ति। तत्र समसर्वधातूनां सर्वाकारसमम्, अधिकदोषाणां तु त्रयाणां यथास्वं दोषाधिक्यमभिसमीक्ष्य दोषप्रतिकूलयोगीनि त्रीण्यनु(न्न)प्रणिधानानि श्रेयस्कराणि भवन्ति यावदग्नेः समीभावात्, समे तु सममेव कार्यम्; एवं चेष्टा भेषजप्रयोगाश्चापरे। तान् विस्तरेणानुव्याख्यास्यामः॥१४॥

दोषे प्रवृद्धे प्रतिकूलतया योगीनि दोषप्रतिकूलयोगीनि। त्रीणि वातपित्तश्लेष्मप्रतिकूलानि। समे त्विति समतां गते वह्नौ, यथोचितविधानेन (वातप्रकृत्यादीनां) सममेवानुप्रणिधानं कर्तव्यम्। एवमित्यनेन प्रकारेण चेष्टाभेषजयोरपि प्रयोगा वातादीनां भवन्ति; ये तु, एवमित्यनेन चतुर्विधेनोक्तेन प्रकारेणेति

वदन्ति, ते समप्रकृतीनां च समव्यायामादिचेष्टा भेषजं च ऋतुचर्याविधेयं वमनादिकारकं सूच्यतेऽनेनेति व्याख्यानयन्ति॥१४॥

त्रयस्तु पुरुषा भवन्त्यातुराः, ते त्वनातुरास्तन्त्रान्तरीयाणां भिषजाम्। तद्यथा— वातलः, पित्तलः, श्लेष्मलश्चेति। तेषामिदं विशेषविज्ञानं— वातलस्य वातनिमित्ताः, पित्तलस्य पित्तनिमित्ताः, श्लेष्मलस्य श्लेष्मनिमित्ता व्याधयः प्रायेण बलवन्तश्च भवन्ति॥१५॥

तत्र वातलस्य वातप्रकोपणान्यासेवमानस्य क्षिप्रं वातः प्रकोपमापद्यते, न तथेतरौ दोषौ; स तस्य प्रकोपमापन्नो यथोक्तैर्विकारैः शरीरमुपतपति बलवर्णसुखायुषामुपघाताय। तस्यावजयनं— स्नेहस्वेदौ विधियुक्तौ, मृदूनि च संशोधनानि स्नेहोष्णमधुराम्ललवणयुक्तानि, तद्वदभ्यवहार्याणि, अभ्यङ्गोपनाहनोद्वेष्टनोन्मर्दनपरिषेकावगाहनसंवाहनावपीडनवित्रासनविस्मापनविस्मारणानि, सुरासवविधानं, स्नेहाश्चानेकयोनयो दीपनीयपाचनीयवातहरविरेचनीयोपहितास्तथा शतपाकाः सहस्रपाकाः सर्वशश्च प्रयोगार्थाः, बस्तयः, बस्तिनियमः सुखशीलता चेति॥१६॥

न तथेतरौ दोषाविति सत्याऽपि हेतुसेवयेत्यर्थः; अन्यथा वातप्रकोपणसेवया पित्तश्लेष्मणोर्वृद्धिरेव नास्ति। वित्रासनादयो यद्यपि वातकारकास्तथाऽपि वातजनितोन्मादविनाशकत्वेन चोक्ता इति ज्ञेयम्। उन्मादे हि वित्रासनादि भेषजमभिधायोक्तं— "तेन याति शमं तस्य सर्वतो विप्लुतं मनः" (चि.अ.९) इति। सर्वशः प्रयोगार्था इति पानाभ्यङ्गबस्त्यादिभिः प्रयोजनीया इत्यर्थः। बस्तिनियम इति बस्तौ यथोक्तनियमसेवेत्यर्थः; किंवा बस्तिनियमशब्देन सिद्धौ वक्ष्यमाणकर्म-काल-योगरूपं बस्तिसङ्ख्यानियमं कर्तव्यतया दर्शयति। वक्ष्यति हि— "त्रिंशन्मताः कर्मसु बस्तियोगाः कालस्ततोऽर्धेन ततश्च योगः" (सि.अ.१) इति। सुखशीलता सततसुखसेवित्वम्॥१५-१६॥

पित्तलस्यापि पित्तप्रकोपणान्यासेवमानस्य क्षिप्रं पित्तं प्रकोपमापद्यते, न तथेतरौ दोषौ; तदस्य प्रकोपमापन्नं यथोक्तैर्विकारैः शरीरमुपतपति बलवर्णसुखायुषामुपघाताय। तस्यावजयनं— सर्पिष्पानं, सर्पिषा च स्नेहनम्, अधश्च दोषहरणं, मधुरतिक्तकषायशीतानां चौषधाभ्यवहार्याणामुपयोगः, मृदुमधुरसुरभिशीतहृद्यानां गन्धानां चोपसेवा, मुक्तामणिहारावलीनां च परमशिशिरवारिसंस्थितानां धारणमुरसा, क्षणे क्षणेऽग्र्यचन्दनप्रियङ्गुकालीयमृणालशीतवातवारिभिरुत्पलकुमुदकोकनदसौगन्धिकपद्मानुगतैश्च वारिभिरभिप्रोक्षणं, श्रुतिसुखमृदुमधुरमनोऽनुगानां च गीतवादित्राणां श्रवणं, श्रवणं चाभ्युदयानां, सुहृद्भिः संयोगः, संयोगश्चेष्टाभिः स्त्रीभिः शीतोपहितांशुकस्रग्धारिणीभिः, निशाकरांशुशीतलप्रवातहर्म्यवासः, शैलान्तरपुलिनशिशिरसदनवसनव्यजनपवनसेवनं, रम्याणां चोपवनानां सुखशिशिरसुरभिमारुतोपहितानामुपसेवनं, सेवनं च पद्मोत्पलनलिन-कुमुदसौगन्धिकपुण्डरीकशतपत्रहस्तानां, सौम्यानां च सर्वभावानामिति॥ १७॥

यथोक्तैरिति महारोगाध्यायोक्तैः। अधश्च दोषहरणमिति विरेचनादित्यर्थः। अग्र्यचन्दनं धवलचन्दनम्। हस्तानामिति कलापानाम्॥ १७॥

श्लेष्मलस्यापि श्लेष्मप्रकोपणान्यासेवमानस्य क्षिप्रं श्लेष्मा प्रकोपमापद्यते, न तथेतरौ दोषौ; स तस्य प्रकोपमापन्नो यथोक्तैर्विकारैः शरीरमुपतपति बलवर्णसुखायुषामुपघाताय। तस्यावजयनं— विधियुक्तानि तीक्ष्णोष्णानि संशोधनानि, रूक्षप्रायाणि चाभ्यवहार्याणि कटुकतिक्तकषायोपहितानि, तथैव धावनलङ्घनप्लवनपरिसरणजागरणनियुद्धव्यवायव्यायामोन्मर्दनस्नानोत्सादनानि, विशेषतस्तीक्ष्णानां दीर्घकालस्थितानां च मद्यानामुपयोगः, सधूमपानः सर्वशश्चोपवासः, तथोष्णं वासः, सुखप्रतिषेधश्च सुखार्थमेवेति॥ १८॥

श्लेष्मविजयार्थं रूक्षस्यैव हितत्वेन रूक्षाणीति वक्तव्ये यद्रूक्षप्रायाणीति करोति, तेनात्यर्थरूक्षान्नस्य वातानुगुणत्वेन तथा धात्वपोषकत्वेन चासेव्यत्वं दर्शयति; उक्तं हि रसविमाने— "स्निग्धमश्नीयात्; स्निग्धं हि भुक्तं स्वदते, भुक्तमौदर्यमग्निमुदीरयति" (वि.अ.१) इत्यादि। लङ्घनम् उत्प्लुत्य गमनं, परिसरणं कुण्डलरूपभ्रमणम्। सर्वशश्चोपवास इति सर्वलङ्घनानि। यदुक्तं— "चतुष्प्रकारा संशुद्धिः पिपासा मारुतातपौ। पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम्" (सू.अ.२२) इति। उपवासशब्दो ह्यत्र लङ्घने वर्तते। सुखार्थमिति आयतिसुखार्थं; सुखप्रतिषेधाद्धि श्लेष्मक्षये भूते श्लेष्मविकाराभावलक्षणं सुखं भवति॥१८॥

भवति चात्र—

सर्वरोगविशेषज्ञः सर्वकार्यविशेषवित्।

सर्वभेषजतत्त्वज्ञो राज्ञः प्राणपतिर्भवेदिति॥१९॥

यथोक्ताध्यायज्ञानादेव सर्वरोगाभिज्ञं स्तौति— सर्वेत्यादिना। प्राणान् पाति रक्षतीति प्राणपतिः॥१९॥

तत्र श्लोकाः—

प्रकृत्यन्तरभेदेन रोगानीकविकल्पनम्।

परस्पराविरोधश्च सामान्यं रोगदोषयोः॥२०॥

दोषसङ्ख्या विकाराणामेकदेशः प्रकोपणम्।

जरणं प्रति चिन्ता च कायाग्नेर्धुक्षणानि च॥२१॥

नराणां वातलादीनां प्रकृतिस्थापनानि च।

रोगानीके विमानेऽस्मिन् व्याहृतानि महर्षिणा॥२२॥

सङ्ग्रहे जरयतीति जरणो वह्निः, तं प्रति चिन्ता 'अग्निषु' इत्यादिना कृता। प्रकृतिस्थापनानीति भेषजानि॥२०-२२॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते विमानस्थाने रोगानीकविमानं नाम षष्ठोऽध्यायः॥६॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां विमानस्थाने रोगानीकविमानं नाम षष्ठोऽध्यायः॥६॥

सप्तमोऽध्यायः।

अथातो व्याधितरूपीयं विमानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

पूर्वाध्याये व्याधिं प्रतिपाद्य व्याधितस्य पुरुषस्य भेदं चिकित्सोपयोगितया प्रतिपादयितुं तथा तत्प्रसङ्गाच्च क्रिमीन् प्रतिपादयितुं व्याधितरूपीयोऽभिधीयते॥१-२॥

इह खलु द्वौ पुरुषौ व्याधितरूपौ भवतः— गुरुव्याधितः, लघुव्याधितश्च। तत्र— गुरुव्याधित एकः सत्त्वबलशरीरसम्पदुपेतत्वाल्लघुव्याधित इव दृश्यते, लघुव्याधितोऽपरः सत्त्वादीनामधमत्वाद्गुरुव्याधित इव दृश्यते। तयोरकुशलाः केवलं चक्षुषैव रूपं दृष्ट्वाऽध्यवस्यन्तो व्याधिगुरुलाघवे विप्रतिपद्यन्ते॥३॥

द्वावित्यादौ व्याधिः जातो यस्य स व्याधितः, तस्येव रूपं ययोस्तौ व्याधितरूपौ; व्याधितसदृशावित्यर्थः। तेन, व्याधितरूपावित्यनेन गुरुलघुव्याधियुक्तसदृशौ बोद्धव्यौ। यो हि गुरुव्याधिः सम्पन्नसत्त्वादिना लघुव्याधिर्दृश्यते, नासावपि लघुना व्याधिना व्याधितः, किं तु गुरुव्याधित एवासौ। स तु गुरुणैव व्याधिना व्याधितो गुरुव्याधिरदूरदर्शिना लघुव्याधिरिव दृश्यते, एवं विपर्यासाल्लघुव्याधितोऽपर इत्यादावपि व्याख्येयम्। अधमत्वादिति ह्यवरत्वादित्यर्थः। चक्षुषैवेति इतरज्ञानसाधनोपलक्षणं; तेन स्पर्शादिनाऽपि विशेषानवगाहकेनेति बोद्धव्यम्। रूपमिति विरूपम्। अध्यवस्यन्त इति निश्चयं कुर्वन्तः। गुरुलाघवे विप्रतिपद्यन्त इति गुरुलघुत्वे न प्रतिपद्यन्ते॥३॥

नहि ज्ञानावयवेन कृत्स्ने ज्ञेये विज्ञानमुत्पद्यते। विप्रतिपन्नास्तु खलु रोगज्ञाने उपक्रमयुक्तिज्ञाने चापि विप्रतिपद्यन्ते। ते यदा गुरुव्याधितं लघुव्याधितरूपमासादयन्ति, तदा तमल्पदोषं मत्वा संशोधनकालेऽस्मै मृदु संशोधनं प्रयच्छन्तो भूय एवास्य दोषानुदीरयन्ति। यदा तु लघुव्याधितं गुरुव्याधितरूपमासादयन्ति, तदा तं महादोषं मत्वा संशोधनकालेऽस्मै तीक्ष्णं संशोधनं प्रयच्छन्तो दोषानतिनिर्हृत्य शरीरमस्य क्षिण्वन्ति। एवमवयवेन ज्ञानस्य कृत्स्ने ज्ञेये ज्ञानमभिमन्यमानाः परिस्खलन्ति। विदितवेदितव्यास्तु भिषजः सर्वं सर्वथा यथासम्भवं परीक्ष्यं परीक्ष्याध्यवस्यन्तो न क्वचिदपि विप्रतिपद्यन्ते, यथेष्टमर्थमभिनिर्वर्तयन्ति चेति॥४॥

अत्रैव विरुद्धप्रतिपत्तौ हेतुमाह— नहीत्यादि। ज्ञानावयवेनेति एकदेशज्ञानेन। विप्रतिपत्तिफलमाह— विप्रतिपन्नास्त्वित्यादि। उपक्रमस्य भेषजप्रयोगस्य विकारेण समं योजना उपक्रमयुक्तिः, तस्या ज्ञाने विरुद्धप्रतिपत्तिमन्तो भवन्ति। एतदेव व्याकरोति— ते यदेत्यादि। आसादयन्तीति बुध्यन्ते। उदीरयन्तीति प्रकोपयन्त्येव परं, नत्वल्पबलत्वाद्धरन्तीत्यर्थः। अतिनिर्हृत्येति अतियोगेन हृत्वेत्यर्थः। ज्ञानस्येति ज्ञानसाधनस्य। यथासम्भवमिति यानि यत्र ज्ञानसाधनानि भवन्ति, तैस्तत्र। परीक्ष्यं सत्त्वादि। न क्वचिदपीति गौरवलाघवादौ॥४॥

भवन्ति चात्र—

सत्त्वादीनां विकल्पेन व्याधिरूपमथातुरे।
दृष्ट्वा विप्रतिपद्यन्ते बाला व्याधिबलाबले॥५॥
ते भेषजमयोगेन कुर्वन्त्यज्ञानमोहिताः।
व्याधितानां विनाशाय क्लेशाय महतेऽपि वा॥६॥
प्राज्ञास्तु सर्वमाज्ञाय परीक्ष्यमिह सर्वथा।
न स्खलन्ति प्रयोगेषु भेषजानां कदाचन॥७॥

एतदेव सुखग्रहणार्थं श्लोकेनाह— सत्त्वेत्यादि। व्याधिरूपमिति व्याधेर्गतिरूपमित्यर्थः। 'व्याधितरूपम्' इति तु पाठः सुगमः। बाला इति अल्पज्ञाः। अतियोगेनेति असम्यग्योगेन; तेनातियोगमिथ्यायोगयोर्ग्रहणं भवति॥५-७॥

इति व्याधितरूपाधिकारे व्याधितरूपसङ्ख्याग्रसम्भवं व्याधितरूपहेतुविप्रतिपत्तौ कारणं सापवादं सम्प्रतिपत्तिकारणं चानपवादं निशम्य, भगवन्तमात्रेयमग्निवेशोऽतः परं सर्वक्रिमीणां पुरीषसंश्रयाणां समुत्थानस्थानसंस्थानवर्णनामप्रभावचिकित्सितविशेषान् पपच्छोपसङ्गृह्य पादौ॥८॥

सम्प्रति व्याधिगुरुलाघवस्य दुर्ज्ञेयताप्रसङ्गेन दुर्ज्ञेयक्रिमिख्यापकमपि प्रकरणमारभते— इति व्याधितेत्यादि। सङ्ख्याग्रसम्भवमिति सङ्ख्याप्रमाणसम्भवमित्यर्थः; अग्रशब्दो हि परिमाणवाची। व्याधितरूपस्य हेतुः सत्त्वादिबलवत्त्वाबलवत्त्वे, तत्कृतो विप्रतिपत्तिर्व्याधितरूपहेतुविप्रतिपत्तिः, तत्र। कारणम् एकदेशेन ज्ञानम्। सापवादमिति सदोषम्। सम्यक् प्रतिपत्तिः सम्प्रतिपत्तिः॥८॥

अथास्मै प्रोवाच भगवानात्रेयः— इह खल्वग्निवेश! विंशतिविधाः क्रिमयः पूर्वमुद्दिष्टा नानाविधेन प्रविभागेनान्यत्र सहजेभ्यः; ते पुनः प्रकृतिभिर्विभज्यमानाश्चतुर्विधा भवन्ति; तद्यथा— पुरीषजाः, श्लेष्मजाः, शोणितजा, मलजाश्चेति॥९॥

पूर्वमुद्दिष्टा इति अष्टोदरीये सञ्ज्ञामात्रकथिताः। अन्यत्र सहजेभ्य इत्यनेन शरीरसहजास्त्ववैकारिकाः क्रिमयो विंशतेरप्यधिका भवन्तीति दर्शयति। प्रकृतिभिरिति कारणैः। मलजा इति बाह्यमलजाः॥९॥

तत्र मलो बाह्यश्चाभ्यन्तरश्च। तत्र बाह्यमलजातान् मलजान् सञ्चक्ष्महे। तेषां समुत्थानं— मृजावर्जनं; स्थानं— केशश्मश्रुलोमपक्ष्मवासांसि; संस्थानम्— अणवस्तिलाकृतयो बहुपादाश्च; वर्णः— कृष्णः, शुक्लश्च; नामानि— यूकाः, पिपीलिकाश्च; प्रभावः— कण्डूजननं, कोठपिडकाभिनिर्वर्तनं च; चिकित्सितं तु खल्वेषामपकर्षणं, मलोपघातः, मलकराणां च भावानामनुपसेवनमिति॥१०॥

पिपीलिकां लिक्षां केचिदाहुः। क्रिमीणां सञ्ज्ञा स्वशास्त्रव्यवहारसिद्धा देशान्तरप्रसिद्धा च बोद्धव्या। प्रभाव इति स्वशक्तिसम्पाद्यमित्यर्थः॥१०॥

शोणितजानां तु खलु कुष्ठैः समानं समुत्थानं; स्थानं— रक्तवाहिन्यो धमन्यः; संस्थानम्— अणवो वृत्ताश्चापादाश्च, सूक्ष्मत्वाच्चैके भवन्त्यदृश्याः; वर्णः— ताम्रः; नामानि— केशादा, लोमादा, लोमद्वीपाः, सौरसा, औडुम्बरा, जन्तुमातरश्चेति; प्रभावः— केशश्मश्रुनखलोमपक्ष्मापध्वंसः, व्रणगतानां च हर्षकण्डूतोदसंसर्पणानि, अतिवृद्धानां च त्वक्सिरास्नायुमांसतरुणास्थिभक्षणमिति; चिकित्सितमप्येषां कुष्ठैः समानं, तदुत्तरकालमुपदेक्ष्यामः॥११॥

हर्षकण्ड्वादयो व्रणदेश एव ज्ञेयाः॥११॥

श्लेष्मजाः क्षीरगुडतिलमत्स्यानूपमांसपिष्टान्नपरमान्नकुसुम्भस्नेहाजीर्णपूतिक्लिन्नसङ्कीर्णविरुद्धासात्म्य-भोजनसमुत्थानाः; तेषामामाशयः स्थानं, ते प्रवर्धमानास्तूर्ध्वमधो वा विसर्पन्त्युभयतो वा; संस्थानवर्णविशेषास्तु— श्वेताः पृथुब्रध्नसंस्थानाः केचित्, केचिद्वृत्तपरिणाहा गण्डूपदाकृतयः श्वेतास्ताम्रावभासाश्च, केचिदणवो दीर्घास्तन्त्वाकृतयः श्वेताः; तेषां त्रिविधानां श्लेष्मनिमित्तानां क्रिमीणां नामानि— अन्त्रादाः, उदरादाः, हृदयचराः, चुरवः, दर्भपुष्पाः, सौगन्धिकाः, महागुदाश्चेति;

प्रभावो— हृल्लासः, आस्यसंस्रवणम्, अरोचकाविपाकौ, ज्वरः, मूर्च्छा, जृम्भा, क्षवथुः, आनाहः, अङ्गमर्दः, छर्दिः कार्श्यं, पारुष्यं, चेति॥१२॥

परमान्नं पायसम्। सङ्कीर्णभोजनं घृणाविषयमलादिमिश्रितव्यञ्जनादिभोजनम्। ब्रध्नः चर्मलता॥१२॥

पुरीषजास्तुल्यसमुत्थानाः श्लेष्मजैः; तेषां स्थानं पक्वाशयः, ते प्रवर्धमानास्त्वधो विसर्पन्ति, यस्य पुनरामाशयाभिमुखाः स्युर्यदन्तरं तदन्तरं तस्योद्गारनिःश्वासाः पुरीषगन्धिनः स्युः; संस्थानवर्णविशेषास्तु— सूक्ष्मवृत्तपरीणाहाः श्वेता दीर्घा ऊर्णांशुसङ्काशाः केचित्, केचित् पुनः स्थूलवृत्तपरीणाहाः श्यावनीलहरितपीताः; तेषां नामानि ककेरुकाः, मकेरुकाः, लेलिहाः; सशूलकाः, सौसुरादाश्चेति; प्रभावः— पुरीषभेदः, कार्श्यं, पारुष्यं, लोमहर्षाभिनिर्वर्तनं च, त एव चास्य गुदमुखं परितुदन्तः कण्डूं चोपजनयन्तो गुदमुखं पर्यासते, त एव जातहर्षा गुदनिष्क्रमणमतिवेलं कुर्वन्ति; इत्येष श्लेष्मजानां पुरीषजानां च क्रिमीणां समुत्थानादिविशेषः॥१३॥

यदन्तरमिति यस्मिन् काले, तदन्तरं तत्कालमेव। ऊर्णांशुसङ्काशा इति मेषलोमतुल्याः। पर्यासत इति क्षिपन्ति, किंवा गुदं परिवार्यासते। अतिवेलमिति पुनः पुनः॥१३॥

चिकित्सितं तु खल्वेषां समासेनोपदिश्य पश्चाद्विस्तरेणोपदेक्ष्यामः। तत्र सर्वक्रिमीणामपकर्षणमेवादितः कार्यं, ततः प्रकृतिविघातः, अनन्तरं निदानोक्तानां भावानामनुपसेवनमिति॥१४॥

तत्रापकर्षणं— हस्तेनाभिगृह्य विमृश्योपकरणवताऽपनयनमनुपकरणेन वा; स्थानगतानां तु क्रिमीणां भेषजेनापकर्षणं न्यायतः, तच्चतुर्विधं; तद्यथा— शिरोविरेचनं, वमनं, विरेचनम्, आस्थापनं च;

इत्यपकर्षणविधिः। प्रकृतिविघातस्त्वेषां कटुतिक्तकषायक्षारोष्णानां द्रव्याणामुपयोगः, यच्चान्यदपि किञ्चिच्छ्लेष्मपुरीषप्रत्यनीकभूतं तत् स्यात्; इति प्रकृतिविघातः। अनन्तरं निदानोक्तानां भावानामनुपसेवनं— यदुक्तं निदानविधौ तस्य विवर्जनं तथाप्रायाणां चापरेषां द्रव्याणाम्। इति लक्षणतश्चिकित्सितमनुव्याख्यातम्। एतदेव पुनर्विस्तरेणोपदेक्ष्यते॥१५॥

अपकर्षणं हस्तादि संशोधनानि च। प्रकृतेः कारणस्य श्लेष्मादिरूपस्य विघातः प्रकृतिविघात इत्यर्थः। उपकरणवतेति सन्दंशाद्युपकरणयुक्तेन। तत् स्यादिति विघातः स्यादिति योजना। निदानोक्तानां भावानामनुपसेवनमिति विवरणानुवादः। अस्य विवरणं— यदुक्तमित्यादि। तथाप्रायाणामिति श्लेष्मजपुरीषजक्रिमिनिदानसदृशानामित्यर्थः। लक्षणत इति सङ्क्षेपतः; सङ्क्षेपो हि विस्तरस्य ग्राहकं लक्षणं भवति॥ १४-१५॥

अथैनं क्रिमिकोष्ठमातुरमग्रे षड्रात्रं सप्तरात्रं वा स्नेहस्वेदाभ्यामुपपाद्य श्वोभूते एनं संशोधनं पाययिताऽस्मीति क्षीरगुडदधितिलमत्स्यानूपमांसपिष्टान्नपरमान्नकुसुम्भस्नेहसम्प्रयुक्तैर्भोज्यैः सायं प्रातश्चोपपादयेत् समुदीरणार्थं क्रिमीणां कोष्ठाभिसरणार्थं च भिषक्। अथ व्युष्टायां रात्र्यां सुखोषितं सुप्रजीर्णभक्तं च विज्ञायास्थापनवमनविरेचनैस्तदहरेवोपपादयेदुपपादनीयश्चेत् स्यात् सर्वान् परीक्ष्यविशेषान् परीक्ष्य सम्यक्॥ १६॥

कोष्ठाभिसरणार्थमिति क्षीरगुडादिलोभेन देशान्तरं परित्यज्य कोष्ठगमनार्थम्। तदहरेवेति एकस्मिन् दिने; एतच्चैकदिन एव भूरिकर्मकरणं व्याधिप्रभावाद्बोद्धव्यम्। एतच्चैकाहेन सर्वकरणं यदि शरीरबलादिसम्पद्युक्तः पुरुषो भवति तदैव परं कर्तव्यं, नान्यथेत्याह— उपपादनीयश्चेत् स्यादित्यादिना॥ १६॥

अथाहरेति ब्रूयात्— मूलकसर्षपलशुनकरञ्जशिग्रुमधुशिग्रुखरपुष्पाभूस्तृणसुमुखसुरसकुठेरकगण्डीर-कालमालकपर्णासक्षवकफणिज्झकानि सर्वाण्यथवा यथालाभं; तान्याहृतान्यभिसमीक्ष्य खण्डशश्छेदयित्वा प्रक्षाल्य पानीयेन सुप्रक्षालितायां स्थाल्यां समावाप्य गोमूत्रेणार्धोदकेनाभिषिच्य साधयेत् सततमवघट्टयन् दर्व्या, तमुपयुक्तभूयिष्ठेऽम्भसि गतरसेष्वौषधेषु स्थालीमवतार्य सुपरिपूतं कषायं सुखोष्णं मदनफलपिप्पलीविडङ्गकल्कतैलोपहितं स्वर्जिकालवणितमभ्यासिच्य बस्तौ विधिवदास्थापयेदेनं; तथाऽर्कालर्ककुटजाढकीकुष्ठकैडर्यकषायेण वा, तथा शिग्रुपीलुकुस्तुम्बुरुकटुकासर्षपकषायेण, तथाऽऽमलकशृङ्गवेरदारुहरिद्रापिचुमर्दकषायेण मदनफलादिसंयोगसम्पादितेन, त्रिवारं सप्तरात्रं वाऽऽस्थापयेत्॥१७॥

मधुशिग्रुः शोभाञ्जनः। अत्र क्वाथ्यद्रव्यजलादिमानं क्वाथपरिभाषया कर्तव्यम्। उपयुक्तभूयिष्ठे प्रक्षीणभूयिष्ठ इत्यर्थः। गतरसेष्वौषधेष्विति जले सङ्क्रान्तरसेषु। अनेन कषायसिद्धिलक्षणेन यावता जलेन पाकेन चौषधानि गतरसानि भवन्ति, तावदेव जलं देयं, तावांश्च पाकः कर्तव्यः, नावश्यं परिभाषया सर्वत्रेति क्रमं दर्शयति। सुपरिपूतमिति वस्त्रगालितम्। बस्तौ कषायादिमानं सिद्धौ वक्ष्यमाणेन ज्ञेयम्। अलर्कः मन्दारः॥१७॥

प्रत्यागते च पश्चिमे बस्तौ प्रत्याश्वस्तं तदहरेवोभयतोभागहरं संशोधनं पाययेद्युक्त्या; तस्य विधिरुपदेक्ष्यते— मदनफलपिप्पलीकषायस्यार्धाञ्जलिमात्रेण त्रिवृत्कल्काक्षमात्रमालोड्य पातुमस्मै प्रयच्छेत्, तदस्य दोषमुभयतो निर्हरति साधु; एवमेव कल्पोक्तानि वमनविरेचनानि प्रतिसंसृज्य पाययेदेनं बुद्ध्या सर्वविशेषानवेक्षमाणो भिषक्॥१८॥

अथैनं सम्यग्विरिक्तं विज्ञायापराह्णे शैखरिककषायेण सुखोष्णेन परिषेचयेत्। तेनैव च कषायेण बाह्याभ्यन्तरान् सर्वोदकार्थान् कारयेच्छश्वत्; तदभावे कटुतिक्तकषायाणामौषधानां क्वाथैर्मूत्रक्षारैर्वा

परिषेचयेत्। परिषिक्तं चैनं निवातमागारमनुप्रवेश्य पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरसिद्धेन यवाग्वादिना क्रमेणोपाचरेत्, विलेपीक्रमागतं चैनमनुवासयेद्विडङ्गतैलेनैकान्तरं द्विस्त्रिर्वा॥१९॥

पश्चिमे तृतीयपुटके। संसृज्येति मिश्रीकृत्य। शैखरिककषायेणेति विडङ्गकषायेण, विडङ्गकषायो हि वैद्यकव्यवहारात् शैखरिककषाय उच्यते। विलेप्याः क्रमागतमिति कृतयवाग्वादिक्रममित्यर्थः॥१८-१९॥

यदि पुनरस्यातिप्रवृद्धाञ्छीर्षादान् क्रिमीन् मन्येत शिरस्यैवाभिसर्पतः कदाचित्, ततः स्नेहस्वेदाभ्यामस्य शिर उपपाद्य विरेचयेदपामार्गतण्डुलादिना शिरोविरेचनेन॥२०॥

अपामार्गतण्डुलादिनेति अपामार्गतण्डुलीयोक्तेन॥२०॥

यस्त्वभ्यवहार्यविधिः प्रकृतिविघातायोक्तः क्रिमीणामथ तमनुव्याख्यास्यामः— मूलकपर्णीं समूलाग्रप्रतानामाहृत्य खण्डशश्छेदयित्वोलू(दू)खले क्षोदयित्वा पाणिभ्यां पीडयित्वा रसं गृह्णीयात्, तेन रसेन लोहितशालितण्डुलपिष्टं समालोड्य पूपलिकां कृत्वा विधूमेष्वङ्गारेषूपकुड्य विडङ्गतैललवणोपहितां क्रिमिकोष्ठाय भक्षयितुं प्रयच्छेत्, अनन्तरं चाम्लकाञ्जिकमुदश्विद्वा पिप्पल्यादिपञ्चवर्गसंसृष्टं सलवणमनुपाययेत्। अनेन कल्पेन मार्कवार्कसहचरनीप-निर्गुण्डीसुमुखसुरसकुठेरकगण्डीरकालमालकपर्णासक्षवकफणिज्झकबकुलकुटजसुवर्णक्षीरीस्वरसाना मन्यतमस्मिन् कारयेत् पूपलिकाः; तथा किणिहीकिराततिक्तकसुवहामलकहरीतकीबिभीतकस्वरसेषु कारयेत् पूपलिकाः; स्वरसांश्चैतेषामेकैकशो द्वन्द्वशः सर्वशो वा मधुविलुलितान् प्रातरनन्नाय पातुं प्रयच्छेत्॥२१॥

मूलकपर्णी शोभाञ्जनः। उपकुञ्च्येति पाचयित्वा, 'कुड दाहे', इति धातुः पठ्यते। पिप्पल्यादिपञ्चवर्गोऽत्रैव पेयादिक्रमोक्तपञ्चकोलम्। सहचरः झिण्टिका। मधुविलुलितानिति मधुनाऽऽलोडितान्॥२१॥

अथाश्वशकृदाहृत्य महति किलिञ्जके प्रस्तीर्यातपे शोषयित्वोदूखले क्षोदयित्वा दृषदि पुनः सूक्ष्मचूर्णानि कारयित्वा विडङ्गकषायेण त्रिफलाकषायेण वाऽष्टकृत्वो दशकृत्वो वाऽऽतपे सुपरिभावितानि भावयित्वा दृषदि पुनः सूक्ष्माणि चूर्णानि कारयित्वा नवे कलशे समावाप्यानुगुप्तं निधापयेत्। तेषां तु खलु चूर्णानां पाणितलं यावद्वा साधु मन्येत तत् क्षौद्रेण संसृज्य क्रिमिकोष्ठिने लेढुं प्रयच्छेत्॥२२॥

सुपरीत्यादि यथा सुपरिभावितानि भवन्ति तथा भावयित्वेत्यर्थः। अनुगुप्तमिति वाताद्यननुगमनीयं कृतरक्षं च यथा भवति॥२२॥

तथा भल्लातकास्थीन्याहृत्य कलशप्रमाणेन चापोथ्य स्नेहभाविते दृढे कलशे सूक्ष्मानेकच्छिद्रब्रध्ने शरीरमुपवेष्ट्य मृदावलिप्ते समावाप्योडुपेन पिधाय भूमावाकण्ठं निखातस्य स्नेहभावितस्यैवान्यस्य दृढस्य कुम्भस्योपरि समारोप्य समन्ताद्गोमयैरुपचित्य दाहयेत्, स यदा जानीयात् साधु दग्धानि गोमयानि विगतस्नेहानि च भल्लातकास्थीनीति ततस्तं कुम्भमुद्धरेत्। अथ तस्माद्द्वितीयात् कुम्भात् स्नेहमादाय विडङ्गतण्डुलचूर्णैः स्नेहार्धमात्रैः प्रतिसंसृज्यातपे सर्वमहः स्थापयित्वा ततोऽस्मै मात्रां प्रयच्छेत् पानाय; तेन साधु विरिच्यते, विरिक्तस्य चानुपूर्वी यथोक्ता। एवमेव भद्रदारुसरलकाष्ठस्नेहानुपकल्प्य पातुं प्रयच्छेत्॥२३॥

अनुवासयेच्चैनमनुवासनकाले॥२४॥

ब्रध्नः गुदः, इह तु कलशाधोभागः। शरीरमुपवेष्ट्येति वेष्टयित्वा। उडुपः पिधानम्। स इति भल्लातकस्नेहसाधकः। द्वितीयादिति अधःस्थाद्धटात्॥२३-२४॥

अथाहरेति ब्रूयात्— शारदान्नवांस्तिलान् सम्पदुपेतान्; तानाहृत्य सुनिष्पूतान्निष्पूय, सुशुद्धान् शोधयित्वा, विडङ्गकषाये सुखोष्णे प्रक्षिप्य निर्वापयेदादोषगमनात्, गतदोषानभिसमीक्ष्य, सुप्रलूनान् प्रलुञ्च्य, पुनरेव सुनिष्पूतान् निष्पूय, सुशुद्धान् शोधयित्वा, विडङ्गकषायेण त्रिःसप्तकृत्वः सुपरिभावितान् भावयित्वा, आतपे शोषयित्वा, उलू(दू)खले सङ्क्षुद्य, दृषदि पुनः श्लक्ष्णपिष्टान् कारयित्वा, द्रोण्यामभ्यवधाय, विडङ्गकषायेण मुहुर्मुहुरवसिञ्चन् पाणिमर्दमेव मर्दयेत्; तस्मिंस्तु खलु प्रपीड्यमाने यत्तैलमुदियात्तत् पाणिभ्यां पर्यादाय, शुचौ दृढे कलशे न्यस्यानुगुप्तं निधापयेत्॥२५॥

निष्पूयेति मृत्तिकाद्यवकरान्निश्चित्य। शोधयित्वेति प्रक्षाल्य। आदोषगमनादित्यत्र तिलदोषगमनं तिलत्वग्लग्नमलादिगमनं ज्ञेयम्। प्रलुञ्च्य निस्तुषीकृत्य। अभ्यवधायेति आरोप्य। पाणिभ्यां पर्यादायेति पाणिलग्नं पुनः पुनः पुनर्गृहीत्वा॥२५॥

अथाहरेति ब्रूयात्— तिल्वकोद्दालकयोर्द्वौ बिल्वमात्रौ पिण्डौ श्लक्ष्णपिष्टौ विडङ्गकषायेण, तदर्धमात्रौ श्यामात्रिवृतयोः, अतोऽर्धमात्रौ दन्तीद्रवन्त्योः, अतोऽर्धमात्रौ च चव्यचित्रकयोरिति। एतं सम्भारं विडङ्गकषायस्यार्धाढकमात्रेण प्रतिसंसृज्य, तत्तैलप्रस्थं समावाप्य, सर्वमालोड्य, महति पर्योगे समासिच्याग्नावधिश्रित्यासने सुखोपविष्टः सर्वतः स्नेहमवलोकयन्नजस्रं मृद्वग्निना साधयेद्दर्व्या सततमवघट्टयन्। स यदा जानीयाद्विरमति शब्दः, प्रशाम्यति च फेनः, प्रसादमापद्यते स्नेहः, यथास्वं च गन्धवर्णरसोत्पत्तिः, संवर्तते च भैषज्यमङ्गुलिभ्यां मृद्यमानमनतिमृद्वनतिदारुणमनङ्गुलिग्राहि चेति, स कालस्तस्यावतारणाय। ततस्तमवतार्य शीतीभूतमहतेन वाससा परिपूय, शुचौ दृढे कलशे समासिच्य, पिधानेन पिधाय, शुक्लेन वस्त्रपट्टेनावच्छाद्य, सूत्रेण सुबद्धं सुनिगुप्तं निधापयेत्। ततोऽस्मै

मात्रां प्रयच्छेत् पानाय, तेन साधु विरिच्यते; सम्यगपहृतदोषस्य चानुपूर्वी यथोक्ता। ततश्चैनमनुवासयेदनुवासनकाले। एतेनैव च पाकविधिना सर्षपातसीकरञ्जकोषातकीस्नेहानुपकल्प्य पाययेत् सर्वविशेषानवेक्षमाणः। तेनागदो भवति॥२६॥

एवं द्वयानां श्लेष्मपुरीषसम्भवानां क्रिमीणां समुत्थानसंस्थानवर्णनामप्रभावचिकित्सितविशेषा व्याख्याताः सामान्यतः। विशेषतस्तु स्वल्पमात्रमास्थापनानुवासनानुलोमहरणभूयिष्ठं तेष्वेवौषधेषु पुरीषजानां क्रिमीणां चिकित्सितं कर्तव्यं, मात्राधिकं पुनः शिरोविरेचनवमनोपशमनभूयिष्ठं तेष्वेवौषधेषु श्लेष्मजानां क्रिमीणां चिकित्सितं कार्यम्; इत्येष क्रिमिघ्नो भेषजविधिरनुव्याख्यातो भवति। तमनुतिष्ठता यथास्वं हेतुवर्जने प्रयतितव्यम्। यथोद्देशमेवमिदं क्रिमिकोष्ठचिकित्सितं यथावदनुव्याख्यातं भवति॥२७॥

उद्दालकः बहुवारः। बिल्वमात्रौ पलप्रमाणौ। पर्योगः कटाहः। यथास्वमिति यावन्मात्रं यद्द्रव्यं तैलसंस्कारकं, तदानुरूप्येण वर्णादिसम्पत्तिरित्यर्थः। संवर्तते इति वर्तिवद्भवति। अल्पमात्रमिति आस्थापनानुलोमहरणद्रव्यातिरिक्तं भेषजमल्पमात्रं कर्तव्यमित्यर्थः॥२६-२७॥

भवन्ति चात्र—

अपकर्षणमेवादौ क्रिमीणां भेषजं स्मृतम्।
ततो विघातः प्रकृतेर्निदानस्य च वर्जनम्॥२८॥
अयमेव विकाराणां सर्वेषामपि निग्रहे।
विधिर्दृष्टस्त्रिधा योऽयं क्रिमीनुद्दिश्य कीर्तितः॥२९॥
संशोधनं संशमनं निदानस्य च वर्जनम्॥
एतावद्भिषजा कार्यं रोगे रोगे यथाविधि॥३०॥

तत्र श्लोकौ—

व्याधितौ पुरुषौ ज्ञाज्ञौ भिषजौ सप्रयोजनौ।

विंशतिः क्रिमयस्तेषां हेत्वादिः सप्तको गणः॥३१॥

उक्तो व्याधितरूपीये विमाने परमर्षिणा॥

शिष्यसम्बोधनार्थाय व्याधिप्रशमनाय च॥३२॥

एतदेवापकर्षणादित्रयं रोगान्तरे शब्दान्तरेणोच्यत इत्याह— अयमेवेत्यादि। अत्र संशोधनमपहरणं, संशमनं विघातः, निदानवर्जनं तु शब्देनापि समानम्॥२८-३२॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते विमानस्थाने व्याधितरूपीयविमानं नाम सप्तमोऽध्यायः॥७॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां विमानस्थाने व्याधितरूपीयं विमानं नाम सप्तमोऽध्यायः॥७॥

अष्टमोऽध्यायः।

अथातो रोगभिषग्जितीयं विमानं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

पूर्वाध्याये व्याधितरूपभ्रान्तिज्ञानमुक्तं, तच्च बुद्धिदोषाद्भवति, तेन विशुद्धबुद्ध्युत्पादहेतूनामध्ययनाध्यापनतद्विद्यसम्भाषाणां कथनाय रोगभिषग्जितीयोऽभिधीयते। रोगभिषग्जितं चिकित्सितमधिकृत्य कृतोऽध्यायो रोगभिषग्जितीयः। रोगचिकित्साकारित्वं चास्य चिकित्सोपयुक्तस्य सम्यग्ज्ञानसाधनस्याध्ययनविध्यादेस्तथा करणकारणादेश्चाभिधानाज्ज्ञेयम्॥१-२॥

बुद्धिमानात्मनः कार्यगुरुलाघवं कर्मफलमनुबन्धं देशकालौ च विदित्वा युक्तिदर्शनाद्भिषग्बुभूषुः शास्त्रमेवादितः परीक्षेत। विविधानि हि शास्त्राणि भिषजां प्रचरन्ति लोके; तत्र यन्मन्येत सुमहद्यशस्विधीरपुरुषासेवितमर्थबहुलमाप्तजनपूजितं त्रिविधशिष्यबुद्धिहितमपगतपुनरुक्तदोषमार्षं सुप्रणीतसूत्रभाष्यसङ्ग्रहक्रमं स्वाधारमनवपतितशब्दमकष्टशब्दं पुष्कलाभिधानं क्रमागतार्थमर्थतत्त्वविनिश्चयप्रधानं सङ्गतार्थमसङ्कुलप्रकरणमाशुप्रबोधकं लक्षणवच्चोदाहरणवच्च, तदभिप्रपद्येत शास्त्रम्। शास्त्रं ह्येवंविधममल इवादित्यस्तमो विधूय प्रकाशयति सर्वम्॥३॥

इहाध्ययनविध्यादिषु कर्तव्येषु यादृक् शास्त्रमध्येयं, तदेवायुर्वेदार्थिपुरुषमुपदर्श्य दर्शयन्नाह—बुद्धिमानित्यादि। कार्यं कर्तव्यं, तस्य गौरवं बहुप्रयाससाध्यत्वेन, लाघवं वा स्वल्पप्रयाससाध्यत्वेनेति कार्यगुरुलाघवम्। कर्मफलमिति कार्यफलम्, एतच्च तादात्विकं फलमीप्सितम्। अनुबन्धमिति कार्यस्यैवायतीयं फलम्। देशकालाविति कर्तव्यकार्यानुगुणौ देशकालावित्यर्थः। एतत् सर्वं विदित्वा,

युक्तिदर्शनादुपपत्तिदर्शनाद्यदि भिषग्भवितुमिच्छुः स्यात्, तदा शास्त्रं तावदादितः परीक्षेत। एवं मन्यते — य आयुर्वेदाध्ययनलक्षणे कार्ये स्वशक्त्यपेक्षया गौरवं मन्यते स न वर्तते, यश्चायुर्वेदफलेनारोग्यादिना अर्थी न भवति स च तथा, यश्चानुपादेयायुर्वेदज्ञाने देशे स्थितः स च तथा, यस्य च वपुषो वार्धक्यलक्षणः कालः स चायुर्वेदाध्ययनान्तगमनाशक्तत्वादेव यथोक्तानुपपत्तिदर्शनाद्भिषग्भवितुं नेच्छति, अतो न तान् प्रत्यायुर्वेदशास्त्रपरीक्षामप्युपदिशामः; यस्तु यथोक्तविपरीतधर्मयोगी स चायुर्वेदाध्ययनोपादानाद्भिषग्बुभूषुः शास्त्रं परीक्षेत। विविधानीति अगणितानि। सुमहद्यशस्वि च धीरपुरुषासेवितं च; किंवा सुमहद्यशस्विधीरपुरुषैरासेवितमिति विग्रहः। आप्तजनपूजितमिति बहुविधैराप्तैर्यथार्हमनुमतम्। उत्कृष्टमध्याल्पबुद्धयस्त्रिविधाः शिष्याः। अपगतपुनरुक्तमिति कर्तव्ये यद्दोषपाठं करोति, तेनाधिकरणवशप्राप्तं यत् करोति तत् पुनरुक्तमदोषं भवति। वचनं हि— "अधिकरणवशाद्दुर्गाद्गुणदोषप्राप्तितोऽर्थसम्बन्धात्। स्तुत्यर्थं संशयतः शिष्यधियां चाभिवृद्ध्यर्थम्॥ अल्पतोऽन्तरितत्वाद्विशेषणेष्वपि च तन्त्रकृद्भिस्तु। यत्तन्त्रे स्यात् पुनरुक्तं नेष्यते तद्विभाव्य विवरणम्" इति। स्वाधारमिति शोभनाभिधेयम्। अनवपतितमिति अग्राम्यशब्दम्। अकष्टशब्दमिति अकृच्छ्रोच्चार्यशब्दं, किंवा प्रसिद्धाभिधेयशब्दम्। पुष्कलाभिधानमिति सम्यगर्थसमर्पकवाक्यम्। क्रमागतार्थमिति परिपाट्यागतार्थम्। सङ्गतार्थमिति प्रतिपादितार्थम्। असङ्कुलप्रकरणमिति अमिश्रीभूतप्रकरणम्। लक्षणवदिति आयुर्वेदप्रधानार्थहेतुलिङ्गौषधाख्यासाधारणधर्मकथनवत्; किंवा प्रशस्तशास्त्रलक्षणवत्। उदाहरणवदिति दृष्टान्तवत्॥३॥

ततोऽनन्तरमाचार्यं परीक्षेत; तद्यथा— पर्यवदातश्रुतं परिदृष्टकर्माणं दक्षं दक्षिणं शुचिं जितहस्तमुपकरणवन्तं सर्वेन्द्रियोपपन्नं प्रकृतिज्ञं प्रतिपत्तिज्ञमनुपस्कृतविद्यमनहङ्कृतमनसूयकमकोपनं क्लेशक्षमं शिष्यवत्सलमध्यापकं ज्ञापनसमर्थं चेति। एवंगुणो ह्याचार्यः सुक्षेत्रमार्तवो मेघ इव शस्यगुणैः सुशिष्यमाशु वैद्यगुणैः सम्पादयति॥४॥

अध्येतव्यं शास्त्रं परीक्ष्य यस्मात्तच्छास्त्रमध्येतव्यं तस्याचार्यस्य परीक्षामाह— तत इत्यादि। दक्षमिति अवामबुद्धिम्। उपकरणवन्तमिति अनेनानुपकरणे गुरौ चिकित्सावृत्त्यभावात् कर्मदर्शनं न भवति। अनुपस्कृतविद्यमिति शास्त्रान्तरज्ञानेन नास्त्येवोपस्कृता विद्या यस्य स तथा; य आयुर्वेदज्ञः सञ् शास्त्रान्तरेणापि संस्कृतो भवति, स तु नितरामुपादेयः। आर्तव इति यथोचितकालभवः॥४॥

तमुपसृत्यारिराधयिषुरुपचरेदग्निवच्च देववच्च राजवच्च पितृवच्च भर्तृवच्चाप्रमत्तः। ततस्तत्प्रसादात् कृत्स्नं शास्त्रमधिगम्य शास्त्रस्य दृढतायामभिधानस्य सौष्ठवेऽर्थस्य विज्ञाने वचनशक्तौ च भूयो भूयः प्रयतेत सम्यक्॥५॥

अग्न्यादिबहुदृष्टान्तदर्शनेन येन येन भावेनाग्न्यादयः सेव्यन्ते, तथा तथा गुरुः सेव्यत इति दर्शयति। दृढतायामिति शास्त्रग्रहणस्य स्थैर्ये। अभिधानस्येति शास्त्राभिधानस्य। वचनशक्तौ अर्थकीर्तनसामर्थ्ये॥५॥

तत्रोपायाननुव्याख्यास्यामः— अध्ययनम्, अध्यापनं, तद्विद्यसम्भाषा चेत्युपायाः॥६॥

तत्रायमध्ययनविधिः— कल्यः कृतक्षणः प्रातरुत्थायोपव्यूषं वा कृत्वाऽऽवश्यकमुपस्पृश्योदकं देवर्षिगोब्राह्मणगुरुवृद्धसिद्धाचार्येभ्यो नमस्कृत्य समे शुचौ देशे सुखोपविष्टो मनःपुरःसराभिर्वाग्भिःसूत्रमनुक्रामन् पुनः पुनरावर्तयेद् बुद्ध्वा सम्यगनुप्रविश्यार्थतत्त्वं स्वदोषपरिहारार्थं परदोषप्रमाणार्थं च; एवं मध्यन्दिनेऽपराह्णे रात्रौ च शश्वदपरिहापयन्नध्ययनमभ्यस्येत्। इत्यध्ययनविधिः॥७॥

तत्रेति शास्त्रदृढतादौ। तद्विद्यसम्भाषा तच्छास्त्राध्यायिना सह सम्भाषणम्। कल्यः नीरोगः। कृतक्षण इति अनन्यव्यापारत्वेनाध्ययनाय कृतकालपरिग्रहः। प्रातर्वा उत्थाय, उपव्यूषं वा उत्थायेति योजना। उपव्यूषमिति किञ्चिच्छेषायां रात्रौ। मनपुरःसराभिरिति एकाग्रमनःप्रणीताभिः। स्वदोषपरिहारपरदोषप्रमाणार्थमिति स्वकीयाध्ययनदोषपरिहारार्थं, परकीयाध्ययनदोषप्रमाणार्थं परकीयाध्ययनदोषज्ञानार्थमित्यर्थः। प्रमीयतेऽनेनेति प्रमाणं ज्ञानमात्रमीप्सितम्। सम्यग् बुद्ध्वाऽर्थतत्त्वं, बुद्ध्वा चाधीयानो निर्दोषाध्ययनो भवति, सम्यगध्ययनज्ञानाच्च परस्य सदोषमध्ययनं प्रतिपद्यते। इत्यध्ययनविधिरिति पूर्वप्रतिज्ञाताध्ययनविधेरुपसंहरणम्। यथोक्तेन विधिनाऽध्ययनं क्रियमाणं सुसङ्गृहीतं भवति। दृष्टादृष्टसम्पत्त्याऽध्ययनकालवर्जनं वेदाध्ययने निषिद्धमेवात्रापि तज्ज्ञेयमिति न विशेषेणोक्तम्॥६-७॥

अथाध्यापनविधिः— अध्यापने कृतबुद्धिराचार्यः शिष्यमेवादितः परीक्षेत; तद्यथा— प्रशान्तमार्यप्रकृतिकमक्षुद्रकर्माणमृजुचक्षुर्मुखनासावंशं तनुरक्तविशदजिह्वमविकृतदन्तौष्ठममिन्मिनं धृतिमन्तमनहङ्कृतं मेधाविनं वितर्कस्मृतिसम्पन्नमुदारसत्त्वं तद्विद्यकुलजमथवा तद्विद्यवृत्तं तत्त्वाभिनिवेशिनमव्यङ्गमव्यापन्नेन्द्रियं निभृतमनुद्धतमर्थतत्त्वभावकमकोपनमव्यसनिनं शीलशौचाचारानुरागदाक्ष्यप्रादक्षिण्योपपन्नमध्ययनाभिकाममर्थविज्ञाने कर्मदर्शने चानन्यकार्यमलुब्धमनलसं सर्वभूतहितैषिणमाचार्यसर्वानुशिष्टिप्रतिकरमनुरक्तं च, एवंगुणसमुदितमध्याप्यमाहुः॥८॥

इह शिष्यगुणेषु ऋजुचक्षुर्मुखनासावंशत्वादयो गुणाः सहजलक्षणत्वेनोपादेयाः; अतो विपरीतलक्षणो हि जडो भवति। तद्विद्यवृत्तमिति आयुर्वेदज्ञाचारम्। निभृतमिति विनीतम्। अनुद्धतमिति अनहङ्कृतम्। अनुरागशब्देनाध्यायनानुराग उच्यते, अनुरक्तमित्यनेन च गुरावनुरक्तत्वमुच्यते। दाक्ष्यं

दर्शयित्वाऽप्यनलसमिति यत् करोति तेन दाक्ष्यादारब्धेऽपि कार्ये बहुप्रयाससाध्येऽनलसमित्याह। अनुशिष्टिप्रतिकरमिति आज्ञाकरम्॥८॥

एवंविधमध्ययनार्थिनमुपस्थितमारिराधयिषुमाचार्योऽनुभाषेत— उदगयने शुक्लपक्षे प्रशस्तेऽहनि तिष्यहस्तश्रवणाश्वयुजामन्यतमेन नक्षत्रेण योगमुपगते भगवति शशिनि कल्याणे कल्याणे च करणे मैत्रे मुहूर्ते मुण्डः कृतोपवासः स्नातः काषायवस्त्रसंवीतः सगन्धहस्तः समिधोऽग्निमाज्यमुपलेपनमुदकुम्भान् माल्यदामदीपहिरण्यहेमरजतमणिमुक्ताविद्रुमक्षौमपरिधीन् कुशलाजसर्षपाक्षतांश्च शुक्लानि सुमनांसि ग्रथिताग्रथितानि मेध्यान् भक्ष्यान् गन्धांश्च घृष्टानादायोपतिष्ठस्वेति॥९॥

स तथा कुर्यात्॥१०॥

तिष्यः पुष्यनक्षत्रम्, अश्वयुग् अश्विनी। शशिनि कल्याणे इति उक्तनक्षत्रेष्वध्ययनार्थिनो यतः शशी कल्याणकरो भवति, उदित एव शशिन्यध्ययनं कर्तव्यम्। मैत्रे मुहूर्ते इति अनुकूले मुहूर्ते; मुहूर्ताश्च शिवभुजगादयः। मुण्डः कृतवापनः। गन्धेन युक्तो हस्तः पञ्चाङ्गुलो गन्धहस्तः। हिरण्यशब्देनाघटितं हेम गृह्यते, हेमशब्देन च घटितम्। परिधयो हस्तप्रमाणा होमकुण्डचतुःपार्श्वे स्थाप्याः पालाशादिदण्डा उच्यन्ते। अत्र चोपर्जितवस्तुसान्निध्यमेव फलप्रदमिति ऋषिवचनादुन्नीयते, (तेन अन्योपाहृतमपीष्टगन्धादि नोद्भावनीयम्)॥९-१०॥

तमुपस्थितमाज्ञाय समे शुचौ देशे प्राक्प्रवणे उदक्प्रवणे वा चतुष्किष्कुमात्रं चतुरस्रं स्थण्डिलं गोमयोदकेनोपलिप्तं कुशास्तीर्णं सुपरिहितं परिधिभिश्चतुर्दिशं यथोक्तचन्दनोदकुम्भक्षौमहेम-हिरण्यरजतमणिमुक्ताविद्रुमालङ्कृतं मेध्यभक्ष्यगन्धशुक्लपुष्पलाजसर्षपाक्षतोपशोभितं कृत्वा, तत्र

पालाशीभिरैङ्गुदीभिरौदुम्बरीभिर्माधुकीभिर्वा समिद्भिरग्निमुपसमाधाय प्राङ्मुखः शुचिरध्ययन-विधिमनुविधाय मधुसर्पिर्भ्यां त्रिस्त्रिर्जुहुयादग्निमाशीःसम्प्रयुक्तैर्मन्त्रैर्ब्रह्माणमग्निं धन्वन्तरिं प्रजापतिमश्विनाविन्द्रमृषींश्च सूत्रकारानभिमन्त्रयमाणः पूर्वं स्वाहेति॥११॥

शिष्यश्चैनमन्वालभेत। हुत्वा च प्रदक्षिणमग्निमनुपरिक्रामेत्। परिक्रम्य ब्राह्मणान् स्वस्ति वाचयेत्; भिषजश्चाभिपूजयेत्॥१२॥

किष्कुरिह हस्तप्रमाणम्। सुपरिहितमिति सुवेष्टितम्। उपधायेति आरोप्य। जुहुयादिति अध्यापक इत्यभिप्रायः। ब्रह्मादीन् स्वाहेति मन्त्रेण मन्त्रयमाण आचार्यः पूर्वमग्निं जुहुयादिति योजना। तेन ब्रह्माद्यृग्भिराशीःप्रयुक्ताभिः 'ब्रह्मणे स्वाहा' इत्यादिभिर्होमः कर्तव्यः। शिष्यश्चैनमन्वालमेतेति शिष्योऽपि गुरुहोमानन्तरमेव जुहुयादित्यर्थः॥११-१२॥

अथैनमग्निसकाशे ब्राह्मणसकाशे भिषक्सकाशे चानुशिष्यात्— ब्रह्मचारिणा श्मश्रुधारिणा सत्यवादिनाऽमांसादेन मेध्यसेविना निर्मत्सरेणाशस्त्रधारिणा च भवितव्यं, न च ते मद्वचनात् किञ्चिदकार्यं स्यादन्यत्र राजद्विष्टात् प्राणहराद्विपुलादधर्म्यादनर्थसम्प्रयुक्ताद्वाऽप्यर्थात्; मदर्पणेन मत्प्रधानेन मदधीनेन मत्प्रियहितानुवर्तिना च शश्वद्भवितव्यं, पुत्रवद्दासवदर्थिवच्चोपचरता-ऽनुवस्तव्योऽहम्, अनुत्सेकेनावहितेनानन्यमनसा विनीतेनावेक्ष्यावेक्ष्यकारिणाऽनसूयकेन चाभ्यनुज्ञातेन प्रविचरितव्यम्, अनुज्ञातेन (चाननुज्ञातेन च) प्रविचरता पूर्वं गुर्वर्थोपाहरणे यथाशक्ति प्रयतितव्यं, कर्मसिद्धिमर्थसिद्धिं यशोलाभं प्रेत्य च स्वर्गमिच्छता भिषजा त्वया गोब्राह्मणमादौ कृत्वा सर्वप्राणभृतां शर्माशासितव्यमहरहरुत्तिष्ठता चोपविशता च, सर्वात्मना चातुराणामारोग्याय प्रयतितव्यं, जीवितहेतोरपि चातुरेभ्यो नाभिद्रोग्धव्यं, मनसाऽपि च परस्त्रियो नाभिगमनीयास्तथा सर्वमेव परस्वं, निभृतवेशपरिच्छदेन भवितव्यम्, अशौण्डेनापापेनापापसहायेन च,

श्लक्ष्णशुक्लधर्म्यशर्म्यधन्यसत्यहितमितवचसा देशकालविचारिणा स्मृतिमता ज्ञानोत्थानोपकरणसम्पत्सु नित्यं यत्नवता च; न च कदाचिद्राजद्विष्टानां राजद्वेषिणां वा महाजनद्विष्टानां महाजनद्वेषिणां वाऽप्यौषधमनुविधातव्यं, तथा सर्वेषामत्यर्थविकृतदुष्टदुःखशीलाचारोपचाराणामनपवादप्रतिकारणां मुमूर्षूणां च, तथैवासन्निहितेश्वराणां स्त्रीणामनध्यक्षाणां वा; न च कदाचित् स्त्रीदत्तमामिषमादातव्यमननुज्ञातं भर्त्राऽथवाऽध्यक्षेण, आतुरकुलं चानुप्रविशता विदितेनानुमतप्रवेशिना सार्धं पुरुषेण सुसंवीतेनावाक्शिरसा स्मृतिमता स्तिमितेनावेक्ष्यावेक्ष्य मनसा सर्वमाचरता सम्यगनुप्रवेष्टव्यम्, अनुप्रविश्य च वाङ्मनोबुद्धीन्द्रियाणि न क्वचित् प्रणिधातव्यान्यन्यत्रातुरादातुरोप-कारार्थादातुरगतेष्वन्येषु वा भावेषु, न चातुरकुलप्रवृत्तयो बहिर्निश्चारयितव्याः, ह्रसितं चायुषः प्रमाणमातुरस्य जानताऽपि त्वया न वर्णयितव्यं तत्र यत्रोच्यमानमातुरस्यान्यस्य वाऽप्युपघाताय सम्पद्यते; ज्ञानवताऽपि च नात्यर्थमात्मनो ज्ञाने विकत्थितव्यम्, आप्तादपि हि विकत्थमानादत्यर्थमुद्विजन्त्यनेके॥१३॥

ते भवितव्यमिति त्वया भवितव्यम्। प्रविचरितव्यमिति चिकित्सार्थं व्यवहर्तव्यम्। गोब्राह्मणमादौ कृत्वेति प्रथमं गोब्राह्मणानां शर्म आशासितव्यं, ततश्चेतरेषां प्राणिनाम्। उपविशता चेति च्छेदः। शुण्डा मद्यशाला, तत्प्रचारी शौण्डः; अशौण्डस्तु तदप्रचारी। शुक्लमिव शुक्लं, निर्दोषत्वादेतद्वचनम्। यत्नवता भवितव्यमिति सम्बन्धः। राज्ञो द्विष्टो राजद्विष्टः, यस्तु राजानं द्वेष्टि स राजद्वेषी। आचारस्योपचरणमाचारोपचारः। अनध्यक्षाणां वा न प्रतिकर्तव्यमिति योजना। प्रवृत्तय इति वार्ताः। तत्रेति न वर्णयितव्यमित्यनेन सम्बध्यते। अन्यस्य आतुरपुत्रपित्रादेः; अन्यत्र उदासीने जीवितह्रासकथनं यशस्करमेव। न विकत्थितव्यं न श्लाघा कर्तव्या। आप्तादपि हीति अत्राप्तः सत्यवागुच्यते, अन्यत्रापि सत्यमेवाप्तं वक्ष्यति; यथाकालप्राप्तमेव ब्रूयादित्यर्थः॥१३॥

न चैव ह्यस्ति सुतरमायुर्वेदस्य पारं, तस्मादप्रमत्तः शश्वदभियोगमस्मिन् गच्छेत्, एतच्च कार्यम्, एवम्भूयश्च वृत्तसौष्ठवमनसूयता परेभ्योऽप्यागमयितव्यं, कृत्स्नो हि लोको बुद्धिमतामाचार्यः शत्रुश्चाबुद्धिमताम्, अतश्चाभिसमीक्ष्य बुद्धिमताऽमित्रस्यापि धन्यं यशस्यमायुष्यं पौष्टिकं लौक्यमभ्युपदिशतो वचः श्रोतव्यमनुविधातव्यं चेति। अतः परमिदं ब्रूयात्— देवताग्निद्विजगुरुवृद्धसिद्धाचार्येषु ते नित्यं सम्यग्वर्तितव्यं, तेषु ते सम्यग्वर्तमानस्यायमग्निः सर्वगन्धरसरत्नबीजानि यथेरिताश्च देवताः शिवाय स्युः, अतोऽन्यथा वर्तमानस्याशिवायेति। एवं ब्रुवति चाचार्ये शिष्यः 'तथा' इति ब्रूयात्। यथोपदेशं च कुर्वन्नध्याप्यः, अतोऽन्यथा त्वनध्याप्यः। अध्याप्यमध्यापयन् ह्याचार्यो यथोक्तैश्चाध्यापनफलैर्योगमाप्नोत्यन्यैश्चानुक्तैः श्रेयस्करैर्गुणैः शिष्यमात्मानं च युनक्ति। इत्यध्यापनविधिरुक्तः॥१४॥

न चैव हीत्यादि। यस्मादायुर्वेदोऽपि ज्ञातुं न शक्यते प्रायस्तेनायुर्वेदज्ञानार्थमुद्यमं गच्छेत्। अस्मिन्निति दुस्तरे आयुर्वेदे। अनुक्तसद्वृत्तकरणार्थमाह— एतच्चेत्यादि।— एतच्चेति 'अथैनमग्निसकाशे' इत्यादिग्रन्थोक्तमनुष्ठेयम्। एवम्भूयश्च वृत्तसौष्ठवमिति उक्तसदृशं च साधुवृत्तमित्यर्थः। लौक्यं लोकानुमतम्। इतिशब्दोऽवधारणे, तेन यदेवामित्रस्य धन्यादिगुणयुक्तं वचस्तदेवानुविधातव्यं श्रोतव्यं च। यथोक्तैरिति शास्त्रान्तरे; न ह्यस्मिन् शास्त्रेऽध्ययनफलं साक्षात् क्वचिदुक्तम्॥१४॥

सम्भाषाविधिमत ऊर्ध्वं व्याख्यास्यामः— भिषक् भिषजा सह सम्भाषेत। तद्विद्यसम्भाषा हि ज्ञानाभियोगसंहर्षकरी भवति, वैशारद्यमपि चाभिनिर्वर्तयति, वचनशक्तिमपि चाधत्ते, यशश्चाभिदीपयति, पूर्वश्रुते च सन्देहवतः पुनः श्रवणाच्छ्रुतसंशयमपकर्षति, श्रुते चासन्देहवतो भूयोऽध्यवसायमभिनिर्वर्तयति, अश्रुतमपि च कञ्चिदर्थं श्रोत्रविषयमापादयति, यच्चाचार्यः शिष्याय शुश्रूषवे प्रसन्नः क्रमेणोपदिशति गुह्याभिमतमर्थजातं तत् परस्परेण सह जल्पन् पिण्डेन विजिगीषुराह संहर्षात्, तस्मात्तद्विद्यसम्भाषामभिप्रशंसन्ति कुशलाः॥१५॥

द्विविधा तु खलु तद्विद्यसम्भाषा भवति— सन्धायसम्भाषा, विगृह्यसम्भाषा च॥ १६॥

संहर्षः स्पर्धा, ज्ञानार्थमभियोगसंहर्षौ करोतीति ज्ञानाभियोगसंहर्षकरी। वैशारद्यमिति परवचनाभिभवपाण्डित्यम्; एतच्च सभायामभ्यासाद्भवति। भूयोऽध्यवसायमिति दृढनिश्चयम्। अथ कथं श्रुतत्वमपि कस्यचिद्गुह्यस्यार्थस्य स्यात्तदाह— जल्पन् पिण्डेनेति।— पिण्डेनेति सारोद्धारेण। ननु गुह्यश्चेत् सारतस्तत् कथमयं विजिगीषुस्तमाहेत्याह— संहर्षादिति। स्पर्धया तु गुह्योऽप्यर्थो विजयार्थमभिधीयत इति भावः। सन्धायसम्भाषा नये 'संवाद' इत्युच्यते। विगृह्यसम्भाषा तु जल्पवितण्डारूपा ज्ञेया॥ १५-१६॥

तत्र ज्ञानविज्ञानवचनप्रतिवचनशक्तिसम्पन्नेनाकोपनेनानुपस्कृतविद्येनानसूयकेनानुनेयेनानुनयकोविदेन क्लेशक्षमेण प्रियसम्भाषणेन च सह सन्धायसम्भाषा विधीयते। तथाविधेन सह कथयन् विस्रब्धः कथयेत्, पृच्छेदपि च विस्रब्धः, पृच्छते चास्मै विस्रब्धाय विशदमर्थं ब्रूयात्, न च निग्रहभयादुद्विजेत, निगृह्य चैनं न हृष्येत्, न च परेषु विकत्थेत, न च मोहादेकान्तग्राही स्यात्, न चाविदित-मर्थमनुवर्णयेत्, सम्यक् चानुनयेनानुनयेत्, तत्र चावहितः स्यात्। इत्यनुलोमसम्भाषाविधिः॥ १७॥

तत्रेत्यादिना सन्धायसम्भाषाविधिमाह। विस्रब्धः कथयेदिति जल्पवितण्डोक्तनिग्रहाभीतः। कथयेदिति ब्रूयात्। निगृह्य चैनं न हृष्येदिति अनुलोमसम्भाषारूपवादे च यानि सम्भवन्ति निग्रहस्थानानि तत्त्वविघातीनि हेत्वाभासापसिद्धान्तन्यूनाधिकरूपाणि, तैरपि निगृह्य न हृष्येत्। जल्पोक्तनिग्रहस्थानानि त्वत्राग्राह्याण्येव। अविदितमिति प्रतिवादिनोऽविदितम्। अनुनयेच्च सम्यगनुनयेनेति सम्बन्धः; तेन चात्र छलजातिप्रयोगो न कर्तव्य इति शिक्षयति। तत्र चावहितः स्यादिति सम्यगनुनयेऽवधानं कुर्यात्॥ १७॥

अत ऊर्ध्वमितरेण सह विगृह्य सम्भाषायां जल्पेच्छ्रेयसा योगमात्मनः पश्यन्। प्रागेव च जल्पाज्जल्पान्तरं परावरान्तरं परिषद्विशेषांश्च सम्यक् परीक्षेत। सम्यक्परीक्षा हि बुद्धिमतां कार्यप्रवृत्तिनिवृत्तिकालौ शंसति, तस्मात् परीक्षामभिप्रशंसन्ति कुशलाः। परीक्षमाणस्तु खलु परावरान्तरमिमान् जल्पकगुणाञ् श्रेयस्करान्दोषवतश्च परीक्षेत सम्यक्; तद्यथा— श्रुतं विज्ञानं धारणं प्रतिभानं वचनशक्तिरिति, एतान् गुणान् श्रेयस्करानाहुः; इमान् पुनर्दोषवतः, तद्यथा— कोपनत्वमवैशारद्यं भीरुत्वमधारणत्वमनवहितत्वमिति। एतान् गुणान् गुरुलाघवतः परस्य चैवात्मनश्च तुलयेत्॥१८॥

इतरेणेति अविशिष्टेन। वादे तु विशिष्टो गुरुर्ब्रह्मचारी वाऽधिकृतः; उक्तं हि न्याये— "तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयात्" (न्या.द.४।२।४०) इति। सम्भाषायामिति प्रवृत्तकथोपलक्षणं, तेन जल्पे वितण्डायां चेति ज्ञेयम्। परावरान्तरमिति प्रतिवादिन आत्मनश्च प्रतिभादिविशेषमित्यर्थः। जल्पान्तरमिति सामयिकसर्वार्थादिविशेषितं जल्पकविशेषमित्यर्थः॥१८॥

तत्र त्रिविधः परः सम्पद्यते— प्रवरः, प्रत्यवरः, समो वा, गुणविनिक्षेपतः; नत्वेव कार्त्स्न्येन॥१९॥

परिषत्तु खलु द्विविधा— ज्ञानवती, मूढपरिषच्च। सैव द्विविधा सती त्रिविधा पुनरनेन कारणविभागेन— सुहृत्परिषत्, उदासीनपरिषत्, प्रतिनिविष्टपरिषच्चेति। तत्र प्रतिनिविष्टायां परिषदि ज्ञानविज्ञानवचनप्रतिवचनशक्तिसम्पन्नायां मूढायां वा न कथं चित् केनचित् सह जल्पो विधीयते; मूढायां तु सुहृत्परिषद्युदासीनायां वा ज्ञानविज्ञानवचनप्रतिवचनशक्तीरन्तरेणाप्यदीप्तयशसा महाजनविद्विष्टेनापि सह जल्पो विधीयते। तद्विधेन च सह कथयता आविद्धदीर्घसूत्र-सङ्कुलैर्वाक्यदण्डकैः कथयितव्यम्, अतिहृष्टं मुहुर्मुहुरुपहसता परं निरूपयता च पर्षदमाकारैर्ब्रुवतश्चास्य वाक्यावकाशो न देयः; कष्टशब्दं च ब्रुवता वक्तव्यो नोच्यते, अथवा पुनर्हीना

ते प्रतिज्ञा, इति। पुनश्चाह्व(ह्व)यमानः प्रतिवक्तव्यः— परिसंवत्सरो भवान् शिक्षस्व तावत्; न त्वया गुरुरुपासितो नूनम्, अथवा पर्याप्तमेतावत्ते; सकृदपि हि परिक्षेपिकं निहतं निहतमाहुरिति नास्य योगः कर्तव्यः कथञ्चित्। अप्येवं श्रेयसा सह विगृह्य वक्तव्यमित्याहुरेके; नत्वेवं ज्यायसा सह विग्रहं प्रशंसन्ति कुशलाः॥२०॥

गुणविनिक्षेपत इति गुणपरिमाणादुत्कृष्टगुणत्वेन प्रवर इत्यर्थः; प्रत्यवरः हीनगुणः, समगुणः समो वाद्यपेक्षयेत्यर्थः। नत्वेव कार्त्स्न्येनेति न कुलशीलधर्मादिनाऽपि प्रवरादिरिहाभिप्रेत इत्यर्थः। मूढपरिषदित्यत्र मूढेव मूढा किञ्चित्कृत्ये, सर्वथा मूढायां तु न कश्चिद्ब्रूते। न केनचिदिति नाधमेनापीत्यर्थः। आविद्धं वक्रम्। कथयितव्यमिति वक्तव्यम्। उपहसता परं प्रतिवादिनम्। तथा परिषदं निरूपयता आकारैरिति सम्बन्धः। कष्टशब्दमिति नातिप्रसिद्धार्थम्। नोच्यत इति त्वया नोच्यत इति वक्तव्यं; कष्टशब्दस्य ह्यर्थं मूढा परिषन्न जानात्येव, ततश्च कष्टशब्दस्यानर्थकतायाः परिषदं प्राप्य सुखसाध्यत्वमिति भावः। तथा कष्टशब्दं वदंस्त्वेवं वाच्यं— हीना ते प्रतिज्ञेति। परिसंवत्सरोऽध्ययनं गुरुमुपास्थाय पुनरधीष्व। पर्याप्तमेतावत्त इति 'पक्षावसादाय' इति शेषः। परिक्षेपिकमिति प्रतिक्षेपिकशब्दम्। नास्य योगः कर्तव्य इति न सकृत्पराभूतस्य पक्षस्य पुनः प्रतिक्षेपकहेतुना योगः कर्तव्य इत्यर्थः। कथञ्चिदित्यादिना श्रेयसा समं विगृह्यसम्भाषायामेकीयमतमाह; नत्वेवेत्यादिना आत्ममतमाह॥१९-२०॥

प्रत्यवरेण तु सह समानाभिमतेन वा विगृह्य जल्पता सुहृत्परिषदि कथयितव्यम्, अथवाऽप्युदासीनपरिषद्यवधानश्रवणज्ञानविज्ञानोपधारणवचनप्रतिवचनशक्तिसम्पन्नायां कथयता चावहितेन परस्य साद्गुण्यदोषबलमवेक्षितव्यं, समवेक्ष्य च यत्रैनं श्रेष्ठं मन्येत नास्य तत्र जल्पं योजयेदनाविष्कृतमयोगं कुर्वन्; यत्र त्वेनमवरं मन्येत तत्रैवैनमाशु निगृह्णीयात्। तत्र खल्विमे प्रत्यवराणामाशु निग्रहे भवन्त्युपायाः; तद्यथा— श्रुतहीनं महता सूत्रपाठेनाभिभवेत्, विज्ञानहीनं पुनः कष्टशब्देन वाक्येन, वाक्यधारणाहीनमाविद्धदीर्घसूत्रसङ्कुलैर्वाक्यदण्डकैः, प्रतिभाहीनं पुनर्वचनेनैकविधेनानेकार्थवाचिना,

वचनशक्तिहीनमर्धोक्तस्य वाक्यस्याक्षेपेण, अविशारदमपत्रपणेन, कोपनमायासनेन, भीरुं वित्रासनेन, अनवहितं नियमनेनेति। एवमेतैरुपायैः परमवरमभिभवेच्छीघ्रम्॥२१॥

तत्र श्लोकौ—

विगृह्य कथयेद्युक्त्या युक्तं च न निवारयेत्।
विगृह्यभाषा तीव्रं हि केषाञ्चिद्द्रोहमावहेत्॥२२॥
नाकार्यमस्ति क्रुद्धस्य नावाच्यमपि विद्यते।
कुशला नाभिनन्दन्ति कलहं समितौ सताम्॥२३॥

एवं प्रवृत्ते वादे कुर्यात्॥२४॥

साद्गुण्यस्य विद्यमानगुणतायास्तथा दोषस्य बलं साद्गुण्यदोषबलम्। श्रेष्ठं मन्येतेति यत्र वादविषये प्रतिवादिनमधिकं पश्येदित्यर्थः। तत्र परस्य पुरःसरवादविषये तथा वादो निवर्तनीयः, यथा आविष्कृतः प्रकटीकृतः सभायां नायोगः स्यात्; अनभीष्टविषये तथा वादनिवृत्तिः कर्तव्या यथा कोऽपि न जानात्येवं तत्र वक्तुमक्षम इत्यर्थः। तत्रैवेति तत्रैव हीनपक्षे प्रवृत्तं निगृह्णीयादिति योजना। महता सूत्रपाठेनेति श्रुतहीनो ह्यपरिचयाद्दीर्घसूत्रपाठं कर्तुमक्षमः। विज्ञानहीनमिति अज्ञातार्थम्। नानार्थवाचिनेति अनेकार्थवाचिना, एकविधेनेति एकविधेन शब्देन; प्रतिभाहीनो ह्यनेकार्थं नावधारयति यत् केनाभिप्रायेणायं प्रयुक्तोऽनेन शब्द इति। वचनशक्तिहीनोऽर्धोक्तवाक्याक्षेपान्न पुनर्वक्तुं क्षमो भवतीति दृष्टम्। अविशारदमिति अदृष्टसभम्; अदृष्टसभो ह्यपत्रपणेनातीव लज्जितः सन्न किञ्चित् प्रतिपद्यते। एवमिति 'तद्यथा श्रुतहीनम्' इत्यादिग्रन्थोक्तम्। प्रवृत्ते वादे कुर्यादिति च्छेदः॥२१-२४॥

प्रागेव तावदिदं कर्तुं यतेत— सन्धाय पर्षदाऽयनभूतमात्मनः प्रकरणमादेशयितव्यं, यद्वा परस्य भृशदुर्गं स्यात्, पक्षमथवा परस्य भृशं विमुखमानयेत्; परिषदि चोपसंहितायामशक्यमस्माभिर्वक्तुम्, एषैव ते परिषद्यथेष्टं यथायोगं यथाभिप्रायं वादं वादमर्यादां च स्थापयिष्यतीत्युक्त्वा तूष्णीमासीत॥ २५॥

तथाऽप्रवृत्ते वादे किं कुर्यादित्याह— प्रागेवेत्यादि। अयनभूतमिति अभ्यासान्मार्गीभूतमिव अभ्यस्तमित्यर्थः। परस्य भृशदुर्गमिति प्रतिवादिनोऽविदितत्वेन दुर्गमिव दुर्गं; तत् पूर्वं सन्धितया परिषदाऽऽदेशयेत्। पक्षान्तरमाह— पक्षमथवेत्यादि। परस्य प्रतिवादिनः पक्षं भृशमत्यर्थं सभायां यथा विमुखं भवति, तथा वादं प्रवर्तयेत्; एतेन नास्ति परलोको नास्ति कर्मफलमित्यादि यदि परस्य पक्षो भवति, तदैतस्य पक्षस्य स्वाभाविकद्विष्टत्वेन यत्किञ्चित् स्वपक्षसाधनमुच्यते, तदेव परिषदपि गृह्णातीत्युक्तं भवति। उपसंहितायामिति सन्धिना युक्तायां तूष्णीमासीतेति योजना। उपसंहिता हि परिषत् परोक्षोणाभिमतत्वेनोपदर्शितमेव सर्वं करिष्यति, तदलमिहात्यर्थवचनेन माहात्म्यखण्डकेनेति भावः॥२५॥

तत्रेदं वादमर्यादालक्षणं भवति— इदं वाच्यम्, इदमवाच्यम्, एवं पराजितो भवतीति॥२६॥

वादमर्यादालक्षणमाह— तत्रेदमित्यादि। वादशब्देन चेह विगृह्य पक्षप्रतिपक्षवचनमात्रमुच्यते; सन्धायसम्भाषया तु तत्त्वबुभुत्सोर्वाद उक्तः॥२६॥

इमानि तु खलु पदानि भिषग्वादमार्गज्ञानार्थमधिगम्यानि भवन्ति; तद्यथा— वादः, द्रव्यं, गुणाः, कर्म, सामान्यं, विशेषः, समवायः, प्रतिज्ञा, स्थापना, प्रतिष्ठापना, हेतुः, दृष्टान्तः, उपनयः, निगमनम्, उत्तरं, सिद्धान्तः, शब्दः, प्रत्यक्षम्, अनुमानम्, ऐतिह्यम्, औपम्यं, संशयः, प्रयोजनं, सव्यभिचारं,

जिज्ञासा, व्यवसायः, अर्थप्राप्तिः, सम्भवः, अनुयोज्यम्, अननुयोज्यम्, अनुयोगः, प्रत्यनुयोगः, वाक्यदोषः, वाक्यप्रशंसा, छलम्, अहेतुः, अतीतकालम्, उपालम्भः, परिहारः, प्रतिज्ञाहानिः, अभ्यनुज्ञा, हेत्वन्तरम्, अर्थान्तरं, निग्रहस्थानमिति॥२७॥

सम्प्रति वादमार्गज्ञानार्थं वादाभिज्ञेयानि द्रव्यगुणादीन्युपदर्शयन्नाह— इमानीत्यादि। भिषजां वादमार्गो भिषग्वादमार्गः। वादादयः स्वयमेवाचार्येणाग्रे विव्रियन्त इति नेह सञ्ज्ञाकथने विव्रियन्ते॥२७॥

तत्र वादो नाम स यत् परेण सह शास्त्रपूर्वकं विगृह्य कथयति। स च द्विविधः सङ्ग्रहेण— जल्पः, वितण्डा च। तत्र पक्षाश्रितयोर्वचनं जल्पः, जल्पविपर्ययो वितण्डा। यथा— एकस्य पक्षः पुनर्भवोऽस्तीति, नास्तीत्यपरस्य; तौ च स्वस्वपक्षहेतुभिः स्वस्वपक्षं स्थापयतः, परपक्षमुद्भावयतः, एष जल्पः। जल्पविपर्ययो वितण्डा। वितण्डा नाम परपक्षे दोषवचनमात्रमेव॥२८॥

तत्रेत्यादिना वादलक्षणम्। इह वादशब्देन विगृह्यवादोऽभिप्रेतः, तत्त्वबुभुत्सुवादस्तु सन्धायसम्भाषयैवोक्तः। शास्त्रपूर्वकमित्यनेनार्थादिकलहवादं निषेधति। तत्र वादे विगृह्यसम्भाषारूपत्वादेव छलजातिनिग्रहस्थानानां विजिगीषाप्रवृत्तानां प्रयोगो लभ्यते। पक्षाश्रितयोरिति पक्षं साधयतोरित्यर्थः; तेन, वितण्डायामप्युत्तरवादिनः परपक्षदूषणलक्षणः पक्षोऽस्त्येव, परं स्वमतं न साधयतीति भेदः। यथैकस्येत्यादि जल्पोदाहरणम्। परपक्षे दोषवचनमात्रमित्यनेन न स्वपक्षसाधनवचनं वैतण्डिकस्येति दर्शयति॥२८॥

द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाः स्वलक्षणैः श्लोकस्थाने पूर्वमुक्ताः॥२९॥

अथ प्रतिज्ञा— प्रतिज्ञा नाम साध्यवचनं; यथा— नित्यः पुरुष इति॥३०॥

पूर्वमुक्ता दीर्घञ्जीवितीये॥२९-३०॥

अथ स्थापना— स्थापना नाम तस्या एव प्रतिज्ञाया हेतुदृष्टान्तोपनयनिगमनैः स्थापना। पूर्वं हि प्रतिज्ञा, पश्चात् स्थापना, किं ह्यप्रतिज्ञातं स्थापयिष्यति; यथा— नित्यः पुरुष इति प्रतिज्ञा; हेतुः— अकृतकत्वादिति; दृष्टान्तः— यथाऽऽकाशमिति; उपनयः— यथा चाकृतकमाकाशं, तच्च नित्यं, तथा पुरुष इति; निगमनं— तस्मान्नित्य इति॥३१॥

स्थापयति सिद्धमर्थं परं प्रति साधयतीति स्थापना। सा च साध्यं परं प्रति हेत्वादिभिश्चतुर्भिः साधयति। प्रतिज्ञाऽपि परं प्रति स्थापना भवति, यतः पञ्चावयवमेवानुमानं भवति, सा त्विह स्थाप्यत्वेनैव लब्धेति न स्थापनायामिहोदाहृता॥३१॥

अथ प्रतिष्ठापना— प्रतिष्ठापना नाम या तस्या एव परप्रतिज्ञाया विपरीतार्थस्थापना। यथा— अनित्यः पुरुष इति प्रतिज्ञा; हेतुः— ऐन्द्रियकत्वादिति; दृष्टान्तः— यथा घट इति, उपनयो— यथा घट ऐन्द्रियकः स चानित्यः, तथा चायमिति; निगमनं— तस्मादनित्य इति॥३२॥

प्रतिष्ठापनापदं प्रथमं सम्प्रत्यवसरप्राप्ता प्रतिष्ठापनेति दर्शयति; द्वितीयं तु प्रतिष्ठापना नामेति तस्या एवेत्यादिना वक्ष्यमाणस्य लक्षणस्योपदर्शनार्थम्। एवं 'स्थापना नाम' इत्यादावपि पुनरुक्तस्य प्रयोजनं वाच्यम्। प्रतिष्ठापनापदगतस्य प्रतिशब्दस्यार्थं व्याकरोति— विपरीतार्थस्थापनेति; प्रतिशब्दोऽयं विपरीतार्थ इत्यर्थः। इयं च प्रतिष्ठापना आन्वीक्षिक्यां प्रकरणसमाख्यं हेतुदूषणम्॥३२॥

अथ हेतुः— हेतुर्नामोपलब्धिकारणं; तत् प्रत्यक्षम्, अनुमानम्, ऐतिह्यम्, औपम्यमिति; एभिर्हेतुभिर्यदुपलभ्यते तत् तत्त्वम्॥३३॥

हेतुश्चाविनाभावलिङ्गवचनं यद्यपि, तथाऽपीह लिङ्गप्रग्राहकाणि प्रत्यक्षादिप्रमाणान्येव यथोक्तहेतुमूलत्वेन हेतुशब्देनाहेति बोद्धव्यम्; अन्यथा पुनः प्रत्यक्षाद्यभिधानं पुनरुक्तं स्यात्। उपलब्धिकारणमिति व्यापकस्य साध्यस्योपलब्धिकारणम्। तत्तत्त्वमिति तल्लिङ्गमित्यर्थः॥३३॥

अथ दृष्टान्तः— दृष्टान्तो नाम यत्र मूर्खविदुषां बुद्धिसाम्यं, यो वर्ण्यं वर्णयति। यथा— अग्निरुष्णः, द्रवमुदकं, स्थिरा पृथिवी, आदित्यः प्रकाशक इति; यथा आदित्यः प्रकाशकस्तथा साङ्ख्यज्ञानं प्रकाशकमिति॥३४॥

मूर्खविदुषां बुद्धिसाम्यमित्यनेन लौकिकानां पण्डितानां च योऽर्थोऽविवादसिद्धः स दृष्टान्तो भवति, न पण्डितमात्रसिद्धः। योऽपि लोकप्रसिद्धो दृष्टान्त उच्यते, स यावन्न प्रतिपाद्यपुरुषं प्रति साध्यते, न तावद्दृष्टान्ततामासादयतीति भावः। अथ बुद्धिसाम्यमात्रेण साध्यसाधर्म्यभावादिष्टत्वाद् दृष्टान्तो भवतीत्याह— यो वर्ण्यं वर्णयति; यः साध्यं साधयतीत्यर्थः। प्रसिद्धसाध्यसाधनसम्बन्धश्च दृष्टान्तः साध्यं साधयतीति भावः। अग्न्यादयश्च लोकप्रसिद्धत्वेनोदाहृताः; तेनैतेषामपि साध्यसाधनोदाहरणमादित्यादिवत् क्वचिद्द्वन्द्वेऽयमयमिवेति दर्शयति॥३४॥

उपनयो निगमनं चोक्तं स्थापनाप्रतिष्ठापनाव्याख्यायाम्॥३५॥

अथोत्तरम्— उत्तरं नाम साधर्म्योपदिष्टे हेतौ वैधर्म्यवचनं, वैधर्म्योपदिष्टे वा हेतौ साधर्म्यवचनम्। यथा— 'हेतुसधर्माणो विकाराः, शीतकस्य हि व्याधेर्हेतुभिः साधर्म्यं हिमशिशिरवातसंस्पर्शाः', इति

ब्रुवतः परो ब्रूयात्— हेतुविधर्माणो विकाराः, यथा शरीरावयवानां दाहौष्ण्यकोथप्रपचने हेतुवैधर्म्यं हिमशिशिरवातसंस्पर्शा इति। एतत् सविपर्ययमुत्तरम्॥३६॥

उत्तरमित्यादि। उत्तरशब्देनेह जात्युत्तरमुत्तराभासमीप्सितं; यतोऽसाधकसाधर्म्यमात्रप्रत्यवस्थानमेवोत्तरविकरणे दर्शयिष्यति। उक्तं च न्याये— "साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः" (न्या.द.१।२।१८) इति। एतच्च साधर्म्यवैधर्म्योदाहरणार्थम्। तेन न्यायोक्ता जात्युत्तरा उत्कर्षापकर्षसमादयोऽप्यनुक्ता इहैवानुबोद्धव्याः। हेतुसधर्माण इति हेतुसदृशाः। शीतकः शीतं, हिमशिशिरवातगताः संस्पर्शाः शीतस्य हेतुभिः साधर्म्यमिति कृत्वा योजना। तेन हिमादीनां हेतूनां ये शीतस्पर्शास्ते शीतकेऽपीति साधर्म्यं हेतुविकारयोरिति। परो ब्रूयादिति प्रतिवादी वदेत्। दाहौष्ण्यकोथप्रपचने 'विकारे' इति शेषः। हेतुवैधर्म्यं हेतुवैसादृश्यम्। हिमादिसंस्पर्शाः हिमादिजन्यस्पर्शाः, शरीरावयवदाहादिविकारे उष्णे विसदृशा इति वाक्यार्थः। एवं तावद् वैधर्म्योक्ते हेतौ विपर्ययाद्यदा हेतुसाम्यमुत्तरं क्रियते, तदा विपर्ययो भवति। एवमेवोदाहरणद्वयं सविपर्ययं सम्पूर्णमुत्तरं भवतीत्यर्थः॥३५-३६॥

अथ सिद्धान्तः— सिद्धान्तो नाम स यः परीक्षकैर्बहुविधं परीक्ष्य हेतुभिश्च साधयित्वा स्थाप्यते निर्णयः। स चतुर्विधः— सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्तश्चेति। तत्र सर्वतन्त्रसिद्धान्तो नाम तस्मिंस्तस्मिन् सर्वस्मिंस्तन्त्रे तत्तत् प्रसिद्धं; यथा सन्ति निदानानि, सन्ति व्याधयः, सन्ति सिद्ध्युपायाः साध्यानामिति। प्रतितन्त्रसिद्धान्तो नाम तस्मिंस्तस्मिन्नैकैकस्मिंस्तन्त्रे तत्तत् प्रसिद्धं; यथा— अन्यत्राष्टौ रसाः षडत्र, पञ्चेन्द्रियाण्यत्र षडिन्द्रियाण्यन्यत्र तन्त्रे, वातादिकृताः सर्वे विकारा यथाऽन्यत्र, अत्र वातादिकृता भूतकृताश्च प्रसिद्धाः। अधिकरणसिद्धान्तो नाम स यस्मिन्नधिकरणे प्रस्तूयमाने सिद्धान्यन्यान्यप्यधिकरणानि भवन्ति, यथा— 'न मुक्तः कर्मानुबन्धिकं कुरुते, निस्पृहत्वात् इति प्रस्तुते सिद्धाः कर्मफल-मोक्ष-

पुरुष-प्रेत्यभावा भवन्ति। अभ्युपगमसिद्धान्तो नाम स यमर्थमसिद्धमपरीक्षितमनुपदिष्टमहेतुकं वा वादकालेऽभ्युपगच्छन्ति भिषजः; तद्यथा— द्रव्यं प्रधानमिति कृत्वा वक्ष्यामः, गुणाः प्रधानमिति कृत्वा वक्ष्यामः, वीर्यं प्रधानमिति कृत्वा वक्ष्यामः, इत्येवमादिः। इति चतुर्विधः सिद्धान्तः॥३७॥

बहुविधं परीक्ष्य हेतुभिः साधयित्वा स्थाप्यत इत्यस्य विवरणं— निर्णय इति; निर्णीयत इति निर्णयः। एतच्च सिद्धान्तलक्षणमभ्युपगमसिद्धान्ते नास्ति, तेन तत्र बुद्धिव्यवस्थितत्वेन चोक्तं सिद्धान्तत्वं ज्ञेयम्। सिद्धान्तं विभजते— स इत्यादि। प्रतितन्त्रसिद्धान्ते षड्रसा अष्टौ रसा इति परस्परविरुद्धेऽपि वादे स्वयुक्तिव्यवस्थापनबलात्तु सिद्धान्तत्वं ज्ञेयम्। यस्मिन्नित्यादौ अधिकरणे इति अभिधेयप्रधानत्वे। अन्यान्यपीति साक्षादनभिधीयमानान्यपि। अनुबध्नातीति आनुबन्धिकं जन्मान्तरेऽप्यनुगामीत्यर्थः। मुक्त इति प्रत्यासन्नमुक्तिः, सर्वथामुक्तस्त्वशरीरत्वात् कर्म न करोति; किंवा आनुबन्धिकं विशेषेण न करोति। सिद्धा इत्यादि। यदीह कर्मफलं न स्यात्तदा मुमुक्षुणाऽपि क्रियते कर्म, फलोद्विग्नो ह्ययं न तत् कर्म करोति; यदि च मोक्षो न स्यात्तदा मुक्त इति वचनं न स्यात्; तथा यदि च पुरुषो न स्यात्तदा कस्य वा बन्धः, कस्य वा मोक्षः स्यात्; यदा जन्मान्तरं न स्यात्तदा कर्मणो जन्मान्तरानुबन्धित्वमनुपपन्नं स्यादिति; न मुक्त इत्यादिवदता अधिकरणबलादेव सिद्धाः सिद्धान्तत्वेन कर्मफलादयः स्वीकृता भवन्ति। असिद्धमित्यस्य विवरणम्— अपरीक्षितमित्यादि॥३७॥

अथ शब्दः— शब्दो नाम वर्णसमाम्नायः; स चतुर्विधः— दृष्टार्थश्च, अदृष्टार्थश्च, सत्यश्च, अनृतश्चेति। तत्र दृष्टार्थो नाम— त्रिभिर्हेतुभिर्दोषाः प्रकुप्यन्ति, षड्भिरुपक्रमैश्च प्रशाम्यन्ति, सति श्रोत्रादिसद्भावे शब्दादिग्रहणमिति। अदृष्टार्थः पुनः— अस्ति प्रेत्यभावः, अस्ति मोक्ष इति। सत्यो नाम— यथार्थभूतः; सन्त्यायुर्वेदोपदेशाः, सन्ति सिद्ध्युपायाः साध्यानां व्याधीनां, सन्त्यारम्भफलानीति। सत्यविपर्ययश्चानृतः॥३८॥

शब्दशब्देनेह सङ्केतबलादर्थप्रकाशिका वर्णमालोच्यते। आप्तोपदेशशब्दस्तु द्विविधः— परमाप्तब्रह्मादिप्रणीतः, तथा लौकिकाप्तप्रणीतश्च; ऐतिह्यशब्देन परमाप्तप्रणीतोऽवरुद्धः, लौकिकाप्तप्रणीतश्च शब्दैकदेशरूपः सत्यप्रकारविहितो ज्ञेयः। वर्णसमाम्नाय इति वर्णमेलक इत्यर्थः। वर्णानां यद्यप्यत्र सहस्थायिनां मेलको नास्ति, तथाऽप्येकस्मृतिसमानरूपित्वेन किंवा पूर्वपूर्वानुभवजनितसंस्कारसहितान्त्यवर्णानुभवारोहेण मेलको ज्ञेयः। दृष्टार्थ इति प्रमाणान्तरोपलब्धियोग्यार्थः। त्रिभिर्हेतुभिरिति प्रज्ञापराधादिभिः। षडुपक्रमा लङ्घनादयो लङ्घनबृंहणीयोक्ताः। एतेषां वाक्यानामिहैव दृश्यतेऽर्थ इति दृष्टार्थत्वम्। सत्यविपर्ययः— 'न सन्त्यायुर्वेदोपदेशाः' इत्यादिर्ज्ञेयः॥३८॥

अथ प्रत्यक्षं— प्रत्यक्षं नाम तद्यदात्मना चेन्द्रियैश्च स्वयमुपलभ्यते; तत्रात्मप्रत्यक्षाः सुखदुःखेच्छाद्वेषादयः, शब्दादयस्त्विन्द्रियप्रत्यक्षाः॥३९॥

आत्मनेति मनसा, तेन मानसप्रत्यक्षं सुखाद्यमवरुध्यते। इन्द्रियैश्चेत्यनेन बाह्यं प्रत्यक्षं गृह्यते। स्वयमुपलभ्यत इति साक्षादुपलभ्यते; अनेन चेन्द्रियव्यापारे सत्यपि यदनुमानविज्ञानं तदसाक्षात्कारित्वान्न प्रत्यक्षमिति दर्शयति॥३९॥

अथानुमानम्— अनुमानं नाम तर्को युक्त्यपेक्षः; यथा— अग्निं जरणशक्त्या, बलं व्यायामशक्त्या, श्रोत्रादीनि शब्दादिग्रहणेनेत्येवमादि॥४०॥

तर्को युक्त्यपेक्ष इत्यनुमानलक्षणं विविधरोगविज्ञानीय एव व्याकृतम्। अनुमानोदाहरणमाह— अग्निं जरणशक्त्येत्यादिना॥४०॥

अथैतिह्यम्— ऐतिह्यं नामाप्तोपदेशो वेदादिः॥४१॥

अलौकिकाप्तोपदेश ऐतिह्यपदेनोच्यत इत्याह— वेदादिरिति॥४१॥

अथौपम्यम्— औपम्यं नाम यदन्येनान्यस्य सादृश्यमधिकृत्य प्रकाशनं; यथा— दण्डेन दण्डकस्य, धनुषा धनुःस्तम्भस्य, इष्वासेनाऽऽरोग्यदस्येति॥४२॥

यदन्येनेत्यादौ अन्येनेति प्रसिद्धेन, अन्यस्येति अप्रसिद्धस्य। सादृश्यमधिकृत्येति सादृयं प्रतिपाद्यं सञ्ज्ञासञ्ज्ञिसम्बन्धं प्रति कारणतया अधिकृत्य; यदा तु भट्टनयेनोपमानं व्याख्येयं तदा सादृश्यं प्रतिपाद्यतया अधिकृत्येति योजनीयं, तेषां सादृश्यप्रतिपत्तिरुपमानार्थः। न्याये च सञ्ज्ञासञ्ज्ञिसम्बन्धप्रतीतिरुपमानफलं, तच्च प्रथमव्याख्यानाद्भवति; उक्तं हि तत्र— “प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्” (न्या.द.१।१।६) इति। दण्डेन दण्डकस्येति दण्डेन प्रसिद्धेनाप्रसिद्धस्य दण्डकस्य साधर्म्यमाप्ताच्छ्रुतवान् कुम्भकारदण्डवद्विकारदर्शने सत्ययमसौ दण्डकसञ्ज्ञो विकार इति प्रत्येति, किंवा भट्टनयेन प्रसिद्धं दण्डगतं साधर्म्यमप्रसिद्धदण्डका-ख्यविकारसम्बन्धितया प्रत्येति; एवमन्यत्राप्युदाहरणे ज्ञेयम्। इष्वासेनेति इषुमोक्षकेण, यथा इषुमोक्षकेण लक्ष्येऽनतिविप्रकृष्टे नापराध्यते, तथाऽऽरोग्यदेन वैद्येन वैद्यगुणैरातुरं साधयता॥४२॥

अथ संशयः— संशयो नाम सन्देहलक्षणानुसन्दिग्धेष्वर्थेष्वनिश्चयः; यथा— दृष्टा ह्यायुष्मल्लक्षणैरुपेताश्चानुपेताश्च तथा सक्रियाश्चाक्रियाश्च पुरुषाः शीघ्रभङ्गाश्चिरजीविनश्च, एतदुभयदृष्टत्वात् संशयः— किमस्ति खल्वकालमृत्युरुत नास्तीति॥४३॥

सन्देहलक्षणानुसन्दिग्धेष्वर्थेष्वित्यनेन सन्देहयोग्यं विषयं दर्शयति; अनेन च न्यायोक्त "समानानेकधर्मोपपत्तेः" (न्या.द.१।१।२३) इत्यादिवचनाद् विषयं संशयस्य दर्शयति। संशयलक्षणम् "अनिश्चयः" इति ज्ञेयम्; अनिश्चयः पाक्षिकविरुद्धधर्मावमर्शकरं ज्ञानं, यथा— स्थाणुर्वा पुरुषो वेति। दृष्टा हीत्यादिना संशयोत्पत्तिसामग्रीमाह। तत्रायुष्यलक्षणोपेतानामक्रियाणां शीघ्रभङ्गे तथा सक्रियाणां च चिरजीवने दृष्टे अकालमृत्युरस्तीति बुद्धिः। एतद्विपर्यये चाकालमृत्युर्नास्तीति बुद्धिः॥४३॥

अथ प्रयोजनं— प्रयोजनं नाम यदर्थमारभ्यन्त आरम्भाः; यथा— यद्यकालमृत्युरस्ति ततोऽहमात्मानमायुष्यैरुपचरिष्याम्यनायुष्याणि च परिहरिष्यामि, कथं मामकालमृत्युः प्रसहेतेति॥४४॥

यदर्थमिति यन्निमित्तम्। प्रसहेतेति मारयेदित्यर्थः॥४४॥

अथ सव्यभिचारं— सव्यभिचारं नाम यद्व्यभिचरणं; यथा— भवेदिदमौषधमस्मिन् व्याधौ यौगिकमथवा नेति॥४५॥

सव्यभिचारमिति अनैकान्तिकमित्यर्थः। अथवा नेति न भवेदिति। अनैकान्तिकं चात्रौषधं यौगिकत्वायौगिकत्वाभ्यां संशयजनकमेव; तेन संशयेन समभेकता न शङ्कनीयाऽनैकान्तिकस्य॥४५॥

अथ जिज्ञासा— जिज्ञासा नाम परीक्षा; यथा भेषजपरीक्षोत्तरकालमुपदेक्ष्यते॥४६॥

उत्तरकालमिति इहैव परीक्षाप्रकरणे; किंवा रसायने "भेषजं द्विविधं च तत्"(चि.अ.१पा.१) इत्यादिना॥४६॥

अथ व्यवसायः— व्यवसायो नाम निश्चयः; यथा— वातिक एवायं व्याधिः, इदमेवास्य भेषजं चेति॥ ४७॥

अथार्थप्राप्तिः— अर्थप्राप्तिर्नाम यत्रैकेनार्थेनोक्तेनापरस्यार्थस्यानुक्तस्यापि सिद्धिः; यथा— नायं सन्तर्पणसाध्यो व्याधिरित्युक्ते भवत्यर्थप्राप्तिः— अपतर्पणसाध्योऽयमिति, नानेन दिवा भोक्तव्यमित्युक्ते भवत्यर्थप्राप्तिः— निशि भोक्तव्यमिति॥ ४८॥

अर्थप्राप्तिरिति अर्थापत्तिरित्यर्थः। इह उक्तेनेति वचनाच्छ्रुतार्थापत्तिरेव विवक्षिता, दृष्टार्थापत्तिरपि त्वेतत्सामान्यत्वेनैव ज्ञेया। इयं चार्थापत्तिरन्यथोपपत्त्या न प्रमाणमिति न प्रमाणप्रकरणे पठिता, या तु दोषरहिता साऽनुमानान्तर्गतैवेति भावः। यो ह्यपतर्पणसाध्योऽपि न स्यात्तं प्रति 'नायं सन्तर्पणसाध्यः' इतिवचनमेवासमर्थविशेषणतया न स्यादित्यर्थापत्तिर्नेत्यभिप्रायः, उभयथाऽप्यसाध्ये हि 'असाध्यः' इत्येतावदेव वक्तव्यं स्यात्। एवमन्यत्राप्युदाहरणे ज्ञेयम्॥ ४७-४८॥

अथ सम्भवः— यो यतः सम्भवति स तस्य सम्भवः; यथा— षड्धातवो गर्भस्य, व्याधेरहितं, हितमारोग्यस्येति॥ ४९॥

सम्भवति विद्यते अस्मादिति सम्भवः, कारणं हि अव्यक्तस्वजन्मकार्यमुक्तम्, यतः कारणं सत्कार्यवादिमते कार्ययुक्तमेव। तेन षड्धातौ गर्भोऽस्त्येव, एवमहितेऽपि व्याधिरस्त्येव, स उत्तरकालं व्यज्यते इति साङ्ख्यमतेनोक्तम्। ततश्च यदन्यत्र सम्भवोदाहरणमुक्तं यथा— 'सम्भवति खार्यां द्रोण' इत्यादि, तत्समानमेतदप्युदाहरणं भवति॥ ४९॥

अथानुयोज्यम्— अनुयोज्यं नाम यद्वाक्यं वाक्यदोषयुक्तं तत्। सामान्यतो व्याहृतेष्वर्थेषु वा विशेषग्रहणार्थं यद्वाक्यं तदप्यनुयोज्यं; यथा— 'संशोधनसाध्योऽयं व्याधिः' इत्युक्ते 'किं वमनसाध्योऽयं, किंवा विरेचनसाध्यः' इत्यनुयुज्यते॥५०॥

अनुयोज्यान्तरमाह— सामान्यत इत्यादि॥५०॥

अथाननुयोज्यम्— अननुयोज्यं नामातो विपर्ययेण; यथा— अयमसाध्यः॥५१॥

अननुयोज्यमाह— अतो विपर्ययेणेति। यथोक्तानुयोज्यद्वयोदाहरणविपर्ययेण ज्ञेयम्॥५१॥

अथानुयोगः— अनुयोगो नाम स यत् तद्विद्यानां तद्विद्यैरेव सार्धं तन्त्रे तन्त्रैकदेशे वा प्रश्नःप्रश्नैकदेशो वा ज्ञानविज्ञानवचनप्रतिवचनपरीक्षार्थमादिश्यते। यथा—
'नित्यः पुरुषः' इति प्रतिज्ञाते यत् परः 'को हेतुः' इत्याह, सोऽनुयोगः॥५२॥

अथ प्रत्यनुयोगः— प्रत्यनुयोगो नामानुयोगस्यानुयोगः; यथा— अस्यानुयोगस्य पुनः को हेतुरिति॥५३॥

अनुयोगमाह— अथेत्यादि। प्रश्न इतिशब्देन यथोक्तशास्त्रे सम्पूर्णप्रश्नो गृह्यते, यथाऽत्रैव 'तत्र चेद्भिषक् भिषजं पृच्छेद्' इत्यादिना यावदुक्तं तत् सम्पूर्णं ज्ञेयम्; अत्रैव चैकदेशोऽपि प्रश्नस्य ज्ञेयः॥५२-५३॥

अथ वाक्यदोषः— वाक्यदोषो नाम यथा खल्वस्मिन्नर्थे न्यूनम्, अधिकम्, अनर्थकम्, अपार्थकं, विरुद्धं चेति; एतानि ह्यन्तरेण न प्रकृतोऽर्थः प्रणश्येत्। तत्र न्यूनं— प्रतिज्ञाहेतूदाहरणोपनयनिगमनानामन्यतमेनापि न्यूनं न्यूनं भवति; यद्वा बहूपदिष्टहेतुकमेकेन हेतुना साध्यते तच्च न्यूनम्। अथाधिकम्— अधिकं नाम यन्न्यूनविपरीतं, यद्वाऽऽयुर्वेदे भाष्यमाणे बार्हस्पत्यमौशनसमन्यद्वा यत्किञ्चिदप्रतिसम्बद्धार्थमुच्यते, यद्वा सम्बद्धार्थमपि द्विरभिधीयते तत् पुनरुक्तदोषत्वादधिकं; तच्च पुनरुक्तं द्विविधम्— अर्थपुनरुक्तं, शब्दपुनरुक्तं च; तत्रार्थपुनरुक्तं यथा— भेषजमौषधं साधनमिति, शब्दपुनरुक्तं पुनर्भेषजं भेषजमिति। अथानर्थकम्— अनर्थकं नाम यद्वचनमक्षरग्राममात्रमेव स्यात् पञ्चवर्गवन्न चार्थतो गृह्यते। अथापार्थकम्— अपार्थकं नाम यदर्थवच्च परस्परेणासंयुज्यमानार्थकं; यथा— चक्र-न(त)क्र-वंश-वज्र-निशाकरा इति। अथ विरुद्धं— विरुद्धं नाम यद्दृष्टान्तसिद्धान्तसमयैर्विरुद्धं; तत्र पूर्वं दृष्टान्तसिद्धान्तावुक्तौः समयः पुनस्त्रिधा भवति; यथा— आयुर्वैदिकसमयः, याज्ञिकसमयः, मोक्षशास्त्रिकसमयश्चेति; तत्रायुर्वैदिकसमयः— चतुष्पादं भेषजमिति, याज्ञिकसमयः— आलभ्या यजमानैः पशव इति, मोक्षशास्त्रिकसमयः— सर्वभूतेष्वहिंसेति; तत्र स्वसमयविपरीतमुच्यमानं विरुद्धं भवति। इति वाक्यदोषाः॥५४॥

वाक्यदोषानुदाहरति— अथेत्यादि। अस्मिन्नर्थ इतिवचनेन छलहेत्वाभासादिपदगृहीतानपि वाक्यदोषत्वेन दर्शयति; छलादयो हि वाक्यदोषा एव, परं पृथग्गृहीतत्वादिह नोच्यन्ते; तथा शास्त्रान्तरोक्ताश्चासिद्धादयोऽनया भाषया सूच्यन्ते वाक्यदोषाः। यद्वेत्यादौ यदा पुरुषनित्यत्वे ये हेतव उक्ता 'अनादित्वात्, अकृतकत्वात्, निर्विकारत्वात्' इति, तेषु यदि सकलहेत्वभिधानं प्रतिज्ञाय एकं हेतुं ब्रूते, तदा प्रतिज्ञातार्थस्य न्यूनार्थत्वान्न्यूनं भवतीति ज्ञेयं; यदा हेतुर्वक्तव्यस्तदा एक एव वक्तव्यो युज्यते, एकस्यापि हेतोः साध्यसाधनसमर्थत्वात्; तेन तत्र बहुहेतुकथनमेवाधिकत्वाद्दोष एव भवतीति ज्ञेयम्। प्रकृत इति साध्यत्वेन प्रतिज्ञातः। बार्हस्पत्यमौशनसं च नीतिशास्त्रम्। अप्रतिसम्बद्धार्थमित्यनेन बार्हस्पत्याद्यपि यदि धनैषणाभिधानप्रसङ्गेन प्रसङ्गागतं भवति, तदा

स्तोकक्रमेणोच्यमानमायुर्वेदोपकारकत्वेन नाधिकमिति दर्शयति। पुनरक्तदोषादिति दोषवतः पुनरुक्तादित्यर्थः। दोषवत्त्वं च यथा पुनरुक्तस्य, तथोक्तमेव। पञ्चवर्गवदिति क-ख-ग-घ-ङादिवर्गसमुदायवत्, तत्र त्वभिधेयोऽर्थो न प्रतिभाति। अर्थवदिति प्रत्येकं पदरूपतया प्रसिद्धार्थम्। परस्परेणायुज्यमानमिति वाक्यरूपतयाऽर्थाप्रत्यायकं; चक्रादयो हि शब्दाः क्रियां विना न वाक्यरूपार्थाभिधायका इत्यर्थः। विरुद्धे दृष्टान्तविरुद्धं यथा— यथा शीतं जलं तापकं तथा ज्वरोऽपीति। सिद्धान्तविरुद्धं यथा— वैद्यो ब्रूते— न भेषजं रोगहरमिति; आयुर्वेदे चतुष्पादमेव भेषजमिति सिद्धान्त एव, तथा चतुष्पादसञ्ज्ञा समयकृता ज्ञेया। एवं याज्ञिकानामालभ्यसञ्ज्ञा समयकृता। तत्र यदि स्वसमयविपरीतमभिदधाति तदा समयविरुद्धं भवति॥५४॥

अथ वाक्यप्रशंसा— वाक्यप्रशंसा नाम यथा खल्वस्मिन्नर्थे त्वन्यूनम्, अनधिकम्, अर्थवत्, अनपार्थकम्, अविरुद्धम्, अधिगतपदार्थं चेति यत्तद्वाक्यमननुयोज्यमिति प्रशस्यते॥५५॥

अननुयोज्यमिति नानुयोगार्हम्॥५५॥

अथ च्छलं— छलं नाम परिशठमर्थाभासमनर्थकं वाग्वस्तुमात्रमेव। तद्द्विविधं— वाक्छलं, सामान्यच्छलं च। तत्र वाक्छलं नाम यथा— कश्चिद्ब्रूयात्— नवतन्त्रोऽयं भिषगिति, अथ भिषग् ब्रूयात्— नाहं नवतन्त्र एकतन्त्रोऽहमिति; परो ब्रूयात्— नाहं ब्रवीमि नव तन्त्राणि तवेति, अपि तु नवाभ्यस्तं ते तन्त्रमिति; भिषक् ब्रूयात्— न मया नवाभ्यस्तं तन्त्रम्, अनेकधाऽभ्यस्तं मया तन्त्रमिति; एतद्वाक्छलम्। सामान्यच्छलं नाम यथा— व्याधिप्रशमनायौषधमित्युक्ते, परो ब्रूयात्— सत् सत्प्रशमनायेति किं नु भवानाह; सन् हि रोगः, सदौषधं; यदि च सत् सत्प्रशमनाय भवति, तत्र सत् कासः, सत् क्षयः, सत्सामान्यात् कासस्ते क्षयप्रशमनाय भविष्यतीति। एतत् सामान्यच्छलम्॥५६॥

छलमित्यादि। परिशठमिति वञ्चनाप्रवृत्तम्। अर्थवदिवाभासत इत्यर्थाभासः। एतदेव विवृणोति— अपार्थकमित्यादि। अपगतसमीचीनार्थत्वेन वाग्वस्तुमात्रमित्यर्थः। छलं ह्यभिप्रेतार्थादर्थान्तरं परिकल्प्य परवचनोपघाताय प्रतिकल्प्यते। यदुक्तं न्याये "वचनविघातोऽर्थविकल्पोपपत्त्या च्छलम्" (न्या.द.१।२।१०) इति। अत्र वाक्छले एवोपचारच्छलं न्यायोक्तं सम्भवति। सामान्यशब्दोक्ते ह्यर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलं; तेन 'मञ्चाः क्रोशन्ति' इत्यत्रापि मञ्चशब्दो मुख्यः सन् मञ्चे वर्तते, उपचारात्तु मञ्चस्थेषु पुरुषेषु मञ्चशब्दप्रयोगे सति 'कथमचेतना मञ्चाः क्रोशन्ति'?, इत्याक्षेपो वाक्छल एव प्रविशतीति भावः। नवतन्त्रोऽयमित्यादि व्यक्तम्। सामान्यच्छललक्षणमत्रानुक्तं, तत्र न्यायोक्तलक्षणमेव ज्ञेयं; यथा— 'सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम्'
(न्या.द.अ.१आ.२सू.१३) इति। सत् सत्प्रशमायेति सता सतः प्रशमः क्रियते इति तव मतमिति कृत्वा च्छलवादी पूर्वपक्षं करोति, तेनाविवक्षितेन सत्त्वसामान्येन प्रत्यवस्थानात् सामान्यच्छलं भवति॥ ५६॥

अथाहेतुः— अहेतुर्नामप्रकरणसमः, संशयसमः, वर्ण्यसमश्चेति। तत्र प्रकरणसमो नामाहेतुर्यथा— अन्यः शरीरादात्मा नित्य इति; परो ब्रूयात्— यस्मादन्यः शरीरादात्मा, तस्मान्नित्यः; शरीरं ह्यनित्यमतो विधर्मिणा चात्मना भवितव्यमित्येष चाहेतुः; नहि य एव पक्षः स एव हेतुरिति। संशयसमो नामाहेतुर्य एव संशयहेतुः स एव संशयच्छेदहेतुः; यथा— अयमायुर्वेदैकदेशमाह, किन्न्वयं चिकित्सकः स्यान्न वेति संशये परो ब्रूयात्— यस्मादयमायुर्वेदैकदेशमाह तस्माच्चिकित्सकोऽयमिति, न च संशयच्छेदहेतुं विशेषयति, एष चाहेतुः; न हि य एव संशयहेतुः, स एव संशयच्छेदहेतुर्भवति। वर्ण्यसमो नामाहेतुः— यो हेतुर्वर्ण्याविशिष्टः; यथा— कश्चिद्ब्रूयात्— अस्पर्शत्वाद्बुद्धिरनित्या शब्दवदिति; अत्र वर्ण्यः शब्दो बुद्धिरपि वर्ण्या, तदुभयवर्ण्याविशिष्टत्वाद्वर्ण्यसमोऽप्यहेतुः॥५७॥

अहेतुः असाधकहेतुरित्यर्थः। प्रक्रियते साध्यत्वेनाधिक्रियत इति व्युत्पत्त्या प्रकरणं पक्षः, तेन समः प्रकरणसमः। अन्यः शरीरादात्मा नित्य इति प्रतिज्ञायां शरीरादन्यत्वं नित्यत्वं चात्मनः साध्यम्। अतो विधर्मिणेति शरीरादनित्याद्विधर्मिणा नित्येनेत्यर्थः। य एव पक्ष इत्यनेनान्यत्वं च शरीरादात्मनो न सिद्धमिति दर्शयति, सति हि नित्यत्वे चेतनाधारस्य शरीरादन्यत्वमपि सिध्यति; चार्वाकपक्षे तु शरीरमेव चेतनमनित्यं चेति तं प्रत्युभयमपि साध्यं; न च साध्यं साधनं भवति, असिद्धत्वादिति भावः। अयमायुर्वेदैकदेशमाहेति आयुर्वेदैकदेशाभिधानं चिकित्सकाचिकित्सकगमकत्वेन संशयहेतुः, एकदेशकथनं हि शास्त्रानभ्यासेऽपि कुतश्चिच्छ्रवणादपि भवतीति भावः। न संशयच्छेदहेतुं विशेषयतीति न संशयच्छेदहेतुं विशिष्टं दर्शयतीत्यर्थः। एष चाहेतुरिति यथोक्तो हेतुरहेतुः संशयोच्छेदे इत्यर्थः। वर्ण्येन साध्येन दृष्टान्तोऽप्यसिद्धत्वेन सम इति वर्ण्यसमः। वर्ण्यः शब्द इति अस्पर्शत्वयोगादनित्यत्वेन शब्दोऽपि साध्यः, न च साध्यो दृष्टान्तो भवति। उभयवर्ण्याविशिष्टत्वादिति उभयत्र वर्ण्ये दृष्टान्ते च वर्ण्यस्य साध्यस्य साध्यत्वेनाविशिष्टत्वादित्यर्थः॥५७॥

अथातीतकालम्— अतीतकालं नाम यत् पूर्वं वाच्यं तत् पश्चादुच्यते, तत् कालातीतत्वादग्राह्यं भवतीति; पूर्वं वा निग्रहप्राप्तमनिगृह्य परिगृह्य पक्षान्तरितं पश्चान्निगृहीते, तत्तस्यातीतकालत्वान्निग्रहवचनमसमर्थं भवतीति॥५८॥

यत् पूर्वं वाच्यं तत् पश्चादुच्यते इति यथा निगमनमभिधाय पश्चात् प्रतिज्ञोच्यते। निग्रहप्राप्तमिति निग्रहणीयं ज्ञातम्॥५८॥

अथोपालम्भः— उपालम्भो नाम हेतोर्दोषवचनं; यथा— पूर्वमहेतवो हेत्वाभासा व्याख्याताः॥५९॥

हेतोर्दोषवचनमित्यनेन कालात्ययापदिष्टासिद्धयोर्द्वयोरपीहानुक्तयोर्ग्रहणं कर्तव्यम्; उदाहरणार्थं त्वहेतव उक्ताः। हेतुवदाभासन्त इति हेत्वाभासाः॥५९॥

अथ परिहारः— परिहारो नाम तस्यैव दोषवचनस्य परिहरणं; यथा— नित्यमात्मनि शरीरस्थे जीवलिङ्गान्युपलभ्यन्ते, तस्य चापगमान्नोपलभ्यन्ते, तस्मादन्यः शरीरादात्मा नित्यश्चेति॥६०॥

अथ प्रतिज्ञाहानिः— प्रतिज्ञाहानिर्नाम सा पूर्वपरिगृहीतां प्रतिज्ञां पर्यनुयुक्तो यत् परित्यजति, यथा प्राक् प्रतिज्ञां कृत्वा नित्यः पुरुष इति, पर्यनुयुक्तस्त्वाह— अनित्य इति॥६१॥

यथा नित्यमात्मनीत्यादिना प्रकरणसमत्वेनोक्तहेतौ दोषमुद्धरति। नित्यमिति सर्वदा। जीवलिङ्गानि प्रतिसन्धानस्मरणादीनि। तस्यापगमान्नोपलभ्यन्त इत्यनेन मृतशरीरे चेतनाद्यभावादन्यदेव तत्कारणमुन्नीयते, यदपगमान्न चेतयते मृतशरीरं, तस्मादन्यत्वमात्मनः सिद्धं, ततश्च शरीरादन्यत्वाच्छरीरविधर्मित्वेन पूर्वव्युत्पादितेन नित्यत्वमपि सिध्यतीत्याह— नित्यश्चेति॥६०-६१॥

अथाभ्यनुज्ञा— अभ्यनुज्ञा नाम सा य इष्टानिष्टाभ्युपगमः॥६२॥

अथ हेत्वन्तरं— हेत्वन्तरं नाम प्रकृतहेतौ वाच्ये यद्विकृतहेतुमाह॥६३॥

अथार्थान्तरम्— अर्थान्तरं नामैकस्मिन् वक्तव्येऽपरं यदाह। यथा— ज्वरलक्षणे वाच्ये प्रमेहलक्षणमाह॥६४॥

इष्टानिष्टाभ्युपगमो यथा— "भवान् चौर" इत्युक्ते स्वदोषमपरिहृत्य वचनं— भवानपि चौर इति। एतद्धि वचनं स्वीयमनिष्टं चौरत्वं परस्य चेष्टं चौरत्वमभ्यनुजानाति। तदेवं वचनं न्याये "मतानुज्ञा" शब्देनोच्यते॥६२-६४॥

अथ निग्रहस्थानं— निग्रहस्थानं नाम पराजयप्राप्तिः; तच्च त्रिरभिहितस्य वाक्यस्यापरिज्ञानं परिषदि विज्ञानवत्यां, यद्वा अननुयोज्यस्यानुयोगोऽनुयोज्यस्य चाननुयोगः। प्रतिज्ञाहानिः, अभ्यनुज्ञा, कालातीतवचनम्, अहेतुः, न्यूनम्, अधिकं, व्यर्थम्, अनर्थकं, पुनरुक्तं, विरुद्धं, हेत्वन्तरम्, अर्थान्तरं च निग्रहस्थानम्॥६५॥

इति वादमार्गपदानि यथोद्देशमभिनिर्दिष्टानि भवन्ति॥६६॥

निग्रहस्य पराजयस्य स्थानमिव स्थानं कारणमिति निग्रहस्थानम्। परिषदि विज्ञानवत्यामित्यनेन यदि परिषत्तस्य त्रिरभिहितस्यार्थं विजानाति, प्रतिवादी च न जानाति, तदा तस्य निग्रहस्थानं भवति। अन्यानप्युक्तानेव निग्रहस्थानत्वेनाह— अननुयोज्यस्यानुयोग इत्यादि। एते च व्याकृता एव। अत्र चाप्रतिभादयोऽपि न्यायोक्ता अन्तर्भावनीया बुद्धिमद्भिः, आयुर्वेदे तथाविधोपकारकत्वाभावादेतत् प्रपञ्चविषयमपि न प्रपञ्चितं; न्यायविदां त्वेतदनुक्तमपि सुगममेव, तदवेदिनां च मनाक्प्रपञ्चोक्तमपि नालं ज्ञानायेत्यलं प्रपञ्चेन॥६५-६६॥

वादस्तु खलु भिषजां प्रवर्तमानो प्रवर्तेतायुर्वेद एव, नान्यत्र। अत्र हि वाक्यप्रतिवाक्यविस्तराः केवलाश्चोपपत्तयः सर्वाधिकरणेषु। ताः सर्वाः समवेक्ष्यावेक्ष्य सर्वं वाक्यं ब्रूयात्, नाप्रकृतकमशास्त्रमपरीक्षितमसाधकमाकुलमव्यापकं वा। सर्वं च हेतुमद्ब्रूयात्। हेतुमन्तो ह्यकलुषाः

सर्व एव वादविग्रहाश्चिकित्सिते कारणभूताः, प्रशस्तबुद्धिवर्धकत्वात्; सर्वारम्भसिद्धिं ह्यावहत्यनुपहता बुद्धिः॥६७॥

इदानीं यथोक्तवाद एवायुर्वेदे आयुर्वेदाध्यायिभिः कर्तव्यः, एवम्भूतस्यैव वादस्य विवक्षितत्वं सम्यग्ज्ञानजनकत्वादित्याह— वाद इत्यादि। अथ किमर्थं वादविषयाः सन्तीत्याह— अत्र हीत्यादि। सर्वाधिकरणेषु 'सन्ति' इति शेषः। अव्यापकं वेति ब्रूयादिति पूर्वेण सम्बन्धः। वादो विग्रहः शरीरमिव येषां ते वादविग्रहा जल्पभेदा वितण्डाभेदाश्च। प्रशस्तबुद्धिकर्तृत्वेन कथं वादश्चिकित्सायां कारणं भवतीत्याह— सर्वेत्यादिना। न केवलं चिकित्सासिद्धिं करोत्यनुपहता बुद्धिः, किन्तु सर्वारम्भसिद्धिं करोतीत्यर्थः॥६७॥

इमानि खलु तावदिह कानिचित् प्रकरणानि भिषजां ज्ञानार्थमुपदेक्ष्यामः। ज्ञानपूर्वकं हि कर्मणां समारम्भं प्रशंसन्ति कुशलाः। ज्ञात्वा हि कारण-करण-कार्ययोनि-कार्य-कार्यफलानुबन्ध-देश-काल-प्रवृत्त्युपायान् सम्यगभिनिर्वर्तमानः कार्याभिनिर्वृत्ताविष्टफलानुबन्धं कार्यमभिनिर्वर्तयत्यनतिमहता यत्नेन कर्ता॥६८॥

सम्प्रति बुद्धेर्वर्धनकारणतद्विद्यसम्भाषाविध्यभिधानप्रसङ्गेणायुर्वेदोपयुक्तकारणाद्यभिधायकान्यपि प्रकरणानि बुद्धिवर्धनान्यभिधातुं प्रतिजानीते— इमानीत्यादि। ज्ञानपूर्वकमिति कर्तव्यकार्यानुगुणपदार्थज्ञानपूर्वकमित्यर्थः। यानि ज्ञात्वा क्रियमाणं कार्यं साधु भवति तान्याह— ज्ञात्वा हीत्यादि। अभिनिर्वर्तमान इति आभिमुख्येन वर्तमानः। इष्टं तादात्विकं फलमनुबन्धश्चायतीयफलं यस्य तदिष्टफलानुबन्धम्॥६८॥

तत्र कारणं नाम तद् यत् करोति, स एव हेतुः, स कर्ता॥६९॥

उक्तानि कारणादीनि व्याकरोति— तत्रेत्यादिना। यदिति कारणप्रत्यवमर्शान्नपुंसकम्। करोतीति स्वातन्त्र्येण करोति। तेनेह कारणशब्देन स्वतन्त्रकारणं कर्तृलक्षणमुच्यते॥६९॥

करणं पुनस्तद् यदुपकरणायोपकल्पते कर्तुः कार्याभिनिर्वृत्तौ प्रयतमानस्य॥७०॥

करणं विवृणोति— करणं पुनरित्यादि। उपकरणायेति कर्तुः सम्पाद्ये कार्ये सन्निहितं सहकारितया व्याप्रियते। कार्याभिनिर्वृत्ताविति कार्याभिनिर्वृत्तिमुद्दिश्य। यतमानस्येति यत्नं कुर्वतः। एतेन यः कार्ये कारणान्तरप्रेरकः, स चात्र कर्ता कारणशब्देनोच्यते; यत्तु कर्त्रधीनव्यापारे साधकतमं, तत् करणम्। कर्तृत्वं च तस्यैव मुख्यं यो हि बुद्धिप्रयत्नयुक्तत्वादितरकारणप्रेरको भवति, अचेतने तु कर्तृत्वव्यपदेशः स्वातन्त्र्यविवक्षया भाक्तः॥७०॥

कार्ययोनिस्तु सा या विक्रियमाणा कार्यत्वमापद्यते॥७१॥

कार्यस्य योनिः समवायिकारणं कार्ययोनिः। येत्यादि या योनिः कारणरूपा विक्रियमाणा रूपान्तरमापद्यमाना कार्यत्वमापद्यते कार्यरूपा भवतीत्यर्थः। तत्र घटस्य मृत्तिका कार्ययोनिः; मृदेव ह्यवस्थान्तरप्राप्त्या घटो भवति॥७१॥

कार्यं तु तद्यस्याभिनिर्वृत्तिमभिसन्धाय कर्ता प्रवर्तते॥७२॥

अभिनिर्वृत्तिमभिसन्धायेति कर्तव्यताबुद्धिं स्थिरीकृत्य॥७२॥

कार्यफलं पुनस्तद् यत्प्रयोजना कार्याभिनिर्वृत्तिरिष्यते॥७३॥

कार्यफलशब्देनेह तादात्विकं कार्यफलं ज्ञेयं, यथा— कुम्भकारस्य घटकरणे तन्मूल्यप्राप्तिः; अनुबन्धस्त्वायतीयं फलं, यथा— घटमूल्यविनियोगः कुटुम्बपोषणादौ॥७३॥

अनुबन्धः खलु स यः कर्तारमवश्यमनुबध्नाति कार्यादुत्तरकालं कार्यनिमित्तः शुभो वाऽप्यशुभो भावः॥७४॥

अनुबध्नातीति उत्तरकालं कर्तारमुपतिष्ठते। शुभो वाऽप्यशुभो वेति शुभस्य कार्यस्य शुभः, अशुभस्य चाशुभः॥७४॥

देशस्त्वधिष्ठानम्॥७५॥

देशस्त्वधिष्ठानमिति कार्यानुगुणोऽननुगुणो वा आधाररूपो देशः॥७५॥

कालः पुनः परिणामः॥७६॥

परिणाम इति परिणामी ऋत्वयनादिरूपः कालः। तेन नित्यगं कालं निरस्यति, तस्य सर्वसाधारणत्वेन कार्यं प्रत्यनपेक्षणीयत्वात्॥७६॥

प्रवृत्तिस्तु खलु चेष्टा कार्यार्था; सैव क्रिया, कर्म, यत्नः, कार्यसमारम्भश्च॥७७॥

प्रवृत्तेश्चेष्टादिशब्दाः पर्याया एव लक्षणम्॥७७॥

उपायः पुनस्त्रयाणां कारणादीनां सौष्ठवमभिविधानं च सम्यक् कार्यकार्यफलानुबन्धवर्ज्यानां, कार्याणामभिनिर्वर्तक इत्यतस्तूपायः; कृते नोपायार्थोऽस्ति, न च विद्यते तदात्वे, कृताच्चोत्तरकालं फलं, फलाच्चानुबन्ध इति॥७८॥

उपायमाह— उपायः पुनरित्यादि। सौष्ठवमिति सुष्ठुत्वं कर्त्रादीनां कार्यानुगुणयोगित्वमित्यर्थः। अभिविधानं च सम्यगिति कारणादीनां कार्यानुगुण्येनावस्थानं, यथा— भेषजस्य शिरोविरेचनकारकस्य तापनपिचुदानमित्यादि; यथा वा पटकारणानां तन्त्वादीनां पटवापनयोग्यतयाऽवस्थानम्। एतच्चोपायरूपं सौष्ठवमभिविधानं च कार्यादित्रिकरहितानां कारणादीनां ज्ञेयमित्याह— कार्येत्यादि। उपायस्य स्वरूपान्तरमाह— कार्याणामभिनिर्वर्तक इत्यतस्तूपाय इति। असत्युपाये कारणादीनि कार्यं न कुर्वन्तीत्यर्थः। अथ कथं कार्यादिषूपायत्वं न सम्भवतीत्याह— कृत इत्यादि। उपायो हि कार्यकारकः, तत्र कृते उत्पन्ने कार्ये नोपायार्थोऽस्ति, न हि कृतं पुनः क्रियते; तेन कार्यगतमप्युपायत्वं न पुनः कार्योत्पादे स्वीकुर्मः। अथानुत्पन्ने कार्ये उपायरूपता भविष्यतीत्याह— न च विद्यते तदात्वे; 'कार्यम्' इति शेषः; तदात्वे कार्योत्पत्तेः पूर्वं कार्यमेव नास्ति, तेन तदात्वेऽप्युपायत्वं कार्यस्य नास्तीति। यदा च कार्य एवोपायत्वमुपायोत्तरकालीनत्वेन नास्ति तदा कार्योत्तरकालजयोः फलानुबन्धयोरपि उपायार्थो नास्तीत्याह— कृताच्चोत्तरकालमित्यादि॥७८॥

एतद्दशविधमग्रे परीक्ष्यं, ततोऽनन्तरं कार्यार्था प्रवृत्तिरिष्टा। तस्माद्भिषक् कार्यं चिकीर्षुः प्राक् कार्यसमारम्भात् परीक्षया केवलं परीक्ष्यं परीक्ष्य कर्म समारभेत कर्तुम्॥७९॥

उपसंहरति— एतदित्यादि॥७९॥

तत्र चेद्भिषगभिषग्वा भिषजं कश्चिदेवं खलु पृच्छेद्— वमनविरेचनास्थापनानुवासनशिरोविरेचनानि प्रयोक्तुकामेन भिषजा कतिविधया परीक्षया कतिविधमेव परीक्ष्यं, कश्चात्र परीक्ष्यविशेषः, कथं च परीक्षितव्यः, किम्प्रयोजना च परीक्षा, क्व च वमनादीनां प्रवृत्तिः, क्व च निवृत्तिः, प्रवृत्तिनिवृत्तिलक्षणसंयोगे च किं नैष्ठिकं, कानि च वमनादीनां भेषजद्रव्याण्युपयोगं गच्छन्तीति॥८०॥

सम्प्रत्युक्तं कारणादिदशकं वैद्योपयुक्तभिषगादिदृष्टान्तेन दर्शयितुं तत्र चेदित्यादिप्रकरणमारभते। अभिषग्वेति किञ्चिद्भिषगित्यर्थः। कतिविधं परीक्ष्यमिति कतिप्रकारं परीक्षणीयम्। प्रवृत्तिनिवृत्तिलक्षणसंयोग इति प्रवृत्त्यनुगुणनिवृत्त्यनुगुणयोर्लक्षणयोरेकत्र मेलके। किं नैष्ठिकमिति निष्ठा निश्चयस्तद्भवं नैष्ठिकं; किं निश्चयेन कर्तव्यमित्यर्थः॥८०॥

स एवं पृष्टो यदि मोहयितुमिच्छेत्, ब्रूयादेनं— बहुविधा हि परीक्षा तथा परीक्ष्यविधिभेदः, कतमेन विधिभेदप्रकृत्यन्तरेण भिन्नया परीक्षया केन वा विधिभेदप्रकृत्यन्तरेण परीक्ष्यस्य भिन्नस्य भेदाग्रं भवान् पृच्छत्याख्यायमानं; नेदानीं भवतोऽन्येन विधिभेदप्रकृत्यन्तरेण भिन्नया परीक्षयाऽन्येन वा विधिभेदप्रकृत्यन्तरेण परीक्ष्यस्य भिन्नस्याभिलषितमर्थं श्रोतुमहमन्येन परीक्षाविधिभेदेनान्येन वा विधिभेदप्रकृत्यन्तरेण परीक्ष्यं भित्त्वाऽन्यथाऽऽचक्षाण इच्छां पूरयेयमिति॥८१॥

यदि मोहयितुमिच्छेदिति यदि विगृह्यसम्भाषाप्रवृत्तत्वेन मोहयितुमिच्छेदित्यर्थः। तथेति बहुविध इत्यर्थः। विधिरूपो भेदो विधिभेदः, तस्य प्रकृत्यन्तरमिति कारणान्तरम्। भेदाग्रमिति भेदपरिमाणं, भेदपरिमाणं चेह भेदसङ्ख्यापरिच्छेद एव ज्ञेयः। आख्यायमानमिति च्छेदः। किमर्थमेवं पुनः पृच्छसीत्याकाङ्क्षायामाह— नेदानीमित्यादि। भवतोऽन्यथा श्रोतुमभिलषितमर्थमहमन्यथाऽऽचक्षाणो

न भवत इच्छां पूरयेयं; तेन त्वमेव तावद्विशेषयित्वा पृच्छेति वाक्यार्थः। यदा तु, 'वेदानीं न पूरयेयम्' इतिपाठः, तदा वेदानीमित्यग्रे आचक्षाण इच्छां न पूरयेयमिति योज्यं; किंवा, नेति पूर्वेण युज्यते। तेन, कतमेन विधिभेदप्रकृत्यन्तरेणाख्यायमानं भवानिच्छति, केन वा विधिभेदप्रकृत्यन्तरेणाख्यायमानमिच्छति न, इति योज्यम्। इदानीमित्यादि तु पूर्ववदाशङ्कायां वचनम्। एतद्विशेषपृच्छया पृच्छको व्याकुलो भवतीति भावः। परीक्ष्यस्यार्थं भवतः श्रोतुमभिलषितमन्यथा आचक्षाण इति योजना॥८१॥

स यदुत्तरं ब्रूयात्तत् समीक्ष्योत्तरं वाच्यं स्याद्यथोक्तं च प्रतिवचनविधिमवेक्ष्य; सम्यक् यदि तु ब्रूयान्न चैनं मोहयितुमिच्छेत्, प्राप्तं तु वचनकालं मन्येत, काममस्मै ब्रूयादाप्तमेव निखिलेन॥८२॥

तत् समीक्ष्येति तद्वचनं समीक्ष्य यदौपयिकं भवति। यथोक्तं प्रतिवचनविधिमित्यत्रैवाध्याये विगृह्यसम्भाषाविधावुक्तमवेक्ष्योत्तरं वाच्यम्। पक्षान्तरमाह— सम्यगित्यादि। सम्यग्यदि तु ब्रूयादिति यदि सन्धायसम्भाषायां ब्रूयात्। प्राप्तमिति उचितम्, उचिते हि वचनकाले वक्तव्यमेव; आप्तमेवेति यथार्थमेवेत्यर्थः॥८२॥

द्विविधा तु खलु परीक्षा ज्ञानवतां— प्रत्यक्षम्, अनुमानं च। एतद्धि द्वयमुपदेशश्च परीक्षा स्यात्। एवमेषा द्विविधा परीक्षा, त्रिविधा वा सहोपदेशेन॥८३॥

तदेव यथार्थमुत्तरं पूर्वप्रश्नेषु यथाक्रमेणाह— द्विविधात्वित्यादि। ज्ञानवतामित्याप्तोपदेशरूपशास्त्रजनितज्ञानवताम्। पक्षान्तरे परीक्षात्रैविध्यमाह— एतद्धीत्यादि। एतच्च परीक्षाया द्वैविध्यं त्रैविध्यं वा त्रिविधरोगविशेषविज्ञानीय एव व्याख्यातम्॥८२॥

दशविधं तु परीक्ष्यं कारणादि यदुक्तमग्रे, तदिह भिषगादिषु संसार्य सन्दर्शयिष्यामः— इह कार्यप्राप्तौ कारणं भिषक्, करणं पुनर्भेषजं, कार्ययोनिर्धातुवैषम्यं, कार्यं धातुसाम्यं, कार्यफलं सुखावाप्तिः, अनुबन्धः खल्वायुः, देशो भूमिरातुरश्च, कालः पुनः संवत्सरश्चातुरावस्था च, प्रवृत्तिः प्रतिकर्मसमारम्भः, उपायस्तु भिषगादीनां सौष्ठवमभिविधानं च सम्यक्। इहाप्यस्योपायस्य विषयः पूर्वेणैवोपायविशेषेण व्याख्यातः। इति कारणादीनि दश दशसु भिषगादिषु संसार्य सन्दर्शितानि, तथैवानुपूर्व्यैतद्दशविधं परीक्ष्यमुक्तं च॥८४॥

भिषगादिषु संसार्येति भिषगादीनि चोपयुक्तान्युदाहरणानि कृत्वा। धातुवैषम्यमिति विषमतां गता धातवः; धातव एव हि विषमामवस्थां परित्यज्य समावस्थामापद्यमाना आरोग्याख्यस्य धातुसाम्यस्य समवायिकारणतया कार्ययोनितामापद्यन्ते। सुखावाप्तिरिति अरोग्यावाप्तिः। उक्तं च— "सुखसञ्ज्ञकमारोग्यं" (सू.अ.९) इति। आयुश्चानुबन्धफलरूपं यद्यप्यत्र रोगिगतं न वैद्यगतं, तथाऽपि वैद्येन काङ्क्षितत्वाद्वैद्यगतमेव तद्विज्ञेयम्। तेनानुबन्धलक्षणे कर्तारमभिप्रैतीति यदुक्तं तदुपपन्नम्। कर्ता ह्यत्र भिषक्, तेनातुरगतमप्यायुर्भिषगपेक्षितत्वेन भिषज एव फलमिति ज्ञेयम्। प्रतिकर्म चिकित्सा। इहाप्यस्येत्यादि। अत्रापि कार्यफलानुबन्धव्यतिरिक्तानां कारणादीनां सौष्ठवमभिविधानं च यथोक्तन्यायेनोपाय इति दर्शयति॥८४॥

तस्य यो यो विशेषो यथा यथा च परीक्षितव्यः, स तथा तथा व्याख्यास्यते॥८५॥

कारणं भिषगित्युक्तमग्रे, तस्य परीक्षा— भिषङ्नाम यो भिषज्यति, यः सूत्रार्थप्रयोगकुशलः, यस्य चायुः सर्वथा विदितं यथावत्। स च सर्वधातुसाम्यं
चिकीर्षन्नात्मानमेवादितः परीक्षेत गुणिषु गुणतः कार्याभिनिर्वृत्तिं पश्यन्, कच्चिदहमस्य कार्यस्याभिनिर्वर्तने समर्थो न वेति; तत्रेमे भिषग्गुणा यैरुपपन्नो भिषग्धातुसाम्याभिनिर्वर्तने समर्थो

भवति; तद्यथा— पर्यवदातश्रुतता, परिदृष्टकर्मता, दाक्ष्यं, शौचं, जितहस्तता, उपकरणवत्ता, सर्वेन्द्रियोपपन्नता, प्रकृतिज्ञता, प्रतिपत्तिज्ञाता चेति॥८६॥

कश्च परीक्ष्यविशेषः? कथं च परीक्षितव्यः? इति प्रश्नद्वयोत्तरं दातुमाह— तस्येत्यादि। यो यो विशेष इति कारणादीनां यो यो दृष्टकर्मत्वादिः सजातीयाद्वैद्यातुरादेस्तथा विजातीयाच्च भेषजादेर्विशेष इत्यर्थः। यथा परीक्षितव्य इत्यस्योदाहरणं 'कच्चिदहमस्य' इत्येवं(प्रकार)ग्रन्थे वक्ष्यमाणं ज्ञेयम्। भिषज्यति चिकित्सति। सर्वथेति हिताहितसुखदुःखत्वादिना। स चेति कारणं भिषङ्ग परेण परीक्षणीयः, किं त्वात्मनाऽप्यात्मानं परीक्षेतेति दर्शयति। अथ कथमात्मानं परीक्षेतेत्याह— गुणिष्वित्यादि। आत्मानं गुणयोगतया परीक्षेतेत्यर्थः। गुणत इति हेतौ पञ्चमी। कच्चिदिति इच्छाप्रकाशने। प्रतिपत्तिः उत्पन्नायामापदि झटिति कर्तव्यकरणम्॥८५-८६॥

करणं पुनर्भेषजम्। भेषजं नाम तद्यदुपकरणायोपकल्पते भिषजो धातुसाम्याभिनिर्वृत्तौ प्रयतमानस्य विशेषतश्चोपायान्तेभ्यः। तद्द्विविधं व्यपाश्रयभेदात्— दैवव्यपाश्रयं, युक्तिव्यपाश्रयं चेति। तत्र दैवव्यपाश्रयं— मन्त्रौषधिमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि, युक्तिव्यपाश्रयं— संशोधनोपशमने चेष्टाश्च दृष्टफलाः। एतच्चैव भेषजमङ्गभेदादपि द्विविधं— द्रव्यभूतम्ः, अद्रव्यभूतं च। तत्र यदद्रव्यभूतं तदुपायाभिप्लुतम्। उपायो नाम भयदर्शनविस्मापनविस्मारणक्षोभणहर्षणभर्त्सनवधबन्धस्वप्नसंवाहनादिरमूर्तो भावविशेषो यथोक्ताः सिद्ध्युपायाश्चोपायाभिप्लुता इति। यत्तु द्रव्यभूतं तद्वमनादिषु योगमुपैति। तस्यापीयं परीक्षा— इदमेवम्प्रकृत्यैवङ्गुणमेवम्प्रभावमस्मिन् देशे जातमस्मिन्नृतावेवं गृहीतमेवं निहितमेवमुपस्कृतमनया च मात्रया युक्तमस्मिन् व्याधावेवंविधस्य पुरुषस्यैवतावन्तं दोषमपकर्षत्युपशमयति वा, यदन्यदपि चैवंविधं भेषजं भवेत्तच्चानेन विशेषेण युक्तमिति॥८७॥

विशेषतश्चोपायान्तेभ्य इत्यनेन कार्ययोनिप्रवृत्तिदेशकालोपायेभ्योऽन्यद्यद्यत् कर्तुरुपकरणं भवति तत् करणमिति दर्शयति। कार्ययोनिर्हि लोके विकार्यकर्मतया साधकतमात् करणात् पृथगुच्यते, प्रवृत्त्युपाययोस्तु कर्तृकरणादिधर्मत्वेन न करणसञ्ज्ञा, देशकालौ तु न साधकतमौ; तेनोपायान्तेभ्यो यथोक्तविशेषेण यत् कर्तुरुपकरणं भवति, तत् करणम्। अत्र दैवव्यपाश्रययुक्तिव्यपाश्रयद्वैविध्ये तु सत्त्वावजयोऽपि भेषजमवरुद्धं ज्ञेयं; सत्त्वावजयो हि दृष्टद्वारोपकारी युक्तिव्यपाश्रये, तथाऽदृष्टद्वारोपकारी तु दैवव्यपाश्रये प्रविशति। अत एवोक्तं युक्तिव्यपाश्रयव्याकरणे— चेष्टाश्च दृष्टफला इति। चेष्टाशब्देन मनश्चेष्टाऽपि सत्त्वावजयलक्षणा गृह्यते। पुनरौषधस्य प्रकारान्तरेण द्वैविध्यमाह— अङ्गभेदादित्यादि। अङ्गं शरीरं स्वरूपमिति यावत्; तेन स्वरूपभेदादित्यर्थः। द्रव्यभूतं द्रव्यरूपम् एवमद्रव्यरूपम्। उपायाभिप्लुतमिति उपायव्याप्तम्, उपायग्रहणगृहीतमिति यावत्। एवं मन्यते— भयादयोऽमूर्ता भावा न साक्षादारोग्यकारणानि भवन्ति, किं तर्हि शरीरस्थितानेव वातादीन् तथा कुर्वन्ति समत्वेनोत्पाद्यमानान् येनारोग्यं भवति, न ह्यमूर्तानि मूर्तानां शरीरधातूनामुत्पत्तौ समवायिकारणानि भवन्ति; भेषजं तु द्रव्यभूतं समशरीरोत्पादे समवायिकारणं भवत्येव, तेन द्रव्यस्यारोग्यं प्रति साधकतमत्वं साधुः अमूर्तानां तु भयादीनां न भेषजवत् साधकतमत्वमिति कृत्वा द्रव्यजन्य एव धातुसाम्ये तेषामुपायत्वं युक्तम्। एवं सूक्ष्मया बुद्ध्या भयादीनामुपायत्वं, स्थूलया तु बुद्ध्या भेषजत्वमपीति कृत्वा भयादिषु भेषजव्यवहारश्चाचार्याभिमतो द्विविधभेषजेऽर्थे-ऽद्रव्यभूतभयादिग्रहणादुन्नीयते। न केवलमद्रव्यभूतं भेषजमुपायव्याप्तं, किं त्वन्येऽपि परिचारकादय उपायग्रहणगृहीता एवेत्याह— यथोक्ताः सिद्ध्युपायाश्चेति। यथोक्ताः सिद्ध्युपायाः परिचारकादयोऽत्र दशविधपरीक्ष्ये साक्षादनुक्तास्तेऽपि उपायाभिप्लुता एवेत्यर्थः। किंवा उपायाभिप्लुतमिति उपायमिश्रितम्। तत्र भयाद्यमूर्तभेषज एव यथोक्ता उपायाः कारणादिसौष्ठवसम्यगभिविधानरूपा अद्रव्यभूतभेषजपक्षगृहीता इत्यर्थः। तेन, भयादिषु तथोपायशब्दाभिधेयेषु च अद्रव्यभूतभेषजशब्दप्रयोगो भवतीति दर्शयति। ये तु 'उपायान्ताभिप्लुतम्' इति पठन्ति, ते देशकालावेव अद्रव्यभूतभेषजमिति वदन्ति; वदन्ति च द्रव्यशब्देन क्वाथकल्काद्युपयोजनीयं

द्रव्यमुच्यते इति। एतच्च नातिमनोहारि। अनेन चेति साधनभूतेन च ‘एवम्प्रकृत्या’ इत्यादिनोक्तेन तथा साध्येन च ‘एवंविधस्य पुरुषस्य’ इत्यादिनोक्तेन विशेषेण युक्तमभूदित्यर्थः॥८७॥

कार्ययोनिर्धातुवैषम्यं, तस्य लक्षणं विकारागमः। परीक्षा त्वस्य विकारप्रकृतेश्चैवोनातिरिक्तलिङ्गविशेषावेक्षणं विकारस्य च साध्यासाध्यमृदुदारुण-लिङ्गविशेषावेक्षणमिति॥८८॥

तस्य लक्षणं धातुवैषम्यस्य प्रत्यात्मरूपमित्यर्थः। विकारप्रकृतेरिति विकारकारणस्य दोषस्येत्यर्थः॥८८॥

कार्यं धातुसाम्यं, तस्य लक्षणं विकारोपशमः। परीक्षा त्वस्य— रुगुपशमनं, स्वरवर्णयोगः, शरीरोपचयः, बलवृद्धिः, अभ्यवहार्याभिलाषः, रुचिराहारकाले, अभ्यवहृतस्य चाहारस्य काले सम्यग्जरणं, निद्रालाभो यथाकालं, वैकारिणां च स्वप्नानामदर्शनं, सुखेन च प्रतिबोधनं, वातमूत्रपुरीषरेतसां मुक्तिः, सर्वाकारैर्मनोबुद्धीन्द्रियाणां चाव्यापत्तिरिति॥८९॥

सर्वाकारैरिति सर्वशुभलक्षणैः॥८९॥

कार्यफलं सुखावाप्तिः, तस्य लक्षणं— मनोबुद्धीन्द्रियशरीरतुष्टिः॥९०॥

सुखावाप्तिरिति आत्मगुणसुखप्राप्तिः॥९०॥

अनुबन्धस्तु खल्वायुः, तस्य लक्षणं— प्राणैः सह संयोगः॥९१॥

प्राणैः सह संयोग इति प्राणलक्षणेन वायुना योग इत्यर्थः। तेन प्राणशब्दस्यायुषो भिन्नार्थत्वाल्लक्ष्यलक्षणयोरभेदः॥९१॥

देशस्तु भूमिरातुरश्च॥९२॥

तत्र भूमिपरीक्षा आतुरपरिज्ञानहेतोर्वा स्यादौषधपरिज्ञानहेतोर्वा। तत्र तावदियमातुरपरिज्ञानहेतोः। तद्यथा— अयं कस्मिन् भूमिदेशे जातः संवृद्धो व्याधितो वा; तस्मिंश्च भूमिदेशे मनुष्याणामिदमाहारजातम्, इदं विहारजातम्, इदमाचारजातम्, एतावच्च बलम्, एवंविधं सत्त्वम्, एवंविधं सात्म्यम्, एवंविधो दोषः, भक्तिरियम्, इमे व्याधयः, हितमिदम्, अहितमिदमिति प्रायोग्रहणेन। औषधपरिज्ञानहेतोस्तु कल्पेषु भूमिपरीक्षा वक्ष्यते॥९३॥

क्रमप्राप्तं देशमाह— देश इत्यादि। आतुरशब्देनेह शङ्क्यमानातुर्यतया स्वस्थवृत्तोपपादनीयः स्वस्थोऽपि गृह्यते। सोऽपि परीक्ष्यत एव स्वस्थवृत्तप्रयोगार्थम्। परिशब्दो विशेषार्थः, तेनातुरस्य सकलदेशकृतविशेषेण ज्ञानमातुरपरिज्ञानम्। एवं भेषजपरिज्ञानेऽपि देशकृतविशेषज्ञानं परिज्ञानं बोद्धव्यम्। संवृद्ध इति वर्धितः। एवंविधं सात्म्यमिति ओकसात्म्यमित्यर्थः। इदं हितमित्यनेन च देशापेक्षया विपरीतगुणसात्म्यं ब्रूते। प्रायोग्रहणेनेति च्छेदः, प्रायोग्रहणेन नैकान्ततः परीक्षेतेति योजना। प्रायःशब्देन च देशेनाहाराद्यनुमानं न निश्चितं किं तु प्रायोभावीति दर्शयति। कल्पेष्विति मदनादिकल्पेषु। तत्र च यद्यपि प्रथम एव कल्पे भूमिपरीक्षा वक्तव्या, तथाऽप्यन्तरकल्पेष्वपि तदर्थस्यातिदेशेन कथनाद्बहुवचनं कृतम्, उत्तरकल्पवक्तव्यान्यपि हि द्रव्याणि यथोक्त एव देशे ग्राह्याणीति दर्शनार्थम्॥९२-९३॥

आतुरस्तु खलु कार्यदेशः। तस्य परीक्षा आयुषः प्रमाणज्ञानहेतोर्वा स्याद्, बलदोषप्रमाणज्ञानहेतोर्वा। तत्र तावदियं बलदोषप्रमाणज्ञानहेतोः; दोषप्रमाणानुरूपो हि भेषजप्रमाणविकल्पो बलप्रमाणविशेषापेक्षो भवति। सहसा ह्यतिबलमौषधमपरीक्षकप्रयुक्तमल्पबलमातुरमतिपातयेत्; न ह्यतिबलान्याग्नेयवायवीयान्यौषधा-न्यग्निक्षारशस्त्रकर्माणि वा शक्यन्तेऽल्पबलैः सोढुम्; असह्यातितीक्ष्णवेगत्वाद्धितानि सद्यःप्राणहराणि स्युः। एतच्चैव कारणमपेक्षमाणा हीनबलमातुरमविषादकरैर्मृदुसुकुमारप्रायैरुत्तरोत्तर-गुरुभिरविभ्रमैरनात्ययिकैश्चोपचरन्त्यौषधैः; विशेषतश्च नारीः, ता ह्यनवस्थितमृदुविवृतविक्लवहृदयाः प्रायः सुकुमार्योऽबलाः परसंस्तभ्याश्च। तथा बलवति बलवद्व्याधिपरिगते स्वल्पबलमौषधमपरीक्षकप्रयुक्तमसाधकमेव भवति। तस्मादातुरं परीक्षेत प्रकृतितश्च, विकृतितश्च, सारतश्च, संहननतश्च, प्रमाणतश्च, सात्म्यतश्च, सत्त्वतश्च, आहारशक्तितश्च, व्यायामशक्तितश्च, वयस्तश्चेति, बलप्रमाणविशेषग्रहणहेतोः॥९४॥

भूमिरूपं देशमभिधायातुररूपमाह— आतुरस्तु खल्वित्यादि। कार्यदेश इति कर्तव्यधातुसाम्याधार इत्यर्थः। बलस्य दोषस्य च प्रमाणं बलदोषप्रमाणम्। इयमिति अग्रे 'तस्मादातुरं परीक्षेत' इत्यादिग्रन्थवक्ष्यमाणा। अथ किमर्थं बलदोषप्रमाणपरीक्षा कर्तव्येत्याह— दोषप्रमाणेत्यादि। दोषप्रमाणापेक्षया भेषजप्रमाणं क्रियते, तेनैव सम्यक् साध्यसिद्धिर्यस्माद्भवति तस्माद्बलप्रमाणपरीक्षा शरीरस्य कर्तव्येति प्रकरणार्थः। बलप्रमाणविशेषापेक्ष इति यदि बलवच्छरीरं भवति तदैव दोषप्रमाणापेक्षया महौषधप्रमाणं भवति, विपर्यये तु न भवति। एतदेव विपर्ययेण व्याकरोति— सहसेत्यादि। अल्पबले रोगिण्यपरीक्षकप्रयुक्तमेवातिमात्रं भेषजं भवतीत्युक्तं, न तु परीक्षकप्रयुक्तमिति। सद्यःप्राणहराणि स्युरिति 'अल्पबले' इत्यर्थाद्गृह्यते। अविषादकरं शरीरमनसोरग्लानिकरम्। उत्तरोत्तरं प्रमाणलक्षणगुरुत्वं येषां, तैः। तेन यदि दुर्बले महादोषः, स च भूरिमात्रभेषजसाध्यस्तथाऽपि तदात्वव्यापत्तिभयान्न सहसा भेषजभूयस्त्वं कर्तव्यं, किन्तूत्तरोत्तरमभ्यासवशाद्बलमपेक्ष्य भेषजभूयस्त्वं कर्तव्यमिति दर्शयति। अविभ्रमैरिति

पाककालेऽप्यवैकारिकैः। अनात्ययिकैरिति न महाविपत्तिकरैः। यथोक्तगुणं भेषजं विशेषेण स्त्रीणां कर्तव्यमित्याह— विशेषत इत्यादि। हृदयशब्देन हृदयस्थं मन इति ज्ञेयम्। मृदुविवृतम् अगम्भीरम्। विक्लवं स्तोकक्लेशाभिभवनीयम्, अनेन च दुर्बलचेतस्त्वमुक्तम्। परसंस्तभ्याः न स्वयमात्मानं सत्त्वबलात् स्तम्भयन्ति। तथेत्यादिना स्वल्पप्रमाणभेषजदोषमाह। बलवद्व्याधिपरिगते इति वचनेन य एव बलवान् व्याधिर्बलवतः स एवानल्पभेषजासाध्यः; यस्तु बलवतोऽप्यल्पबलः सोऽल्पभेषजसाध्य एव। परीक्षाहेतुमभिधाय यथा शरीरं परीक्षणीयं तदाह— तस्मादित्यादि। बलप्रमाणविशेषग्रहणहेतोरित्यत्र देहबलं दोषबलं च सामान्येन गृह्यते। येन विकृतितः शरीरज्ञानं दोषबलज्ञानहेतोर्भवति, तदेव 'प्रकृत्यादीनां विकृतिवर्ज्यानां' इत्यादिना वक्ष्यति। किंवा बलं शरीरबलमेवोच्यते; तत्र च विकृतिबलेनापि शरीरबलं बुध्यत इति कृत्वा इह सामान्येनोक्तम्, उत्तरत्र तु विकृत्या दोषप्रमाणं प्रायो विज्ञायत इति कृत्वा 'विकृतिबलत्रैविध्येन दोषबलत्रैविध्यमनुमीयते' इत्युक्तम्॥९४॥

तत्र प्रकृत्यादीन् भावाननुव्याख्यास्यामः। तद्यथा— शुक्रशोणितप्रकृतिं, कालगर्भाशयप्रकृतिं, आतुराहारविहारप्रकृतिं, महाभूतविकारप्रकृतिं च गर्भशरीरमपेक्षते। एतानि हि येन येन दोषेणाधिकेनैकेनानेकेन वा समनुबध्यन्ते, तेन तेन दोषेण गर्भोऽनुबध्यते; ततः सा सा दोषप्रकृतिरुच्यते मनुष्याणां गर्भादिप्रवृत्ता। तस्माच्छ्लेष्मलाः प्रकृत्या केचित्, पित्तलाः केचित्, वातलाः केचित्, संसृष्टाः केचित्, समधातवः केचिद्भवन्ति। तेषां हि लक्षणानि व्याख्यास्यामः॥९५॥

प्रकृतिमिति स्वभावम्। एतानीति शुक्रादीनि। अत्र शुक्रे शोणिते वा यादृगवस्थो दोषस्तादृग्गर्भे प्रकृतिर्भवति; तथा शुक्रशोणितमेलककाले ऋतुरूपे यो दोष उत्कटो भवति, स प्रकृतिमारभते; एवं गर्भाशयस्थश्च दोषः; मातुराहारविहारौ तत्कालीनौ यद्दोषकरणस्वभावौ, सा च प्रकृतिर्गर्भशरीरे भवति। एषु च प्रकृत्यारम्भकेषु कारणेषु यद्बलवद्भवति कारणान्तरबृंहितं च, तदेव प्रकृत्यारम्भकं

भवति। कालादयश्च शुक्रशोणितमेव कुर्वन्तः प्रकृतिजनका भवन्तीति तन्त्रान्तरे शुक्रशोणितगतदोषेणैव प्रकृत्युत्पादो दर्शितः। गर्भादिप्रवृत्तेति गर्भस्यादिमेलके प्रवृत्ता। अत्र च समैर्दोषैर्वृद्धैर्गर्भजन्मैव न भवतीति विकृतदोषत्रयप्रकृतेरनभिधानादिति ज्ञेयम्। प्रकृतिविकारश्च सूत्रस्थान एव व्याकृतः॥९५॥

श्लेष्मा हि स्निग्धश्लक्ष्णमृदुमधुरसारसान्द्रमन्दस्तिमितगुरुशीतविज्जलाच्छः। तस्य स्नेहाच्छ्लेष्मलाः स्निग्धाङ्गाः, श्लक्ष्णत्वाच्छ्लक्ष्णाङ्गाः, मृदुत्वाद्दृष्टिसुखसुकुमारावदातगात्राः, माधुर्यात् प्रभूतशुक्रव्यवायापत्याः, सारत्वात् सारसंहतस्थिरशरीराः, सान्द्रत्वादुपचितपरिपूर्णसर्वाङ्गाः, मन्दत्वान्मन्दचेष्टाहारव्याहाराः, स्तैमित्यादशीघ्रारम्भक्षोभविकाराः, गुरुत्वात् साराधिष्ठितावस्थितगतयः, शैत्यादल्पक्षुत्तृष्णासन्तापस्वेददोषाः, विज्जलत्वात् सुश्लिष्टसारसन्धिबन्धनाः, तथाऽच्छत्वात् प्रसन्नदर्शनाननाः प्रसन्नस्निग्धवर्णस्वराश्च भवन्ति। त एवं गुणयोगाच्छ्लेष्मला बलवन्तो वसुमन्तो विद्यावन्त ओजस्विनः शान्ता आयुष्मन्तश्च भवन्ति॥९६॥

मृदुत्वं जलकृतम्। अवदातगात्रा इति मृदुत्वादेवावदातत्वम्। अशीघ्रशब्द आरम्भादिभिः प्रत्येकमभिसम्बध्यते। सारगतयो न स्खलन्ति, अधिष्ठितगतयः सर्वेण पदेन महीमाक्रामन्ति, अवस्थितगतय इति अवस्थितत्वेन न चपला गतिर्भवति। प्रसन्ने दर्शनानने यस्य स तथा। वसुमत्त्वादि प्रकृतिरूपं यद्भवति, तत् प्रकृतिप्रभावाज्ज्ञेयम्॥९६॥

पित्तमुष्णं तीक्ष्णं द्रवं विस्रमम्लं कटुकञ्च। तस्यौष्ण्यात् पित्तला भवन्त्युष्णासहा, उष्णमुखाः, सुकुमारावदातगात्राः, प्रभूतविप्लुव्यङ्गतिलपिडकाः, क्षुत्पिपासावन्तः, क्षिप्रवलीपलितखालित्यदोषाः, प्रायोमृद्वल्पकपिलश्मश्रुलोमकेशाश्च; तैक्ष्ण्यात्तीक्ष्णपराक्रमाः, तीक्ष्णाग्नयः, प्रभूताशनपानाः, क्लेशासहिष्णवो, दन्दशूकाः; द्रवत्वाच्छिथिलमृदुसन्धिमांसाः, प्रभूतसृष्टस्वेदमूत्रपुरीषाश्च; विस्रत्वात्

प्रभूतपूतिकक्षास्यशिरःशरीरगन्धाः; कट्वम्लत्वादल्पशुक्रव्यवायापत्याः; त एवं गुणयोगात् पित्तला मध्यबला मध्यायुषो मध्यज्ञानविज्ञानवित्तोपकरणवन्तश्च भवन्ति॥९७॥

दन्दशूकाः पुनः पुनर्भक्षणशीलाः। प्रभूताशनत्वं तु बहुभक्षणत्वेन। प्रभूतः पूतिः कक्षाप्रभृतिषु गन्धो येषां ते तथा॥९७॥

वातस्तु रूक्षलघुचलबहुशीघ्रशीतपरुषविशदः। तस्य रौक्ष्याद्वातला रूक्षापचितात्पशरीराः प्रततरूक्षक्षामसन्नसक्तजर्जरस्वरा जागरूकाश्च भवन्ति, लघुत्वाल्लघुचपलगतिचेष्टाहारव्याहाराः, चलत्वादनवस्थितसन्ध्यक्षिभ्रूहन्वोष्ठजिह्वाशिरःस्कन्धपाणिपादाः, बहुत्वाद्बहुप्रलापकण्डरासिराप्रतानाः, शीघ्रत्वाच्छीघ्रसमारम्भक्षोभविकाराः शीघ्रत्रासरागविरागाः श्रुतग्राहिणोऽल्पस्मृतयश्च, शैत्याच्छीतासहिष्णवः प्रततशीतकोद्वेपकस्तम्भाः, पारुष्यात् परुषकेशश्मश्रुरोमनखदशनवदनपाणिपादाः, वैशद्यात् स्फुटिताङ्गावयवाः सततसन्धिशब्दगामिनश्च भवन्ति; त एवं गुणयोगाद्वातलाः प्रायेणाल्पबलाश्चाल्पायुषश्चाल्पापत्याश्चाल्पसाधनाश्चाल्पधनाश्च भवन्ति॥९८॥

संसर्गात् संसृष्टलक्षणाः॥९९॥

प्रततः प्रसृतः। सन्नः हीनः, सक्तः बद्धः, जर्जरः भग्नपात्रध्वनिसमः। सततसन्धिशब्दगामिन इति सन्धिस्फुटनशब्दवन्तः॥९८-९९॥

सर्वगुणसमुदितास्तु समधातवः। इत्येवं प्रकृतितः परीक्षेत॥१००॥

सर्वगुणसमुदिता इति सर्वप्रकृतिषूक्तप्रशस्तगुणयुक्ताः; यदुक्तं वाग्भटे— 'समधातुः समस्तासु श्रेष्ठा' (वा.सू.अ.१) इति। यदि च प्रशस्तगुणवान् न स्यात्, न तदा श्रेष्ठत्वं स्यात्। साम्यस्थिताश्च दोषाः साम्यप्रभावादेव गुणान् परं कुर्वते, न दोषानिति ज्ञेयम्॥१००॥

विकृतितश्चेति विकृतिरुच्यते विकारः। तत्र विकारं हेतु-दोष-दूष्य-प्रकृति-देश-काल-बलविशेषैर्लिङ्गतश्च परीक्षेत, न ह्यन्तरेण हेत्वादीनां बलविशेषं व्याधिबलविशेषोपलब्धिः। यस्य हि व्याधेर्दोष-दूष्य-प्रकृति-देश-काल-बलसाम्यं भवति, महच्च हेतुलिङ्गबलं, स व्याधिर्बलवान् भवति; तद्विपर्ययाच्चाल्पबलः; मध्यबलस्तु दोषदूष्यादीनामन्यतमसामान्याद्धेतुलिङ्गमध्यबलत्वाच्चो-पलभ्यते॥ १०१॥

साम्यं भवतीति परस्परतुल्यगुणता भवति। महच्च हेतुलिङ्गबलमिति हेतवो लिङ्गानि च बलवन्ति भूयांसि च। अन्यतमसामान्यादिति दोषादीनां येन केनचित् सामान्ये सतीत्यर्थः॥१०१॥

सारतश्चेति साराण्यष्टौ पुरुषाणां बलमानविशेषज्ञानार्थमुपदिश्यन्ते; तद्यथा—त्वग्रक्तमांसमेदोऽस्थिमज्जशुक्रसत्त्वानीति॥१०२॥

तत्र स्निग्धश्लक्ष्णमृदुप्रसन्नसूक्ष्माल्पगम्भीरसुकुमारलोमा सप्रभेव च त्वक् त्वक्साराणाम्। सा सारता सुखसौभाग्यैश्वर्योपभोगबुद्धिविद्यारोग्यप्रहर्षणान्यायुष्यत्वं चाचष्टे॥१०३॥

कर्णाक्षिमुखजिह्वानासौष्ठपाणिपादतलनखललाटमेहनं स्निग्धरक्तवर्णं श्रीमद्भ्राजिष्णु रक्तसाराणाम्। सा सारता सुखमुद्धतां मेधां मनस्वित्वं सौकुमार्यमनतिबलमक्लेशसहिष्णुत्वमुष्णासहिष्णुत्वं चाचष्टे॥ १०४॥

शङ्खललाटकृकाटिकाक्षिगण्डहनुग्रीवास्कन्धोदरकक्षवक्षःपाणिपादसन्धयः स्थिरगुरुशुभमांसोपचिता मांससाराणाम्। सा सारता क्षमां धृतिमलौल्यं वित्तं विद्यां सुखमार्जवमारोग्यं बलमायुश्च दीर्घमाचष्टे॥ १०५॥

वर्णस्वरनेत्रकेशलोमनखदन्तौष्ठमूत्रपुरीषेषु विशेषतः स्नेहो मेदःसाराणाम्। सा सारता वित्तैश्वर्यसुखोपभोगप्रदानान्यार्जवं सुकुमारोपचारतां चा चष्टे॥ १०६॥

पार्ष्णिगुल्फजान्वरत्निजत्रुचिबुकशिरःपर्वस्थूलाः स्थूलास्थिनखदन्ताश्चास्थिसाराः। ते महोत्साहाः क्रियावन्तः क्लेशसहाः सारस्थिरशरीरा भवन्त्यायुष्मन्तश्च॥ १०७॥

मृद्वङ्गा बलवन्तः स्निग्धवर्णस्वराः स्थूलदीर्घवृत्तसन्धयश्च मज्जसाराः। ते दीर्घायुषो बलवन्तः श्रुतवित्तविज्ञानापत्यसम्मानभाजश्च भवन्ति॥ १०८॥

सौम्याः सौम्यप्रेक्षिणः क्षीरपूर्णलोचना इव प्रहर्षबहुलाः स्निग्धवृत्तसारसमसंहतशिखरदशनाः प्रसन्नस्निग्धवर्णस्वरा भ्राजिष्णवो महास्फिचश्च शुक्रसाराः। ते स्त्रीप्रियोपभोगा बलवन्तः सुखैश्वर्यारोग्यवित्तसम्मानापत्यभाजश्च भवन्ति॥ १०९॥

स्मृतिमन्तो भक्तिमन्तः कृतज्ञाः प्राज्ञाः शुचयो महोत्साहा दक्षा धीराः समरविक्रान्तयोधिनस्त्यक्तविषादाः सुव्यवस्थितगतिगम्भीरबुद्धिचेष्टाः कल्याणाभिनिवेशिनश्च सत्त्वसाराः। तेषां स्वलक्षणैरेव गुणा व्याख्याताः॥ ११०॥

तत्र सर्वैः सारैरुपेताः पुरुषा भवन्त्यतिबलाः परमसुखयुक्ताः क्लेशसहाः सर्वारम्भेष्वात्मनि जातप्रत्ययाः कल्याणाभिनिवेशिनः स्थिरसमाहितशरीराः सुसमाहितगतयः सानुनादस्निग्धगम्भीरमहास्वराः सुखैश्वर्यवित्तोपभोगसम्मानभाजो मन्दजरसो मन्दविकाराः प्रायस्तुल्यगुणविस्तीर्णापत्याश्चिरजीविनश्च॥१११॥

अतो विपरीतास्त्वसाराः॥११२॥

मध्यानां मध्यैःसारविशेषैर्गुणविशेषा व्याख्याता भवन्ति॥११३॥

इति साराण्यष्टौ पुरुषाणां बलप्रमाणविशेषज्ञानार्थमुपदिष्टानि भवन्ति॥११४॥

कथं नु शरीरमात्रदर्शनादेव भिषङ्मुह्येदयमुपचितत्वाद्बलवान्, अयमल्पबलः कृशत्वात्, महाबलोऽयं महाशरीरत्वात्, अयमल्पशरीरत्वादल्पबल इति; दृश्यन्ते ह्यल्पशरीराः कृशाश्चैके बलवन्तः; तत्र पिपीलिकाभारहरणवत् सिद्धिः। अतश्च सारतः परीक्षेतेत्युक्तम्॥११५॥

सारतश्चेत्यादौ सारशब्देन विशुद्धतरो धातुरुच्यते। सप्रभेवेति प्रभायुक्ता त्वक्। त्वक्साराणामिति च्छेदः। अथेयं सारता किं करोतीत्याह— सा सारतेत्यादि। एवमन्यत्रापि सा सारतेत्यादि व्याख्यातव्यम्। श्रीमदिति शोभायुक्तम्। अरत्निः कफोणिका। शिखरदशना इति शोभनदशनाः। स्त्रीप्रिय उपभोगः सम्भोगो येषां ते तथा। समरे विक्रम्य युध्यन्तीति समरविक्रान्तयोधिनः। स्वस्थिता इति न परस्थिताः। तुल्यगुणविस्तीर्णापत्या इति जनितात्मसदृशापत्याः। प्रायःशब्दो नियमेन निषेधयति। मध्यानामिति स्तोकसाराणाम्। मध्यैः सारविशेषैरिति ये तत्र सम्भवन्ति सारास्तद्युक्तैः सारगुणैरित्यर्थः। उपचितत्वादिति स्थूलत्वात्। महाशरीरत्वादिति अतिप्रमाणशरीरत्वात्।

पिपीलिकाभारहरणवदिति स्वल्पाः पिपीलिका यथा सारशरीरत्वेन महान्तं भारं नयन्ति, तथाऽल्पकृशशरीरा इत्यर्थः॥१०२-११५॥

संहननतश्चेति संहननं, संहतिः, संयोजनमित्येकोऽर्थः। तत्र समसुविभक्तास्थि, सुबद्धसन्धि, सुनिविष्टमांसशोणितं, सुसंहतं शरीरमित्युच्यते। तत्र सुसंहतशरीराः पुरुषा बलवन्तः, विपर्ययेणाल्पबलाः, मध्यत्वात् संहननस्य मध्यबला भवन्ति॥११६॥

संहतिरिति निबिडसन्धानतेत्यर्थः॥११६॥

प्रमाणतश्चेति शरीरप्रमाणं पुनर्यथास्वेनाङ्गुलिप्रमाणेनोपदेक्ष्यते उत्सेधविस्तारायामैर्यथाक्रमम्। तत्र पादौ चत्वारि षट् चतुर्दशाङ्गुलानि, जङ्घे त्वष्टादशाङ्गुले षोडशाङ्गुलपरिक्षेपे च, जानुनी चतुरङ्गुले षोडशाङ्गुलपरिक्षेपे, त्रिंशदङ्गुलपरिक्षेपावष्टादशाङ्गुलावूरु, षडङ्गुलदीर्घौ वृषणावष्टाङ्गुलपरिणाहौ, शेफः षडङ्गुलदीर्घं पञ्चाङ्गुलपरिणाहं, द्वादशाङ्गुलिपरिणाहो भगः, षोडशाङ्गुलविस्तारा कटी, दशाङ्गुलं बस्तिशिरः, दशाङ्गुलविस्तारं द्वादशाङ्गुलमुदरं, दशाङ्गुलविस्तीर्णे द्वादशाङ्गुलायामे पार्श्वे, द्वादशाङ्गुलं स्तनान्तरं, द्व्यङ्गुलं स्तनपर्यन्तं, चतुर्विंशत्यङ्गुलविशालं द्वादशाङ्गुलोत्सेधमुरः, द्व्यङ्गुलं हृदयम्, अष्टाङ्गुलौ स्कन्धौ, षडङ्गुलावंसौ, षोडशाङ्गुलौ प्रबाहू, पञ्चदशाङ्गुलौ प्रपाणी, हस्तौ द्वादशाङ्गुलौ, कक्षावष्टाङ्गुलौ, त्रिकं द्वादशाङ्गुलोत्सेधम्, अष्टादशाङ्गुलोत्सेधं पृष्ठं, चतुरङ्गुलोत्सेधा द्वाविंशत्यङ्गुलपरिणाहा शिरोधरा, द्वादशाङ्गुलोत्सेधं चतुर्विंशत्यङ्गुलपरिणाहमाननं, पञ्चाङ्गुलमास्यं, चिबुकौष्ठकर्णाक्षिमध्यनासिकाललाटं चतुरङ्गुलं, षोडशाङ्गुलोत्सेधं द्वात्रिंशदङ्गुलपरिणाहं शिरः; इति पृथक्त्वेनाङ्गावयवानां मानमुक्तम्। केवलं पुनःशरीरमङ्गुलिपर्वाणि चतुरशीतिः। तदायामविस्तारसमं समुच्यते। तत्रायुर्बलमोजः सुखमैश्वर्यं वित्तमिष्टाश्चापरे भावा भवन्त्यायत्ताः प्रमाणवति शरीरे; विपर्ययस्त्वतो हीनेऽधिके वा॥११७॥

प्रमाणतश्चेत्यादिना प्रशस्तं प्रमाणमङ्गावयवानामाह। पादौ उत्सेधेन चत्वारि, विस्तारेण षट्, दैर्घ्येण चतुर्दशाङ्गुलानीति यथाक्रमं भवतः। जङ्घा जान्वधस्तादुच्यते। परिक्षेपः परिणाहः। जानुः जङ्घोरुसन्धिः। परिणाहपरिमाणं च यदुच्यते तन्मध्यस्थानस्य, तेनासमपरिणाहमानेषु जङ्घादिषु मध्यस्थानमेतज्ज्ञेयम्। कठ्या उत्सेधपरिमाणं नोक्तं, तस्या उत्सेधस्योर्वन्तराधिसन्धित्वेन पृथगुत्सेधप्रमाणस्याविद्यमानत्वात्। प्रबाहुरंसादर्वाक् कफोणिपर्यन्तम्। प्रपाणिः कफोण्यधस्तात्। त्रिकमिति गुदास्थ्नः प्रभृति कटीकपालोर्ध्वपर्यन्तम्। चिबुकं च ओष्ठश्च कर्णौ च अक्षिमध्यं च नासिका च ललाटं च प्रति प्रति चतुरङ्गुलम्। षडङ्गुलोत्सेधं शिर इति पृष्ठमनु ग्रीवाया उपरि ज्ञेयम्। केवलमिति पादतलात् प्रभृति शिरःपर्यन्तं चतुरशीत्यङ्गुलं भवति, एवं सार्धत्रिहस्तप्रमाणत्वं शरीरस्य स्वहस्तेन भवति। अत्र च प्रत्यवयवोत्सेधेन चतुरशीत्यङ्गुलादधिकं यच्छरीरं भवति, तदवयवानामवयवान्तरदैर्घ्यानुप्रविष्टानां ग्रहणात्; तेन प्रत्यवयवदैर्घ्यमानेन न चतुरशीत्यङ्गुलं गणनीयं किं तु समुदितमेव शरीरम्। तत्र पादस्याङ्गुलानि चत्वारि, जङ्घाया अष्टादश, जानुनश्चत्वारि, ऊर्वोरष्टादश, पृष्ठस्याष्टादश, ग्रीवायाश्चत्वारि, शिरसः षट्, एवं चतुरशीत्यङ्गुलानि घटन्ते। **सुश्रुतेन** समं योऽत्र मानविरोधः सोऽत्राङ्गुलिमानभेदाच्छमयितव्यः। तत्र हि सविंशमङ्गुलिशतं पुरुषमानमुक्तम्। तेन तत्राङ्गुलि(ल)मानमेवाल्पं ज्ञेयम्। आयामविस्तारसममिति यथोक्तप्रत्यवयवायामविस्तारयुक्तं; किंवा, यावताऽऽयामेन चतुरशीत्यङ्गुलं, तावद्यदि विस्तृतबाहुद्वयप्रमाणेन च विस्तारेण शरीरं भवति, तदा आयामविस्तारसमं भवति। तत्रेति यथोक्तप्रमाणवति शरीरे इति योजनीयम्। हीने इति हीनप्रमाणे। अधिके इति अधिकप्रमाणे॥११७॥

सात्म्यतश्चेति सात्म्यं नाम तद्यत् सातत्येनोपसेव्यमानमुपशेते। तत्र ये घृतक्षीरतैलमांसरससात्म्याः सर्वरससात्म्याश्च ते बलवन्तः क्लेशसहाश्चिरजीविनश्च भवन्ति, रूक्षसात्म्याः पुनरेकरससात्म्याश्च ये ते

प्रायेणाल्पबला अल्पक्लेशसहा अल्पायुषोऽल्पसाधनाश्च भवन्ति, व्यामिश्रसात्म्यास्तु ये ते मध्यबलाः सात्म्यनिमित्ततो भवन्ति॥ ११८॥

सात्म्यतश्चेत्यत्र सात्म्यशब्देन ओकसात्म्यमुच्यते, प्रकृतिसात्म्यादीनां भेषजादिपरीक्षयैव परीक्षितत्वादिति ज्ञेयम्। अल्पसाधना इति अल्पभेषजाः, एकरससात्म्यानां पञ्चरसा असात्म्यत्वेनापथ्या इति भावः॥ ११८॥

सत्त्वतश्चेति सत्त्वमुच्यते मनः। तच्छरीरस्य तन्त्रकमात्मसंयोगात्। तत् त्रिविधं बलभेदेन— प्रवरं, मध्यम्, अवरं चेति; अतश्च प्रवरमध्यावरसत्त्वाः पुरुषा भवन्ति। तत्र प्रवरसत्त्वाः सत्त्वसारास्ते सारेषूपदिष्टाः, स्वल्पशरीरा ह्यपि ते निजागन्तुनिमित्तासु महतीष्वपि पीडास्वव्यथा दृश्यन्ते सत्त्वगुणवैशेष्यात्; मध्यसत्त्वास्त्वपरानात्मन्युपनिधाय संस्तम्भयन्त्यात्मनाऽऽत्मानं परैर्वाऽपि संस्तभ्यन्ते; हीनसत्त्वास्तु नात्मना नापि परैः सत्त्वबलं प्रति शक्यन्ते उपस्तम्भयितुं, महाशरीरा ह्यपि ते स्वल्पानामपि वेदनानामसहा दृश्यन्ते, सन्निहितभयशोकलोभमोहमाना रौद्रभैरवद्विष्टबीभत्सविकृतसङ्कथास्वपि च पशुपुरुषमांसशोणितानि चावेक्ष्य विषादवैवर्ण्यमूर्च्छोन्मादभ्रमप्रपतनानामन्यतममाप्नुवन्त्यथवा मरणमिति॥ ११९॥

तन्त्रकमिति प्रेरक धारकं च। ते सारेषूपदिष्टा इति य एव सत्त्वसारास्त एव प्रवरसत्त्वा इति ज्ञेया इत्यर्थः। सत्त्वगुणवैशेष्यादिति सत्त्वगुणेन संस्तम्भितवेदनाविकारत्वादव्यथा इव दृश्यन्त इत्यर्थः। परानात्मन्युपनिधायेति परं वेदनासहं दृष्ट्वा, 'चेदयं वेदनासहस्तदहमपि वेदनासहो भवामि' इति कृत्वा वेदनां सहत इत्यर्थः॥ ११९॥

आहारशक्तितश्चेति आहारशक्तिरभ्यवहरणशक्त्या जरणशक्तया च परीक्ष्या; बलायुषी ह्याहारायत्ते॥ १२०॥

जरणशक्त्या चेतिवचनाद्यो बहु भुङ्क्ते परिणमयति च, असावाहारशक्तिमानिहोच्यते, न तु वस्तुगपरिणतिगृहीतः॥१२०॥

व्यायामशक्तितश्चेति व्यामामशक्तिरपि कर्मशक्तया परीक्ष्या। कर्मशक्तया ह्यनुमीयते बलत्रैविध्यम्॥१२१॥

कर्म भारवहनादि, तत्र शक्तिः कर्मशक्तिः॥१२१॥

वयस्तश्चेति कालप्रमाणविशेषापेक्षिणी हि शरीरावस्था वयोऽभिधीयते। तद्वयो यथास्थूलभेदेन त्रिविधं — बालं, मध्यं, जीर्णमिति। तत्र बालमपरिपक्वधातुमजातव्यञ्जनं सुकुमारमक्लेशसहमसम्पूर्णबलं श्लेष्मधातुप्रायमाषोडशवर्षं, विवर्धमानधातुगुणं पुनः प्रायेणानवस्थितसत्त्वमात्रिंशद्वर्षमुपदिष्टं; मध्यं पुनः समत्वागतबलवीर्यपौरुषपराक्रमग्रहणधारणस्मरणवचनविज्ञानसर्वधातुगुणं बलस्थितमवस्थित-सत्त्वमविशीर्यमाणधातुगुणं पित्तधातुप्रायमाषष्टिवर्षमुपदिष्टम्; अतः परं हीयमानधात्विन्द्रिय-बलवीर्यपौरुषपराक्रमग्रहणधारणस्मरणवचनविज्ञानं भ्रश्यमानधातुगुणं वायुधातुप्रायं क्रमेण जीर्णमुच्यते आवर्षशतम्। वर्षशतं खल्वायुषः प्रमाणमस्मिन् काले; सन्ति च पुनरधिकोनवर्षशतजीविनोऽपि मनुष्याः; तेषां विकृतिवर्ज्यैः प्रकृत्यादिबलविशेषैरायुषो लक्षणतश्च प्रमाणमुपलभ्य वयसस्त्रित्वं विभजेत्॥१२२॥

वयःस्वरूपमाह— कालेत्यादि। कालप्रमाणविशेषापेक्षिणीति कालस्य प्रमाणविशेषेण योगाद्भवतीत्यर्थः। यथास्थूलभेदेनेतिवचनाद् बालबालतराद्यवस्थाभेदादधिकमपि वयो भवतीति दर्शयति। बालो द्विविधः— अपरिपक्वधातुराषोडशवर्षात्, तथा वर्धमानधातुरात्रिंशत्तमात्। तदेतयोर्बालभेदयोरुपयुक्तत्वेन भेदमाह— तत्रेत्यादि।

षोडशवर्षीयो हि बालोऽल्पमृदुभेषजोपचर्यत्वादिना शास्त्रे वक्तव्यः, तदूर्ध्वं बालोऽपि नाल्पभेषजत्वादिना तथोपचर्यते। क्रमेणेति नैकदैव, षष्टिवर्षादूर्ध्वं धात्वादिहानिरिति दर्शयति। अस्मिन् काल इति कलौ। अथाधिकवर्षशतजीविनां कथं वयस्त्रित्वं विभक्तव्यमित्याह— तेषामित्यादि। प्रकृत्यादयो दश परीक्ष्या अत्रैव प्रकृतिविकृतिसारेत्यादिनोक्ताः; अत्र विकृतिवर्ज्यानामित्यनेन विकृतेः परित्यागः कृतः। तेन प्रकृतिसारादीनां बलविशेषैः प्रवरावरमध्यभेदभिन्नप्रकृत्यादिभेदेन कृतैः प्रवरावरमध्यरूपैरायुषः प्रमाणं प्रवरावराद्युपलभ्य वयस्त्रित्वं विभजनीयम्। एतेन यस्य प्रकृतिबलमुत्तमं श्लेष्मप्रकृतेः समप्रकृतेर्वा तस्यायुर्दीर्घं भवति, हीने तु प्रकृतिबले हीनम्; एवं सारादावपि ज्ञेयम्। एवं वयःप्रकृत्यादीनां सर्वेषामेवोत्तमेन बलेन युक्तः स शताधिकं जीवति। तेन, तस्य विंशतिवर्षाधिकशतं यद्यायुरुपलभ्यते, तदा पूर्वोक्तवयोविभागानुमानादाषड्विंशद्वर्षाणि स बालो भवति, द्विसप्ततिवर्षश्च स मध्यः, ततो वृद्ध इत्यादि विभजनीयम्। न केवलं प्रकृत्यादिनाऽऽयुरवधार्यं, किन्त्वायुर्लक्षणैरपि शरीरप्रतिबद्धैः शारीरे वक्तव्यैरित्याह— आयुषो लक्षणतश्चेति। आयुर्लक्षणेनापि वयोऽवधार्य बाल्यादिवयोविभागः कर्तव्य इत्यर्थः। अयं च स्तोकन्यूनाधिकशतायुषां बाल्यादिविभागः कर्तव्यः; येषां तु विंशतिवर्षादि परमायुषो मानं न तेषां तदनुमानेन वयोभेदः, ते ह्यप्राप्तमध्यावस्था एव म्रियन्ते॥१२२॥

एवं प्रकृत्यादीनां विकृतिवर्ज्यानां भावानां प्रवरमध्यावरविभागेन बलविशेषं विभजेत्। विकृतिबलत्रैविध्येन तु दोषबलं त्रिविधमनुमीयते। ततो भैषज्यस्य तीक्ष्णमृदुमध्यविभागेन त्रैविध्यं विभज्य यथादोषं भैषज्यमवचारयेदिति॥१२३॥

प्रकृत्यादिविभागेन शरीरबलपरीक्षामुक्तामुपसंहरति— एवमित्यादि। दोषबलं तु यथा शरीररूपदेशपरीक्षया परीक्ष्यं तदाह— विकृतिबलेत्यादि॥१२३॥

आयुषः प्रमाणज्ञानहेतोः पुनरिन्द्रियेषु जातिसूत्रीये च लक्षणान्युपदेक्ष्यन्ते॥१२४॥

शरीरबलदोषबलपरीक्षार्थं शरीरपरीक्षां प्रतिज्ञातामभिधाय पुनरायुः प्रमाणज्ञानार्थं शरीरपरीक्षामतिदिशति— आयुष इत्यादि। इन्द्रियेष्विति इन्द्रियस्थानाध्यायेषु। तत्रेन्द्रिये वर्णादिविकृत्या रिष्टरूपया ह्रसितमायुर्ज्ञातव्यं, जातिसूत्रीये शारीरे च जन्मप्रतिबद्धैर्लक्षणैर्दीर्घायुष्ट्वमल्पायुष्ट्वं च ज्ञातव्यम्॥१२४॥

कालः पुनः संवत्सरश्चातुरावस्था च। तत्र संवत्सरो द्विधा त्रिधा षोढा द्वादशधा भूयश्चाप्यतः प्रविभज्यते तत्तत्कार्यमभिसमीक्ष्य। अत्र खलु तावत् षोढा प्रविभज्य कार्यमुपदेक्ष्यते— हेमन्तो ग्रीष्मो वर्षाश्चेति शीतोष्णवर्षलक्षणास्त्रय ऋतवो भवन्ति, तेषामन्तरेष्वितरे साधारणलक्षणास्त्रय ऋतवः— प्रावृड्शरद्वसन्ता इति। प्रावृडिति प्रथमः प्रवृष्टः कालः, तस्यानुबन्धो हि वर्षाः। एवमेते संशोधनमधिकृत्य षट् विभज्यन्ते ऋतवः॥१२५॥

देशपरीक्षां समाप्य कालपरीक्षामाह— काल इत्यादि। संवत्सरोऽयनभेदेन द्विविधः, शीतोष्णवर्षभेदेन त्रिविधः, ऋतुभेदेन षोढा, मासभेदेन द्वादशधा, पक्षभेदाच्चतुर्विंशतिधा, प्रहरादिनाऽनेकधेति ज्ञेयम्। तत्तत् कार्यमिति अयनादिज्ञेयभेदेन सम्पाद्यं कार्यमित्यर्थः। साधारण इति अनतिशीतोष्णवर्षः। प्रावृषं विभजते— प्रावृडित्यादि। प्रथमप्रवृष्टशब्देनाऽऽषाढश्रावणावुच्येते। एतच्च द्विमासमृतुभेदभागमादिं कृत्वा शेषमासद्विकेन वर्षादयो यथाक्रमं ज्ञेयाः। अयं च ऋतुक्रमो न रसोत्पत्त्यादौ, किन्तु शरीरशोधनप्रवृत्तावेवेति दर्शयता 'संशोधनमधिकृत्य' इत्युक्तम्, एवमेव च क्रमं सिद्धौ वक्ष्यति— "प्रावृट् शुक्रनभौ ज्ञेयौ शरदूर्जसहौ पुनः। तपस्यश्च मधुश्चैव वसन्तः शोधनं प्रति" (सि.अ.६) इति। अस्मिन्नृतुक्रमे शिशिरो नास्ति। ये तु ब्रुवते— गङ्गाया दक्षिणकूले वर्षा बहु भवति तेन तत्र प्रावृडादिक्रमः, गङ्गोत्तरकूले शीतं बहु भवति तेन तत्र हेमन्तशिशिरौ भवतः; उक्तं हि **काश्यपेन**—

यत्— “भूयो वर्षति पर्जन्यो गङ्गाया दक्षिणे जलम्। तेन प्रावृडवर्षाख्यौ ऋतू तेषां प्रकल्पितौ॥ गङ्गाया उत्तरे कूले हिमवदम्बुसङ्कुले। भूयः शीतमतस्तेषां हेमन्तशिशिरावृतू” इति। एत्तच्च न, अत्र ‘संशोधनमधिकृत्य’ इति वचनात्। यदि देशकृतोऽयं भेदः स्यात्तदा तमेव भेदकं ब्रूयात्, न संशोधनम्। तेन, काश्यपोक्तदेशभेदेन प्रावृडादिक्रमो न तावदिहाभिमतः। अविकल्पकाश्च शरीरौषधानामिति न शरीरस्य कृत्रिमतापादितगुणेन भेदकाः, तथौषधस्य च न प्रमाणोत्कर्षापकर्षभेदकारका इत्यर्थः। विकल्पकाश्च शरीरौषधानामिति यदाऽऽत्ययिकत्वेनावश्यकर्तव्या भवन्ति वमनादयः, तदौषधस्य कृत्रिमगुणोपधानेन यथावक्ष्यमाणेन, तथा शरीरस्य च विकल्पका भवन्ति॥ १२५॥

तत्र साधारणलक्षणेष्वृतुषु वमनादीनां प्रवृत्तिर्विधीयते, निवृत्तिरितरेषु। साधारणलक्षणा हि मन्दशीतोष्णवर्षत्वात् सुखतमाश्च भवन्त्यविकल्पकाश्च शरीरौषधानाम्, इतरे पुनरत्यर्थशीतोष्णवर्षत्वाद्दुःखतमाश्च भवन्ति विकल्पकाश्च शरीरौषधानाम्॥ १२६॥

तत्र हेमन्ते ह्यतिमात्रशीतोपहतत्वाच्छरीरमसुखोपपन्नं भवत्यतिशीतवाताध्मातमतिदारुणीभूतमवबद्धदोषं च, भेषजं पुनः संशोधनार्थमुष्णस्वभावमतिशीतोपहतत्वान्मन्दवीर्यत्वमापद्यते, तस्मात्तयोः संयोगे संशोधनमयोगायोपपद्यते शरीरमपि च वातोपद्रवाय। ग्रीष्मे पुनर्भृशोष्णोपहतत्वाच्छरीरमसुखोपपन्नं भवत्युष्णवातातपाध्मातमतिशिथिलमत्यर्थप्रविलीनदोषं, भेषजं पुनः संशोधनार्थमुष्णस्वभावमुष्णानुगमनात्तीक्ष्णतरत्वमापद्यते, तस्मात्तयोः संयोगे संशोधनमतियोगायोपपद्यते शरीरमपि पिपासोपद्रवाय। वर्षासु तु मेघजलावतते गूढार्कचन्द्रतारे धाराकुले वियति भूमौ पङ्कजलपटलसंवृतायामत्यर्थोपक्लिन्नशरीरेषु भूतेषु विहतस्वभावेषु च केवलेष्वौषधग्रामेषु तोयतोयदानुगतमारुतसंसर्गाद् गुरुप्रवृत्तीनि वमनादीनि भवन्ति, गुरुसमुत्थानानि च शरीराणि। तस्माद्वमनादीनां निवृत्तिर्विधीयते वर्षान्तेष्वृतुषु, न चेदात्ययिकं कर्म। आत्ययिके पुनः

कर्मणि काममृतुं विकल्प्य कृत्रिमगुणोपधानेन यथर्तुगुणविपरीतेन भेषजं संयोगसंस्कारप्रमाणविकल्पेनोपपाद्य प्रमाणवीर्यसमं कृत्वा ततः प्रयोजयेदुत्तमेन यत्नेनावहितः॥ १२७॥

यथा हेमन्तादिषु दुःखतमत्वं भवति तदाह— तत्र हेमन्त इत्यादि। अवबद्धदोषमिति अतिबद्धदोषम्। तयोरिति यथोक्तशरीरभेषजयोः। तोयस्य तोयदानुगतमारुतस्य च संसर्गस्तस्मात्। गुरुप्रवृत्तीनीति गुरोर्यथा न सुखकारिणी प्रवृत्तिर्भवति, तथाऽस्यापीत्यर्थः; किंवा बहुप्रतिविधेयप्रवृत्तीनि गुरुप्रवृत्तीनि। गुरुसमुत्थानानीति संशोधनक्लिष्टानि शरीराणि तदा महता प्रयत्नेन चिरेण च कालेन प्रकृतिं प्राप्नुवन्तीत्यर्थः। वर्षान्तेष्विति हेमन्तग्रीष्मवर्षासु। हेमन्तादिष्वप्यात्ययिके व्याधौ संशोधनं दर्शयन्नाह — न चेदित्यादि। विकल्प्येति अल्पगुणयुक्तं कृत्वा। कृत्रिमगुणोपधानं यथा— शीते शीतप्रतीकारार्थमुष्णसदनादिकरणम्; उक्तं चान्यत्र— "शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम्। कृत्वा कुर्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत्"— (सु.सू.अ.३५) इति। ऋतौ प्रतीकारं दर्शयित्वा भेषजप्रतीकारमाह— भेषजमित्यादि। संयोगविकल्पो यथा— शीते त्रिवृताया उष्णेन गोमूत्रेणालोडनं; प्रमाणविकल्पो यथा— अयोगप्रतीकारार्थमतिमात्रत्रिवृद्दानमित्यादि। अत्र च प्रमाणविकल्पस्तथा कर्तव्यो यथा प्राणाविरोधः स्यात्, तथा संयोगविकल्पश्च तथा कर्तव्यो यथा विरुद्धवीर्यभेषजमेलको न स्यादिति दर्शयन्नाह— प्रमाणवीर्यसमं कृत्वेति॥ १२६-१२७॥

आतुरावस्थास्वपि तु कार्याकार्यं प्रति कालाकालसञ्ज्ञा; तद्यथा— अस्यामवस्थायामस्य भेषजस्याकालः, कालः पुनरन्यस्येति; एतदपि हि भवत्यवस्थाविशेषेण; तस्मादातुरावस्थास्वपि हि कालाकालसञ्ज्ञा। तस्य परीक्षा— मुहुर्मुहुरातुरस्य सर्वावस्थाविशेषावेक्षणं यथावद्भेषजप्रयोगार्थम्। न ह्यतिपतितकालमप्राप्तकालं वा भेषजमुपयुज्यमानं यौगिकं भवति; कालो हि भैषज्यप्रयोगपर्याप्तिमभिनिर्वर्तयति॥ १२८॥

आतुरावस्थालक्षणं कालमाह— आतुरावस्थास्वित्यादि। तत्रोदाहरणं यथा— नवज्वरे न कषायकालः, अतिक्रान्तषडहे ज्वरे कषायकाल इत्यादि। भैषज्यप्रयोगपर्याप्तिमिति भेषजप्रयोगसाध्यसिद्धिमित्यर्थः॥१२८॥

प्रवृत्तिस्तु प्रतिकर्मसमारम्भः। तस्य लक्षणं भिषगौषधातुरपरिचारकाणां क्रियासमायोगः॥१२९॥

कालमभिधाय क्रमप्राप्तां प्रवृत्तिमाह— प्रवृत्तिस्त्वित्यादि। प्रतिकर्म चिकित्सा॥१२९॥

उपायः पुनर्भिषगादीनां सौष्ठवमभिविधानं च सम्यक्। तस्य लक्षणं— भिषगादीनां यथोक्तगुणसम्पत् देशकालप्रमाणसात्म्यक्रियादिभिश्च सिद्धिकारणैः सम्यगुपपादितस्यौषधस्यावचारणमिति॥१३०॥

परिशिष्टमुपायमाह— उपाय इत्यादि। यथोक्तगुणसम्पदित्यनेन सौष्ठवमुक्तम्॥१३०॥

एवमेते दश परीक्ष्यविशेषाः पृथक् पृथक् परीक्षितव्या भवन्ति॥१३१॥

एवमित्यादिना तु सम्यगभिविधानं ब्रूते॥१३१॥

परीक्षायास्तु खलु प्रयोजनं प्रतिपत्तिज्ञानम्। प्रतिपत्तिर्नाम यो विकारो यथा प्रतिपत्तव्यस्तस्य तथाऽनुष्ठानज्ञानम्॥१३२॥

किम्प्रयोजना परीक्षेत्यस्योत्तरं— परीक्षायास्त्वित्यादि। प्रतिपत्तिशब्दार्थं विभजते— य इत्यादि। प्रतिपत्तव्य इति अनुष्ठानेन योजयितव्यः॥१३२॥

यत्र तु खलु वमनादीनां प्रवृत्तिः, यत्र च निवृत्तिः, तद्व्यासतः सिद्धिषूत्तरमुपदेक्ष्यामः॥१३३॥

'क्व च वमनादीनां प्रवृत्तिः, क्व च निवृत्तिः' इत्यस्योत्तरमतिदेशेनाह— यत्र त्वित्यादि॥१३३॥

प्रवृत्तिनिवृत्तिलक्षणसंयोगे तु गुरुलाघवं सम्प्रधार्य सम्यगध्यवस्येदन्यतरनिष्ठायाम्। सन्ति हि व्याधयः शास्त्रेषूत्सर्गापवादैरुपक्रमं प्रति निर्दिष्टाः। तस्माद्गुरुलाघवं सम्प्रधार्य सम्यगध्यवस्येदित्युक्तम्॥ १३४॥

'प्रवृत्तिनिवृत्तिलक्षणसंयोगे किं नैष्ठिकम्' इत्यस्योत्तरं— प्रवृत्तीत्यादि। अध्यवस्येदिति अध्यवसायं कुर्यादित्यर्थः। अन्यतरनिष्ठायामिति अन्यतरपक्षव्यवस्थायाम्। अत्र गुरुलाघवे ज्ञाते गुरुप्रतिक्रियानिश्चयोऽनुक्तोपि ज्ञायते; तेन शास्त्रकारेण गुरुव्याधिप्रतीकारनिष्ठायामध्यवसायं कुर्यादिति साक्षान्न कृतम्। एतदेव गुरुव्याधिप्रतीकारं लघुव्याध्युपपादकेन वचनभङ्ग्यन्तरेणाह— सन्ति हीत्यादि। सम्यगध्यवस्येदिति उत्सर्गलघुं परित्यज्यापवादगुरुमुपक्रम्यतयाऽध्यवस्येत्; बलवन्तमुपद्रवं वेत्यादिना हि दुर्बलं परित्यज्य बलवच्चिकित्सामभिधास्यति॥१३४॥

यानि तु खलु वमनादिषु भेषजद्रव्याण्युपयोगं गच्छन्ति तान्यनुव्याख्यास्यामः। तद्यथा— फलजीमूतकेक्ष्वाकुधामार्गवकुटजकृतवेधनफलानि, फलजीमूतकेक्ष्वाकुधामार्गवपत्रपुष्पाणि आरग्वध-वृक्षकमदनस्वादुकण्टकपाठापाटलाशार्ङ्गेष्टामूर्वासप्तपर्णनक्तमालपिचुमर्दपटोलसुषवीगुडूचीचित्रकसोम वल्कशतावरीद्वीपीशिग्रुमूलकषायैः, मधुकमधूककोविदारकर्बुदारनीपविदुलबिम्बीशणपुष्पीसदापुष्पा-

प्रत्यक्पुष्पाकषायैश्च, एलाहरेणुप्रियङ्गुपृथ्वीकाकुस्तुम्बुरुतगरनलदह्रीवेरतालीशोशीरकषायैश्च, इक्षुकाण्डेक्ष्विक्षुवालिकादर्भपोटगलकालङ्क(ङ्क)तकषायैश्च, सुमनासौमनस्यायनीहरिद्रादारुहरिद्रा-वृश्चीरपुनर्नवामहासहाक्षुद्रसहाकषायैश्च, शाल्मलिशाल्मलिकभद्रपर्ण्येलापर्ण्युपोदिकोद्दालकधन्वन-राजादनोपचित्रागोपीश्रृङ्गाटिकाकषायैश्च, पिप्पलीपिप्पलीमूलचव्यचित्रकश्रृङ्गवेरसर्षपफाणित-क्षीरक्षारलवणोदकैश्च, यथालाभं यथेष्टं वाऽप्युपसंस्कृत्य वर्तिक्रियाचूर्णावलेहस्नेहकषाय-मांसरसयवागूयूषकाम्बलिकक्षीरोपधेयान्मोदकानन्यांश्च भक्ष्यप्रकारान् विविधाननुविधाय यथार्हं वमनार्हाय दद्याद्विधिवद्वमनम्। इति कल्पसङ्ग्रहो वमनद्रव्याणाम्। कल्पमेषां विस्तारेणोत्तरकालमुपदेक्ष्यामः॥१३५॥

सम्प्रति 'कानि च वमनादिषु भेषजद्रव्याणि योगं गच्छन्ति' इत्यस्योत्तरं— यानीत्यादी। शार्ङ्गेष्टा गुञ्जा, सोमवल्कः खदिरः; सुषवी कारवेल्लकः। द्वीपी कण्टकारी, द्वीपिशत्रुरिति पाठे शतावरी ज्ञेया। विदुलो वेतसः, शतपुष्पा घण्टारवा, सदापुष्पा रक्तार्कः। कालङ्कतो कासमर्दः, पोटगलो होग्गलः। सुमना जाती, सौमनस्यायनी जातिकलिका जातिकोषो वा। शाल्मलिको रोहितकः, स्वल्पशाल्मलिर्वा, भद्रपर्णी भादाली, एलापर्णी रास्ना, उद्दालः बहुवारः, गोपी सारिवा। वर्तिक्रिया वर्तिरूपदीर्घभक्ष्यकरणम्। अत्र 'आरग्वधादि' 'मध्वादि' इति पृथग्वर्गकरणं प्रायः समानगुणतां विच्छेदपाठेन दर्शयितुं कृतम्। कल्पनं कल्पः प्रयोग इत्यर्थः। उत्तरकालमिति कल्पस्थाने॥१३५॥

विरेचनद्रव्याणि तु श्यामात्रिवृच्चतुरङ्गुलतिल्वकमहावृक्षसप्तलाशङ्खिनीदन्तीद्रवन्तीनां क्षीरमूलत्वक्पत्रपुष्पफलानि यथायोगं तैस्तैः क्षीरमूलत्वक्पत्रपुष्पफलैर्विकल्पितैरविकल्पितैश्च ; , अजगन्धाश्वगन्धाजश्रृङ्गीक्षीरिणीनीलिनीक्लीतककषायैश्च, प्रकीर्योदकीर्यामसूरविदलाकम्पिल्लकविडङ्ग-गवाक्षीकषायैश्च, पीलुप्रियालमृद्वीकाकाश्मर्यपरूषकबदरदाडिमामलकहरीतकीबिभीतकवृश्चीरपुनर्नवा-विदारिगन्धादिकषायैश्च, सीधुसौवीरकतुषोदकमैरेयमेदकमदिरामधुमधूलकधान्याम्लकुवल-

बदरखर्जूरकर्कन्धुभिश्च, दधिदधिमण्डोदश्विद्भिश्च, गोमहिष्यजावीनां च क्षीरमूत्रैर्यथालाभं यथेष्टं वाऽप्युपसंस्कृत्य वर्तिक्रियाचूर्णासवलेहस्नेहकषायमांसरसयूषकाम्बलिकयवागूक्षीरोपधेयान् मोदकानन्यांश्च भक्ष्यप्र(वि)कारान् विविधांश्च योगाननुविधाय यथार्हं विरेचनार्हाय दद्याद्विरेचनम्। इति कल्पसङ्ग्रहो विरेचनद्रव्याणाम्। कल्पमेषां विस्तरेण यथावदुत्तरकालमुपदेक्ष्यामः॥ १३६॥

विक्लिप्तिः द्रव्यान्तरसंयोगः, अविक्लिप्तिः केवलप्रयोगः; तेन विक्लिप्ताविक्लिप्तैरिति संयुक्तायुक्तैरित्यर्थः। क्षीरिणी दुग्धिका, क्लीतकं यष्टीमधु। मसूरविदला श्यामलता। प्रथमं तु श्यामा श्याममूला त्रिवृदेवोक्ता॥ १३६॥

आस्थापनेषु तु भूयिष्ठकल्पानि द्रव्याणि यानि योगमुपयान्ति तेषु तेष्ववस्थान्तरेष्वातुराणां, तानि द्रव्याणि नामतो विस्तरेणोपदिश्यमानान्यपरिसङ्ख्येयानि स्युरतिबहुत्वात्; इष्टश्चानतिसङ्क्षेपविस्तरोपदेशस्तन्त्रे, इष्टं च केवलं ज्ञानं, तस्माद्रसत एव तान्यत्र व्याख्यास्यामः। रससंसर्गविकल्पविस्तरो ह्येषामपरिसङ्ख्येयः, समवेतानां रसानामंशांशबलविकल्पातिबहुत्वात्। तस्माद्द्रव्याणां चैकदेशमुदाहरणार्थं रसेष्वनुविभज्य रसैकैकश्येन च नामलक्षणार्थं षडास्थापनस्कन्धा रसतोऽनुविभज्य व्याख्यास्तन्ते॥ १३७॥

भूयिष्ठकल्पानीति बहुप्रयोगाणि प्रायःप्रयोज्यानि च। इष्टश्चानतिसङ्क्षेपविस्तरोपदेश इति अनतिसङ्क्षेपविस्तरेण शास्त्रे कथनमिष्टम्। इष्टं च केवलं ज्ञानमिति अनतिसङ्क्षेपविस्तराभिधानेन यदनुक्तं तस्यापि यथासामान्यद्वारा ज्ञानं भवति तदपीष्टं ग्रन्थकर्तुः श्रोतुश्चेत्यर्थः। तस्माद्रसत एवेति रसं प्राधान्येनोद्दिश्य रसाश्रयद्रव्यस्यानतिसङ्क्षेपविस्तारोपदेशेनेत्यर्थः। तानीति आस्थापनोपयोगीनि द्रव्याणि। अत्र च रसद्वारा निर्देशोऽपि रससंसर्गस्यातिबहुत्वेन कृत्स्नद्रव्यनिर्देशवदसङ्ख्येयता स्यादिति कृत्वा षड्भिरेव रसैर्निर्देशः कर्तव्य आस्थापनोपयोगिद्रव्याणामिति दर्शयन्नाह— रसेत्यादि।

उदाहरणार्थमिति मधुरादिरसस्याधारभूतस्य द्रव्यस्योदाहरणार्थम्। रसेष्वनुविभज्येति रसेषु मधुरादिषु द्रव्याणामेकदेशमाधारतयोपदिश्येत्यर्थः। रसैकैकश्येनेति न रससंसर्गेण। नामलक्षणार्थं षडास्थापनस्कन्धा इति साक्षादुक्तानां जीवकादीनां नामार्थं, तथा अनुक्तानां मधुरादिद्रव्याणां तज्जातीयत्वेन लक्षणार्थमास्थापनयोगिद्रव्यसमूहा व्याख्यास्यन्त इति; किंवा, नामलक्षणार्थमिति नामज्ञानार्थम्। आस्थाप्यतेऽनेनेति आस्थापनं जीवकादिद्रव्यं; स्कन्धः समूहः। रसतोऽनुविभज्येति मधुरादिरसतया निर्दिश्येत्यर्थः॥१३७॥

यत्तु षड्विधमास्थापनमेकरसमित्याचक्षते भिषजः, तद्दुर्लभतमं संसृष्टरसभूयिष्ठत्वाद्द्रव्याणाम्। तस्मान्मधुराणि मधुरप्रायाणि मधुरविपाकानि मधुरप्रभावाणि च मधुरस्कन्धे मधुराण्येव कृत्वोपदेक्ष्यन्ते, तथेतराणि द्रव्याण्यपि॥१३८॥

अयं च मधुरादिरसेन द्रव्यगणनिर्देशो न मधुराद्येकरसस्यैव द्रव्यस्य सङ्ग्रहेण
यथा परैराख्यायते तथाऽस्माभिरपीष्यते, किन्तु यत्र सत्यपि रसान्तरे मधुरादयः प्रधानं, यद्वा द्रव्यं मधुरादिकार्यकारि विपाकप्रभावात्, तदपि मधुरादिगण एवास्माभिः पठनीयमिति दर्शयन्नाह— यत्त्वित्यादि। एकरसमिति शुद्धैकरसम्। मधुरप्रायाणीति उत्कृष्टमधुररसानि। तथेतराणीति अम्लादीनि अम्लप्रायाणि अम्लपाकानि च अम्लमेव कृत्वोपदेक्ष्यामः; तथा लवणादिष्वप्येवमेव तथेतराणीतिपदेन दर्शयति॥१३८॥

तद्यथा— जीवकर्षभकौ जीवन्ती वीरा तामलकी काकोली क्षीरकाकोली मुद्गपर्णी माषपर्णी शालपर्णी पृश्निपर्ण्यसनपर्णी मधुपर्णी मेदा महामेदा कर्कटश्रृङ्गी श्रृङ्गाटिका छिन्नरुहा च्छत्राऽतिच्छत्रा श्रावणी महाश्रावणी सहदेवा विश्वदेवा शुक्ला क्षीरशुक्ला बलाऽतिबला विदारी क्षीरविदारी क्षुद्रसहा महासहा ऋष्यगन्धाऽश्वगन्धा वृश्चीरः पुनर्नवा बृहती कण्टकारिकोरुबूको मोरटः श्वदंष्ट्रा संहर्षा शतावरी

शतपुष्पा मधूकपुष्पी यष्टीमधु मधूलिका मृद्वीका खर्जूरं परूषकमात्मगुप्ता पुष्करबीजं कशेरुकं राजकशेरुकं राजादनं कतकं काश्मर्यं शीतपाक्योदनपाकी तालखर्जूरमस्तकमिक्षुरिक्षुवालिका दर्भः कुशः काशः शालिर्गुन्द्रेत्कटकः शरमूलं राजक्षवकः ऋष्यप्रोक्ता द्वारदा भारद्वाजी वनत्रपुष्यभीरुपत्री हंसपादी काकनासिका कुलिङ्गाक्षी क्षीरवल्ली कपोलवल्ली कपोतवल्ली सोमवल्ली गोपवल्ली मधुवल्ली चेति; एषामेवंविधानामन्येषां च मधुरवर्गपरिसङ्ख्यातानामौषधद्रव्याणां छेद्यानि खण्डशश्छेदयित्वा भेद्यानि चाणुशो भेदयित्वा प्रक्षाल्य पानीयेन सुप्रक्षालितायां स्थाल्यां समावाप्य पयसाऽर्धोदकेनाभ्यासिच्य साधयेद्दर्व्या सततमवघट्टयन्; तदुपयुक्तभूयिष्ठेऽम्भसि गतरसेष्वौषधेषु पयसि चानुपदग्धे स्थालीमुपहृत्य सुपरिपूतं पयः सुखोष्णं घृततैलवसामज्जलवणफाणितोपहितं बस्तिं वातविकारिणे विधिज्ञो विधिवद्दद्यात्; शीतं तु मधुसर्पिर्भ्यामुपसंसृज्य पित्तविकारिणे विधिवद्दद्यात्। इति मधुरस्कन्धः॥१३९॥

वीरा जालन्धरं शाकम्। अस(श)नपर्णी अपराजिता। मधुपर्णी विकङ्कतम्। छत्रा कोकिलाक्षः। अतिच्छत्रा अरुणकोकिलाक्षः। महाश्रावणी अलम्बुषा। शुक्ला शर्करा। क्षीरशुक्ला बृहच्छृङ्गाटिका। क्षुद्रसहा कुमारी। ऋष्यगन्धा ऋष्यजाङ्गलकः, बलाभेदो वा। मोरटः मूर्वा। संहर्षा बन्दाकः। मधुकपर्णी मधुकभेदः। मधूलिका मर्कटहस्ततृणम्। राजादनं वेञ्चुलिकीति ख्यातम्। कशेरुः चिञ्चोडकः। राजकशेरुः कशेरुभेदः। शीतपाकी शीतला। ओदनपाकी नीलझिण्टी। ऋष्यप्रोक्ता बलाभेदः। द्वारदा शाकतरुः। भारद्वाजी वनकार्पासी। वनत्रपुषी बृहत्फला गोडुम्बा। अभीरुपत्री शतावरीभेदः। कुलिङ्गाक्षी पेटिका, कुलिङ्गापाठपक्षे उच्चटा। क्षीरवल्ली क्षीरलता। कपोलपल्ली 'कवडवेण्डुआ' इति ख्याता। कपोतवल्ली सूक्ष्मैला। सोमवल्ली सोमलता। गोपवल्ली अनन्तमूलम्। मधुवल्ली यष्टीमधुभेदः॥१३९॥

आम्राम्रातकलकुचकरमर्दवृक्षाम्लाम्लवेतसकुवलबदरदाडिममातुलुङ्गगण्डीरामलकनन्दीतकशीतकतिन्तिण्डीकदन्तशठैरावतककोशाम्रधन्वनानां फलानि, पत्राणि चाम्रातकाश्मन्तकचाङ्गेरीणां चतुर्विधानां चाम्लिकानां द्वयोश्च कोलयोश्चामशुष्कयोर्द्वयोश्चैव शुष्काम्लिकयोर्ग्राम्यारण्ययोः, आसवद्रव्याणि च सुरासौवीरकतुषोदकमैरेयमेदकमदिरामधुशुक्तशीधुदधिदधिमण्डोदश्विद्धान्याम्लादीनि च, एषामेवंविधानामन्येषां चाम्लवर्गपरिसङ्ख्यातानामौषधद्रव्याणां छेद्यानि खण्डशश्छेदयित्वा भेद्यानि चाणुशो भेदयित्वा द्रवैः स्थाल्यामभ्यासिच्य साधयित्वोपसंस्कृत्य यथावत्तैलवसामज्जलवणफाणितोपहितं सुखोष्णं बस्तिं वातविकारिणे विधिज्ञो विधिवद्दद्यात्। इत्यम्लस्कन्धः॥ १४०॥

अम्लस्कन्धे नन्दीतकः कर्परनन्दी, शीतकः अम्ललोटः, ऐरावतः नागरङ्गम्। अम्लिका कन्दप्रधाना कामरूपे प्रसिद्धा अम्लिकाभेद एवेत्याहुः। द्रवैः स्थिराणीति द्रवमज्जनात् स्थिरीभूतानीत्यर्थः(?)॥ १४०॥

सैन्धवसौवर्चलकालविडपाक्यानूपकूप्यवालुकैलमौलकसामुद्ररोमकौद्भिदौषरपाटेयकपांशुजान्येवम्प्रकाराणि चान्यानि लवणवर्गपरिसङ्ख्यातानि, एतान्यम्लोपहितान्युष्णोदकोपहितानि वा स्नेहवन्ति सुखोष्णं बस्तिं वातविकारिणे विधिज्ञो विधिवद्दद्यात्। इति लवणस्कन्धः॥ १४१॥

कूप्यादयो लवणभेदा देशान्तरप्रसिद्धाः; तेन देशान्तरीयेभ्यो ज्ञेयाः। रोमकं रूमानदीभवम्॥ १४१॥

पिप्पलीपिप्पलीमूलहस्तिपिप्पलीचव्यचित्रकशृङ्गवेरमरिचाजमोदार्द्रकविडङ्गकुस्तुम्बुरुपीलुतेजोवत्येलाकुष्ठभल्लातकास्थिहिङ्गुनिर्यासकिलिममूलकसर्षपलशुनकरञ्जशिग्रुकमधुशिग्रुकखरपुष्पभूस्तृणसुमुखसुरसकुठेरकार्जकगण्डीरकालमालकपर्णासक्षवकफणिज्झकक्षारमूत्रपित्तानीति; एषामेवंविधानां चान्येषां

कटुकवर्गपरिसङ्ख्यातानामौषधद्रव्याणां छेद्यानि खण्डशश्छेदयित्वा भेद्यानि चाणुशो भेदयित्वा गोमूत्रेण सह साधयित्वोपसंस्कृत्य यथावन्मधुतैललवणोपहितं सुखोष्णं बस्तिं श्लेष्मविकारिणे विधिज्ञो विधिवद्दद्यात्। इति कटुकस्कन्धः॥ १४२॥

तेजस्विनी तेजोवती। किलिमं देवदारु॥ १४२॥

चन्दननलदकृतमालनक्तमालनिम्बतुम्बुरुकुटजहरिद्रादारुहरिद्रामुस्तमूर्वाकिराततिक्तककटुकरोहिणी त्रायमाणाकारवेल्लिकाकरीरकरवीरकेबुककठिल्लकवृषमण्डूकपर्णीकर्कोटकवार्ताकुकर्कशकाकमाचीका कोदुम्बरिकासुषव्यतिविषापटोलकुलकपाठागुडूचीवेत्राग्रवेतसविकङ्कतबकुलसोमवल्कसप्तपर्णसुमनार्का वल्गुजवचातगरागुरुवालकोशीराणीति, एषामेवंविधानां चान्येषां तिक्तवर्गपरिसङ्ख्याताना-मौषधद्रव्याणां छेद्यानि खण्डशश्छेदयित्वा भेद्यानि चाणुशो भेदयित्वा प्रक्षाल्य पानीयेनाभ्यासिच्य साधयित्वोपसंस्कृत्य यथावन्मधुतैललवणोपहितं सुखोष्णं बस्तिं श्लेष्मविकारिणे विधिज्ञो विधिवद्दद्यात्, शीतं तु मधुसर्पिर्भ्यामपसंसृज्य पित्तविकारिणे विधिज्ञो विधिवद्दद्यात्। इति तिक्तस्कन्धः॥ १४३॥

तिक्तवर्गे कर्कशः पटोलभेदः॥ १४३॥

प्रियङ्ग्वनन्ताम्रास्थ्यम्बष्ठकीकट्वङ्गलोध्रमोचरससमङ्गाधातकीपुष्पपद्मापद्मकेशरजम्ब्वाम्रप्लक्षवटकपीतनोदुम्बराश्वत्थभल्लातकास्थ्यश्मन्तकशिरीषशिंशपासोमवल्कतिन्दुकप्रियालबदरखदिरसप्तपर्णाश्वकर्णस्यन्दनार्जुनारिमेदैलवालुकपरिपेलवकदम्बशल्लकीजिङ्गिनीकाशकशेरुकराजकशेरुकट्फलवंशपद्मकाशोकशालधवसर्जभूर्जशणखरपुष्पापुरशमीमाचीकवरकतुङ्गाजकर्णस्फूर्जकबिभीतककुम्भीपुष्करबीजबिसमृणालतालखर्जूरतरुणानीति, एषामेवंविधानां चान्येषां कषायवर्गपरिसङ्ख्यातानामौषधद्रव्याणां छेद्यानि

खण्डशश्छेदयित्वा भेद्यानि चाणुशो भेदयित्वा प्रक्षाल्य पानीयेनाभ्यासिच्य साधयित्वोपसंस्कृत्य यथावन्मधुतैललवणोपहितं सुखोष्णं बस्तिं श्लेष्मविकारिणे विधिज्ञो विधिवद्दद्यात्, शीतं तु मधुसर्पिर्भ्यामुपसंसृज्य पित्तविकारिणे दद्यात्। इति कषायस्कन्धः॥ १४४॥

कषायवर्गे अश्वकर्णः प्रियालशालः, परिपेलवं कैवर्तमुस्तकं, जिङ्गिनी स्वनामख्याता, माचीकः देवदारुः, अजकर्णः शालभेदः, कुम्भी 'कुम्भीक' इति ख्याता, किंवा हठः, मृणालं मृणालनालिका, तालखर्जूरतरुणानीति तालखर्जूराङ्कुरा इत्यर्थः। अत्र च स्कन्धेषु यद्द्रव्यं स्कन्धद्वये पठ्यते तदुभयगुणयुक्तत्वेनोभयत्रपि योगीति ज्ञेयम्॥ १४४॥

तत्र श्लोकाः—

षड्वर्गाः परिसङ्ख्याता य एते रसभेदतः।
आस्थापनमभिप्रेत्य तान्विद्यात्सार्वयौगिकान्॥ १४५॥
सर्वशो हि प्रणिहिताः सर्वरोगेषु जानता।
सर्वान्रोगान्नियच्छन्ति येभ्य आस्थापनं हितम्॥ १४६॥

सार्वयौगिकानिति सर्वेष्वास्थापनसाध्येषु रोगेषु वातव्याधिज्वरगुल्मादिषु यथोक्तदोषसम्बन्धे सति यौगिकानित्यर्थः। एतदेव विवृणोति— सर्वशो हीत्यादि। सर्वश इति समस्तवर्गेण अर्धवर्गेण यथालाभं वा॥ १४५-१४६॥

येषां येषां प्रशान्त्यर्थं ये ये न परिकीर्तिताः।
द्रव्यवर्गा विकाराणां तेषां ते परिकोपकाः॥ १४७॥
इत्येते षडास्थापनस्कन्धा रसतोऽनुविभज्य व्याख्याताः॥ १४८॥

इदानीं सर्ववर्गाणां सर्वेष्वास्थापनसाध्यरोगेषु यौगिकत्वं यदुक्तं तत्र पित्तज्वरे कटुवर्गेणास्थापनं पित्तकरत्वाज्ज्वरवर्धकं भवति, तेन न दोषविशेषेण सर्वगणानां यौगिकत्वमेतदुक्तं, किन्तु सामान्येन सर्वास्थापनसाध्यरोगहितत्वं, दोषविशेषेषु तु तत्र तत्राननुगुणवर्गस्य प्रकोपकस्य निषेध एवेति दर्शयन्नाह— येषामित्यादि। येषां येषामिति वातादिविकाराणामुक्तानामिह। तत्र मधुरस्कन्धः कफप्रशान्त्यर्थमनुक्तः, तेन कफवर्धकः; एवमम्लादिवर्गेष्वपि ज्ञेयम्। किंवा सार्वयौगिकानित्यनेनोक्तानां वर्गाणां समासव्यासयोगेन सकलास्थापनसाध्यरोगहरत्वमुच्यते, न प्रत्येकं; प्रत्येकं तु वर्गाणां साध्यत्वेनानुक्तरोगाहन्तृत्वमुच्यते येषामित्यादिना॥ १४७-१४८॥

तेभ्यो भिषग्बुद्धिमान् परिसङ्ख्यातमपि यद्यद्द्रव्यमयौगिकं मन्येत, तत्तदपकर्षयेत्। यद्यच्चानुक्तमपि यौगिकं मन्येत, तत्तद्विदध्यात्; वर्गमपि वर्गेणोपसंसृजेदेकमेकेनानेकेन वा युक्तिं प्रमाणीकृत्य। प्रचरणमिव भिक्षुकस्य बीजमिव कर्षकस्य सूत्रं बुद्धिमतामल्पमप्यनल्पज्ञानाय भवति; तस्माद्बुद्धिमतामूहापोहवितर्काः, मन्दबुद्धेस्तु यथोक्तानुगमनमेव श्रेयः। यथोक्तं हि मार्गमनुगच्छन् भिषक् संसाधयति कार्यमनतिमहत्त्वाद्वा विनिपातयत्यनतिह्रस्वत्वादुदाहरणस्येति॥ १४९॥

सम्प्रत्युक्तवर्गेषु व्याध्यादिपर्यालोचनया यौगिकत्वमपेक्ष्य यौगिकप्रक्षेपमयौगिकोद्धरणं च दर्शयन्नाह— तेभ्य इत्यादि। बुद्धिमानितिपदेन बुद्धिमतैव प्रक्षेपोद्धारौ गणे कर्तव्यौ, नाल्पबुद्धिनोहापोहकरणासमर्थेनेति दर्शयति। एकं वर्गमेकेन वर्गेणोपसृजेदनेकेन वा वर्गेणेति योज्यम्। युक्तिं प्रमाणीकृत्येति इदमत्र यौगिकमिदमयौगिकमिति ऊहं प्रमाणीकृत्येत्यर्थः। प्रचरणं भिक्षामूलं तण्डुलादि पात्रस्थम्। ननु मन्दबुद्धेः कथं यथोक्ताननुगमनं? यथोक्तमयौगिकमूहेन बुद्धिमन्तः प्रतिपद्यन्ते तत्रैव तन्मन्दधीः प्रयुञ्जानो न कथमनर्थमावहेदित्याह— यथोक्तं हीत्यादि। अनतिमहत्त्वाद्वा विनिपातयतीत्यनेन मन्दबुद्धेर्यथोक्तमाचरत ऊहं विना न महती व्यापद्भवतीति

दर्शयति। यतः शास्त्रे हि यो विधिर्यथोक्तः, स प्रायो यौगिक एव भवति तत्र; यत्रापि शरीरादिभेदेनायौगिकः, तत्रापि स्तोकमात्रेण यौगिक इत्यर्थः। अनतिह्रस्वत्वादुदाहरणस्येति शास्त्रे उदाहरणत्वेनोक्तस्य विधेरनतिसङ्क्षेपादित्यर्थः। एतेन यदि स्तोकं रोगसाधनोदाहरणं स्यात्, ऊह्यमेव बहु, तदा मन्दबुद्धिः साक्षादुदाहरणविषयाज्ञानात् तथा स्वयमुहाक्षमत्वाच्च न रोगशान्तिलक्षणं कार्यं कर्तुं क्षमः स्यात्; यतस्तूदाहरणानि बहूनि, तेन तैरेवोदाहरणात्मकप्रयोगैस्तत्साध्यत्वेनोक्तव्याधीन् साधयतीति युक्तम्। इमौ चावापोद्धारौ गणोक्त एव द्रव्ये प्रायौ ज्ञेयौ। यदुक्तं **सुश्रुते**— "गणोक्तमपि यद्द्रव्यं भवेद्व्याधावयौगिकम्। तदुद्धरेत, प्रक्षिपेत्तु यन्मन्येद्यौगिकं तु तत्" (सु.चि.अ.१) इति। ये तु संयोगमहिम्ना कार्यकरा अगस्त्यहरीतक्यादयः, न तेष्वावापोद्धारौ कर्तव्यौ। एनमेव चार्थमभिप्रेत्योक्तं **सुश्रुते**— "एष चागमसिद्धत्वात्तथैव फलदर्शनात्। मन्त्रवत् सम्प्रयोक्तव्यो न मीमांस्यः कथञ्चन" (सु.चि.अ.१) इति॥१४९॥

अतः परमनुवासनद्रव्याण्यनुव्याख्यास्यामः। अनुवासनं तु स्नेह एव। स्नेहस्तु द्विविधः— स्थावरात्मकः, जङ्गमात्मकश्च। तत्र स्थावरात्मकः स्नेहस्तैलमतैलं च। तद्द्वयं तैलमेव कृत्वोपदेक्ष्यामः, सर्वतस्तैलप्राधान्यात्। जङ्गमात्मकस्तु वसा, मज्जा, सर्पिरिति। तेषां तैलवसामज्जसर्पिषां यथापूर्वं श्रेष्ठं वातश्लेष्मविकारेष्वनुवासनीयेषु, यथोत्तरं तु पित्तविकारेषु, सर्व एव वा सर्वविकारेष्वपि योगमुपयान्ति संस्कारविधिविशेषादिति॥१५०॥

क्रमप्राप्तमनुवासनद्रव्यमाह— अतः परमित्यादि। अत्र तैलमिति तैलभूतं सर्षपस्नेहादि। तैलप्राधान्यादिति स्थावरस्नेहेषु तिलतैलस्यैव प्राधान्यादित्यर्थः। एतेन तैले यो विधिः स सार्षपादौ बोद्धव्यः, तैलशब्देन तु सार्षपादीनामिह ग्रहणं तिलभवस्नेहस्य प्राधान्यप्रख्यापनार्थं; तैलशब्देन सार्षपादीनां ग्रहणं भवत्येव। यदुक्तं **सुश्रुते**— "निष्पत्तेस्तद्गुणत्वाच्च तैलत्वमितरेष्वपि" (सु.सू.अ.१५) इति॥१५०॥

शिरोविरेचनद्रव्याणि पुनरपामार्गपिप्पलीमरिचविडङ्गशिग्रुशिरीषतुम्बुरुपिल्वजाज्यमोदावार्ताकी-पृथ्वीकैलाहरेणुकाफलानि च, सुमुखसुरसकुठेरकगण्डीरकालमालकपर्णासक्षवकफणिज्झक-

हरिद्राशृङ्गवेरमूलकलशुनतर्कारीसर्षपपत्राणि च, अर्कालर्ककुष्ठनागदन्तीवचापामार्गश्वेताज्योतिष्मती-गवाक्षीगण्डीरपुष्प्यवाक्पुष्पीवृश्चिकालीवयस्थातिविषामूलानि च, हरिद्राशृङ्गवेरमूलकलशुनकन्दाश्च, लोध्रमदनसप्तपर्णनिम्बार्कपुष्पाणि च, देवदार्वगुरुसरलशल्लकीजिङ्गिन्यसनहिङ्गुनिर्यासाश्च, तेजोवतीवराङ्गेङ्गुदीशोभाञ्जनकबृहतीकण्टकारिकात्वचश्चेति। शिरोविरेचनं सप्तविधं, फल-पत्र-मूल-कन्द-पुष्प-निर्यास-त्वगाश्रयभेदात्। लवणकटुतिक्तकषायाणि चेन्द्रियोपशयानि तथाऽपराण्यनुक्तान्यपि द्रव्याणि यथायोगविहितानि शिरोविरेचनार्थमुपदिश्यन्त इति॥ १५१॥

परिशेष्याच्छिरोविरेचनान्याह— शिरोविरेचनेत्यादि। फलानि चेति चकारेण तस्मादुक्तद्रव्यादङ्गान्त-रोपयोगं च दर्शयति। तेन शिग्रोर्वक्ष्यमाणत्वगुपयोगश्च भवति, एवमन्यत्राप्युदाहार्यम्। सुमुखादयः पर्णासभेदाः, तर्कारी जयन्ती। गण्डीरपुष्पी शमठः, वयस्था ब्राह्मी। वराङ्गं गुडत्वक्। इन्द्रियोपशयानीत्यनेन यानि लवणादीनि इन्द्रियानुपघातकानि तान्येव शिरोविरेचने योज्यानि; तथाऽपराणीति मधुराम्लकषायाण्यपि यानि शिरोविरेचने यौगिकानि॥ १५१॥

तत्र श्लोकाः—

लक्षणाचार्यशिष्याणां परीक्षा कारणं च यत्।
अध्येयाध्यापनविधी सम्भाषाविधिरेव च॥ १५२॥
षड्भिरूनानि पञ्चाशद्वादमार्गपदानि च।
पदानि दश चान्यानि कारणादीनि तत्त्वतः॥ १५३॥
सम्प्रश्नश्च परीक्षादेर्नवको वमनादिषु।
भिषग्जितीये रोगाणां विमाने सम्प्रकाशितः॥ १५४॥

सङ्ग्रहे लक्षणाचार्यशिष्याणामिति शास्त्राचार्यशिष्याणां परीक्षा, लक्षणं हि शास्त्रमुच्यते। कारणं च यदिति शास्त्रादिपरीक्षाकारणं च यदित्यर्थः, 'एवम्भूतं शास्त्रममल इवादित्यः' इत्यादिशास्त्रपरीक्षाकारणम्। आचार्यपरीक्षाकारणं तु 'एवंविधो ह्याचार्यः' इत्यादि। शिष्यपरीक्षाकारणं

तु ‘अध्याप्यमध्यापयन् ह्याचार्यः’ इत्यादि। अध्येयम् अध्येतव्यं, तस्य विधिरध्ययनविधिरेव॥१५२-१५४॥

बहुविधमिदमुक्तमर्थजातं बहुविधवाक्यविचित्रमर्थकान्तम्।

बहुविधशुभशब्दसन्धियुक्तं बहुविधवादनिसूदनं परेषाम्॥१५५॥

इमां मतिं बहुविधहेतुसंश्रयां विजज्ञिवान् परमतवादसूदनीम्।

न सज्जते परवचनावमर्दनैर्न शक्यते परवचनैश्च मर्दितुम्॥१५६॥

दोषादीनां तु भावानां सर्वेषामेव हेतुमत्।

मानात् सम्यग्विमानानि निरुक्तानि विभागशः॥१५७॥

इदमुक्तमर्थजातमिति लक्षणाचार्यशिष्यपरीक्षादिरूपमभिधेयजातमुक्तम्। अर्थकान्तमिति यथा सम्बद्धार्थत्वादिना गुणेन कमनीयार्थं भवति तथोक्तमित्यर्थः। शब्दस्य वाक्ये योजनं शब्दसन्धिः। दोषादीनामित्यादिना विमानस्थानार्थसङ्ग्रहं करोति। हेतुमदिति उपपत्तिमद्यथा भवति तथा दोषादिमानादित्यर्थः। निरुक्तानीति निरुक्त्योक्तानि। निरुक्तिश्च दोषादयो विशेषेण मीयन्ते ज्ञायन्ते एभिरिति विमानानि॥१५५-१५७॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते विमानस्थाने रोगभिषग्जितीयविमानं नामाष्टमोऽध्यायः॥

(अग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते।

अनेनावधिना स्थानं विमानानां समर्थितम्।)

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां विमानस्थाने रोगभिषग्जितीयविमानं नामाष्टमोऽध्यायः॥८॥

विमानस्थानव्याख्या समाप्ता।

शारीरस्थानम्।

प्रथमोऽध्यायः।

अथातः कतिधापुरुषीयं शारीरं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

निदानस्थाने ज्ञातहेत्वादिना तथा विमाने प्रतीतरसदोषादिमानेन कर्तव्यचिकित्साया अधिकरणं शरीरं ज्ञातव्यं भवति; यतोऽप्रतिपन्नेऽशेषविशेषतः शरीरे न शरीरविज्ञानाधीना चिकित्सा साध्वी भवति; अतः शरीरं कारणोत्पत्तिस्थितिवृद्ध्यादिविशेषैः प्रतिपादयितुं शारीरं स्थानमुच्यते। अत्रापि चात्यन्तदुःखोपरममोक्षकारणचिकित्सोपयुक्तपुरुषभेदादिप्रतिपादकतया प्रधानत्वेन कतिधापुरुषीयोऽध्यायोऽभिधीयते॥१-२॥

कतिधा पुरुषो धीमन्! धातुभेदेन भिद्यते।
पुरुषः कारणं कस्मात्, प्रभवः पुरुषस्य कः॥३॥
किमज्ञो ज्ञः, स नित्यः किं किमनित्यो निदर्शितः।
प्रकृतिः का, विकाराः के, किं लिङ्गं पुरुषस्य च॥४॥
निष्क्रियं च स्वतन्त्रं च वशिनं सर्वगं विभुम्।
वदन्त्यात्मानमात्मज्ञाः क्षेत्रज्ञं साक्षिणं तथा॥५॥
निष्क्रियस्य क्रिया तस्य भगवन्! विद्यते कथम्।
स्वतन्त्रश्चेदनिष्टासु कथं योनिषु जायते॥६॥
वशी यद्यसुखैः कस्माद्भावैराक्रम्यते बलात्।

सर्वाः सर्वगतत्वाच्च वेदनाः किं न वेत्ति सः॥७॥

न पश्यति विभुः कस्माच्छैलकुड्यतिरस्कृतम्।

क्षेत्रज्ञः क्षेत्रमथवा किं पूर्वमिति संशयः॥८॥

ज्ञेयं क्षेत्रं विना पूर्वं क्षेत्रज्ञो हि न युज्यते।

क्षेत्रं च यदि पूर्वं स्यात् क्षेत्रज्ञः स्यादशाश्वतः॥९॥

साक्षिभूतश्च कस्यायं कर्ता ह्यन्यो न विद्यते।

स्यात् कथं चाविकारस्य विशेषो वेदनाकृतः॥१०॥

अथ चार्तस्य भगवंस्तिसृणां कां चिकित्सति।

अतीतां वेदनां वैद्यो वर्तमानां भविष्यतीम्॥११॥

भविष्यन्त्या असम्प्राप्तिरतीताया अनागमः।

साम्प्रतिक्या अपि स्थानं नास्त्यर्तेः संशयो ह्यतः॥१२॥

कारणं वेदनानां किं, किमधिष्ठानमुच्यते।

क्व चैता वेदनाः सर्वा निवृत्तिं यान्त्यशेषतः॥१३॥

सर्ववित् सर्वसन्न्यासी सर्वसंयोगनिःसृतः।

एकः प्रशान्तो भूतात्मा कैर्लिङ्गैरुपलभ्यते॥१४॥

इत्यग्निवेशस्य वचः श्रुत्वा मतिमतां वरः।

सर्वं यथावत् प्रोवाच प्रशान्तात्मा पुनर्वसुः॥१५॥

कतिधेति कतिप्रकारः। पुरुष इत्यनेन चाविशेषेण पुरुषशब्दाभिधेयोऽर्थोऽभिधीयते; यतः 'खादयश्चेतनाषष्ठा' इत्यादिना, तथा चतुर्विंशतिकभेदभिन्नश्च कर्मपुरुष एव शरीरी वाच्यः, तथा 'चेतनाधातुरप्येकः स्मृतः पुरुषसञ्ज्ञकः' इत्यनेनात्मैव शरीररहितः पुरुषशब्दार्थत्वेन वाच्यः। पुरुषधारणाद्धातुः; तेन धातुभेदेनेति पुरुषधारणार्थभेदेन। धीमन्निति विशेषणेन य एव धीमान् स एव

पुरुषभेदादिकमिमं वक्ष्यमाणं सुसूक्ष्मं वक्तुं समर्थ इति दर्शयति। पुरुषः कारणं कस्मादिति कस्माद्धेतोः पुरुषः संसारे प्रधानं स्थायिकारणमित्यर्थः। प्रभवत्यस्मादिति प्रभवः कारणम्। योनिष्विति जातिषु। सर्वा इति परपुरुषगता अपि। क्षेत्रज्ञः आत्मा। क्षेत्रम् अव्यक्तवर्जितं सर्वं वक्ष्यमाणम्। ज्ञेयमित्यादि। असति क्षेत्रे क्षेत्रज्ञानाभावान्न क्षेत्रज्ञत्वमुपपद्यते इति भावः। साक्षिभूत इति साक्षिसदृशः। विशेषो वेदनाकृत इति पुत्रादिज्ञानरूपवेदनाजनितो हर्षादिविशेष इत्यर्थः। तिसृणामिति अतीतानागतवर्तमानानां दुःखरूपाणां मध्ये कां चिकित्सति। अतीतामित्यादौ किंशब्दोऽध्याहार्यः, तेन किमतीतां चिकित्सति, किं वर्तमानां, किंवा भविष्यतीमिति योज्यम्। स्थानं नास्तीति क्षणिकत्वेन चिकित्सायाः प्रवृत्तियोग्यकालावस्थानं नास्ति। वेदनानां कारणमधिष्ठानं च यद्यपि दीर्घञ्जीवितीयेऽप्युक्तं, तथाऽपीह प्रकरणवशाद्विशेषप्रतीत्याकाङ्क्षया च विशिष्टाः पुनः प्रश्नाः। प्रश्नार्थाश्चामी उत्तरग्रन्थे आचार्येण प्रपञ्चनीया इति नेह व्याकरणीयाः॥३-१५॥

खादयश्चेतनाषष्ठा धातवः पुरुषः स्मृतः।

चेतनाधातुरप्येकः स्मृतः पुरुषसञ्ज्ञकः॥१६॥

खादय इत्यादि। खादयः "खं वायुरग्निरापः क्षितिस्तथा" इति वक्ष्यमाणाः; चेतनाषष्ठा इत्यत्र चेतनाशब्देन चेतनाधारः समनस्क आत्मा गृह्यते; खादिग्रहणेन चेन्द्रियाणि खादिमयान्यवरुद्धानि। अयं च वैशेषिकदर्शनपरिगृहीतश्चिकित्साशास्त्रविषयः पुरुषः; अयमेव "पञ्चमहाभूतशरीरिसमवायः पुरुषः" (सु.सू.अ.१) इत्यनेन **सुश्रुतेना**प्युक्तः। स्मृत इति भाषया पूर्वाचार्याणामप्ययं पुरुषशब्दवाच्योऽभिप्रेतो नास्मत्कल्पित इति दर्शयति। पुरि शरीरे शेते इति व्युत्पत्त्या य आत्मा पुरुषशब्देनोच्यते तमाह— चेतनेत्यादि। अत्र पुरुष इति कर्तव्ये यत् 'पुरुषसञ्ज्ञक' इति करोति तेन न चेतनाधातुरूपः पुरुषश्चिकित्सायमभिप्रेतः, किन्तु शास्त्रान्तरव्यवहारानुरोधादिहाप्ययं पुरुषशब्देन सञ्ज्ञित इति दर्शयति; चिकित्साविषयस्तु षड्धातुक एव पुरुषः, अत एव तत्र सञ्ज्ञितग्रहणं न कृतम्।

अयं च पुरुषशब्दो गवादावपि षड्धातुसमुदाये यद्यपि वर्तते, तथाऽपि सर्वप्रधाने नर एव विशेषेण वर्तते; तेन नातिप्रसिद्धो गवादौ पुरुषशब्दः॥१६॥

पुनश्च धातुभेदेन चतुर्विंशतिकः स्मृतः।
मनो दशेन्द्रियाण्यर्थाः प्रकृतिश्चाष्टधातुकी॥१७॥

षड्धातुरूपमेव पुरुषं पुनः साङ्ख्यदर्शनभेदाच्चतुर्विंशतिकभेदेनाह— पुनश्चेत्यादि। चतुर्विंशतिकमेव विभजते— मन इत्यादि। यद्यपि पञ्चविंशतितत्त्वमयोऽयं पुरुषः साङ्ख्यैरुच्यते, यदाह— "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" (सां.का.३) इति, तथाऽपीह प्रकृतिव्यतिरिक्तं चोदासीनं पुरुषमव्यक्तत्वसाधर्म्यादव्यक्तायां प्रकृतावेव प्रक्षिप्य अव्यक्तशब्देनैव गृह्णाति; तेन 'चतुर्विंशतिकः पुरुषः' इत्यविरुद्धम्। उदासीनस्य हि सूक्ष्मस्य भेदप्रतिपादनमिहानतिप्रयोजनमिति न कृतम्। दशेन्द्रियाणीति पञ्च कर्मेन्द्रियाणि, पञ्च बुद्धीन्द्रियाणि च। अष्टधातुकीति खादिपञ्चकबुद्ध्यव्यक्ताहङ्काररूपा; वक्ष्यति हि— "खादीनि बुद्धिरव्यक्तमहङ्कारस्तथाऽष्टमः" इति॥१७॥

लक्षणं मनसो ज्ञानस्याभावो भाव एव च।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षे न वर्तते॥१८॥
वैवृत्त्यान्मनसो ज्ञानं सान्निध्यात्तच्च वर्तते।
अणुत्वमथ चैकत्वं द्वौ गुणौ मनसः स्मृतौ॥१९॥

अत्र चतुर्विंशतिके प्रथमोद्दिष्टं मनो लक्षयितुमाह— लक्षणमित्यादि। यथा ज्ञानस्याभावो ज्ञानस्य भावश्च मनोगमको भवति तदाह— सतीत्यादि। वैवृत्त्यान्मनस इति इन्द्रियेणासंयोगात्,

सान्निध्यादिति इन्द्रियेण मनसः सम्बन्धात्। एवं मन्यते— यदा युगपदिन्द्रियार्था इन्द्रियैः संयुज्यन्ते तदा क्वचिदिन्द्रियार्थे ज्ञानं भवति क्वचिन्न भवतीति दृष्टं, तेनेमौ ज्ञानभावाभावौ ज्ञानकारणान्तरं दर्शयतः; यच्च तत् कारणान्तरं तन्मनः। तच्च कारणं मनोरूपं यद्यात्मवद्युगपत् सर्वेन्द्रियव्यापकं स्वीक्रियते किंवा अनेकसङ्ख्यमिन्द्रियवत् स्वीक्रियते, तदा पुनरपि युगपदिन्द्रियार्थसम्बन्धे पञ्चभिर्ज्ञानैर्भवितव्यं विभुना वा मनसा, अनेकैर्वा मनोभिर्युगपदधिष्ठितत्वादिन्द्रियाणां; न च भवन्ति युगपज्ज्ञानानि, तस्माद्युगपज्ज्ञानानुदयाल्लिङ्गान्मनोऽणुरूपमेकं च सिध्यतीत्याह— अणुत्वमित्यादि॥१८-१९॥

चिन्त्यं विचार्यमूह्यं च ध्येयं सङ्कल्प्यमेव च।
यत्किञ्चिन्मनसो ज्ञेयं तत् सर्वं ह्यर्थसञ्ज्ञकम्॥२०॥
इन्द्रियाभिग्रहः कर्म मनसः स्वस्य निग्रहः।
ऊहो विचारश्च, ततः परं बुद्धिः प्रवर्तते॥२१॥

मनोगुणमभिधाय मनोविषयमाह— चिन्त्यमित्यादि। चिन्त्यं कर्तव्यतया अकर्तव्यतया वा यन्मनसा चिन्त्यते। विचार्यम् उपपत्त्यनुपपत्तिभ्यां यद्विमृश्यते। ऊह्यं च यत् सम्भावनया ऊह्यते ‘एवमेतद्भविष्यति’ इति। ध्येयं भावनाज्ञानविषयम्। सङ्कल्प्यं गुणवत्तया दोषवत्तया वाऽवधारणाविषयम्। यत् किञ्चिदित्यनेन सुखाद्यनुक्तविषयावरोधः। मनसो ज्ञेयमिति इन्द्रियनिरपेक्षमनोग्राह्यम्। एते च मनोऽर्थाः शब्दादिरूपा एव; तेन षष्ठार्थकल्पनया न चतुर्विंशतिसङ्ख्यातिरेकः। सुखादयस्तु शब्दादिव्यतिरिक्ता मनोऽर्था बुद्धिभेदग्रहणेनैव ग्राह्याः। मनोविषयमभिधाय मनः कर्माह— इन्द्रियेत्यादि। इन्द्रियाभिग्रहः इन्द्रियाधिष्ठानं मनसः कर्म, तथा स्वस्य निग्रहो मनसः कर्म; मनो ह्यनिष्टविषयप्रसृतं मनसैव नियम्यते, “मनश्च गुणान्तरयुक्तं सद्विषयान्तरान्नियमयति” इत्याहुरेके। यदुक्तम्— “विषयप्रवणं चित्तं धृतिभ्रंशान्न शक्यते।

नियन्तुमहितादर्थाद्धृतिर्हि नियमात्मिका" इति। तेन, धृत्या कारणभूतया (मन) आत्मानं नियमयतीति न स्वात्मनि क्रियाविरोधः। मनः कर्मान्तरमाह— ऊहो विचारश्चेति।— अत्रोह आलोचन(ना)ज्ञानं निर्विकल्प(क)म्, विचारो हेयोपादेयतया विकल्पनम्। चतुर्विधं हि विकल्पकारणं साङ्ख्या मन्यन्ते; तत्र बाह्यमिन्द्रियरूपम्, आभ्यन्तरं तु मनोऽहङ्कारो बुद्धिश्चेति त्रितयम्। तत्रेन्द्रियाण्यालोचयन्ति निर्विकल्पेन गृह्णन्तीत्यर्थः, मनस्तु सङ्कल्पयति हेयोपादेयतया कल्पयतीत्यर्थः, अहङ्कारोऽभिमन्यते 'ममेदमहमत्राधिकृतः' इति मन्यत इत्यर्थः, बुद्धिरध्यवस्यति 'त्यजाम्येनं दोषवन्तमुपाददाम्येनं गुणवन्तम्' इत्यध्यवसायं करोतीत्यर्थः। ऊहस्तु यद्यपि बाह्यचक्षुरादिकर्म, तथाऽपि तत्रापि मनोऽधिष्ठानमस्तीति मनः— कर्मतयोक्तः। वचनं हि "सान्तःकरणबुद्धिः सर्वं विषयमवगाहते यस्मात्। तस्मात् त्रिविधं करणं द्वारि, द्वाराणि शेषाणि" (सां.का.३५) इति। ततः परं बुद्धिः प्रवर्तत इति ऊहविचारानन्तरं बुद्धिरध्यवसायं करोतीत्यर्थः। अहङ्कारव्यापारश्चाभिमननमिहानुक्तोऽपि बुद्धिव्यापारेणैव सूचितो ज्ञेयः। बुद्धिर्हित्यजाम्येनमुपाददामीति वाऽध्यवसायं कुर्वती अहङ्काराभिमत एव विषये भवति; तेन बुद्धिव्यापारेणैवाहङ्कारव्यापारोऽपि गृह्यते। बुद्धौ हि सर्वकरणव्यापारार्पणं भवति। यदुक्तम्— "एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः। कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति" (सां.का.३६)॥२०-२१॥

इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते।
कल्प्यते मनसा तूर्ध्वं गुणतो दोषतोऽथवा॥२२॥
जायते विषये तत्र या बुद्धिर्निश्चयात्मिका।
व्यवस्यति तया वक्तुं कर्तुं वा बुद्धिपूर्वकम्॥२३॥

एतदेवोहविचारपूर्वकत्वं बुद्धेर्विवृणोति— इन्द्रियेणेत्यादि। गृह्यते इति ऊहमात्रेण निर्विकल्पेन गृह्यते। गुणत इति उपादेयतया। दोषत इति हेयतया। बुद्ध्यध्यवसायं विवृणोति— जायत इत्यादि। विषये

तत्रेति मनसा कल्पिते विषये। निश्चयात्मिकेति स्थिरस्वरूपा अध्यवसायरूपेत्यर्थः। व्यवस्यतीति अनुष्ठानं करोति, उद्युक्तो भवतीत्यर्थः; बुद्ध्यध्यवसितमर्थं वक्तुं कर्तुं वाऽनुतिष्ठतीति यावत्। बुद्धिपूर्वकमित्यनेन यदेव बुद्धिपूर्वकमनुष्ठानं तदेवैवंविधं भवति नोन्मत्ताद्यनुष्ठानमिति दर्शयति॥२२-२३॥

एकैकाधिकयुक्तानि खादीनामिन्द्रियाणि तु।
पञ्च कर्मानुमेयानि येभ्यो बुद्धिः प्रवर्तते॥२४॥

मनोऽभिधायेन्द्रियाण्यभिधत्ते, तत्रापि ज्यायस्त्वाद् बुद्धीन्द्रियाणि, प्रागाह— एकैकेत्यादि। खादीनां मध्ये एकैकेनाधिकेन भूतेन युक्तानीन्द्रियाणि पञ्च चक्षुरादीनि; एकैकाधिकपदेन पञ्चापि पाञ्चभौतिकानि, परं चक्षुषि तेजोऽधिकमित्याद्युक्तं सूचयति। कर्मानुमेयानीति कार्यानुमेयानि; कार्यं चक्षुर्बुद्ध्यादि। येभ्यो बुद्धिः प्रवर्तत इति यानि बुद्धीन्द्रियाणि, तानीमानि पञ्चेति दर्शयति। यद्यपि च साङ्ख्ये आहङ्कारिकाणीन्द्रियाणि, यदुक्तं— "सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्" (सां.का.२५) इति, तथाऽपि मतभेदाद्भौतिकत्वमिन्द्रियाणां ज्ञेयं; किंवा, औपचारिकमेतद्भौतिकत्वमिन्द्रियाणां ज्ञेयम्; उपचारबीजं च यद्गुणभूयिष्ठं यदिन्द्रियं गृह्णाति, तत्तद्भूयिष्ठमित्युच्यते; चक्षुस्तेजो गृह्णाति, तेन तैजसमुच्यत इत्यादि ज्ञेयम्॥२४॥

हस्तौ पादौ गुदोपस्थं वागिन्द्रियमथापि च।
कर्मेन्द्रियाणि पञ्चैव पादौ गमनकर्मणि॥२५॥
पायूपस्थं विसर्गार्थं हस्तौ ग्रहणधारणे।
जिह्वा वागिन्द्रियं वाक् च सत्या ज्योतिस्तमोऽनृता॥२६॥

अथ कर्मेन्द्रियाण्याह— हस्तावित्यादि। हस्तावेकं पादौ चैकमिन्द्रियमेकरूपकर्मकर्तृतया। गुदोपस्थं चैकैकम्। वाच उपादानहानार्थं भेदमाह— वाक् चेत्यादि। ज्योतिरिव ज्योतिः, धर्मकर्तृत्वेनोभयलोकप्रकाशकारित्वात्; एतद्विपर्ययेण तमः अनृता॥२५-२६॥

महाभूतानि खं वायुरग्निरापः क्षितिस्तथा।
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः॥२७॥

सम्प्रत्युद्देशक्रमानुरोधादर्थेऽभिधातव्येऽर्थानां प्रकृतिग्रहणगृहीतपञ्चभूतगुणतया पराधीनत्वादष्टधातुप्रकृतिगृहीतानि भूतान्येव तावदाह— महाभूतानीत्यादि। शब्दादयो यथासङ्ख्यं खादीनां नैसर्गिका गुणा ज्ञेयाः। यस्तु गुणोत्कर्षोऽभिधातव्यः स हि अनुप्रविष्टभूतसम्बन्धादेव। तेन पृथिव्यां चतुर्भूतप्रवेशात् पञ्चगुणत्वम्, एवं जलादावपि चतुर्गुणत्वादि ज्ञेयम्॥२७॥

तेषामेकगुणः पूर्वो गुणवृद्धिः परे परे।
पूर्वः पूर्वगुणश्चैव क्रमशो गुणिषु स्मृतः॥२८॥

नैसर्गिकं गुणमभिधाय भूतान्तरप्रवेशकृतं गुणमाह— तेषामित्यादि। एकगुणः पूर्व इति पूर्वो धातुः खरूपः शब्दैकगुणः। पुंलिङ्गता च खादीनां धातुरूपताबुद्धिस्थीकृतत्वात्; उक्तं हि— "खादयश्चेतनाषष्ठा धातवः" इति। यथा यथा च परत्वं तथा तथा च गुणवृद्धिर्यथासङ्ख्यम्। ननु, एतावताऽप्येकगुणत्वद्विगुणत्वादि न नियमेन ज्ञायते को गुणः क्व भूते इत्याह— पूर्व इत्यादि।— गुणिषु खादिषु धातुषु पूर्वो गुणः क्रमेण यथासङ्ख्यं वर्तते; न केवलं पूर्वः किन्तु पूर्वस्यापि यो गुणः, स च पूर्वगुण उत्तरे भूते वर्तते। तेन खे पूर्वे पूर्वः शब्द(ब्दो)गुणो वर्तते; वायौ तु स्पर्शः क्रमप्राप्तः पूर्वो भवति, पूर्वगुणश्च शब्द इति द्विगुणत्वम्; एवमग्न्यादौ च ज्ञेयम्। गन्धस्तूत्तरगुणान्तराभावान्न पूर्वो

भवति, तथाऽपि 'गन्धश्च तद्गुणाः' इति ग्रन्थे तद्गुणा इतिपदापेक्षया गन्धस्य पूर्वत्वं कल्पनीयं; किंवा, पूर्वं इति चत्रिणो गच्छन्तीतिन्यायेनोक्तं, तेनापूर्वोऽपि गन्धः क्रमागतः पृथिव्यां ज्ञेयः॥२८॥

खरद्रवचलोष्णत्वं भूजलानिलतेजसाम्।

आकाशस्याप्रतीघातो दृष्टं लिङ्गं यथाक्रमम्॥२९॥

लक्षणं सर्वमेवैतत् स्पर्शनेन्द्रियगोचरम्।

स्पर्शनेन्द्रियविज्ञेयः स्पर्शो हि सविपर्ययः॥३०॥

भूतानामसाधारणं लक्षणमाह— खरेत्यादि। अप्रतीघातः अप्रतिहननमस्पर्शत्वमिति यावत्; स्पर्शवद्धि गतिविघातकं भवति नाकाशः, अस्पर्शवत्त्वात्। सर्वमेवैतदिति खरत्वादि। स्पर्शनेन्द्रियगोचरमिति स्पर्शनेन्द्रियज्ञेयम्। कथमेतत् सर्वं स्पर्शनेन्द्रियज्ञेयमित्याह— स्पर्शनेत्यादि। सविपर्यय इति स्पर्शाभाव इत्यर्थः। यदिन्द्रियं यद्गृह्णाति, तत्तस्याभावमपि गृह्णाति; तेन, आकाशस्यास्पर्शत्वमपि स्पर्शनेन्द्रियग्राह्यमिति युक्तम्। द्रवत्वं चलत्वं च साङ्ख्यमते स्पर्शनग्राह्यत्वात् स्थूलभूतवातधर्मः स्पर्श एव; यद्धि स्पर्शनेन गृह्यते, तत् सर्वं महाभूतवातपरिणाम एव। एतानि च खादीनि सूक्ष्माणि तन्मात्ररूपाणि ज्ञेयानि, स्थूलभूतानि तु खादीनि विकारतया तत्रोक्तानि। प्रकृतिवर्गे सूक्ष्मरूपास्तन्मात्रा उक्ताः। वचनं हि— "तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः। एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च" (सां.का.३८) इति; तेनेहापि खादीनि तन्मात्रशब्दोक्तानि सूक्ष्माणि बोद्धव्यानि॥२९-३०॥

गुणाः शरीरे गुणिनां निर्दिष्टाश्चिह्नमेव च।

भूतानां सूक्ष्माणां शरीरस्थानां लिङ्गान्तराण्याह— गुणा इत्यादि। गुणाः शब्दादयः। गुणिनामिति सूक्ष्मरूपभूतानाम्। एवचग्रहणात् शब्दादयश्च व्यक्ताः सूक्ष्माणां शरीरस्थानां भूतानां लक्षणं भवन्तीति वाक्यार्थः॥

अर्थाः शब्दादयो ज्ञेया गोचरा विषया गुणाः॥३१॥

अर्थानाह— अर्था इत्यादि। अर्थशब्देन तु ये शब्दादयोऽभिधीयन्ते ते स्थूलखादिरूपा एव ज्ञेयाः; येनाकाशपरिणाम एव शब्दः, वातपरिणामः स्पर्श इत्यादि दर्शनम्। शब्दादिग्रहणेनात्राकाशादिग्रहणं यत्, तदाकाशादिपरिणामा एव शब्दादय इति युक्तमेव। एतेन यच्छ्रोत्रग्राह्यं तत् सर्वमाकाशं शब्दश्च, यत् स्पर्शेन गृह्यते तत् सर्वं वायुः स्पर्शश्चेत्यादि ज्ञेयम्॥३१॥

या यदिन्द्रियमाश्रित्य जन्तोर्बुद्धिः प्रवर्तते।
याति सा तेन निर्देशं मनसा च मनोभवा॥३२॥
भेदात् कार्येन्द्रियार्थानां बह्व्यो वै बुद्धयः स्मृताः।
आत्मेन्द्रियमनोर्थानामेकैका सन्निकर्षजा॥३३॥
अङ्गुल्यङ्गुष्ठतलजस्तन्त्रीवीणानखोद्भवः।
दृष्टः शब्दो यथा बुद्धिर्दृष्टा संयोगजा तथा॥३४॥

सम्प्रति प्रकृतिगणप्रविष्टाया बुद्धेरुपदर्शनार्थं तस्या बुद्धेर्वृत्तिभेदात् ज्ञानविशेषरूपाण्याह— येत्यादि। यदिन्द्रियमाश्रित्येति यदिन्द्रियप्रणालिकामाश्रित्य महच्छब्दाख्यस्य बुद्धितत्त्वस्य वृत्तिविशेषरूपाणि ज्ञानानीन्द्रियप्रणालिकया भवन्ति, तदिन्द्रियजन्यत्वेनैव तानि व्यपदिश्यन्ते— चक्षुर्बुद्धिः, श्रोत्रबुद्धिरित्यादिव्यपदेशेन। मनोभवा च बुद्धिश्चिन्त्यादिविषया मनसा निर्दिश्यते; मनोबुद्धिरिति

व्यपदिश्यत इत्यर्थः। इन्द्रियमनोभेदेन षड्वं बुद्धीनां प्रतिपाद्य बुद्धिबहुत्वं प्राह— भेदादित्यादि। कार्यस्य इन्द्रियार्थस्य च भेदात् तत्सम्बन्धेन भिद्यमाना बह्व्यो बुद्धयो भवन्ति; कार्यं सुखदुःखभेदाः; सुखदुःखप्रपञ्चेन हि तत्कार्येण कारणं ज्ञानमपि बहु भवति। इदानीं सर्वबाह्यज्ञानसाधनमाह— आत्मेत्यादि। आत्मा अव्यक्तम्। एकैकेति प्रत्येकम्। बुद्धेरनेकात्मादिमेलकजन्यत्वे दृष्टान्तमाह— अङ्गुलीत्यादि। अनेन दृष्टान्तेन शब्दद्वयमाह; अङ्गुल्यङ्गुष्ठतलजशब्द एकः, अयं चाङ्गुष्ठयन्त्रितमध्यमाङ्गुल्याः करतलसंयोगाज्जायमानतलशब्द उच्यते; तन्त्रीवीणानखोद्भवश्च वीणाशब्द एकः; अन्ये त्वेकमेवाङ्गुल्यादिजं वीणाशब्दं वर्णयन्ति। एतेन, यथा शब्दोऽङ्गुलाद्यन्यतमवैकल्येऽपि न भवति, तथा बुद्धिरप्यात्मादीनामन्यतमवैकल्येऽपि न भवतीति दर्शयति॥३२-३४॥

बुद्धीन्द्रियमनोर्थानां विद्याद्योगधरं परम्।
चतुर्विंशतिको ह्येष राशिः पुरुषसञ्ज्ञकः॥३५॥

अत्र च बुद्धिवृत्तीनां ज्ञानानां कथनेनैवाहङ्कारोऽपि सूचित एव; यतोऽहङ्कारोपजीवितैवात्मादिसंवलितेयं बुद्धिः 'अहं पश्यामि' इत्यादिरूपा भवति; तेन बुद्धेरहङ्कारस्य चोक्तत्वादवशिष्टमव्यक्तं कार्यद्वारा ब्रूते— बुद्धीत्यादि। परमिति अव्यक्तम्। बुद्ध्यादीनां योगं मेलकं धरतीति योगधरम्; अव्यक्तं हि प्रकृतिरूपं पुरुषार्थप्रवृत्तं बुद्ध्यादिमेलकं भोगसम्पादकं सृजति। एवं व्युत्पादितं चतुर्विंशतिकमुपसंहरति— चतुर्विंशतिक इत्यादि। यदि वा कर्मेन्द्रियाण्यभिधाय महाभूतानीत्यादिना अर्था एवाश्रयभूतखादिकथनेनोच्यन्ते, या यदिन्द्रियमाश्रित्येत्यादिना तु स्फुटोपलभ्यमाना बुद्धिवृत्तिभेदा उच्यन्ते, बुद्ध्यहङ्कारतन्मात्राण्यव्यक्तानि तु सूक्ष्माणि नोक्तानि, तानि सर्वाण्येव बुद्धीन्द्रियमनोर्थानामित्यादिग्रन्थे परशब्देनोच्यन्ते, तेन योगधरं परमित्यनेन मूलप्रकृतिस्तथा

प्रकृतिविकृतयश्च महदादयः सप्तोच्यन्ते; एवं चतुर्विंशतिको राशिर्भवति। परत्वं च विकारापेक्षया प्रकृतीनामुपपन्नमेव॥३५॥

रजस्तमोभ्यां युक्तस्य संयोगोऽयमनन्तवान्।
ताभ्यां निराकृताभ्यां तु सत्त्ववृद्ध्या निवर्तते॥३६॥

सम्प्रत्येवंरूपपुरुषस्य सकारणं संसरणं मोक्षहेतुं चाह— रज इत्यादि। संयोगोऽयमिति चतुर्विंशतिराशिरूपो मेलकः। ताभ्यामिति रजस्तमोभ्याम्। सत्त्ववृद्ध्या कारणभूतया रजस्तमोनिवृत्त्या पुरुषरूपः संयोगो निवर्तते मोक्षो भवतीत्यर्थः। सत्त्वं वृद्धं विशुद्धज्ञानजननाद् रजस्तमसी संसारकारणे विजित्य प्रकृतिपुरुषविवेकज्ञानान्मोक्षमावहति॥३६॥

अत्र कर्म फलं चात्र ज्ञानं चात्र प्रतिष्ठितम्।
अत्र मोहः सुखं दुःखं जीवितं मरणं स्वता॥३७॥
एवं यो वेद तत्त्वेन स वेद प्रलयोदयौ।
पारम्पर्यं चिकित्सां च ज्ञातव्यं यच्च किञ्चन॥३८॥

पुनश्चतुर्विंशतिके पुरुषे कर्मफलादि दर्शयन् दोषहीने पुरुषे कर्मफलाद्यभावमर्थोद्दर्शयति— अत्रेत्यादि। फलमत्रेति यथोक्तसमुदायपुरुषे। कर्मेति अदृष्टम्। फलमिति अदृष्टफलम्। स्वता ममता। ज्ञानं च यद्यपि चतुर्विंशतितत्त्वातिरिक्तस्योदासीनस्यैव, तथाऽपि तच्चेतनया प्रकृतिरपि चेतनामापद्य चेतनैव भवतीति युक्तम् 'अत्र ज्ञानम्' इति। वचनं हि— "तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्" (सां.का.२०) इति। प्रलयोदयाविति जीवितमरणे। पारम्पर्यमिति शरीरपरम्पराम्। चिकित्सां चेति

नैष्ठिकी आत्यन्तिकदुःखचिकित्सा मोक्षसाधना ज्ञातव्या। यच्च किञ्चनेत्यनेनानुक्तमपि कृत्स्नं ज्ञेयमवरुणद्धि॥३७-३८॥

भास्तमः सत्यमनृतं वेदाः कर्म शुभाशुभम्।
न स्युः कर्ता च बोद्धा च पुरुषो न भवेद्यदि॥३९॥
नाश्रयो न सुखं नार्तिर्न गतिर्नागतिर्न वाक्।
न विज्ञानं न शास्त्राणि न जन्म मरणं न च॥४०॥
न बन्धो न च मोक्षः स्यात् पुरुषो न भवेद्यदि।
कारणं पुरुषस्तस्मात् कारणज्ञैरुदाहृतः॥४१॥
न चेत् कारणमात्मा स्याद्भादयः स्युरहेतुकाः।
न चैषु सम्भवेज् ज्ञानं न च तैः स्यात् प्रयोजनम्॥४२॥

पुरुषः कारणं कस्मादिति प्रश्नस्योत्तरं— भास्तम इत्यादि। भाः प्रतिभा। तमः मोहः। पुरुष इह प्रकरणे आत्माऽभिप्रेतः। आश्रयः शरीरम्। गतिश्च प्रयोजनानुसन्धानाद्भवति, एवमागतिरपि। कारणं पुरुषस्तस्मादिति भास्तमःसत्यादौ कारणं पुरुष इत्यर्थः। एतदेव भाआदिकारणत्वमात्मन आह— न चेदित्यादि। एवं मन्यते— भास्तमसी धर्माधर्मजन्ये, धर्माधर्मौ चासत्यात्मनि निराश्रयौ न भवितुमर्हतः; तथा सत्यं धर्मजनकतया उपादेयम्, अनृतं चाधर्मजनकतयाऽनुपादेयम्, एतच्चात्मनि स्थिरेऽसति धर्माधर्मजनकत्वं नास्ति, ततश्च सत्यासत्यभेदोऽप्यकिञ्चित्करत्वान्नास्ति; एवं शुभाशुभकर्मण्यपि वाच्यं; तथा कर्ता च कारणप्रतिसन्धाता न भवति, प्रतिसन्धातुरात्मनोऽभावादित्यर्थः; तथा बोद्धा च पूर्वापरावस्थाप्रतिसन्धातैव भवति; शरीरं चात्मनो भोगायतनं नात्मानं विना भवति; एवं सुखादावप्यात्मनः कारणत्वमुन्नेयम्; विज्ञानं शास्त्रार्थज्ञानं, शास्त्राणि प्रतिसन्धात्राऽऽत्मनैव कृतानि। न चैषु सम्भवेज्ज्ञानमिति आत्मानं ज्ञातारं विना न भादिषु

ज्ञानं सम्भवेत्, ज्ञातुरात्मनोऽभावादित्यर्थः। न च तैः स्यात् प्रयोजनमिति भादीनामात्मार्थत्वेनासत्यात्मनि भाद्युत्पत्तेः प्रयोजनं न स्यात्, प्रयोजनाभावाच्चोत्पादो न स्यात्; सर्वेषामेव हि भावानामात्मस्थौ धर्माधर्मौ पुरुषभोगार्थमुत्पादकौ, असति भोक्तरि भोज्येनापि न भवितव्यं कारणाभावात्॥३९-४२॥

कृतं मृद्दण्डचक्रैश्च कुम्भकारादृते घटम्।
कृतं मृत्तृणकाष्ठैश्च गृहकाराद्विना गृहम्॥४३॥
यो वदेत् स वदेद्देहं सम्भूय करणैः कृतम्।
विना कर्तारमज्ञानाद्युक्त्यागमबहिष्कृतः॥४४॥

आत्मानं विना शरीरानुत्पादे दृष्टान्तद्वयं प्रमेयगौरवादाह— कृतं मृद्दण्डेत्यादि। सम्भूय करणैः कृतमित्यात्मनिरपेक्षैर्भूतैः कृतमित्यर्थः। युक्त्या अनुमानरूपया आगमेन च रहितो युक्त्यागमबहिष्कृतः; प्रत्यक्षं चात्र नोक्तं, तस्यात्मानं प्रति प्रायोऽयोग्यत्वात्॥४३-४४॥

कारणं पुरुषः सर्वैः प्रमाणैरुपलभ्यते॥
येभ्यः प्रमेयं सर्वेभ्य आगमेभ्यः प्रमीयते॥४५॥

सर्वैः प्रमाणैरिति प्रत्यक्षादिभिः। येभ्य इति करण एवापादानविवक्षया पञ्चमी। आगमयन्ति बोधयन्तीति आगमाः प्रमाणान्येव; अन्ये त्वागमप्रमाणाभ्यां शास्त्राण्येव ब्रुवते॥४५॥

न ते तत्सदृशास्त्वन्ये पारम्पर्यसमुत्थिताः।
सारूप्याद्ये त एवेति निर्दिश्यन्ते नवा नवाः॥४६॥
भावास्तेषां समुदयो निरीशः सत्त्वसञ्ज्ञकः।

कर्ता भोक्ता न स पुमानिति केचिद्व्यवस्थिताः॥४७॥

निरात्मवादिमतमुत्थापयति— न ते इत्यादि। अस्मिञ् शरीरे ते क एव पृथिवीजलादयो भावाः, ये त एवेति व्यपदिश्यन्ते; ते न भवन्ति पूर्वानुभूता नानुभवन्तीत्यर्थः। यदि ते न भवन्ति, कथं तर्हि 'ते' इत्यभिज्ञानमित्याह— तत्सदृशास्त्वन्ये पूर्वसदृशा इत्यर्थः। पारम्पर्यसमुत्थिता इति सदृशसन्तानव्यवस्थिताः। सारूप्यादिति सदृशरूपत्वात्। तेषां समुदय इति क्षणभङ्गिनां मेलक इत्यर्थः। निरीश इति स्थाय्यात्मरहितः। सत्त्वसञ्ज्ञक इति प्राणिसञ्ज्ञकः। केचिदिति बौद्धाः। बौद्धा हि निरात्मकं क्षणिकज्ञानादिसमुदायमात्रं शरीरमिच्छन्ति; प्रतिसन्धानं च क्षणिकानामपि ज्ञानादीनां कार्यकारणभावादेकफलसन्ततताविच्छन्ति॥४६-४७॥

तेषामन्यैः कृतस्यान्ये भावा भावैर्नवाः फलम्।
भुञ्जते सदृशाः प्राप्तं यैरात्मा नोपदिश्यते॥४८॥

एतद्दूषयति— तेषामित्यादि। तेषां ज्ञानसन्तानवादिनाम्, अन्येन कृतस्यौदनपाकादेः फलमन्नादि अन्ये भुञ्जत इति प्राप्नोति। एतच्चासङ्गतं, यतः फलं भोक्ष्यामीति कृत्वा भाविफलप्रत्याशया प्रवृत्तिर्युक्ता, न त्वन्यस्य भोग्यतां फलस्य पश्यन् कश्चित् प्रवर्तते; योऽपि सूपकारादिः परार्थं प्रवर्तते, सोऽपि परार्थेन स्वार्थं साधयितुकाम एवेति भावः॥४८॥

करणान्यान्यता दृष्टा कर्तुः कर्ता स एव तु।
कर्ता हि करणैर्युक्तः कारणं सर्वकर्मणाम्॥४९॥

परमतं दूषयित्वा स्वमतमाह— करणेत्यादि। करणस्य शरीरस्य परिणामिनोऽन्यान्यता दृष्टा। कर्ता चात्मा, स एव न विनाशीत्यर्थः। अत्रैव दृष्टान्तमाह— कर्ता हीत्यादि। यथाऽनेकशिल्पवित् कर्ता करणैर्वांशीसन्दंशयन्त्रादिभिः काष्ठपाटनलौहघटनादि करोति, तथाऽऽत्माऽपीत्यर्थः॥४९॥

निमेषकालाद्भावानां कालः शीघ्रतरोऽत्यये।
भग्नानां न पुनर्भावः कृतं नान्यमुपैति च॥५०॥
मतं तत्त्वविदामेतद्यस्मात्तस्मात् स कारणम्।
क्रियोपभोगे भूतानां नित्यः पुरुषसञ्ज्ञकः॥५१॥

अथायमात्मसद्भावः स्थिरोऽस्तु, शरीरारम्भकाणां भूतानां का वा गतिरित्याह— निमेषेत्यादि। भावानामिति शरीरादिभावानाम्। अत्यय इति विनाशे; शरीरस्य स्वाग्निपच्यमानस्य निमेषकालादपि शीघ्रं विनाशो भवतीत्यर्थः। अमीषां च भावानां भग्नानां न पुनर्भावः पुनरागमनं नास्तीत्यर्थः। तेन, येन शरीरेण यत् कृतं तच्छरीरं तत्फलं न प्राप्नोतीत्युक्तं भवति। अथ मा भवत्वेवं ततः किमित्याह— कृतमित्यादि।— कृतं कर्म यागादि न फलरूपतयाऽन्यमुपैति, एवं सति देवदत्तकृतेन शुभकर्मणा यज्ञदत्तादयोऽपि सुखभाजः स्युः; तस्मात् क्षणभङ्गिशरीरादतिरिक्तः कर्मकर्ता तत्फलभोक्ता चास्तीति भावः। क्रियोपभोग इति क्रियायां तत्फलभोगे च। भूतानामिति प्राणिनाम्॥५०-५१॥

अहङ्कारः फलं कर्म देहान्तरगतिः स्मृतिः।
विद्यते सति भूतानां कारणे देहमन्तरा॥५२॥

आत्मसद्भावे हेत्वन्तरमाह— अहङ्कार इत्यादि। एतेऽहङ्कारदयः स्थिर एव परमात्मनि भवन्ति, पूर्वापरकालावस्थायिवस्तुधर्मत्वादिति भावः। देहमन्तरेति देहं विना; देहातिरिक्ते कारणे सत्यहङ्कारो भवतीत्यर्थः॥५२॥

प्रभवो न ह्यनादित्वाद्विद्यते परमात्मनः।

पुरुषो राशिसञ्ज्ञस्तु मोहेच्छाद्वेषकर्मजः॥५३॥

'प्रभवः पुरुषस्य कः' इत्यस्योत्तरं— प्रभव इत्यादि। प्रभवः कारणम्। राशिसञ्ज्ञ इति षड्धातुसमुदायरूपश्चतुर्विंशतिराशिरूपो वा। मोहेच्छाद्वेषजनितकर्मजो मोहेच्छाद्वेषकर्मजः। मोहाद्धि भावेषु इच्छा द्वेषश्च भवति, ततः प्रवृत्तिः, प्रवृत्तेर्धर्माधर्मौ, तौ च शरीरं जनयतो भोगार्थम्॥५३॥

आत्मा ज्ञः करणैर्योगाज् ज्ञानं त्वस्य प्रवर्तते।

करणानामवैमल्यादयोगाद्वा न वर्तते॥५४॥

पश्यतोऽपि यथाऽऽदर्शे सङ्क्लिष्टे नास्ति दर्शनम्।

तत्त्वं जले वा कलुषे चेतस्युपहते तथा॥५५॥

'किमज्ञो ज्ञः' इत्यस्योत्तरम्— आत्मेत्यादि। करणानीह मनोबुद्धीन्द्रियाणि। न वर्तते ज्ञानमिति योजना। ननु यद्ययमात्मा ज्ञः, तत् किमित्यस्य सर्वदा ज्ञानं न भवतीत्याह— पश्यतोऽपीत्यादि। पश्यतोऽपीति चक्षुष्मतोऽपीत्यर्थः। तत्त्वमिति दर्शनविशेषणम्। तेन, म्लाने दर्पणे जले वा दर्शनं भवदप्ययथार्थग्राहितया न तत्त्वरूपं भवतीत्यर्थः। चेतसीत्युपलक्षणं, तेन चक्षुरादावप्युपहत इति ज्ञेयम्॥५४-५५॥

करणानि मनो बुद्धिर्बुद्धिकर्मेन्द्रियाणि च।

कर्तुः संयोगजं कर्म वेदना बुद्धिरेव च॥५६॥

नैकः प्रवर्तते कर्तुं भूतात्मा नाश्नुते फलम्।

संयोगाद्वर्तते सर्वं तमृते नास्ति किञ्चन॥५७॥

करणप्रस्तावाज् ज्ञाने कर्मणि वेदनायां च यावत् करणमात्मनस्तदाह— करणानीत्यादि। संयोगजमिति कर्मणा वेदनया बुद्ध्या च योज्यम्। नाश्नुते फलमेक इति योज्यम्। एक इति निष्करणः। संयोगाद्वर्तत इति करणसमुदायादुत्पद्यते। तमृत इति संयोगं विना॥५६-५७॥

न ह्येको वर्तते भावो वर्तते नाप्यहेतुकः।
शीघ्रगत्वात्स्वभावात्त्वभावो न व्यतिवर्तते॥५८॥

अत्रैव सामग्रीजन्यत्वे सर्वकार्याणामुपपत्तिमाह— न ह्येक इत्यादि। एको भावः कारणरूपः सहकारिकारणान्तररहितो न कार्यकरणे वर्तत इत्यर्थः; एवं तावदेकं कारणं कार्ये न वर्तते, कार्यं च हेतुं विना न भवतीत्याह— वर्तते नाप्यहेतुक इति; हेतुं विना भाव उत्पत्तिधर्मा न वर्तते न भवतीत्यर्थः। तेन करणयुक्तात्मजन्यं कार्यं न केवलादात्मनो हेतुरूपाद्भवतीत्युक्तं भवति। अथ हेतुं विना चेद्भावो न भवति, तत् किमभावेऽपि शारीराणां भावानां हेत्वपेक्षा न वेत्याह— शीघ्रगत्वादित्यादि। शीघ्रगत्वात् स्वभावाल्लक्षितोऽभावो न स्वभावं व्यतिवर्तते शीघ्रगत्वस्वभावं न त्यजतीत्यर्थः। तेन, अहेतुक एवाभावो भवति, भावस्तु सहेतुकः। उक्तं हि “उत्पत्तिहेतुर्भावनां न निरोधेऽस्ति कारणम्” (सू.अ.१६) इति। किंवा, शीघ्रगत्वादस्थिरत्वादभावो नावस्थान्तरमात्मनाशं प्रति गच्छतीति ग्रन्थार्थः॥५८॥

अनादिः पुरुषो नित्यो विपरीतस्तु हेतुजः।
सदकारणवन्नित्यं दृष्टं हेतुजमन्यथा॥५९॥

'स नित्यः किमनित्यः' इत्यस्योत्तरम्— अनादिरित्यादि। अनादिश्च पुरुषोऽव्यक्तरूप आत्मशब्दाभिधेयः। विपरीत इति आदिमान् राशिरूपः पुरुष इत्यर्थः। अत्रैवानादेर्नित्यत्वे शास्त्रान्तरसम्मतिमप्याह— सदित्यादि। सदिति त्रिविधसमये प्रमाणगम्यभावरूपम्। एतेन, प्रागभावस्याकारणवतोऽप्यभावरूपतयाऽनित्यत्वं न व्यभिचारकम्। हेतुजमन्यथेति अत्रापि भावरूपमिति योजनीयम्। तेन, हेतुजन्यस्यापि प्रध्वंसस्याविनाशित्वं परिहृतं भवति॥५९॥

तदेव भावादग्राह्यं नित्यत्व न कुतश्चन।
भावाज्ज्ञेयं तदव्यक्तमचिन्त्यं व्यक्तमन्यथा॥६०॥
अव्यक्तमात्मा क्षेत्रज्ञः शाश्वतो विभुरव्ययः।
तस्माद्यदन्यत्तद्व्यक्तं, वक्ष्यते चापरं द्वयम्॥६१॥
व्यक्तमैन्द्रियकं चैव गृह्यते तद्यदिन्द्रियैः।
अतोऽन्यत् पुनरव्यक्तं लिङ्गग्राह्यमतीन्द्रियम्॥६२॥

किं तन्नित्यत्वमित्याह— तदेवेत्यादि। भावादुत्पत्तिधर्मकात्। तन्नित्यत्वं न कुतोऽपि भावाद्भवति, नित्यं हि न कुतोऽपि भवति। ततश्चात्मा भावं प्रति निरपेक्षत्वात् सर्वेभ्यो भावेभ्योऽप्यग्रे नित्यं सदेव। तच्चैवम्भूतं नित्यमव्यक्तं ज्ञेयम्। अचिन्त्यमित्यव्यक्तविशेषणम्। अव्यक्तं च मूलप्रकृतिः। व्यक्तमन्यथेति प्रकृतेरन्यतमकार्यं महदादिकमनित्यम्; आकाशमपि विकाररूपतयाऽनित्यमेव; उदासीनपुरुषस्तु नित्य एवाव्यक्तशब्देनैव लक्षित इत्युक्तमेव। अव्यक्तधर्मान्तरव्यापकान् पर्यायानाह — अव्यक्तमित्यादि। पुनः प्रकारान्तरेण व्यक्ताव्यक्तार्थमाह— वक्ष्यत इत्यादि। अपरं द्वयमिति प्रकारान्तरकृतं व्यक्ताव्यक्तद्वयम्। लिङ्गग्राह्यमिति अनुमानग्रह्यम्। अतीन्द्रियमित्यनेन चेन्द्रियग्रहणायोग्यं यत् केनापि शब्दादिलिङ्गेन गृह्यते न तदव्यक्तं, किन्तु यन्नित्यानुमेयं मनोऽहङ्कारादि तदेवाव्यक्तम्॥६०-६२॥

खादीनि बुद्धिरव्यक्तमहङ्कारस्तथाऽष्टमः।

भूतप्रकृतिरुद्दिष्टा विकाराश्चैव षोडश॥६३॥

बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च।

समनस्काश्च पञ्चार्था विकारा इति सञ्ज्ञिताः॥६४॥

'प्रकृतिः का विकाराः के' इत्यस्योत्तरं— खादीनीत्यादि। खादीनि सूक्ष्मभूतखादीनि तन्मात्रशब्दाभिधेयानि। बुद्धिः महच्छब्दाभिधेया। अव्यक्तं मूलप्रकृतिः। अहङ्कारः बुद्धिविकारः; स च त्रिविधः— भूतादिः, तैजसः, वैकारिकश्च। भूतानां स्थावरजङ्गमानां प्रकृतिर्भूतप्रकृतिः। अत्र चाव्यक्तं प्रकृतिरेव परं, बुद्ध्यादयस्तु स्वकारणविकृतिरूपा अपि स्वकार्यापेक्षया प्रकृतिरूपा इह प्रकृतित्वेनोक्ताः। यदुक्तं— "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त" (सां.का.३) इति। विकारा नाह— विकारा इत्यादि। एवशब्दो भिन्नक्रमेऽवधारणे, तेन विकारा एव षोडश परं न प्रकृतयः। बुद्धेरिन्द्रियाणि बुद्धीन्द्रियाणि। पञ्चार्था इति स्थूला आकाशादयः शब्दादिरूपाः; गुणगुणिनोर्हि परमार्थतो भेदो नास्त्येवास्मिन् दर्शने॥६३-६४॥

इति क्षेत्रं समुद्दिष्टं सर्वमव्यक्तवर्जितम्।

अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमृषयो विदुः॥६५॥

एनमेव प्रकृतिविकारसमूहं क्षेत्रक्षेत्रज्ञभेदेन विभजते— इतीत्यादि। अव्यक्तवर्जितमिति प्रकृत्युदासीनवर्जितं, प्रकृतेश्चोदासीनपुरुषचैतन्येन चैतन्यमस्त्येव॥६५॥

जायते बुद्धिरव्यक्ताद्बुद्ध्याऽहमिति मन्यते।

परं खादीन्यहङ्कारादुत्पद्यन्ते यथाक्रमम्॥६६॥

ततः सम्पूर्णसर्वाङ्गो जातोऽभ्युदित उच्यते।

सम्प्रति महाप्रलयान्तरं यथाऽऽदिसर्गे बुद्ध्याद्युत्पादो भवति तदाह— जायत इत्यादि। बुद्ध्याऽहमिति मन्यत इति बुद्धेर्जातेनाहङ्कारेणाहमिति मन्यत इत्यर्थः। खादीनीति खादीनि सूक्ष्माणि तन्मात्ररूपाणि, तथैकादशेन्द्रियाणि। वचनं हि "प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः" (सां.का.२२) इति। यथाक्रममिति यस्मादहङ्कारादुत्पद्यते तेन क्रमेण; तत्र वैकृतात् सात्त्विकादहङ्कारात्तैजससहायादेकादशेन्द्रियाणि भवन्ति, भूतादेस्त्वहङ्कारात्तामसात्तैजससहायात् पञ्चतन्मात्राणि। यदुक्तं— "सात्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" (सां.का.२५) इति। तत इति आहङ्कारिककार्यानन्तरं तन्मात्रेभ्य उत्पन्नस्थूलभूतसम्बन्धात्। सम्पूर्णसर्वाङ्गो जात इति आदिसर्गो(र्गे) जातः॥६६॥

पुरुषः प्रलये चेष्टैः पुनर्भावैर्वियुज्यते॥६७॥

अव्यक्ताद्व्यक्ततां याति व्यक्तादव्यक्ततां पुनः।

रजस्तमोभ्यामाविष्टश्चक्रवत् परिवर्तते॥६८॥

येषां द्वन्द्वे परा सक्तिरहङ्कारपराश्च ये।

उदयप्रलयौ तेषां न तेषां ये त्वतोऽन्यथा॥६९॥

एवमादिसर्गे प्रकृतेर्महदादिसर्गं दर्शयित्वा महाप्रलये प्रकृतावव्यक्तरूपायां

बुद्ध्यादीनां लयमाह— पुरुष इत्यादि। इष्टैर्भावैरिति पुरुषोपभोगार्थमिष्टैर्बुद्ध्यादिभिः। अन्ये तु एवम्भूतसङ्गं जन्मनि, बुद्ध्यादिवियोगं च मरणे ब्रुवते। तन्न, जन्ममरणयोर्बुद्ध्यादीनां विद्यमानत्वात्। उक्तं हि— "अतीन्द्रियैस्तैरतिसूक्ष्मरूपैरात्मा कदाचिन्न विमुक्तपूर्वः। नैवेन्द्रियैर्नैव मनोमतिभ्यां न

चाप्यहङ्कारविकारदोषैः" (शा.अ.२) इति। तथाऽन्यत्राप्युक्तं— "पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्। संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" (सां.का.४०) इति। तस्मान्महाप्रलय एव प्रकृतौ लयः, तथाऽऽदिसर्ग एव प्रकृतेर्महदादिसृष्टिरिति। एतदेव प्रपञ्चं लयं च प्रकृतेराह— अव्यक्तादित्यादि। अव्यक्तादिति प्रकृतेः, व्यक्ततामिति महदादिमहाभूतपर्यन्तप्रपञ्चरूपतां याति। व्यक्तादिति महाभूतप्रपञ्चाद्यवस्थातः पुनरव्यक्तरूपतां याति गच्छति; महाप्रलये हि महाभूतानि तन्मात्रेषु लयं यान्ति, तन्मात्राणि तथेन्द्रियाणि चाहङ्कारे लयं यान्ति, अहङ्कारो बुद्धौ, बुद्धिश्च प्रकृताविति लयक्रमः। अयं च लयक्रमो मोक्षेऽपि भवति। परं तु तत्र तं पुरुषं प्रति पुनः सर्गं नारभते प्रकृतिः। अयं संसारः कुतो भवतीत्याह— रज इत्यादि। आविष्टो युक्तः। चक्रवत् परिवर्तत इति पुनः पुनर्लयसर्गाभ्यां युज्यते। द्वन्द्व इति रजस्तमोरूपे मिथुने। अहङ्कारपरा इति अहङ्कारान्ममेदमित्यादिमिथ्याज्ञानपराः। उदयप्रलयौ जन्ममरणे, किंवा लयसर्गौ। अतोऽन्यथेति ये रागद्वेषविमुक्ता निरहङ्काराश्च तेषां नोदयप्रलयौ भवतः॥६७-६९॥

प्राणापानौ निमेषाद्या जीवनं मनसो गतिः।
इन्द्रियान्तरसञ्चारः प्रेरणं धारणं च यत्॥७०॥
देशान्तरगतिः स्वप्ने पञ्चत्वग्रहणं तथा।
दृष्टस्य दक्षिणेनाक्ष्णा सव्येनावगमस्तथा॥७१॥
इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः।
बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः॥७२॥
यस्मात् समुपलभ्यन्ते लिङ्गान्येतानि जीवतः।
न मृतस्यात्मलिङ्गानि तस्मादाहुर्महर्षयः॥७३॥
शरीरं हि गते तस्मिञ् शून्यागारमचेतनम्।
पञ्चभूतावशेषत्वात् पञ्चत्वं गतमुच्यते॥७४॥

'किं लिङ्गं पुरुषस्य च' इत्यस्योत्तरं— प्राणापानावित्यादि। प्राणापानौ उच्छ्वासनिःश्वासौ। निमेषाद्या इति आद्यशब्दग्रहणेन उन्मेषाद्याः प्रेक्षणविशेषा गृह्यन्ते। मनसो गतिरिति मनसा पाटलिपुत्रगमनादिरूपा। इन्द्रियान्तरसञ्चारोऽपि मनस एव, यथा चक्षुः परित्यज्य मनः स्पर्शनमधितिष्ठतीत्यादि। प्रेरणं च तथा धारणं च मनस एवेति ज्ञेयम्। देशान्तरगतिः स्वप्ने इति छेदः। पञ्चत्वग्रहणं मरणज्ञानम्। सव्येनावगम इति सव्येनाक्ष्णा स एवायं दक्षिणाक्षिदृष्टो घट इत्यवगम इत्यर्थः। चेतना ज्ञानमात्रम्। बुद्धिस्तु ऊहापोहज्ञानम्। अथ कथमेतान्यात्मानं गमयन्तीत्याह— यस्मादित्यादि। जीवत इति पञ्चभूतातिरिक्तात्मसंयुक्तस्य। पञ्चत्वं तु यद्यपि जीवतो न भवति किन्तु मृतस्यैव, तथाऽपि पञ्चत्वं मृतशरीरे दृश्यमानं विपर्ययात् पञ्चत्वाभावाज्जीवच्छरीरलिङ्गं भवतीति ज्ञेयम्। अत्रैवोदाहृताश्च प्राणापानादयो न भूतमात्रे भवन्ति, निरात्मकेष्विष्टकामृतशरीरादिष्वदर्शनात्। न च मन एव भूतातिरिक्तमात्मा भवितुमर्हति, यतस्तस्यापि करणरूपस्य प्रेरणाद्यात्मना कर्त्रा कर्तव्यम्। नापीन्द्रियाण्यात्मत्वेन स्वीकर्तुं पार्यन्ते, यतस्तथा सति इन्द्रियान्तरोपलब्धमर्थं नेन्द्रियाणि यज्ञदत्तोपलब्धमर्थं देवदत्त इव प्रतिसन्धातुं समर्थानि भवेयुः; अस्ति चेन्द्रियान्तरोपलब्धार्थप्रतिसन्धानं, यथा— सुरभिचन्दनं स्पृशामीत्यत्र। तस्मान्मन-इन्द्रिय-भूतातिरिक्त आत्मा तिष्ठतीति ज्ञेयम्। अत्र यद्यपि बुद्धिशब्देन चेतनाधृतिस्मृत्यहङ्काराः प्राप्यन्त एव बुद्धिप्रकारत्वेन, तथाऽपि पृथक्पृथगर्थगमकत्वेन पुनः पृथगुपात्ताः। तथाहि— चेतना गुणत्वेन अचेतनखादिभूतातिरिक्तधर्मेणात्मानं गमयति, धृतिस्तु नियमात्मिका नियन्तारमात्मानं गमयति, बुद्धिस्तु ऊहापोहयोरेकं कारणं गमयत्यात्मानं, स्मृतिस्तु पूर्वानुभूतार्थस्मर्तारं स्थायिनमात्मानं गमयतीत्याद्यनुसरणीयम्। आत्माधिष्ठानाभावे शरीरे प्राणाद्यभावमाह— शरीरमित्यादि। शून्यागारमिव शून्यागारं यथा अधिष्ठातृशून्यम्, एवं मृतशरीरमपि। षड्धातुकं शरीरं, तत्र षष्ठे आत्मनि गते पञ्चभूतात्मकं शरीरं भवति, तेन पञ्चत्वं गतमुच्यते॥।७०-७४॥

अचेतनं क्रियावच्च मनश्चेतयिता परः।

युक्तस्य मनसा तस्य निर्दिश्यन्ते विभोः क्रियाः॥७५॥

चेतनावान् यतश्चात्मा ततः कर्ता निरुच्यते।

अचेतनत्वाच्च मनः क्रियावदपि नोच्यते॥७६॥

'निष्क्रियस्य क्रिया तस्य कथम्' इत्यस्योत्तरम्— अचेतनमित्यादि। चेतयिता पर इति पर आत्मा चेतयिता परं न तु साक्षात् क्रियावान्। ननु, यद्येवं कथं तस्य क्रियेत्याह— युक्तस्येत्यादि। आत्माधिष्ठितस्यैव मनसः क्रिया उपचारादात्मनः क्रियेत्युच्यत इत्यर्थः। एतदेवोपपादयति— चेतनावानित्यादि। चेतनेन ह्यात्मनाऽधिष्ठितं मनः क्रियासु प्रवर्तते, चेतनानधिष्ठितं तु मनः क्रियासु न प्रवर्तते; तेन यत्कृता सा क्रिया स एव क्रियावानिति व्यपदेष्टुं युज्यते, नत्वचेतनं मनः; तत् पराधीनक्रियत्वेन परमार्थतः क्रियावदपि कर्तृत्वेन नोच्यत इति वाक्यार्थः; नोच्यते इति 'कर्तृ' इति शेषः॥७५-७६॥

यथास्वेनात्मनाऽऽत्मानं सर्वः सर्वासु योनिषु।

प्राणैस्तन्त्रयते प्राणी नह्यन्योऽस्त्यस्य तन्त्रकः॥७७॥

सम्प्रति स्वतन्त्रत्वेऽप्यनिष्टयोनिगमनमाक्षिप्तं समादधाति— यथास्वेनेत्यादि। सर्वासु नरगोहस्तिकीटादियोनिषु। प्राणैस्तन्त्रयते प्राणैर्योजयति, आत्मनैवायं धर्माधर्मसहायेनात्मानं सर्वयोनिषु नयति, न परप्रेरितो याति; यतो नान्यः पुरुषोऽस्य प्रेरकोऽस्ति ईश्वराभावात्; किंवा सत्यपि ईश्वरे तस्यापि कर्मपराधीनत्वात्। इदमेव चास्यानिष्टयोनिगमने स्वातन्त्र्यं यद् अनिष्टयोनिगमनहेत्वधर्मकरणे स्वातन्त्र्यम्, अधर्मकरणारब्धस्वकर्मणैवायमनिच्छन्नपि नीयत इत्यनिष्टयोनिगमनं भवति; स्वातन्त्र्यं च यथोक्तं भवति॥७७॥

वशी तत् कुरुते कर्म यत् कृत्वा फलमश्नुते।
वशी चेतः समाधत्ते वशी सर्वं निरस्यति॥७८॥

'वशी यद्यसुखैः कस्माद्भावैराक्रम्यते' इत्यस्योत्तरं— वशीत्यादि। वशी स्वेच्छाधीनप्रवृत्तिः (इष्टेऽनिष्टे वाऽऽत्मा,); तेन, वशी सन्नयं तानि कर्माणि करोति शुभान्यशुभानि वा आपातफलरागात्, यानि कृत्वा तत्कर्मप्रभावाच्छुभेनाशुभेन वा फलेन योगमाप्नोति। एतेन कर्तव्ये कर्मण्यस्य वशित्वं, कृतकर्मफलं त्वस्यानिच्छतोऽपि भवति; तेन तत्प्रति नास्य वशित्वम्। अन्यदपि वशित्वफलमाह— वशी चेतः समाधत्त इति। अनिष्टेऽर्थे वशी सन्नयं मनो निवर्तयति; यदि ह्ययं वशी न स्यात्, न मनो निवर्तयितुं शक्नुयात्। अपरमपि वशित्वगमकं कर्माह— वशी सर्वं निरस्यतीति। वशी सन्नयं मोक्षार्थं प्रवृत्तः सर्वारम्भं शुभाशुभफलं त्यजतीत्यर्थः। इह स्वतन्त्रः परात्मना ईश्वरादिना प्रेरितप्रवृत्तिरुच्यते; वशी तु स्वयमपि प्रवर्तमान इच्छावशात् प्रवर्तते, न प्रेरितप्रवृत्तिरूपत्वेनेप्सितेऽनीप्सिते च वर्तते इति स्वातन्त्र्यवशित्वयोर्भेदः॥७८॥

देही सर्वगतोऽप्यात्मा स्वे स्वे संस्पर्शनेन्द्रिये।
सर्वाः सर्वाश्रयस्थास्तु नात्माऽतो वेत्ति वेदनाः॥७९॥

'सर्वाः सर्वगतत्वाच्च वेदनाः किं न वेत्ति सः' इत्यस्योत्तरमाह— देहीत्यादि। सर्वगत इति सर्वगतोऽपि सन्, संस्पर्शनेन्द्रिय इति संस्पर्शनयुक्ते शरीरे, वेदनाः सुखदुःखरूपा वेत्ति, सर्वाश्रयस्थास्तु न वेत्तीति योजना। यस्मात् सर्वगतोऽप्यात्मा स्वकीय एव स्पर्शनवति शरीरे परं वेदना वेत्ति, तेन सर्वाश्रयस्थाः सर्ववेदना न वेत्तीति वाक्यार्थः। सर्वाश्रयस्था इति सर्वपरशरीरगताः। परशरीरे चात्मा स्वकर्मोपार्जितेन्द्रियाभावाद्विद्यमानोऽपि नोपलभते सुखदुःखे। स्वे स्वे शरीर इति वक्तव्ये यत्

‘संस्पर्शनेन्द्रिये’ इति करोति, तेन स्वशरीरेऽपि यत्र केशनखादौ स्पर्शनेन्द्रियं नास्ति तत्र नात्मा किञ्चिदुपलभत इति दर्शयति॥७९॥

विभुत्वमत एवास्य यस्मात् सर्वगतो महान्।
मनसश्च समाधानात् पश्यत्यात्मा तिरस्कृतम्॥८०॥
नित्यानुबन्धं मनसा देहकर्मानुपातिना।
सर्वयोनिगतं विद्यादेकयोनावपि स्थितम्॥८१॥

‘न पश्यति विभुः कस्मात्’ इत्यादिप्रश्नस्योत्तरं वक्तुं प्रवृत्तो विभुत्वसाधकार्थगुणहेतुप्राप्त्याविभुत्वमेव तावदात्मनः साधयति— विभुत्वमित्यादि। विभुत्वं सर्वगतपरिमाणयोगित्वम्। अत एवेति उक्तसर्वगतत्वात्। एतदेव स्पष्टार्थं साक्षाद्ब्रूते— यस्मादित्यादि। सर्वगतत्वं सर्वतोऽप्युपलभ्यमानत्वेन सर्वगताकाशादिपरिमाणस्यप्यस्ति, तेन तद्व्यवच्छेदार्थं ‘महान्’ इति पदं; तेन सर्वत्रोपलभ्यमानं महापरिमाणयोगिद्रव्यं विभुरुच्यत इति फलति। विभुत्वं व्युत्पाद्य कुड्यादितिरोहितज्ञानं नैकान्तेन भवतीति दर्शयन्नाह— मनस इत्यादि। समाधानं समाधिः। अनेन, योगिनः समाधिबलात्तिरोहितमपि पश्यन्तीति दर्शयति। ये तु तिरोहितं न पश्यन्ति तत्राप्युपपत्तिमाह— नित्येत्यादि। सर्वयोनिगतमप्यात्मानं मनसाऽनुबन्धगतमेकयोनाववस्थितं विद्यादिति योज्यम्। देहनिर्वर्तकेन कर्मणा अनुपात आत्मनि सम्बन्धो यस्य, तेन मनसा देहकर्मानुपातिना। एतेन, यद्यप्यात्मा कुड्यादिभिरतिरोहितस्तथाऽपि यदस्योपलब्धिसाधनं मनस्तस्यैकस्मिन्नेव शरीरे व्यवस्थितस्य व्यवधानान्न पश्यत्ययं तिरस्कृतमित्युक्तं भवति॥८०-८१॥

आदिर्नास्त्यात्मनः क्षेत्रपारम्पर्यमनादिकम्।
अतस्तयोरनादित्वात् किं पूर्वमिति नोच्यते॥८२॥

'क्षेत्रज्ञः क्षेत्रमथवा' इत्यादिप्रश्नस्योत्तरम्— आदिरित्यादि। क्षेत्रपारम्पर्यमिति क्षेत्रस्याव्यक्तवर्जितस्य महदादित्रयोविंशतिकस्य परम्परासन्ततेरनादित्वेनैव क्षेत्रक्षेत्रज्ञयोरिदं प्रथममिति व्यपदेशो नैव भवतीत्यर्थः। ननु यदि क्षेत्रपरम्पराऽप्यनादिस्तदा तस्यात्मवदुच्छेदो न प्राप्नोति, यदनादि तन्नित्यं भवति, यथा— आत्मेति दृष्टं? ब्रूमः— अनादित्वेऽपि यत् स्वरूपेणैवानादि तन्नोच्छिद्यते, यथा— आत्मा; यत्तु उच्छित्तिधर्मकं बुद्ध्यादि, तदुच्छिद्यत एव; सन्तानस्तु परमार्थतः सन्तानिभ्योऽतिरिक्तो नास्त्येव, यदनादिः स्यात्; तेन, सन्तानस्यानादित्वं भाक्तमेव। किञ्चैवम्भूतस्य बुद्ध्यादिसन्तानस्योच्छेदे मोक्षप्रतिपादक आगम एव प्रमाणत्वेन ज्ञेयः॥८२॥

ज्ञः साक्षीत्युच्यते नाज्ञः साक्षी त्वात्मा यतः स्मृतः।

सर्वे भावा हि सर्वेषां भूतानामात्मसाक्षिकाः॥८३॥

'साक्षिभूतश्च कस्यायम्' इत्यस्योत्तरं— ज्ञ इत्यादि। ज्ञो ज्ञानवान् साक्षीति लोके कथ्यते, नत्वज्ञः पाषाणादिः। तेन, ज्ञत्वेनासत्यप्यन्यस्मिन् कर्तरि साक्षीत्युच्यते इति वाक्यार्थः। सर्वेषामिति खादिभूतानाम्। सर्वे भावा इति सर्वे भूतधर्मा दर्शनयोग्याः। आत्मसाक्षिका इति आत्मोपलभ्यमानाः॥८३॥

नैकः कदाचिद्भूतात्मा लक्षणैरुपलभ्यते।

विशेषोऽनुपलभ्यस्य तस्य नैकस्य विद्यते॥८४॥

संयोगपुरुषस्येष्टो विशेषो वेदनाकृतः।

वेदना यत्र नियता विशेषस्तत्र तत्कृतः॥८५॥

'स्यात् कथं चाविकारस्य' इत्यादिप्रश्नस्योत्तरं— नैक इत्यादि। अविकारस्य परमात्मनो वेदनाकृतो विशेषो नास्त्येव, यत्र तु वेदनाकृतो विशेषः स राशिरूपः परमात्मव्यतिरिक्त एवेति वाक्यार्थः। भूतानामधिष्ठाता आत्मा भूतात्मा, अयं भूतात्मा एको भूतव्यतिरिक्तो न लक्षणैः प्राणापानादिभिरुक्तैरुपलभ्यते। कुतो नोपलभ्यत इत्याह— विशेष इत्यादि। एकस्य भूतरहितस्य; यदात्मनो विशेषो वेदनादिर्नोपलभ्यत एव, तेनानुपलब्धिरेवात्र प्रमाणमित्यर्थः। संयोगपुरुषः चतुर्विंशतिकः। नन्वेवमपि चतुर्विंशत्यन्तर्निविष्टस्य भूतात्मनोऽपि वेदनाकृतविशेषेण भवितव्यं, यतः समुदायधर्मः समुदायिनामेव भवति, यथा— माषराशेर्गुरुत्वं प्रत्येकं माषाणामेव गौरवेण भवतीत्याह — वेदनेत्यादि। वेदना सुखदुःखरूपा। यत्र बुद्ध्यादिसमूहे नियता व्यवस्थिता वेदना, तत्रैव तत्कृतो दैन्यहर्षादिविशेषोऽपि नियतः; तत्रैव बुद्ध्यादिराशौ वर्तते नात्मनीति भावः। बुद्ध्यादिगतेन गुणत्रयपरिणामरूपेण सुखदुःखादिना असुखदुःख एवात्मा तत्सम्बन्धात् सुखदुःखादिमान् भवति॥ ८४-८५॥

चिकित्सति भिषक् सर्वास्त्रिकाला वेदना इति।
यया युक्त्या वदन्त्येके सा युक्तिरुपधार्यताम्॥८६॥
पुनस्तच्छिरसः शूलं ज्वरः स पुनरागतः।
पुनः स कासो बलवांश्छर्दिः सा पुनरागता॥८७॥
एभिः प्रसिद्धवचनैरतीतागमनं मतम्।
कालश्चायमतीतानामर्तीनां पुनरागतः॥८८॥
तमर्तिकालमुद्दिश्य भेषजं यत् प्रयुज्यते।
अतीतानां प्रशमनं वेदनानां तदुच्यते॥८९॥
आपस्ताः पुनरागुर्मा याभिः शस्यं पुरा हतम्।
यथा प्रक्रियते सेतुः प्रतिकर्म तथाऽऽश्रये॥९०॥

पूर्वरूपं विकाराणां दृष्ट्वा प्रादुर्भविष्यताम्।

या क्रिया क्रियते सा च वेदनां हन्त्यनागताम्॥९१॥

पारम्पर्यानबन्धस्तु दुःखानां विनिवर्तते।

सुखहेतूपचारेण सुखं चापि प्रवर्तते॥९२॥

न समा यान्ति वैषम्यं विषमाः समतां न च।

हेतुभिः सदृशा नित्यं जायन्ते देहधातवः॥९३॥

युक्तिमेतां पुरस्कृत्य त्रिकालां वेदनां भिषक्।

हन्तीत्युक्तं चिकित्सा तु नैष्ठिकी या विनोपधाम्॥९४॥

'अथवाऽऽर्तस्य' इत्यादिप्रश्नस्योत्तरमाह— चिकित्सतीत्यादि। अतीतवेदनाचिकित्सा न मुख्या, किन्तु लोकप्रसिद्धोपचारेणोच्यत इति वाक्यार्थः। प्रसिद्धवचनैरिति लोकप्रसिद्धवचनैः। प्रतिकर्म चिकित्सा। आश्रय इति शरीरे। पूर्वरूपमित्यादिना अनागतवेदनाचिकित्सां समर्थयति। पूर्वरूपं यद्यपि भविष्यतामेव भवति रोगाणां, तथाऽपि भविष्यतामिति पदेन भूतेऽपि व्याधौ यानि रूपाणि भवन्ति तानि निराकरोति। उक्तं हि— "प्राक्सन्तापात्, अपि चैनं सन्तापार्तमनुबध्नन्ति" (नि.अ.१) इत्यनेन रोगावस्थायामपि पूर्वरूपसद्भावः। एवमतीतानागतवेदनाचिकित्सा व्युत्पादिता। वर्तमानचिकित्सामपि दर्शयन् पारमार्थिकं मतमाह— पारम्पर्येत्यादि। पारम्पर्यानुबन्धः सन्तानन्यायेनानुबन्धः। दुःखानामिति रोगाणाम्। सुखहेतूपचारेणेति आरोग्यहेतुचिकित्सासेवया। सुखमिति आरोग्यम्। एवं मन्यते— यदा चिकित्सा सुखहेतुः सेव्यते तदा दुःखहेतुसेवाभावाद्दुःखं नोत्पद्यते, उत्पन्नं च दुःखं रोगरूपं क्षणभङ्गित्वेन स्वयमेव नश्यति, सुखहेतुसान्निध्यात् सुखमारोग्यमुत्पद्यते; तेन चिकित्सया अनागतं दुःखं हेतुप्रतिबन्धान्निरुध्यते, सुखं च जन्यते इति सिद्धान्तः। एतदेवाह— न समा इत्यादि। समाश्च विषमाश्च क्षणभङ्गित्वस्वभावान्न वैषम्यावस्थां साम्यावस्थां वा यान्तीत्यर्थः। हेतुभिः सदृशा इति समहेतोः समाः, तथा विषमहेतोश्च विषमाः।

एतच्चिकित्साप्राभृतीयेऽध्याये प्रपञ्चितमेव। चिकित्साप्रस्तावेन सकलदुःखहारिणीं चिकित्सां मोक्षफलामाह— चिकित्सा त्वित्यादि। निष्ठा अत्यन्तदुःखमोक्षो मोक्षरूपः, तदर्थं भूता नैष्ठिकी। विनोपधामिति तृष्णां विना, तृष्णाशून्या प्रवृत्तिर्मोक्षफला भवतीत्यर्थः॥९४॥

उपधा हि परो हेतुर्दुःखदुःखाश्रयप्रदः।
त्यागः सर्वोपधानां च सर्वदुःखव्यपोहकः॥९५॥
कोषकारो यथा ह्यंशूनुपादत्ते वधप्रदान्।
उपादत्ते तथाऽर्थेभ्यस्तृष्णामज्ञः सदाऽऽतुरः॥९६॥
यस्त्वग्निकल्पानर्थाञ् ज्ञो ज्ञात्वा तेभ्यो निवर्तते।
अनारम्भादसंयोगात्तं दुःखं नोपतिष्ठते॥९७॥

परो हेतुरिति मूलकारणम्। दुःखरूपेणैव दुःखाश्रयः शरीरम्। भोगतृष्णया हि प्रवर्तमानो धर्माधर्मान् दुःखशरीरोत्पादकानुपादत्ते, सर्वोपधात्यागात्तु न रागद्वेषाभ्यां क्वचित् प्रवर्तते, अप्रवर्तमानश्च न धर्माधर्मानुपादत्ते, एवमनागतधर्माधर्मोपरमः, उपात्तधर्माधर्मयोस्तु रागद्वेषशून्यस्योपभोगादेव क्षयः; तेन सर्वथा कर्मक्षयाद्दुःखशरीराभाव इति भावः। अत्रैव तृष्णाया दुःखकारणत्वे दृष्टान्तमाह— कोषकार इत्यादि। कोषकारः स्वनामप्रसिद्धः कीटः। सदाऽऽतुर इति सदा संसारदुःखगृहीतः। अनारम्भादिति रागद्वेषपूर्वकारम्भविरहात्। असंयोगादिति आरम्भशून्यत्वेन धर्माधर्मोच्छेदकृताच्छरीरासंयोगात्; शरीराभावे च निराश्रयमकारणकं दुःखं न भवतीति भावः॥९५-९७॥

धीधृतिस्मृतिविभ्रंशः सम्प्राप्तिः कालकर्मणाम्।
असात्म्यार्थागमश्चेति ज्ञातव्या दुःखहेतवः॥९८॥

'कारणं वेदनानां किम्' इत्यस्योत्तरमाह— धीधृतीत्यादि। अयं चार्थः प्रकरणागतत्वादुच्यमानो न पुनरुक्ततामावहति। धीधृतिस्मृतयः प्रज्ञाभेदाः। एते च शिष्यव्युत्पत्त्यर्थं प्रज्ञाभेदत्वेनान्यथा व्युत्पाद्य इहोच्यन्ते। सम्प्राप्तिः कालकर्मणामिति कालस्य सम्प्राप्तिस्तथा कर्मणश्च सम्प्राप्तिः। कर्मसम्प्राप्तिः पच्यमानकर्मयोगः कालसम्प्राप्तिग्रहणेन चेह ये कालव्यक्तास्ते गृह्यन्ते, नावश्यं कालजन्याः; यतः स्वाभाविकानपि कालजन्यान् तथा तृतीयकादीनप्यासात्म्येन्द्रियार्थादिजन्यान् कालजत्वेनैवेहाभिधास्यति। कर्मजास्तु प्रज्ञापराधजन्या एवेह कर्मजन्यत्वेन विशेषेण शिष्यव्युत्पत्त्यर्थं पृथगुच्यन्ते, कालव्यङ्ग्यत्वेन च कर्मजा इह कालसम्प्राप्तिजन्येष्ववरोद्धव्याः। प्रज्ञापराधावरोधश्च यथा कर्मजानां, तथा प्रथमाध्याय एवोक्तम्। किञ्चाचार्येणोन्मादनिदाने स्वयमेवोक्तं यत्— "प्रज्ञापराधात् सम्भूते व्याधौ कर्मज आत्मनः" (नि.अ.७) इत्यादि, तथा जनपदोद्ध्वंसनीये च विमाने पुनरुक्तं— "वाय्वादीनां यद्वैगुण्यमुत्पद्यते तस्य मूलमधर्मः, तन्मूलं वाऽसत्कर्म पूर्वकृतं, तयोर्योनिः प्रज्ञापराध एव" (वि.अ.३) इति। तस्मादिह सम्प्राप्तिः कालकर्मणामित्यनेन न कालजन्या गदा उच्यन्ते, किं तु कालव्यङ्ग्याः॥९८॥

विषमाभिनिवेशो यो नित्यानित्ये हिताहिते।
ज्ञेयः स बुद्धिविभ्रंशः समं बुद्धिर्हि पश्यति॥९९॥

धीविभ्रंशं विवृणोति— विषमेत्यादि। विषमाभिनिवेशः अयथाभूतत्वेनाध्यवसानं नित्येऽनित्यमिति, एवं हितेऽहितमहिते वा हितमिति या बुद्धिः स बुद्धिभ्रंशः। अथ कथमयं बुद्धिविभ्रंशशब्देनोच्यत इत्याह— समं बुद्धिर्हि पश्यति; उचिता बुद्धिः समं यथाभूतं यस्मात् पश्यति, तस्मादसमदर्शनं बुद्धिविभ्रंश उचित एवेत्यर्थः॥९९॥

विषयप्रवणं सत्त्वं धृतिभ्रंशान्न शक्यते।

नियन्तुमहितादर्थाद्धृतिर्हि नियमात्मिका॥ १००॥

धृतिभ्रंशमाह— विषयेत्यादि। विषयप्रवणं विषयेषु प्रसज्जत्। नियन्तुमिति व्यावर्तयितुम्। धृतिर्हि नियमात्मिकेति यस्माद् धृतिरकार्यप्रसक्तं मनो निवर्तयति स्वरूपेण, तस्मान्मनोनियमं कर्तुमशक्ता धृतिः स्वकर्मभ्रष्टा भवतीत्यर्थः॥ १००॥

तत्त्वज्ञाने स्मृतिर्यस्य रजोमोहावृतात्मनः।

भ्रश्यते स स्मृतिभ्रंशः स्मर्तव्यं हि स्मृतौ स्थितम्॥ १०१॥

स्मृतिभ्रंशं विवेचयति— तत्त्वेत्यादि। तत्त्वज्ञाने स्मृतिर्यस्य भ्रश्यत इति योजना। स्मर्तव्यं हि स्मृतौ स्थितमिति स्मर्तव्यत्वेन सम्मतस्यार्थस्य स्मरणं प्रशस्तस्मृतिधर्मः। तत्र च तत्त्वज्ञानस्य शिष्टानां स्मर्तव्यत्वेन सम्मतस्य यदस्मरणं, तत् स्मृत्यपराधाद्भवतीत्यर्थः॥ १०१॥

धीधृतिस्मृतिविभ्रष्टः कर्म यत् कुरुतेऽशुभम्।

प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपणम्॥ १०२॥

उदीरणं गतिमतामुदीर्णानां च निग्रहः।

सेवनं साहसानां च नारीणां चातिसेवनम्॥ १०३॥

कर्मकालातिपातश्च मिथ्यारम्भश्च कर्मणाम्।

विनयाचारलोपश्च पूज्यानां चाभिधर्षणम्॥ १०४॥

ज्ञातानां स्वयमर्थानामहितानां निषेवणम्।

परमौन्मादिकानां च प्रत्ययानां निषेवणम्॥ १०५॥

अकालादेशसञ्चारौ मैत्री सङ्क्लिष्टकर्मभिः।

इन्द्रियोपक्रमोक्तस्य सद्वृत्तस्य च वर्जनम्॥ १०६॥

ईर्ष्यामानभयक्रोधलोभमोहमदभ्रमाः।

तज्जं वा कर्म यत् क्लिष्टं क्लिष्टं यद्देहकर्म च॥ १०७॥

यच्चान्यदीदृशं कर्म रजोमोहसमुत्थितम्।

प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्॥ १०८॥

एवं बुद्ध्यादिभ्रंशत्रयरूपप्रज्ञापराधजन्यं कर्म प्रज्ञापराधत्वेन दर्शयन्नाह— धीत्यादि। सर्वदोषशब्देन वातादयो रजस्तमसी च गृह्यन्ते। कर्मकालातिपातः चिकित्साकालातिवर्तनम्। मिथ्यारम्भ इति अयोगातियोगमिथ्यायोगरूपः। विनयाचारलोपेनैव प्राप्तमपि यत् पुनः पूज्यानामभिधर्षणाद्यभिधीयते, तद्विशेषेण प्रकोपकत्वख्यापनार्थमुदाहरणार्थं च। सङ्क्लिष्टकर्मभिरिति पतितैः। क्लिष्टमिति निन्दितम्॥ १०२-१०८॥

बुद्ध्या विषमविज्ञानं विषमं च प्रवर्तनम्।

प्रज्ञापराधं जानीयान्मनसो गोचरं हि तत्॥ १०९॥

सङ्क्षेपेण प्रज्ञापराधलक्षणमाह— बुद्ध्येत्यादि। विषममिति अनुचितं, विषमविज्ञानं स्वरूपत एव प्रज्ञापराधः। विषमप्रवर्तनं च प्रज्ञापराधकार्यत्वेन प्रज्ञापराधशब्देनोच्यते। मनसो गोचरं हि तदिति तद्विषमप्रवर्तनं विषमज्ञानं च मनःकार्यप्रज्ञाविषयत्वेन मनसो गोचरमित्यर्थः। विषमप्रवर्तनं च मनोगोचरजन्यत्वेनोपचारादुक्तं, विसदृशमनोविषयज्ञानाद्विषमवाग्देहप्रवृत्तिरपि भवति॥ १०९॥

निर्दिष्टा कालसम्प्राप्तिर्व्याधीनां व्याधिसङ्ग्रहे।

चयप्रकोपप्रशमाः पित्तादीनां यथा पुरा॥११०॥

मिथ्यातिहीनलिङ्गाश्च वर्षान्ता रोगहेतवः।

जीर्णभुक्तप्रजीर्णान्नकालाकालस्थितिश्च या॥१११॥

पूर्वमध्यापराह्णाश्च रात्र्या यामास्त्रयश्च ये।

एषु कालेषु नियता ये रोगास्ते च कालजाः॥११२॥

व्याधीनां कालसम्प्राप्तिमाह— निर्दिष्टेत्यादि। व्याधिसङ्ग्रह इति कियन्तःशिरसीये "चयप्रकोपप्रशमाः पित्तादीनां यथाक्रमम्। भवन्त्येकैकशः षट्सु कालेष्वभ्रगमादिषु" (सू.अ.१७) इत्यनेन तथा ह्युदाहरणेन च। तेन, कालसम्प्राप्तिर्व्याधीनां यथा— चयप्रकोपप्रशमाः पित्तादीनां पुरा निर्दिष्टा इति योज्यम्। उदाहरणान्तरमाह— मिथ्येत्यादि। जीर्णेत्यादौ जीर्णाद्यवस्थात्रयविशिष्टस्यान्नस्य कालः, तथाऽन्नस्याकालोऽजीर्णाद्यवस्थालक्षितः। प्रजीर्णं विदग्धम्। रात्रेर्यामास्त्रयश्च य इति त्रयो भागाः पूर्वरात्रमध्यरात्रापररात्ररूपाः, न तु यामः प्रहर इति ज्ञेयम्। अन्यत्रापि च भागत्रये यामविभागं कृत्वा अभिधानशास्त्रे त्रियामा निशाऽभिधीयते। तेषु कालेष्विति जीर्णान्नकालादिषु; जीर्णे अपराह्णे रात्रिशेषे च वातिका गदाः, भुक्तमात्रे पूर्वाह्णे पूर्वरात्रे च कफजा गदाः, प्रजीर्णे मध्याह्ने मध्यरात्रे च पित्तजा नियता रोगाः। अन्नाकाले चाजीर्णलक्षणे भोजनात् त्रयोऽपि दोषा भवन्तीति ज्ञेयम्। किंवा, 'जीर्णभुक्तप्रजीर्णान्नकाला' इति च्छेदः, तेन जीर्णाद्यवस्थायुक्तान्नकालाः पूर्ववदेव ज्ञेयाः; तथा 'कालस्थितिश्च या' इति योजना; कालस्थितिशब्देन बाल्यादिवयस्त्रैविध्यमुच्यते। तत्र बाल्ये श्लैष्मिकाः, यौवने पैत्तिकाः, वार्धक्ये वातिका गदा वर्धन्त इति ज्ञेयम्॥११०-११२॥

अन्येद्युष्को द्व्यहग्राही तृतीयकचतुर्थकौ।

स्वे स्वे काले प्रवर्तन्ते काले ह्येषां बलागमः॥११३॥

विषमज्वरानपि कालविशेषप्रवर्तमानमात्रत्वेन कालजे दर्शयन्नाह— अन्येद्युष्क इत्यादि। द्व्यहग्राही चतुर्थकविपर्ययः। वक्ष्यति हि— "विषमज्वर एवान्यश्चतुर्थकविपर्ययः। मध्ये अहनी ज्वरयत्यादावन्ते च मुञ्चति" (चि.अ.३) इति। कथं स्वकीय एव काले प्रवर्ततन्त इत्याह— काले ह्येषां बलागम इति। उक्त एव काले यस्माद् बलवन्तो भवन्ति, तस्मात्तत्रैव सञ्जातबलाः सन्तो व्यज्यन्त इत्यर्थः॥११३॥

एते चान्ये च ये केचित् कालजा विविधा गदाः।
अनागते चिकित्स्यास्ते बलकालौ विजानता॥११४॥

एतेषां चिकित्साक्रममाह— एते चेत्यादि। अन्ये चेत्यनेनान्यानपि कालविशेषप्राप्तिप्रादुर्भाविनः। शोथकुष्ठादीन् सूचयति॥११४॥

कालस्य परिणामेन जरामृत्युनिमित्तजाः।
रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः॥११५॥

स्वाभाविकानपि कालपरिणामव्यज्यमानतया इह कालजेऽवरोधयितुमाह— कालस्येत्यादि। जरामृत्युरूपान्निमित्ताज्जाता जरामृत्युनिमित्तजाः, मृत्युशब्देनेह युगानुरूपायुःपर्यवसानभवकालमृत्युर्ग्राह्यः; किंवा जरामृत्व्योर्यन्निमित्तं तस्माज्जाता जरामृत्युनिमित्तजाः, जरामृत्युनिमित्तं च प्राणिनां साधारणदेहनिवर्तकभूतस्वभावोऽदृष्टं च। अथ स्वाभाविकानां का चिकित्सेत्याह— स्वभाव इत्यादि। निष्प्रतिक्रिय इति साधारणचिकित्सया रसायनवर्ज्यया न प्रतिक्रियते, रसायनेन तु प्रतिक्रियत एव; तेन, "अस्य प्रयोगाच्च्यवनः सुवृद्धोऽभूत्

पुनर्युवा” (चि.अ.१ पा) इत्यादिरसायनप्रयोगेण समं न विरोधः; किंवा, स्वाभाविका जरादयो रसायनजनितप्रकर्षादुत्तरकालं पुनरवश्यं भवन्तीति निष्प्रतिक्रियत्वेनोक्ताः॥ ११५॥

निर्दिष्टं दैवशब्देन कर्म यत् पौर्वदेहिकम्।

हेतुस्तदपि कालेन रोगाणामुपलभ्यते॥ ११६॥

सम्प्रति कर्मसम्प्राप्तिकृतमपि गदं कालविशेषव्यज्यमानतया दर्शयन्नाह— निर्दिष्टमित्यादि। कालेनेति पच्यमानतालक्षितेन कालेन (युक्तं सत्) कर्म कारणं भवतीत्यर्थः॥ ११६॥

न हि कर्म महत् किञ्चित् फलं यस्य न भुज्यते।

क्रियाघ्नाः कर्मजा रोगाः प्रशमं यान्ति तत्क्षयात्॥ ११७॥

कर्मणः फलसम्बन्धिनियममाह— न हीत्यादि। महदिति विशेषणेन किञ्चिदमहत् कर्म प्रायश्चित्तबाधनीयफलं न ददात्यपि फलमिति दर्शयति। कर्मजानामचिकित्स्यत्वमाह— क्रियाघ्ना इत्यादि। तत्क्षयादिति कर्मक्षयात्; कर्मक्षयश्च कर्मफलोपभोगादेव परं भवति॥ ११७॥

अत्युग्रशब्दश्रवणाच्छ्रवणात् सर्वशो न च।

शब्दानां चातिहीनानां भवन्ति श्रवणाज्जडाः॥ ११८॥

परुषोद्भीषणाशस्ताप्रियव्यसनसूचकैः।

शब्दैः श्रवणसंयोगो मिथ्यासंयोग उच्यते॥ ११९॥

असंस्पर्शोऽतिसंस्पर्शो हीनसंस्पर्श एव च।

स्पृश्यानां सङ्ग्रहेणोक्तः स्पर्शनेन्द्रियबाधकः॥ १२०॥

यो भूतविषवातानामकालेनागतश्च यः।

स्नेहशीतोष्णसंस्पर्शो मिथ्यायोग स उच्यते॥ १२१॥

रूपाणां भास्वतां दृष्टिर्विनश्यत्यतिदर्शनात्।

दर्शनाच्चातिसूक्ष्माणां सर्वशश्चाप्यदर्शनात्॥ १२२॥

द्विष्टभैरवबीभत्सदूरातिश्लिष्टदर्शनात्।

तामसानां च रूपाणां मिथ्यासंयोग उच्यते॥ १२३॥

अत्यादानमनादानमोकसात्म्यादिभिश्च यत्।

रसानां विषमादानमल्पादानं च दूषणम्॥ १२४॥

अतिमृद्वतितीक्ष्णानां गन्धानामुपसेवनम्।

असेवनं सर्वशश्च घ्राणेन्द्रियविनाशनम्॥ १२५॥

पूतिभूतविषद्विष्टा गन्धा ये चाप्यनार्तवाः।

तैर्गन्धैर्घ्राणसंयोगो मिथ्यायोगः स उच्यते॥ १२६॥

इत्यसात्म्यार्थसंयोगस्त्रिविधो दोषकोपनः।

क्रमागतमसात्म्येन्द्रियार्थसंयोगं विवृणोति— अत्युग्रेत्यादि। सर्वशो न चेति सर्वथोग्रशब्दाश्रवणात्। स्पृश्यानामिति स्पृश्यत्वेनोक्तानां शास्त्रेऽभ्यङ्गोत्सादनादीनाम्। भूताः सविषिक्रिमिपि शाचादयः। यो भूतविषवातादीनां संस्पर्शः, तथाऽकालेनागतः स्नेहशीतोष्णसंस्पर्शश्चेति योजना। तत्राकाले स्नेहसंस्पर्शो यथा— अजीर्णे कफवृद्धिकाले अभ्यङ्गस्पर्शः, एवं शीते शीतस्पर्शः, उष्णे चोष्णस्पर्शोऽकालेनागतो ज्ञेयः। सर्वशश्चाप्यदर्शनादिति भास्वतां सूक्ष्माणां च सर्वथाऽदर्शनात्। अतिश्लिष्टमिति नेत्रप्रत्यासन्नम्। तामसानां च रूपाणां दर्शनाद्विनश्यति दृष्टिरिति सम्बन्धः। मिथ्यायोगः स इति द्विष्टभैरवादिदर्शनरूपः। अतिसूक्ष्मदर्शनं च मिथ्यायोग एव ज्ञेयः। ओकसात्म्यादिभिरिति विषमादानमिति सम्बन्धः। ओकसात्म्यादिवैषम्येण च राशिदोषवर्जं प्रकृत्यादिसप्तदोषा ग्रहीतव्याः। त्रिविध इति अयोगातियोगमिथ्यायोगरूपः॥ ११८-१२६॥

असात्म्यमिति तद्विद्याद्यन्न याति सहात्मताम्॥१२७॥

असात्म्यार्थं दर्शयति— असात्म्यमित्यादि। सहेति मिलितं शरीरेण। आत्मताम् अविकृतरूपतां न याति; एतेन, यदुपयुक्तं प्राकृतरूपोपघातकं भवति, तदसात्म्यमिति॥१२७॥

मिथ्यातिहीनयोगेभ्यो यो व्याधिरुपजायते।
शब्दादीनां स विज्ञेयो व्याधिरैन्द्रियको बुधैः॥१२८॥

इत्थमसात्म्यार्थजस्य व्याधेरिन्द्रियद्वारभूतत्वेनैन्द्रियकत्वं दर्शयन्नाह— मिथ्येत्यादि। हीनयोगेनेहायोगो ग्राह्यः। ऐन्द्रियक इति इन्द्रियद्वारभूतः॥१२८॥

वेदनानामशान्तानामित्येते हेतवः स्मृताः।
सुखहेतुः समस्त्वेकः समयोगः सुदुर्लभः॥१२९॥

दुःखरूपवेदनाहेतुं प्रपञ्चोक्तमुपसंहरति— वेदनानामित्यादि। अशान्तानामिति दुःखानाम्। अथ सुखरूपवेदनाहेतुः क इत्याह— सुखेत्यादि। समयोग इति कालबुद्धीन्द्रियार्थानां सम्यग्योगः। सुदुर्लभ इति कालादिसम्यग्योगस्य अयोगादिविरहत्वेन सुदुर्लभत्वात्। प्रायो हि कालादीनां मध्ये अन्यतरेणाप्ययोगादिना पुरुषः सम्बध्यते; तेन च नित्यातुरा एव पुरुषा भवन्ति, अल्पं च रोगमनादृत्य स्वस्थव्यपदेशः पुरुषाणां क्रियत इति भावः॥१२९॥

नेन्द्रियाणि न चैवार्थाः सुखदुःखस्य हेतवः।

हेतुस्तु सुखदुःखस्य योगो दृष्टश्चतुर्विधः॥१३०॥

सन्तीन्द्रियाणि सन्त्यर्था योगो न च न चास्ति रुक्।

न सुखं, कारणं तस्माद्योग एव चतुर्वधः॥१३१॥

सम्प्रति सम्यग्योगस्योपादेयतामयोगादीनां च हेयतां दर्शयितुं योगमेव चतुर्विधं कारणत्वेन दर्शयन्नाह — नेन्द्रियाणीत्यादि। ननु कथमिन्द्रियार्थयोः सुखदुःखकारणत्वेनोपलभ्यमानयोरप्यकारणत्वमित्याह — सन्तीत्यादि। योगो न चेति इन्द्रियार्थयोः सम्बन्धो न च। न सुखमिति च्छेदः। इन्द्रियार्थयोर्योगाभावे अकारणत्वेन, सति तु योगे कारणत्वेन, योग एवान्वयव्यतिरेकाभ्यां कारणमवधार्यत इति भावः। अयं च योग इन्द्रियार्थावधिकृत्य स्पष्टत्वेनोक्तः; तेन, प्रज्ञाकालयोरपि बोद्धव्यः। एतच्छेन्द्रियमर्थं चानुपादेयं कृत्वा चतुर्विधयोगस्य कारणत्वं योगानामेव हेयोपादेयत्वोपदर्शनार्थं कृतम्॥१३०-१३१॥

नात्मेन्द्रियं मनो बुद्धिं गोचरं कर्म वा विना।

सुखदुःखं, यथा यच्च बोद्धव्यं तत्तथोच्यते॥१३२॥

परमार्थतस्त्वात्मेन्द्रियमनोबुद्ध्यर्थादृष्टान्येव तथायुक्तानि सुखदुःखकारणानीति दर्शयन्नाह— नात्मेत्यादि। गोचर इन्द्रियार्थः। कर्म अदृष्टम्। तत्र आत्मानं विना न लोष्टादौ सुखदुःखे भवतः। इन्द्रियार्थादीनां च सुखदुःखकारणत्वं स्पष्टमेव। कर्मापि च शुभं सुखकारणम्, अशुभं च दुःखकारणम्। यद्यात्मादय एव कारणं, तर्हि किमर्थं कालाद्ययोगातियोगादय इहोच्यन्त इत्याह— यथेत्यादि। यद् बोद्धव्यं सुखदुःखं यथा बोद्धव्यं कार्यवशाद्भवति, तत्तथैवोच्यते नान्यथा। तेन सात्म्यासात्म्येन्द्रियार्थजन्यत्वेन सुखदुःखे इह प्रतीयमाने चिकित्सायामुपयुक्ते भवतः, नात्मादिजन्यत्वेनेह सुखदुःखे अभिधीयेते; न ह्यात्मादयो

दुःखहेतुतया प्रतिपन्ना अपीह हेयतया प्रतिपाद्यन्ते; किन्त्वसात्म्येन्द्रियार्थयोगादय एव दुःखहेतवस्त्यज्यन्ते, सुखहेतवः सात्म्येन्द्रियार्थयोगादयस्तूपादीयन्त इति भावः॥१३२॥

स्पर्शनेन्द्रियसंस्पर्शः स्पर्शो मानस एव च।

द्विविधः सुखदुःखानां वेदनानां प्रवर्तकः॥१३३॥

इदानीं सकलकारणव्यापकं योगं व्युत्पादयितुमैन्द्रियकं मानसं च स्पर्शं दर्शयितुमाह— स्पर्शनेत्यादि। स्पर्शनेन्द्रियसंस्पर्श इत्यनेनेन्द्रियाणामर्थेन सम्बन्धं स्पर्शनेन्द्रियकृतं दर्शयति; चक्षुरादीन्यपि स्पृष्टमेवार्थं जानन्ति; यदि ह्यस्पृष्टमेव चक्षुः श्रोत्रं घ्राणं वा गृह्णाति, तदा विदूरमपि गृह्णीयात्, न च गृह्णाति, तस्मात् स्पृष्ट्वैवेन्द्रियाण्यर्थं प्रतिपद्यते; मानसस्तु स्पर्शश्चिन्त्यादिनाऽर्थेन समं सूक्ष्मोऽस्त्येव, येन मनः किञ्चिदेव चिन्तयति, न सर्वं; तेन यन्मनसा स्पृश्यते तदेव मनो गृह्णातीति स्थितिः॥१३३॥

इच्छाद्वेषात्मिका तृष्णा सुखदुःखात् प्रवर्तते।

तृष्णा च सुखदुःखानां कारणं पुनरुच्यते॥१३४॥

उपादत्ते हि सा भावान् वेदनाश्रयसञ्ज्ञकान्।

स्पृश्यते नानुपादाने नास्पृष्टो वेत्ति वेदनाः॥१३५॥

सुखदुःखोत्पत्तिक्रममाह— इच्छेत्यादि। सुखादिच्छारूपा तृष्णा, दुःखाच्च द्वेषरूपा तृष्णा प्रवर्तते। इयं चोत्पन्ना तृष्णा ईप्सितेऽर्थे प्रवर्तयन्ती द्विष्टे च निवर्तयन्ती प्रवृत्तिनिवृत्तिविषयस्य सुखदुःखहेतुतामपेक्ष्य सुखदुःखे जनयतीति वाक्यार्थः। यथोक्तं तृष्णायाः सुखदुःखहेतुत्वं दर्शयन्नाह — उपादत्ते हीत्यादि। वेदनाश्रयसञ्ज्ञकानिति वेदनाकारणत्वेनोक्तान् कालाद्ययोगादिरूपान्। अथ

तृष्णा चेत् सुखदुःखकारणं, तत् किमिन्द्रियार्थेनापरेण कारणेनेत्याह— स्पृश्यत इत्यादि। अनुपादान इति अविद्यमानार्थरूपे स्पर्शकारणे अर्थं विना नार्थस्य स्पर्शो भवति। अथ न भवत्वर्थस्पर्शः, ततः किमित्याह— नास्पृष्टो वेत्ति वेदना इति; अर्थस्पर्शशून्यः सन् न सुखदुःखे अनुत्पन्नत्वादेव वेत्तीत्यर्थः॥१३४-१३५॥

वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः।

केशलोमनखाग्रान्नमलद्रवगुणैर्विना॥१३६॥

'वेदनानां किमधिष्ठानम्' इत्यस्योत्तरमाह— वेदनानामित्यादि। देहः सेन्द्रिय इति अनेन निरिन्द्रियो देहो केशलेमादिको निरस्तः। तदेव स्पष्टार्थं विवृणोति— केशेत्यादि। किंवा, इन्द्रियाण्यपि प्राधान्यख्यापनार्थं प्रथग् वेदनाश्रयत्वेनेन्द्रियग्रहणेनोच्यन्ते। वेदनाया देहेन्द्रियगतत्वं तदाधारत्वेन प्रतीयमानत्वाज्ज्ञेयम्। द्रवं मूत्रम्। गुणाः शब्दादयः। शरीरगता एते हि केशादयो न वेदनाधारा इत्यनुभव एव प्रमाणम्। या तु मूत्रपुरीषगता वेदना ग्रहणीमूत्रकृच्छ्रादौ वक्तव्या, सा मूत्रपुरीषाधारशरीरप्रदेशस्यैव बोध्या॥१३६॥

योगे मोक्षे च सर्वासां वेदनानामवर्तनम्।

मोक्षे निवृत्तिर्निःशेषा योगो मोक्षप्रवर्तकः॥१३७॥

'क्व चैता वेदनाः सर्वा' इत्यादिप्रश्नस्योत्तरं— योग इत्यादि। योगः 'अनारम्भात्' इत्यादिग्रन्थवक्ष्यमाणः। मोक्ष आत्यन्तिकशरीराद्युच्छेदः। निःशेषेति न पुनर्भवति। एतेन, योगे निवृत्ता वेदना पुनर्भवतीति सूचयति। मोक्षप्रवर्तक इति मोक्षकारणम्। किंवा, 'योगमोक्षौ निवर्तकौ'

इति पाठः; तदा अस्मिन् पक्षे यद्यपि योगमोक्षयोर्वेदनानिवर्तकत्वं 'योगे मोक्षे च' इत्यादिना श्लोकार्धेनोक्तं, तथाऽपि योगमोक्षयोरिह कर्तृता वेदनानिवृत्तिं प्रति दृश्यत इति न पौनरुक्त्यम्॥१३७॥

आत्मेन्द्रियमनोर्थानां सन्निकर्षात् प्रवर्तते।
सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे॥१३८॥
निवर्तते तदुभयं वशित्वं चोपजायते।
सशरीरस्य योगज्ञास्तं योगमृषयो विदुः॥१३९॥

यथा योगो वेदनानिवर्तको भवति, यश्च योगस्तमाह— आत्मेत्यादि। अनारम्भादिति विषयोपादानार्थं मनसाऽनारम्भात्। आत्मस्थे मनसीति विषये निवृत्ते केवलात्मज्ञानस्थे। स्थिरे इति अचले, आत्मज्ञानप्रसक्त एवेति यावत्। तदुभयमिति सुखदुःखे। योगे योगधर्मान्तरप्राप्तिमाह— वशित्वमित्यादि। वशित्वं वक्ष्यमाणमष्टविधमैश्वर्यबलम्। सशरीरस्येतिपदेन शरीरेण सहैव वशित्वं भवतीति दर्शयति॥१३८-१३९॥

आवेशश्चेतसो ज्ञानमर्थानां छन्दतः क्रिया।
दृष्टिः श्रोत्रं स्मृतिः कान्तिरिष्टतश्चाप्यदर्शनम्॥१४०॥
इत्यष्टविधमाख्यातं योगिनां बलमैश्वरम्।
शुद्धसत्त्वसमाधानात्तत् सर्वमुपजायते॥१४१॥

आवेश इत्यादि। आवेशः परपुरप्रवेशः। चेतसो ज्ञानमिति परचित्तज्ञानम्। अर्थानां छन्दतः क्रियेति अर्थानामिच्छातः करणम्। दृष्टिः अतीन्द्रियदर्शनम्। श्रोत्रम् अतीन्द्रियश्रवणम्। स्मृतिः

सर्वभावतत्त्वस्मरणम्। कान्तिः अमानुषी कान्तिः। इष्टतश्चाप्यदर्शनमिति यदेच्छति तदा दर्शनयोग्य एव न दृश्यते, यदा चेच्छति

तदा दृश्यते। किंवा, आवेशश्चेतस इति परचेतसः प्रवेशः, ज्ञानमिति सर्वमतीतानागतादिज्ञानं, शेषं पूर्ववत्। ऐश्वरमिति योगप्रभावादुपपन्नैश्वर्यकृतम्। शुद्धसत्त्वसमाधानादिति नीरजस्तमस्कस्य मनस आत्मनि सम्यगाधानात्॥ १४०-१४१ ॥

मोक्षो रजस्तमोऽभावात् बलवत्कर्मसङ्क्षयात्।
वियोगः सर्वसंयोगैरपुनर्भव उच्यते॥ १४२॥

अथ कथं मोक्षो भवति, कश्चेत्याह— मोक्ष इत्यादि। बलवत्कर्मसङ्क्षयादिति अवश्यभोक्तव्यफलस्य कर्मणः क्षयात्। सर्वसंयोगैरिति सर्वैरात्मसम्बन्धिभिः शरीरबुद्ध्यहङ्कारादिभिः। न पुनः शरीरादिसम्बन्धो भवतीत्यपुनर्भवः॥ १४२॥

सतामुपासनं सम्यगसतां परिवर्जनम्।
व्रतचर्योपवासौ च नियमाश्च पृथग्विधाः॥ १४३॥
धारणं धर्मशास्त्राणां विज्ञानं विजने रतिः।
विषयेष्वरतिर्मोक्षे व्यवसायः परा धृतिः॥ १४४॥
कर्मणामसमारम्भः कृतानां च परिक्षयः।
नैष्क्रम्यमनहङ्कारः संयोगे भयदर्शनम्॥ १४५॥
मनोबुद्धिसमाधानमर्थतत्त्वपरीक्षणम्।
तत्त्वस्मृतेरुपस्थानात् सर्वमेतत् प्रवर्तते॥ १४६॥

प्रस्तावान्मोक्षोपायमाह— सतामित्यादि। परा धृतिरिति अतिशयितं मनोनियमनम्। कर्मणामसमारम्भ इति अनागतधर्माधर्मसाधनानामकरणम्। कृतानां च परिक्षय इति जन्मान्तरैः कृतानां कर्मणां फलोपभोगात् परिक्षयः। नैष्कर्म्यं संसारनिष्क्रमणेच्छा। अनहङ्कार इति ममेदम्, अहं 'करोमि' इत्यादिबुद्धिवर्जनम्। संयोग इति आत्मशरीरादिसंयोगे। मनोबुद्धिसमाधानमिति मनोबुद्ध्योरात्मनि समाधानम्। सर्वमेतदिति 'कर्मणामसमारम्भः' इत्याद्युक्तम्। तत्त्वस्मृतिः आत्मादीनां यथाभूतानुस्मरणं; सा च नात्मा शरीराद्युपकार्यः, शरीरादयश्चामी आत्मव्यतिरिक्ताः, इत्यादिस्मरणरूपस्मृतिः॥ १४३-१४६ ॥

स्मृतिः सत्सेवनाद्यैश्च धृत्यन्तैरुपजायते।

स्मृत्वा स्वभावं भावानां स्मरन् दुःखात् प्रमुच्यते॥ १४७॥

अथ स्मृतिः कथं दुःखप्रमोषे कारणमित्याह— स्मृत्वेत्यादि। स्वभावमिति प्रत्यात्मनियतरूपम्। गुरुवचनाद्धि प्रथमप्रतिपन्नमात्मादीनां रूपं परस्परभिन्नं परस्परानुपकारकत्वेन व्यवस्थितं स्मरन् न क्वचिदपि प्रवर्तते, अप्रवर्तमानश्च न दुःखेन प्रवृत्तिजन्येन युज्यत इत्यर्थः॥ १४७॥

वक्ष्यन्ते कारणान्यष्टौ स्मृतिर्यैरुपजायते।

निमित्तरूपग्रहणात् सादृश्यात् सविपर्ययात्॥ १४८॥

सत्त्वानुबन्धादभ्यासाज्ज्ञानयोगात् पुनः श्रुतात्।

दृष्टश्रुतानुभूतानां स्मारणात् स्मृतिरुच्यते॥ १४९॥

इदानीं स्मृतिप्रस्तावात् स्मृतिकारणान्याह— वक्ष्यन्त इत्यादि। निमित्तग्रहणं कारणज्ञानं, कारणं हि दृष्ट्वा कार्यं स्मरति। रूपग्रहणम् आकारग्रहणम्। यथा— वने गवयं दृष्ट्वा गां स्मरति। सादृश्याद् यथा — पितुः सदृशं पुरुषं दृष्ट्वा पितरं स्मरति। सविपर्ययादिति अत्यर्थवैसादृश्यादपि स्मरणं भवति; यथा

— अत्यर्थकुरूपं दृष्ट्वा प्रतियोगिनमत्यर्थसुरूपं स्मरति। सत्त्वानुबन्धादिति मनसः प्रणिधानात्, स्मर्तव्यस्मरणाय प्रणिहितमनाः स्मर्तव्यं स्मरति। अभ्यासादिति अभ्यस्तमर्थमभ्यासबलादेव स्मरति। ज्ञानयोगादिति तत्त्वज्ञानयोगात्; उपजाततत्त्वज्ञानो हि तद्बलादेव सर्वं स्मरति। पुनः श्रुतादिति श्रुतोऽप्यर्थो विस्मृतः पुनरेकदेशं श्रुत्वा स्मर्यते। स्मृतिकारणमभिधाय स्मृतिरूपमाह— दृष्टेत्यादि।— दृष्टं प्रत्यक्षोपलक्षणं, श्रुतं त्वागमप्रतीतं, तेन सर्वपूर्वानुभूतावरोधः। क्वचित्, 'स्मरणं स्मृतिरुच्यते' इति पाठः, तत्रापि नार्थभेदः॥१४८-१४९॥

एतत्तदेकमयनं मुक्तैर्मोक्षस्य दर्शितम्।
तत्त्वस्मृतिबलं, येन गता न पुनरागताः॥१५०॥
अयनं पुनराख्यातमेतद्योगस्य योगिभिः।
सङ्ख्यातधर्मैः साङ्ख्यैश्च मुक्तैर्मोक्षस्य चायनम्॥१५१॥

एवं स्मृतिं सामान्येन प्रतिपाद्य तत्त्वस्मृतेर्मोक्षसाधकत्वं दर्शयन्नाह— एतदित्यादि। एकमयनमिति श्रेष्ठः पन्थाः। मुक्तैरिति जीवन्मुक्तैरिति ज्ञेयं, सर्वथामुक्तानां शरीराभावेनोपदर्शकत्वाभावात्। तत्त्वस्मृतिबलमिति तत्त्वस्मृतिरूपं बलं; किंवा, तत्त्वस्मृतिर्बलं यत्र मोक्षसाधनमार्गे तत्तत्त्वस्मृतिबलम्। येनेति येन यथा। गता इति मोक्षं गताः न पुनरागता इति मुक्तिं याता न पुनरागच्छन्ति॥१५०-१५१॥

सर्वं कारणवद्दुःखमस्वं चानित्यमेव च।
न चात्मकृतकं तद्धि तत्र चोत्पद्यते स्वता॥१५२॥
यावन्नोत्पद्यते सत्या बुद्धिर्नैतदहं यया।
नैतन्ममेति विज्ञाय ज्ञः सर्वमतिवर्तते॥१५३॥

इदानीं सङ्क्षेपेण संसारहेतुमज्ञानं, तथा मोक्षहेतुं च सम्यगज्ञानं दर्शयन्नाह— सर्वमित्यादि। सर्वं कारणवदिति सर्वमुत्पद्यमानं बुद्ध्यहङ्कारशरीरादि। दुःखमिति दुःखहेतुरेव। अस्वमिति सर्वं कारणवदेवात्मव्यतिरिक्तं परमार्थतः। न चात्मकृतकमिति न चात्मनोदासीनेन कृतम्। तत्रेति कारणवति बुद्धिशरीरादौ। स्वतेति ममता 'ममेयं बुद्धिः' इत्यादिरूपा। अथ कियन्तं कालमियं भ्रान्त्या युतोत्पद्यते इत्याह— यावदित्यादि। सत्या बुद्धिः सम्यगज्ञानम्। यया सत्यया बुद्ध्या। नैतद् बुद्ध्याद्यहं, किन्तु भिन्न एवाहं; तथा नैतद् बुद्ध्यादि मम, किन्तु प्रकृतेः प्रपञ्च इति विज्ञाय। ज्ञः तत्त्वसाक्षात्कारवान्। सर्वमतिवर्तत इति सर्वं बुद्ध्यादि त्यजति॥ १५२-१५३॥

तस्मिंश्चरमसन्न्यासे समूलाः सर्ववेदनाः।
ससञ्ज्ञाज्ञानविज्ञाना निवृत्तिं यान्त्यशेषतः॥ १५४॥

चरमसन्न्यास इति पश्चाद्भाविसकलकर्मसन्न्यासे। प्रथमं हि मोक्षोपयोगित्वेन गुरुवचनात् क्रियासन्न्यासः कृत एव, परं स्वानुभवविरक्तेन न कृतः; अभ्यासादुद्भूतेन ज्ञानेन साक्षाद्दृष्टभावस्वभावेन यः सर्वसन्न्यासः क्रियते, तत्र समूलाः सर्ववेदना ज्ञानादयश्च शरीरोपरमादेवोपरमन्ते। समूला इति सकारणाः, कारणं च बुद्ध्यादयः। सञ्ज्ञा आलोचनं निर्विकल्पकं, ज्ञानं सविकल्पकं, विज्ञानं बुद्ध्यवसायः; किंवा, सञ्ज्ञा नामोल्लेखेन ज्ञानं, विज्ञानं शास्त्रज्ञानम्। तत्त्वज्ञानमपि हि मोक्षं जनयित्वा निवर्तत एव, कारणाभावात्॥ १५४॥

अतः परं ब्रह्मभूतो भूतात्मा नोपलभ्यते।
निःसृतः सर्वभावेभ्यश्चिह्नं यस्य न विद्यते॥
ज्ञानं ब्रह्मविदां चात्र नाज्ञस्तज्ज्ञातुमर्हति॥ १५५॥

'सर्वविद्' इत्यादिप्रश्नस्योत्तरम्— अतः परमित्यादि। ब्रह्मभूत इति प्रकृत्यादिरहितः। चिह्नं यस्य न विद्यते इत्यनेन मुक्तात्मनः प्राणापानाद्यात्मलिङ्गाभावाद्गमकं चिह्नं नास्त्येवेति दर्शयति। न क्षरति अन्यथात्वं न गच्छतीत्यक्षरम्। अविद्यमानं लक्षणं यस्येति अलक्षणम्। एतस्यैव मोक्षस्येतरपुरुषाज्ञेयतां दर्शयति— ज्ञानमित्यादि। ब्रह्मविदामेवात्र मनः प्रत्येति, नाज्ञानामहङ्कारादिवासनागृहीतानामित्यर्थः॥१५५॥

तत्र श्लोकः—

प्रश्नाः पुरुषमाश्रित्य त्रयोविंशतिरुत्तमाः।
कतिधापुरुषीयेऽस्मिन्निर्णीतास्तत्त्वदर्शिना॥१५६॥

सङ्ग्रहो व्यक्तः॥१५६॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते शारीरस्थाने कतिधापुरुषीयं शारीरं नाम प्रथमोऽध्यायः॥१॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां शारीरस्थाने कतिधापुरुषीयं शारीरं नाम प्रथमोऽध्यायः॥१॥

द्वितीयोऽध्यायः।

अथातोऽतुल्यगोत्रीयं शारीरं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

पूर्वाध्याये शरीरस्यादिसर्ग आध्यात्मिको नैष्ठिकमोक्षरूपचिकित्सोपयुक्त उक्तः, सम्प्रति गर्भादिरूपं सर्गमभिधातुमतुल्यगोत्रीयोऽभिधीयते॥१-२॥

अतुल्यगोत्रस्य रजःक्षयान्ते रहोविसृष्टं मिथुनीकृतस्य।
किं स्याच्चतुष्पात्प्रभवं च षड्भ्यो यत् स्त्रीषु गर्भत्वमुपैति पुंसः॥३॥

अतुल्यगोत्रस्येति अतुल्यगोत्रस्य पुंसः। तुल्यगोत्राणां हि मैथुनेऽधर्मो भवति, धर्मशास्त्रेषु निषिद्धत्वात्। रजःक्षयान्ते इति रजःप्रवृत्त्यन्ते; 'अन्ते' इतिपदेन रजःप्रवृत्तित्र्यहं निषेधयति। रहोविसृष्टमिति विजने विसृष्टम्। शुक्रविसर्गश्च विजन एव प्रतिबन्धकलज्जाभावात् सम्यग्भवतीति रह इत्यनेन दर्शयति। मिथुनीकृतस्येत्यनेन सम्यङ्मैथुनप्रयोगं दर्शयति, विपरीतसुरतादींश्च निषेधति। चतुष्पादत्वषड्भवत्वे उत्तरग्रन्थे एव व्यक्ते। अयं च शिष्यप्रश्नतया निवेशितो ग्रन्थः अ(प्रा)ज्ञाशिष्यस्य आचार्यसन्मतिमात्रार्थो ज्ञेयः; तेन यः शिष्यश्चतुष्पदादिविशेषं सूक्ष्मं बीजस्य जानाति, स कथं शुक्रशब्दाभिधेयं न वेत्तीति न वाच्यम्॥३॥

शुक्रं तदस्य प्रवदन्ति धीरा यद्धीयते गर्भसमुद्भवाय।
वाय्वग्निभूम्यब्गुणपादवत्तत् षड्भ्यो रसेभ्यः प्रभवश्च तस्य॥४॥

पश्नस्योत्तरं— शुक्रमित्यादि। धीयत आरोप्यत इत्यर्थः। वाय्वादिपादवदिति वक्तव्ये यद् गुणपदमधिकं करोति, तेन प्रशस्तगुणवतामेव वाय्वादीनां विशुद्धशुक्रारम्भकत्वमिति दर्शयति। वाय्वादिषु शुक्रारम्भकेषु पादव्यपदेशेन सर्वेषां तुल्यशुक्रारम्भकत्वं दर्शयति। आकाशं तु यद्यपि शुक्रे पाञ्चभौतिकेऽस्ति, तथाऽपि न पुरुषशरीरान्निर्गत्य गर्भाशयं गच्छति, किन्तु भूतचतुष्टयमेव क्रियावद् याति, आकाशं तु व्यापकमेव तत्रगतेन शुक्रेण सम्बद्धं भवति, तेनाकाशस्य गमनाभावादिह गर्भाशयगमनाभिधानप्रस्तावे शुक्रगतत्वेनानभिधानम्। अन्यत्रापि च भूतानां गमनप्रस्तावे आकाशं परित्यक्तमेव। यथा— "भूतैश्चतुर्भिः सहितः ससूक्ष्मैर्मनोजवो देहमुपैति देहात्" इति। शुक्रं च षड्रसाहारोत्पन्नमेव विशुद्धं भवतीति कृत्वोक्तं— षड्भ्यो रसेभ्य इत्यादि। यत्तु मधुरस्य शुक्रजनकत्वमम्लादीनां च शुक्रविघातकत्वमुच्यते, तदत्यर्थोपयोगादिति ज्ञेयम्॥४॥

सम्पूर्णदेहः समये सुखं च गर्भः कथं केन च जायते स्त्री।
गर्भं चिराद्विन्दति सप्रजाऽपि भूत्वाऽथवा नश्यति केन गर्भः॥५॥

'सम्पूर्णदेहः कथं जायते' इत्येकः प्रश्नः, 'समये कथं जायते' इति द्वितीयः, 'सुखं कथं जायते' इति तृतीयः। सप्रजाऽपीति अवन्ध्याऽपि सती कथं चिरेण गर्भं विन्दति॥५॥

शुक्रासृगात्माशयकालसम्पद् यस्योपचारश्च हितैस्तथाऽन्नैः।
गर्भश्च काले च सुखी सुखं च सञ्जायते सम्परिपूर्णदेहः॥६॥
योनिप्रदोषान्मनसोऽभितापाच्छुक्रासृगाहारविहारदोषात्।
अकालयोगाद्बलसङ्क्षयाच्च गर्भं चिराद्विन्दति सप्रजाऽपि॥७॥
असृङ्निरुद्धं पवनेन नार्या गर्भं व्यवस्यन्त्यबुधाः कदाचित्।
गर्भस्य रूपं हि करोति तस्यास्तदसृगस्रावि विवर्धमानम्॥८॥

तदग्निसूर्यश्रमशोकरोगैरूष्णान्नपानैरथवाप्रवृत्तम्।

दृष्ट्वाऽसृगेकं न च गर्भसञ्ज्ञं केचिन्नरा भूतहृतं वदन्ति॥९॥

ओजोशनानां रजनीचराणामाहारहेतोर्न शरीरमिष्टम्।

गर्भं हरेयुर्यदि ते न मातुर्लब्धावकाशा न हरेयुरोजः॥१०॥

पञ्चानां प्रश्नामुत्तरं— शुक्रेत्यादि। सम्पच्छब्दः शुक्रादिभिः प्रत्येकमभिसम्बध्यते। शुक्रासृगाशयानामदुष्टत्वं सम्पद्, आत्मनस्तु शुक्रशोणितसंयोगाधिष्ठातुः शुभजीवकर्मयुक्तत्वं सम्पत्, कालस्य त्वनतितीक्ष्णत्वादि सम्पत्। उपचारो गर्भिण्युपचारः। काल इति नवमे दशमे वा मासे। यदुक्तं — "कालः पुनर्नवमं मासमुपादायादशमात्" (शा.अ.४) इति। सुखीति व्याधिना केनचिन्न ग्रस्तः। सुखमिति अक्लेशेन। अकालयोगादिति ऋतुकालातिक्रमेण पुरुषेण संयोगात्, ऋतुकालश्च षोडशरात्रं यावत्। यदुक्तं **हारीते**— "षोडश दिवसा ऋतुकालः" इति। **सुश्रुते** तु द्वादशरात्रमृतुकाल उक्तः। 'भूत्वाऽथवा नश्यति केन गर्भः' इत्यस्योत्तरम्— असृगित्यादि। पवनेनेति दुष्टवातेन। कृते असृङ्निरोधे गर्भभ्रमो भवतीत्याह— गर्भस्य रूपमित्यादि। गर्भाशये हि विवर्धमानं रुधिरं प्रभावाद्गर्भलिङ्गानि कानिचिद्दर्शयतीत्यर्थः। असृगेकमिति असृगेव परम्। न च गर्भसञ्ज्ञमिति न गर्भं ग्रन्थाद्याकारकम्। भूतैर्गर्भानाहरणे हेतुमाह— ओजोशनानामित्यादि। ओजः अष्टबिन्दुकमश्नन्तीति ओजोशनाः। यदि त्वनाहारभूतमपि गर्भं हरेयुस्तदा मातुर्नितरामाहारभूतमोजो लब्धावकाशत्वेन हरेयुः। लब्धावकाशा इति प्राप्तगर्भिण्यभिगमनकारणाः॥६-१०॥

कन्यां सुतं वा सहितौ पृथग्वा सुतौ सुते वा तनयान् बहून् वा।

कस्मात् प्रसूते सुचिरेण गर्भमेकोऽभिवृद्धिं च यमेऽभ्युपैति॥११॥

कन्यामित्यादि प्रश्नाष्टकम्। कन्यां कस्मात् पृथक् प्रसूत इति प्रथमः, सुतं पृथग् वेति द्वितीयः, सहितौ कन्यासुतौ वेति तृतीयः, सुतौ सहिताविति चतुर्थः, सुते सहिते इति पञ्चमः, तनयान् बहून् वेति षष्ठः, सुचिरात् कथं स्त्री प्रसूत इति सप्तमः, यमे युग्मे कथमेकोऽभिवृद्धिमभ्युपैतीत्यष्टमः॥११॥

रक्तेन कन्यामधिकेन पुत्रं शुक्रेण तेन द्विविधीकृतेन।

बीजेन कन्यां च सुतं च सूते यथास्वबीजान्यतराधिकेन॥१२॥

शुक्राधिकं द्वैधमुपैति बीजं यस्याः सुतौ सा सहितौ प्रसूते।

रक्ताधिकं वा यदि भेदमेति द्विधा सुते सा सहिते प्रसूते॥१३॥

भिनत्ति यावद्बहुधा प्रपन्नः शुक्रार्तवं वायुरतिप्रवृद्धः।

तावन्त्यपत्यानि यथाविभागं कर्मात्मकान्यस्ववशात् प्रसुते॥१४॥

आहारमाप्नोति यदा न गर्भः शोषं समाप्नोति परिस्रुतिं वा।

तं स्त्री प्रसूते सुचिरेण गर्भं पुष्टो यदा वर्षगणैरपि स्यात्॥१५॥

कर्मात्मकत्वाद्विषमांशभेदाच्छुक्रासृजोर्वृद्धिमुपैति कुक्षौ।

एकोऽधिको न्यूनतरो द्वितीय एवं यमेऽप्यभ्यधिको विशेषः॥१६॥

रक्तेनेत्याद्युत्तरम्। अधिकेनेति पदं रक्तेन शुक्रेण च योजनीयम्। द्विविधीकृतेन द्विखण्डीकृतेन। यथास्वं बीजेऽन्यतरो भागोऽधिको यत्र तेन बीजेन; एतेन यदि द्विविधे भागे एकत्र रक्तमधिकम्, अपरत्र शुक्रम्, एष विभागो भवति, तदा कन्यासुतौ भवत इत्युक्तं भवति। यावद्बहुधा भिनत्तीति यावतीं बहुसङ्ख्यां करोति चतुःपञ्चादिरूपाम्। प्रपन्न आगतः शुक्रार्तवं वायुरिति सम्बन्धः। यथाविभागमिति यथा शुक्ररक्तविभागो भवति तथा कन्याः सुताश्च स्वबीजाधिक्यापेक्षया भवन्तीति। कर्मात्मकानि कर्मकारणकानि। अस्ववशात् कर्मपराधीनत्वेन। आहारमित्यादौ गर्भिण्या आहारप्राप्त्या

गर्भस्याहारप्राप्तिः। शुक्रासृजोर्यः स्थूलसूक्ष्मरूपो विषमांशभेदो भवति, स जायमानगर्भकर्मवशादेव भवतीत्याह— कर्मात्मकत्वादिति॥१२-१६॥

कस्माद्द्विरेताः पवनेन्द्रियो वा संस्कारवाही नरनारिषण्डौ।
वक्री तथेर्ष्याभिरतिः कथं वा सञ्जायते वातिकषण्डको वा॥१७॥

कस्मादित्यादि प्रश्नाष्टकम्। नरषण्डो नारिषण्डश्चेति नरनारिषण्डौ॥१७॥

बीजात् समांशादुपतप्तबीजात् स्त्रीपुंसलिङ्गी भवति द्विरेताः।
शुक्राशयं गर्भगतस्य हत्वाकरोति वायुः पवनेन्द्रियत्वम्॥१८॥
शुक्राशयद्वारविघट्टनेन संस्कारवाहं कुरुतेऽनिलश्च।
मन्दाल्पबीजावबलावहर्षौ क्लीबौ च हेतुर्विकृतिद्वयस्य॥१९॥
मातुर्व्यवायप्रतिघेन वक्रीस्याद्बीजदौर्बल्यतया पितुश्च।
ईर्ष्याभिभूतावपि मन्दहर्षावीर्ष्यारतेरेव वदन्ति हेतुम्॥२०॥
वाय्वग्निदोषाद्वृषणौ तु यस्य नाशं गतौ वातिकषण्डकः सः।
इत्येवमष्टौ विकृतिप्रकाराः कर्मात्मकानामुपलक्षणीयाः॥२१॥

बीजादिति शुक्रशोणितात्। उपतप्तबीजादिति उपतप्तबीजजनकबीजभागात्। स्त्रीपुंसलिङ्गीति स्त्रीपुरुषसाधारणनासिकाचक्षुरादिलिङ्गयुक्तः, यानि तु स्त्रीपुंसयोरसाधारणान्युपस्थध्वजस्तनश्मश्रुप्रभृतीनि तानि चास्य न सम्भवन्तीति। असाधारणानि लिङ्गानि वृद्धेन शुक्रेण रक्तेन वा जन्यानि, इह समरक्तशुक्रारब्धेन नास्त्यन्यतरवृद्धिरिति नोपस्थध्वजादिविशेषलिङ्गभवनम्। द्विधा स्त्रीत्वपुरुषत्वोपजनकत्वेन स्थितं रेतो बीजं यस्य स

द्विरेताः। किंवा, स्त्रीपुंसलिङ्गीति स्त्रीपुंसयोर्यल्लिङ्गमुपस्थध्वजरूपं, तद्युक्त एव स्त्रीपुरुषलिङ्गी; उत्तरकालभावीनि त्वस्य स्तनश्मश्रुप्रभृतीनि न भवन्ति। अस्मिन् पक्षे बीजोपतापेनोत्तरकालभाविस्तनादिप्रतिबन्धः क्रियते, नोपस्थध्वजोत्पादप्रतिबन्धः कर्मवशादेवेति ब्रुवते। किंवा उपस्थध्वजौ बलवन्तौ, येन तौ गर्भकाल एव भवतः; स्तनादि तूत्तरकालभावितया दुर्बलं, दुर्बलेन बीजोपतापेन न बलवतोरुपस्थध्वजयोर्बाधः, किन्तु दुर्बलानामेव स्तनादीनामिति। यत्र समांशे शुक्रशोणिते भवतः, तत्र संयोगमहिम्नैव बीजांशतापो भवतीति ज्ञेयम्। पवनेन्द्रियं विवृणोति — शुक्राशयमित्यादि। शुक्राशयं शुक्रस्थानम्। पवनेन्द्रियत्वमिति पवनशुक्रत्वम्। शुक्रं हीन्द्रियमुच्यते, पवनस्य चेदमेवेह शुक्रत्वं— यद् व्यवायकाले शुक्रसदृशरूपतया प्रवर्तनं; अस्य हि वायुरेव परं व्यवायकाले याति। शुक्राशयद्वारेत्यादि संस्कारवाहविवरणम्। द्वारविघट्टनेनेति द्वारदूषणेन। संस्कारेण बस्तिवाजीकरणादिना परं यस्य शुक्रमदुष्टद्वारं सत् प्रवर्तते स संस्कारवाहः। अत्र च संस्कारवाहेन **सुश्रुतोक्ता** आसेक्यसौगन्धिककुम्भीका अन्तर्भावनीयाः, यत एतेऽपि संस्कारविशेषेणैव शुक्रं त्यजन्ति; यदुक्तं तत्र— "पित्रोरत्यल्पवीर्यत्वादासेक्यः पुरुषो भवत्। स शुक्रं प्राश्य लभते ध्वजोच्छ्रायमसंशयम्। यः पूतियोन्यां जायेत स सौगन्धिकसञ्ज्ञकः। स योनिशेफसोर्गन्धमाघ्राय लभते बलम्॥ स्वे गुदेऽब्रह्मचर्याद्यः स्त्रीषु पुंवत् प्रवर्तते। कुम्भीकः स तु विज्ञेयः" (सु.शा.अ.२) इति। नरनारीषण्डावाह— मन्देत्यादि। मन्दवेगमल्पं च बीजं ययोस्तौ तथा। अबलाविति निसर्गबलरहितौ। अहर्षाविति अनुत्साहौ। क्लीबाविति दुष्टबीजौ। अत्र यथोक्तगुणा स्त्री स्त्रीषण्डस्य, यथोक्तगुणः पुरुषस्तु पुरुष षण्डस्य हेतुरिति विज्ञेयम्। एतौ त्वबीजावेव ज्ञेयौ; यदुक्तं **सुश्रुते**— "अशुक्रस्त्वेव षण्डकः" (सु.शा.अ.२) इति। मातुर्व्यवायप्रतिघेनेति व्यवायकाले मातुर्व्यवायानिच्छा विषमाङ्गन्यासो वा व्यवायप्रतिघः, तेन यस्य शुक्रं गर्भाशयं नियमान्नोपैति स वक्रीत्युच्यते। बीजदौर्बल्यतया च पितुर्वक्रीस्यादिति योजना। अत्र दुर्बलस्य कर्म दौर्बल्यं तस्य भावो दौर्बल्यता, तेन पितुर्बीजस्य दुर्बलक्रियतयेत्यर्थः। परव्यवायं दृष्वा प्राप्तध्वजोच्छ्रायो व्यवायशक्तो भवति, स ईर्ष्यारतिः। यदुक्तं **सुश्रुते**— "दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्तते। ईर्ष्यकः स तु

विज्ञेयः" (सु.शा.अ.२) इति। कर्मात्मकानामितिपदेन एते क्लैब्यभेदाः प्राक्तनकर्मबलादेव प्रायो भवन्तीति दर्शयति॥१८-२१॥

गर्भस्य सद्योऽनुगतस्य कुक्षौ स्त्रीपुंनपुंसामुदरस्थितानाम्।
किं लक्षणं? कारणमिष्यते किं सरूपतां येन च यात्यपत्यम्॥२२॥

गर्भस्येत्यादिपञ्च प्रश्नाः। सद्योऽनुगतस्येति सद्योगृहीतस्य। कारणमित्यादि। कारणं किं तत्, येन कारणेन सरूपतां सादृश्यमपत्यं गर्भो यातीत्यर्थः। अयं च पञ्चमः प्रश्नः॥२२॥

निष्ठीविका गौरवमङ्गसादस्तन्द्राप्रहर्षौ हृदये व्यथा च।
तृप्तिश्च बीजग्रहणं च योन्यां गर्भस्य सद्योऽनुगतस्य लिङ्गम्॥२३॥
सव्याङ्गचेष्टा पुरुषार्थिनी स्त्री स्त्रीस्वप्नपानाशनशीलचेष्टा।
सव्यात्तगर्भा न च वृत्तगर्भा सव्यप्रदुग्धा स्त्रियमेव सूते॥२४॥
पुत्रं त्वतो लिङ्गविपर्ययेण व्यामिश्रलिङ्गा प्रकृतिं तृतीयाम्।
गर्भोपपत्तौ तु मनः स्त्रिया यं जन्तुं व्रजेत्तत्सदृशं प्रसूते॥२५॥
गर्भस्य चत्वारि चतुर्विधानि भूतानि मातापितृसम्भवानि।
आहारजान्यात्मकृतानि चैव सर्वस्य सर्वाणि भवन्ति देहे॥२६॥
तेषां विशेषाद्बलवन्ति यानि भवन्ति मातापितृकर्मजानि।
तानि व्यवस्येत् सदृशत्वहेतुं सत्त्वं यथानूकमपि व्यवस्येत्॥२७॥

बीजग्रहणं शुक्रस्य योनौ निषिक्तस्यानिःसरणम्। सव्याङ्ग्प्रधानतया चेष्टते या सा सव्याङ्गचेष्टा। स्त्रिया इव स्वप्नादयो यस्याः सा स्त्रीस्वप्नपानाशनशीलचेष्टा। सव्येन पार्श्वेन आत्तो गृहीतो गर्भो यया

सा सव्यात्तगर्भ; किंवा 'सव्याङ्गगर्भा' इति पाठः। न च वृत्तगर्भेति दीर्घगर्भेत्यर्थः। सव्ये स्तने प्रकृष्टं दुग्धं यस्याः सा सव्यप्रदुग्धा। व्यामिश्रलिङ्गा तु सव्यदक्षिणाङ्गचेष्टादिना ज्ञेया। प्रकृतिं तृतीयामिति नपुंसकम्। गर्भोपपत्तावित्यादिनासारूप्यकारणमाह। गर्भोपपत्तौ बीजग्रहणकाले मनो यं जन्तुं व्रजेद् यं प्राणिनं मनसा ध्यायति। एतच्च बीजग्रहणकालीनं मनसाऽनुध्यानं प्रभावादेव चिन्त्यमानसदृशमपत्यं करोतीति ज्ञेयं; किंवा तत्कालीनचिन्तयैव बीजं चिन्त्यमानजन्तुसदृशारम्भशक्तिकं क्रियते, दृष्टश्च मानसानामपि भावानां भूतविशेषकरणे शक्तिविशेषः; यथा— सङ्कल्पः शुक्रोदीरणं करोति, तथा दोहदाप्राप्तौ तच्चिन्तया गर्भविकृतिः, ईर्ष्याभयादीनां चौजःशुक्रक्षयकर्तृत्वमित्यादि। एतदेव च सादृश्यकारणं पश्यता पुनर्वक्तव्यं यथा— "या या यथा विधं पुत्रमाशासीत" इत्युपादाय "सा सा तांस्ताञ्जनपदान् मनसाऽनुक्रमेत्" (शा.अ.८) इति। जन्त्वनुध्यानं सादृश्यकारणमभिधाय सादृश्यकारणान्तरमाह— गर्भस्येत्यादि। चत्वारीति निर्विशेषमाकाशं वर्जयित्वा। भूतानि चतुर्विधानीति विवृणोति— मातेत्यादि। मातृसम्भवानि रक्तगतानि, पितृसम्भवानि शुक्रगतानि, आहारजानि तु शुक्रशोणितसंयोगोत्तरकालं मातुराहासम्भूतरसजानि, आत्मजानि त्वात्मप्रतिबद्धकर्मवशभूतानि ज्ञेयानि। तत्र शुभकर्मणा सदृशरूपजनकानि, अशुभकर्मणा तु विसदृशरूपजनकानीति ज्ञेयम्। यानि त्वात्मनि सूक्ष्माणि भूतानि आतिवाहिकशरीररूपाणि, तानि सर्वसाधारण्त्वेनाविशेषसादृश्यकारणानीति नेह बोद्धव्यानि। तत्रैवं चतुर्विधानां सादृश्ये किं भवति कारणं, किम्भूतं चेत्याह— तेषामित्यादि। विशेषादितिपदेन सर्वाण्येव सादृश्यकारणानि भवन्ति, किन्तु यानि बलवन्ति तानि विशेषाद्भूयिष्टं सादृश्यं जनयन्तीति दर्शयति। अत्र चाहारजभूतानां प्राक्तनकर्मापेक्षयैव सादृश्यकारणत्वं भवतीति कृत्वा नाहारजानां ग्रहणं कृतं, तेन कर्मजेष्वेवाहारजानामवरोधो ज्ञेयः; पूर्वं तु 'आहारजानि' इति पदेन तेषां विद्यमानतामात्रमुक्तं ज्ञेयम्। किंवा, मातृजादीनि हि मात्रादिभिः सदृशं कुर्वन्ति, नत्वाहारजातान्याहारसदृशं कुर्वन्ति, तेन तेषामिहानुपादानम्। तथाह्युत्तराध्याये "यानि खल्वस्य रसजानि" (शा.अ.३) इत्यादिना प्राणानुबन्धादीनि वक्तव्यानि, न च तानि सादृश्यरूपतयेह भवितुमर्हन्ति। देहसादृश्यहेतुमभिधाय

मनःसादृश्यहेतुमाह— सत्त्वमित्यादि। अनूकं प्राक्तनाऽव्यवहिता देहजातिः; तेन यथानूकमिति यो देवशरीरादव्यवधानेनागत्य भवति स देवसत्त्वो भवति, यः पशुशरीरादेति स पशुसत्त्वो भवतीत्यादि। अपिशब्दात् कर्मसम्बन्धं जातिसम्बन्धं च दर्शयति; तेन कर्मवशादपि सत्त्वं राजसं, तामसं, सात्त्विकं वा भवति; तथा मानुषादिजात्यनुरूपं च भवति॥२३-२७॥

कस्मात् प्रजां स्त्रीविकृतां प्रसूते हीनाधिकाङ्गीं विकलेन्द्रियां वा।
देहात् कथं देहमुपैति चान्यमात्मा सदा कैरनुबध्यते च॥२८॥

कस्मादित्यादिना विकलेन्द्रियां वेत्यन्तेनैकः प्रश्नः; तत्र विकृतामित्यस्य विवरणं— हीनेत्यादि। देहादित्यादिर्द्वितीयः। सदा कैरनुबध्यते इति तृतीयः। ये तु विकृतामितिपदेन कुरूपां, हीनाधिकाङ्गीमितिपदेन च हीनाङ्गादिरूपामेव कुरूपातिरिक्तां वदन्ति, तेषां मते प्रश्नभेदः स्यात्, तथाऽध्यायान्ते च वक्ष्यमाणा प्रश्नसङ्ख्याऽतिरिक्ता भवति॥२८॥

बीजात्मकर्माशयकालदोषैर्मातुस्तथाऽऽहारविहारदोषैः।
कुर्वन्ति दोषा विविधानि दुष्टाः संस्थानवर्णेन्द्रियवैकृतानि॥२९॥
वर्षासु काष्ठाश्मघनाम्बुवेगास्तरोः सरित्स्रोतसि संस्थितस्य।
यथैव कुर्युर्विकृतिं तथैव गर्भस्य कुक्षौ नियतस्य दोषाः॥३०॥

आत्मीयं कर्म आत्मकर्म, आशयो गर्भाशयः, दोषो वैगुण्यम्। अश्मघनानि पाषाणखण्डाः; वेगाः काष्ठादीनां त्रयाणाम्॥२९-३०॥

भूतैश्चतुर्भिः सहितः सुसूक्ष्मैर्मनोजवो देहमुपैति देहात्।

कर्मात्मकत्वान्न तु तस्य दृश्यं दिव्यं विना दर्शनमस्ति रूपम्॥३१॥

स सर्वगः सर्वशरीरभृच्च स विश्वकर्मा स च विश्वरूपः।

स चेतनाधातुरतीन्द्रियश्च स नित्ययुक् सानुशयः स एव॥३२॥

रसात्ममातापितृसम्भवानि भूतानि विद्याद्दश षट् च देहे।

चत्वारि तत्रात्मनि संश्रितानि स्थितस्तथाऽऽत्मा च चतुर्षु तेषु॥३३॥

भूतानि मातापितृसम्भवानि रजश्च शुक्रं च वदन्ति गर्भे।

आप्याय्यते शुक्रमसृक् च भूतैर्यैस्तानि भूतानि रसोद्भवानि॥३४॥

भूतानि चत्वारि तु कर्मजानि यान्यात्मलीनानि विशन्ति गर्भम्।

स बीजधर्मा ह्यपरापराणि देहान्तराण्यात्मनि याति याति॥३५॥

रूपाद्धि रूपप्रभवः प्रसिद्धः कर्मात्मकानां मनसो मनस्तः।

भवन्ति ये त्वाकृतिबुद्धिभेदा रजस्तमस्तत्र च कर्म हेतुः॥३६॥

द्वितीयप्रश्नस्योत्तरं— भूतैरित्यादि। सुसूक्ष्मैरित्यनेन चातीन्द्रियत्वं दर्शयति। आकाशमिहाक्रियत्वेन देहान्तरगमनकर्मणि नोक्तम्। मनसा जवते गच्छतीति मनोजवः। एतेन चात्मनो व्यापकस्य यद्यपि देहान्तरगतिर्नास्ति, तथाऽप्यस्य मनोगतिरेव भूतसहिता गतिशब्देनोच्यत इति दर्शितं भवति। देहादिति म्रियमाणदेहात्। देहमिति उत्पद्यमानदेहम्। कर्मात्मकत्वादिति कर्माधीनत्वात्। तेन, कर्म धर्माधर्मरूपं यत्रैनं भोगार्थं नयति, तदेव देहमयं यातीत्युक्तं भवति। अथ गच्छन् किमित्ययं नोपलभ्यते म्रियमाणपुरुषादित्याह— न त्वित्यादि। तस्यात्मन आतिवाहिकशरीरयुक्तस्य दृश्यं रूपं नास्ति, अतिसूक्ष्मरूपत्वादिति भावः। अथ किं सर्व एवैनं गच्छन्तं न पश्यन्तीत्याह— दिव्यं विना दर्शनमिति।— दिव्यं दर्शनं योगिचक्षुः, तेन योगिन एव पश्यन्त्येनमिति दर्शयति। अस्यैवातिवाहिकशरीरयुक्तस्यात्मनो धर्मान्तराण्याह— स सर्वग इत्यादि। सर्वशरीरभृदिति सर्वशरीराणि भर्तुं योग्यः। विश्वकर्मकरणक्षमो विश्वकर्मा। विश्वरूपतां च नरपश्वादिशरीररूपतया

कर्मवशाद्व्रजत इति विश्वरूपः। नित्यं बुद्ध्यादिभिर्युज्यत इति नित्ययुक्। सहानुशयेन रागादिना वर्तत इति सानुशयः। आतिवाहिकशरीररूपभूतचतुष्टयव्याकरणार्थं शरीरे यानि सम्भवन्ति भूतानि तान्येवाह— रसेत्यादि। एतानि भूतानि सारूप्यहेतुप्रस्तावोक्तान्यपि प्रकरणवशात्तथा वक्तव्यरजःशुक्राद्यनुक्तरूपप्रतिपादनार्थं च पुनरुच्यन्ते। आत्मनि संश्रितानीति आत्मकर्मणाऽऽत्मन्यातिवाहिकदेहरूपतया निबद्धानि। स्थितस्तथाऽऽत्मेति आत्मा तेषु भूतेषु देहान्तरादिक्रियार्थं स्थितः। या च गतिर्देहान्तरादिनाऽऽत्मनः, सा तद्भूतव्यवस्थितस्यैवोच्यते न व्यापकस्य, त स्य (सर्वत्र) सर्वगतत्वादित्यर्थः। मातापितृसम्भवानि रजश्च शुक्रमिति यथासङ्ख्यं मातापितृसम्भवानि। आत्मलीनानीति नित्यमात्मसम्बद्धानि। आत्मलीनभूतानां धर्मान्तरमाह— स बीजधर्मेत्यादि। स आत्मलीनभूतसन्तानो बीजधर्मा बीजस्वरूपः, बीजं हि स्वसदृशमङ्कुरं करोति; तेन, अयमप्यात्मलीनो भूतसन्तानः सदृशं देहरूपं भूतान्तरसङ्गं कुर्वन् बीजधर्मा भवति। 'सा बीजधर्मिणि' इति वा पाठः, तदा सा 'भूतसन्ततिः' इत्यध्याहार्यम्। आत्मनीति मनोयुक्तात्मनि। याति गच्छति सति देहान्तराणि यातीति योजना। आत्मनश्च गमनं मनोगमनमेव। 'परापराणि' इति वा पाठः; तदा पराणि श्रेष्ठानि देवादिशरीराणि, अपराणि अश्रेष्ठानि क्रिम्यादिशरीराणीति योजनीयम्। नन्वपरिदृश्यमाना भूतचतुष्टयी मनःप्रवृत्तियुक्ता बीजधर्मिणी किमर्थं स्वीकर्तव्या, यतः परिदृश्यमानमेवेदं षाड्भौतिकं शरीरं शुक्रशोणितकारणकमस्त्वित्याह— रूपाद्धीत्यादि। रूप्यत इति रूपं भौतिकं शरीरम्। तेन, अभौतिकाच्छरीराद्भौतिकं शरीरं भवतीत्यागमप्रसिद्धम्। तेनागमादेव साक्षाददर्शनरूपादातिवाहिकशरीराद् व्यक्तं शरीरमुत्पद्यत इति वाक्यार्थः। यद्यपि शुक्ररजसी कारणे, तथाऽपि यदैवातिवाहिकं सूक्ष्मभूतरूपशरीरं प्राप्नुतः, तदैव ते शरीरं जनयतः, नान्यदा, यदि शुक्रशोणितमातिवाहिकशरीरनिरपेक्षं गर्भं जनयेत्, तदा असत्यपि जीवाधिष्ठाने जनयेत्, न तु जनयति, तस्मादात्मस्थसूक्ष्मभूतादेव बीजरूपाच्छुक्रशोणितयुक्ताद्गर्भजन्मेति। एतच्चात्मस्थभूतं मातापितृजभूतेन समं शरीरकारणं कर्मवशादेव भवतीत्याह— कर्मेत्यादि। कर्मात्मकानामिति कर्मकारणकानां; किंवा यस्माद् रूपवत्तन्तुभ्यो रूपवान् पट उत्पद्यत इति प्रसिद्धं,

तेनातिवाहिकशरीरेण कर्तव्यशरीरसदृशेन भवितव्यं, कारणसदृशं हि कार्यं भवति; ततश्चात्मधर्मित्वं सूक्ष्माणामात्मस्थितभूतानां सिद्धमिति भावः। अथ मनः सात्त्विकराजसतामसभेदाद्भिन्नं कुतस्तत्र तत्र पुरुषे भवतीत्याह— मनसो मनस्त इति। पूर्वजन्मन्यव्यवहिते यादृङ्मनः, इह जन्मन्यपि तादृगेव मनो भवति। उक्तं चान्यत्र "जन्म जन्म यदभ्यस्तं दानमध्ययनं तपः। तेनैवाभ्यासयोगेन तदेवाभ्यस्यते पुनः" इति। अत्रापि च मनौत्पत्तौ कर्मात्मकानामिति योज्यम्। तेन कर्मवशादेव मनोभेदो भवति। नन्वेवं सति आत्मस्थसूक्ष्मभूतानामेकरूपत्वेनैकरूपेणैव शरीरेण सर्वप्राणिनां भवितव्यमित्याह— भवन्तीत्यादि। अकृतिः संस्थानम्। रजस्तमसी अनेकतरतमादिभेदभिन्ने तथा कर्म चानेकधा भिन्नं सत्यप्यभिन्ने सूक्ष्मभूतरूपे कारणे भेदकारणं भवतीत्यर्थः॥३१-३६॥

अतीन्द्रियैस्तैरतिसूक्ष्मरूपैरात्मा कदाचिन्न वियुक्तरूपः।
न कर्मणा नैव मनोमतिभ्यां न चाप्यहङ्कारविकारदोषैः॥३७॥
रजस्तमोभ्यां हि मनोऽनुबद्धं ज्ञानं विना तत्र हि सर्वदोषाः।
गतिप्रवृत्त्योस्तु निमित्तमुक्तं मनः सदोषं बलवच्च कर्म॥३८॥

'आत्मा सदा कैरनुबध्यते' इत्यस्योत्तरम्— अतीन्द्रियैरित्यादि। तैरिति बीजधर्मित्वेनोक्तैः। अहङ्कारविकारा एव दोषाः, किंवा रजस्तमसी दोषौ। अयं च सूक्ष्मभूताद्यनुबन्धो मनस एवेत्याह— रज इत्यादि। रजस्तमोभ्यां हेतुभूताभ्यां मनः सर्वैर्भूतादिभिरनुबद्धं भवति। अत्रैव हेतुमाह— ज्ञानादित्यादि। ज्ञानादिति तत्त्वज्ञानात्; तत्त्वज्ञानं विना मनः सर्वैर्दोषैर्युक्तं भवति, तत्त्वज्ञानात्तु निर्दोषं भवतीत्यर्थः। सदोषत्वे मनसः किं भवतीत्याह— गतीत्यादि। गतिः देहान्तरगमनं, प्रवृत्तिः धर्माधर्मक्रियासु प्रवृत्तिः; सदोषत्वेन मनः संसारहेतुर्भवतीति वाक्यार्थः। गतिप्रवृत्त्योर्हेत्वन्तरमाह— बलवच्च कर्मेत्यादि। बलवदिति नियतविपाकं; 'फलवत्' इति वा पाठः, तथाऽपि स एवार्थः। नियतं

कर्मफलं कर्मबलादेव भवति। अत्र च प्रश्नोत्तरेषु यदधिकमुच्यते 'गतिप्रवृत्त्योः' इत्यादिना, तत् प्रकरणवशादेव ज्ञेयम्॥३७-३८॥

रोगाः कुतः संशमनं किमेषां हर्षस्य शोकस्य च किं निमित्तम्।
शरीरसत्त्वप्रभवा विकाराः कथं न शान्ताः पुनरापतेयुः॥३९॥

'रोगाः कुतः' इत्येकः प्रश्नः। 'संशमनं किम्' इति द्वितीयः। 'हर्षस्य किं निमित्तम्' इति तृतीयः। 'शोकस्य किं निमित्तम्' इति चतुर्थः। 'शरीरसत्त्वप्रभवा विकाराः कथं न शान्ताः पुनरापतेयुः' इति पञ्चमः। एवं सङ्ग्रहवक्ष्यमाणं षड्विंशकं प्रश्नानां पूर्यते॥३९॥

प्रज्ञापराधो विषमास्तथाऽर्था हेतुस्तृतीयः परिणामकालः।
सर्वामयानां त्रिविधा च शान्तिर्ज्ञानार्थकालाः समयोगयुक्ताः॥४०॥

प्रज्ञापराधादयः प्रकरणवशात् पुनरुच्यन्ते। परिणामकाल इति कालपरिणाम इत्यर्थः॥४०॥

धर्म्याः क्रिया हर्षनिमित्तमुक्तास्ततोऽन्यथा शोकवशं नयन्ति।
शरीरसत्त्वप्रभवास्तु रोगास्तयोरवृत्त्या न भवन्ति भूयः॥४१॥

धर्म्या धर्मसाधनाः, ताश्च हर्षकारणधर्मकर्तृत्वेन हर्षकारणं भवन्ति। ततोऽन्यथेति अधर्म्याः क्रियाः। तयोरवृत्त्येति शरीरमनसोः सन्तानोच्छेदात्। मोक्षे हि शरीरमनसी निवर्तेते, ततः सर्वथा रोगसन्ताननिवृत्तिर्भवति॥४१॥

रूपस्य सत्त्वस्य च सन्ततिर्या नोक्तस्तदादिर्नहि सोऽस्ति कश्चित्।
तयोरवृत्तिः क्रियते पराभ्यां धृतिस्मृतिभ्यां परया धिया च॥४२॥

ननु यस्य निवृत्तिर्भवति तदादिमद्भवति, तत् किं शरीरमनःसन्ततिरादिमती, येन तस्या निवृत्तिर्वास्तविकरोगनिवृत्तिकारणमुच्यत इत्याह— रूपस्येत्यादि। रूपस्य शरीरस्य, रूपं हि शरीरं रूप्यमाणत्वेन रूपशब्देनोच्यते, यथा— "रूपाद्धि रूपप्रभवः" इत्यत्रोक्तम्। नोक्त इत्यागमेषु। कुतो नोक्त इत्याह— न हि सोऽस्तीति; अभावादेव नोक्त इत्यर्थः। अथ यद्यनादिमती शरीरमनःसन्ततिः, तत् कथं तस्या निवृत्तिरित्याह— तयोरित्यादि। तयोरिति शरीरसत्त्वयोः सन्तन्यमानयोः। पराभ्यामिति श्रेष्ठाभ्याम्। धृत्यादयस्तु यथा मोक्षकारणं तथोक्तं कतिधापुरुषीये। अनादिरपि च शरीरसन्ततिर्यथा विनश्यति, तथा च तत्रैवोक्तम्॥४२॥

सत्याश्रये वा द्विविधे यथोक्ते पूर्वं गदेभ्यः प्रतिकर्म नित्यम्।
जितेन्द्रियं नानुपतन्ति रोगास्तत्कालयुक्तं यदि नास्ति दैवम्॥४३॥

प्रकारान्तरेण शारीरमानसरोगाणां चिकित्सां शास्त्रे व्यवह्रियमाणामाह— सतीत्यादि। आश्रयशब्देन शरीरमनसी गृह्येते। पूर्वं गदेभ्य इति अनुत्पन्नेष्वेव रूपेषु। प्रतिकर्म नित्यमिति अनागतचिकित्सा नित्यम्। जितेन्द्रियमित्यनेन च रोगहेतुप्रज्ञापराधासात्म्येन्द्रियार्थवर्जनं दर्शयति, प्रतिकर्मनित्यतया चाशक्यपरिहारकालकृतदोषचिकित्सां दर्शयति। तत्कालयुक्तमिति तत्कालेऽवश्यं रोगकर्तृतया पच्यमानम्; एतेन, बलवद्दैवमवश्यं रोगं ददातीति दर्शयति॥४३॥

दैवं पुरा यत् कृतमुच्यते तत् तत् पौरुषं यत्त्विह कर्म दृष्टम्।
प्रवृत्तिहेतुर्विषमः स दृष्टो निवृत्तिहेतुर्हि समः स एव॥४४॥

प्रकरणाद्दैवाख्यं कर्म तदनुषङ्गत् पुरुषकारमप्याह— दैवमित्यादि। तेन, प्रकरणादुच्यमानतया जनपदोद्ध्वंसनीयोक्तकर्म लक्षणेन समं न पौनरुक्त्यम्। पुरेति जन्मान्तरे। इहेति इह जन्मनि। प्रवृत्तिहेतुरिति रोगप्रवृत्तिहेतुः। विषम इति अधर्मरूपं दैवं, रोगजनकश्च पुरुषकारः। समस्तु दैवं धर्मरूपं, रोगपरिपन्थी च पुरुषकारः। स इति पुंलिङ्गनिर्देशस्तु कर्मणि (पुल्लिङ्ग)धर्माधर्मरूपतया तथा पुरुषकारस्य प्रत्यवमर्शाज्ज्ञेयः। अन्ये तु प्रवृत्तिहेतुरित्यनेन संसारप्रवृत्तिहेतुरिति, तथा निवृत्तिहेतुरित्यनेन मोक्षहेतुरिति च वर्ण्यन्ति॥४४॥

हैमन्तिकं दोषचयं वसन्ते प्रवाहयन् ग्रैष्मिकमभ्रकाले।
घनात्यये वार्षिकमाशु सम्यक् प्राप्नोति रोगानृतुजान्न जातु॥४५॥

अथ कथं कालवृत्तदोषनिमित्तरोगपरिहारः प्रतिकर्मणा कर्तव्य इत्याह— हैमन्तिकमित्यादि। वसन्त इति चैत्रे। अभ्रकाल इति श्रावणे। घनात्यय इति मार्गशीर्षे। यदुक्तं— "माधवप्रथमे मासि" (सू.अ.७) इत्यादि। प्रवाहयन्नित्यनेन यथायोग्यतया वमनादिनेति ज्ञेयम्॥४५॥

नरो हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः।
दातासमः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः॥४६॥
मतिर्वचः कर्म सुखानुबन्धं सत्त्वं विधेयं विशदा च बुद्धिः।
ज्ञानं तपस्तत्परता च योगे यस्यास्ति तं नानुपतन्ति रोगाः॥४७॥

तत्र श्लोकः।

इहाग्निवेशस्य महार्थयुक्तं षड्त्रिंशकं प्रश्नगणं महर्षिः।

अतुल्यगोत्रे भगवान् यथावन्निर्णीतवान् ज्ञानविवर्धनार्थम्॥४८॥

हेत्वन्तरं रोगाभावकारणमाह— नर इत्यादि। सम इति भूतेषु समचित्तः। सुखानुबन्धमिति लिङ्गविपरिणामन्मत्या वचसा च योज्यम्। तेन कायवाङ्मनः कर्माण्युत्तरकालीनसुखफलानि शुभानि गृह्यन्ते। सत्त्वं विधेयं स्वायत्तं मनः। विशदाबुद्धिरिति न कश्मला बुद्धिः। बुद्धिश्चेह ऊहापोहवती विवक्षिता। मतिस्तु स्मृतिचिन्तादि। ज्ञानं तत्त्वज्ञानम्। शेषं सुगमम्॥४६-४८॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते शारीरस्थानेऽतुल्यगोत्रीयं शारीरं नाम द्वितीयोऽध्यायः॥२॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां शारीरस्थानेऽतुल्यगोत्रीयं शारीरं नाम द्वितीयोऽध्यायः॥२॥

तृतीयोऽध्यायः।

अथातः खुड्डिकां गर्भावक्रान्तिं शारीरं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

पूर्वाध्याये शुक्रशोणिते गर्भकारणत्वेनोक्ते, नतु कृत्स्नं गर्भकारणमुक्तम्, अतः सम्पूर्णगर्भकारणाभिधानार्थं खुड्डिकागर्भावक्रान्तिरुच्यते। खुड्डिकामिति अल्पाम्। गर्भस्यावक्रान्तिः मेलकः, उत्पत्तिरिति यावत्॥१-२॥

पुरुषस्यानुपहतरेतसः स्त्रियाश्चाप्रदुष्टयोनिशोणितगर्भाशयाया यदा भवति संसर्गः ऋतुकाले, यदा चानयोस्तथायुक्ते संसर्गे शुक्रशोणितसंसर्गमन्तर्गर्भाशयगतं जीवोऽवक्रामति सत्त्वसम्प्रयोगात्तदा गर्भोऽभिनिर्वर्तते, स सात्म्यरसोपयोगादरोगोऽभिवर्धते सम्यगुपचारैश्चोपचर्यमाणः, ततः प्राप्तकालः सर्वेन्द्रियोपपन्नः परिपूर्णशरीरो बलवर्णसत्त्वसंहननसम्पदुपेतः सुखेन जायते समुदयादेषां भावानां— मातृजश्चायं गर्भः पितृजश्चात्मजश्च सात्म्यजश्च रसजश्च, अस्ति च खलु सत्त्वमौपपादुकमिति होवाच भगवानात्रेयः॥३॥

पुरुषस्येत्यादि। अनुपहतरेतस इति पदेनैव पुरुषस्येति लभ्यते, यतः पुरुषस्यैव रेतसो गर्भजनकत्वमुक्तं; तेन पुरुषस्येति पदेन य एव सम्पूर्णधातुः पुरुषशब्दवाच्यो बालव्यतिरिक्तस्तं ग्राहयति। स्त्रियाश्चेति पदमर्थलब्धं सद् यौवनवतीं स्त्रियं लम्भयति। संसर्गः मैथुनम्। ऋतौ पुष्पदर्शने प्रशस्तः कालः ऋतुकालः; तेन ऋतुकालस्यादित्र्यहं निषेधयति। यतः "रजस्वलाभिगमनमलक्ष्मीमुखानां" (सू.अ.२५) इत्यादिना ऋतौ त्र्यहं निषिद्धम्। आर्तवदर्शनं च शरदाद्यृतुसाधर्म्याद् ऋतुशब्देनोच्यते। यथा ऋतावुप्तानि बीजानि प्ररोहन्ति, तथा आर्तवदर्शनाख्येऽपि

ऋतौ शुक्ररूपं बीजमुप्तमिति ऋतुसाधर्म्यम्। न केवलमेवम्भूतः संसर्ग एव गर्भकारणं, किं तु जीवाधिष्ठाने सतीत्याह— यदेत्यादि। तथायुक्त इति अदुष्टरेतसः पुरुषस्य अदुष्टयोन्यादेश्च स्त्रियाः संसर्गे। अयं चार्थः पुरुषस्येत्यादिनैव लब्धोऽपि पुनः शुक्रशोणितसंसर्गमित्यादिग्रन्थवक्ष्यमाणाधिकधर्मविध्यर्थमनूद्यते, तेन न पौनरुक्त्यम्। किंवा, पुरुषस्येत्यादिना पूर्वं मैथुनात् प्रागनुपहतरेतस्त्वाद्युक्तं, तथायुक्ते चेत्यनेन तु मैथुनसमयेऽपि शुक्रयोन्यादीनामदुष्टिरुच्यते। मैथुनकाले हि ईर्ष्यादिना शुक्रदुष्टिः सम्भाव्यते। शुक्रशोणितसंसर्गमिति शुक्रशोणितमेलकम्। अन्तरित्यनेन गर्भाशयबाह्यगतं संसर्गमकारणं गर्भस्य निषेधयति। जीवशब्देन चेतनाधातुरात्मा। नन्वात्मा व्यापकः, तत् कथमयमवक्रामतीत्याह— सत्त्वेत्यादि। सत्त्वसम्प्रयोगादिति मनोगमनादित्यर्थः। तद् यथोक्तं— "युक्तस्य मनसा तस्य निर्दिश्यन्ते विभोः क्रियाः" (शा.अ.१) इति। यद्यप्यात्मा विभुत्वात् सर्वगतत्वेन न क्वचिदपि याति, तथाऽपि यत्रास्य कर्मवशान्मनो याति, तत्रैव चैतन्योपलब्धेरात्माऽपि गत इति व्यपदिश्यत इति भावः। अथैवमुत्पन्नो गर्भः कथमभिवर्धते, कथं वा जायत इत्याह— सम्यगुपचारैरिति; गर्भहितकरैराहारविहारैरित्यर्थः। प्राप्तकाल इति प्राप्तप्रसवकालः, प्रसवकालो नवमदशममासौ। परिपूर्णशरीर इति सर्वाङ्गोपचितदेहः। सम्पच्छब्दो बलादिभिः प्रत्येकमभिसम्बध्यते। समुदयादिति सम्यङ्मेलकात्। एषामित्यनेन पुरुषस्येत्यादिग्रन्थोक्तान् रेत-आर्तव-जीव-सत्त्व-सात्म्य-रस-सम्यगुपचारान् प्रत्यवमृशति। एतदेव समुदायप्रभवत्वं गर्भस्य प्रत्येकं मात्रादिगर्भकारणव्युत्पादनेन दर्शयन्नाह— मातृजश्चेत्यादि। सात्म्यजश्चेत्यत्र सात्म्यशब्देन रसव्यतिरिक्तरूपादि, तथा आचारश्च सात्म्यो ग्राह्यः। सात्म्यरसस्तु 'रसज' इत्यनेनैव गृहीतः। औपपादुकमिति आत्मनः शरीरान्तरसम्बन्धोपपादकम्। एतच्च व्याकृतमेव पूर्वम्। अत्र यद्यपि पुरुषस्यानुपहतरेतस इत्यनेन पितैव प्रथममुक्तः, तथाऽपि मातृप्रधानतां गर्भस्य दर्शयितुं मातृजश्चायमिति प्रथमं कृतं; माता च गर्भे प्रधानं कारणं, येन आसेकात् प्रभृति प्रसवपर्यन्तं मातुरेव गुणदोषावनुविदधाति गर्भः; प्रथमं तु पुरुषस्य मैथुने स्वातन्त्र्यात् तथा शरीरधारकप्रधानास्थिकारणत्वाच्चाग्रेऽभिधानं कृतम्॥३॥

नेति भरद्वाजः, किं कारणं— न हि माता न पिता नात्मा न सात्म्यं न पानाशनभक्ष्यलेह्योपयोगा गर्भं जनयन्ति, न च परलोकादेत्य गर्भं सत्त्वमवक्रामति॥ (१)॥

पूर्वपक्षोद्धारेण सिद्धान्तं ग्राहयितुं मात्रादिगर्भकारणानि भरद्वाजमुखेनाक्षिपति— नेत्यादि। नेतीत्यनेन सामान्येनात्रेयवचनस्योक्तस्याक्षेपः। किं कारणमित्यनेन कस्मादात्रेयवचनमेतद्विरुद्धमित्यत्र कारणं पृच्छतो नहि मातेत्यादिनोक्तमात्रादिकारणानामकारणत्वं भरद्वाजः प्रतिजानीते॥ (१)॥

यदि हि मातापितरौ गर्भं जनयेतां, भूयस्यः स्त्रियः पुमांसश्च भूयांसः पुत्रकामाः, ते सर्वे पुत्रजन्माभिसन्धाय मैथुनधर्ममापद्यमानाः पुत्रानेव जनयेयुर्दुहितॄर्वा दुहितृकामाः, न तु काश्चित् स्त्रियः केचिद्वा पुरुषा निरपत्याः स्युरपत्यकामा वा परिदेवेरन्॥ (२)॥

यदि हीत्यादिना मात्रादीनामकारणत्वे हेतुं ब्रूते। किंवा, मात्रादीनामकारणत्वं भरद्वाजेन प्रतिज्ञातं तत्र 'किं कारणमिति' हेतुप्रश्नः, ततः 'नहि माता' इत्यादिना हेतुकथनम्। अस्य चायमर्थः— यत्— न मात्रादयो गर्भकारणत्वेन प्रत्यक्षेण दृश्यन्ते, ततो न मात्रादयो गर्भकारणम्। यदि हीत्यादिना तूपपत्तिविरोधोऽपि मात्रादिकारणत्वेऽस्तीति दर्शयति; तेन न पौनरुक्त्यम्। मैथुनधर्मः व्यवायः। पुत्रकामाः पुत्रानेव जनयेयुः, दुहितृकामा दुहितॄर्वा जनयेयुरिति योजना। नतु काश्चित् स्त्रिय इत्यत्र मैथुनमापद्यमाना एव स्त्रियः पुरुषाश्च परिदेवेरन् न चेति योजना। मातापित्रधीनत्वेन गर्भस्य यदैवेच्छन्त्यपत्यं, तदैव मैथुनमापद्यमानाः सापत्याः स्युः; ततश्च सर्वापत्यत्वेन न केचित् परिदेवेरन्नित्यर्थः॥ (२)॥

न चात्माऽऽत्मानं जनयति। यदि ह्यात्माऽऽत्मानं जनयेज्जातो वा जनयेदात्मानमजातो वा, तच्चोभयथाऽप्ययुक्तम्। न हि जातो जनयति सत्त्वात्, न चाजातो जनयत्यसत्त्वात्, तस्मादुभयथाऽप्यनुपपत्तिः। तिष्ठतु तावदेतत्। यद्ययमात्माऽऽत्मानं शक्तो जनयितुं स्यात्, न त्वेनमिष्टास्वेव कथं योनिषु जनयेद्वशिनमप्रतिहतगतिं कामरूपिणं तेजोबलजववर्ण-सत्त्वसंहननसमुदितमजरमरुजममरम्; एवंविधं ह्यात्माऽऽत्मानमिच्छत्यतो वा भूयः॥(३)॥

आत्मजत्वं गर्भस्य निषेधयति— न चात्मेत्यादि। मनुष्यकरितुरगादिरूपेण आत्मानं जनयतीत्यर्थः। सत्त्वादिति जन्यस्यात्मनो विद्यमानत्वात्, न च विद्यमानो जन्यत इत्यर्थः। असत्त्वादिति कारणभूतस्यात्मनोऽजातपक्षेऽसत्त्वान्न कारणत्वमुपपन्नमित्यर्थः। अत्रैव दूषाणान्तरमाह— तिष्ठत्वित्यादि। योनिष्विवि जातिषु। अतो वा भूय इति यथोक्तगुणयुक्तादप्यधिकं शक्रादिपरमर्धितुल्यमित्यर्थः॥(३)॥

असात्म्यजश्चायं गर्भः। यदि हि सात्म्यजःस्यात्, तर्हि सात्म्यसेविनामेवैकान्तेन प्रजा स्यात्, असात्म्यसेविनश्च निखिलेनानपत्याः स्युः, तच्चोभयमुभयत्रैव दृश्यते॥४॥

तच्चोभयमिति सप्रजत्वमनपत्यत्वं च। उभयत्रेति सात्म्यसेविन्यसात्म्यसेविन्यपि॥(४)॥

अरसजश्चायं गर्भः। यदि हि रसजः स्यात्, न केचित् स्त्रीपुरुषेष्वनपत्याः स्युः, न हि कश्चिदस्त्येषां यो रसान्नोपयुङ्क्ते; श्रेष्ठरसोपयोगिनां चेद्गर्भा जायन्त इत्यभिप्रेतमिति, एवं सत्याजौरभ्रमार्गमायू-रगोक्षीरदधिघृतमधुतैलसैन्धवेक्षुरसमुद्गशालिभृतानामेवैकान्तेन प्रजा स्यात्, श्यामाकवरकोद्दालक-कोरदूषककन्दमूलभक्षाश्च निखिलेनानपत्याः स्युः, तच्चोभयमुभयत्र दृश्यते॥(५)॥

यो रसान्नोपयुङ्क्ते इति रसश्चेद्गर्भकारणं तं च सर्व एव स्त्रीपुरुषाः सेवन्ते, तेन सर्व एव सापत्याः स्युरिति भावः। अथ रसजो गर्भ इत्यस्य श्रेष्ठरस इत्यर्थो वर्ण्यते, तत्रापि दूषणमाह— श्रेष्ठेत्यादि॥ (५)॥

न खल्वपि परलोकादेत्य सत्त्वं गर्भमवक्रामति; यदि ह्येनमवक्रामेत्, नास्य किञ्चित् पौर्वदेहिकं स्यादविदितमश्रुतमदृष्टं वा, स च तच्च न किञ्चिदपि स्मरति॥ (६)॥
तस्मादेतद्ब्रूमहे— अमातृजश्चायं गर्भोऽपितृजश्चानात्मजश्चासात्म्यजश्चारसजश्च, न चास्ति सत्त्वमौपपादुकमिति (होवाच भरद्वाजः)॥४॥

'अस्ति च सत्त्वमौपपादुकम्' इति यदुक्तं, तद्दूषयति— न खल्वपीत्यादि। पौर्वदेहिकमिति पूर्वदेहानुभूतम्। अविदितमदृष्टं वेति इह जन्मन्यपि पूर्वदेहानुभूतं नाविदितमदृष्टं वा स्यात्; विदितं प्रत्यक्षव्यतिरिक्तप्रमाणोपलब्धं, दृष्टं तु प्रत्यक्षोपलब्धम्, एतद्विपर्ययादविदितमदृष्टं च विज्ञेयम्। न च किञ्चिदपि स्मरतीति नच पूर्वजन्मानुभूतं स्मरतीत्यर्थः। एवं मन्यते— यन्मनः पौर्वदेहिकमनुभवति तच्चेह जन्मन्यप्यनुवर्तते, तथा यत् तेन जन्मान्तरेऽनुभूतं तदिह जन्मन्यपि तथैव स्मरतु; यथा— देवदत्तो बाल्यानुभूतं यौवने स्मरति, न चायं तथा स्मरति; तेन न पूर्वापरजन्मन्येकं सत्त्वमिति। तस्मादित्यादिना दूषणदूषितमर्थं पुनर्निगमनेन दर्शयति॥४॥

नेति भगवानात्रेयः, सर्वेभ्य एभ्यो भावेभ्यः समुदितेभ्यो गर्भोऽभिनिर्वर्तते॥५॥

भरद्वाजमतमात्रेयवचसा दूषयति— नेतीत्यादि। समुदितेभ्य इति वचनात् प्रत्येकं मात्रादीनामितरकारणनिरपेक्षाणां गर्भकारणत्वं निषेधयति। तेन, मात्रादिगर्भकारणसान्निध्येऽपि गर्भकारणान्तरजीवावक्रमाद्यभावाद् गर्भानुत्पादो युक्त एव। न च सामग्रीजन्ये कार्ये एकदेशस्याजनकत्वेनाकारणत्वम्। एवं सति तन्तूनामपि पटकारणानां कारणान्तरासान्निध्ये

पटाजनकत्वेनाकारणत्वं स्यादिति भावः। इदमेव गर्भस्य मात्रादिजन्यत्वं यत्— मात्रादिव्यतिरेकेणानुत्पद्यमानत्वम्॥५॥

मातृजश्चायं गर्भः! न हि मातुर्विना गर्भोत्पत्तिः स्यात्, न च जन्म जरायुजानाम्। यानि खल्वस्य गर्भस्य मातृजानि, यानि चास्य मातृतः सम्भवतः सम्भवन्ति, तान्यनुव्याख्यास्यामः; तद्यथा— त्वक्च लोहितं च मांसं च मेदश्च नाभिश्च हृदयं च क्लोम च यकृच्च प्लीहा च वृक्कौ च बस्तिश्च पुरीषाधानं चामाशयश्च पक्वाशयश्चोत्तरगुदं चाधरगुदं च क्षुद्रान्त्रं च स्थूलान्त्रं च वापा च वपावहनं चेति (मातृजानि)॥६॥

एवंविधमेव मातुस्तावत् कारणत्वमाह— मातृजश्चायं गर्भ इत्यादिना। गर्भोत्पत्तौ मातुः कारणत्वं दर्शयित्वा जरायुजजन्मनि कारणत्वमाह— न च जन्मेत्यादि। जरायुः अमरा, येन वेष्टितामनुष्यादयः प्रजायन्ते; जरायुणा वेष्टिता जायन्ते इति जरायुजामनुष्यादयः संस्वेदजानां मशकादीनामुद्भिज्जादीनां भेकादीनां च मातरं विनाऽपि जन्म भवति। अण्डजानामपि यद्यपि माता कारणं भवत्येव जन्मनि, तथाऽपि जरायुजस्य मानुषस्येह प्रकरणेऽभिप्रेतत्वेनाण्डजान् विहाय जरायुजानामिति कृतम्। किंवा, जरायुजस्याभिव्यक्तिरूपे जन्मनि यावदभिव्यक्ति यथा माता कारणं भवति, न तथाऽण्डजे; तत्र कूर्मादावण्डोत्पत्तिमात्र एव माता कारणं, न जन्मन्यभिव्यक्तिरूपे। यत्तु 'पितुर्विना न जरायुजानां जन्म' इति वक्ष्यति, तज्जरायुजोत्पादे पितुरवश्यापेक्षणीयत्वोपदर्शनार्थम्; अण्डजास्तु मत्स्यादयः पितरं विनाऽपि ऋतुविशेषप्राप्त्यैव भवन्तीति भावः। मातृजानीत्यस्य विवरणं— यान्यस्य मातृतः सम्भवतः सम्भवन्तीति सम्भवतो गर्भस्य यानि मातृत इति मातुरागताच्छोणितात् सम्भवन्त्युत्पद्यन्ते, तानि मातृजानि त्वगादीन्यनुव्याख्यास्याम इति योजना। एवमन्यत्रापि यानि त्वित्यादिग्रन्थो व्याख्येयः। मातृजत्वं च त्वगादीनामागमगम्यमेव। पुरीषाधानं पक्वाशयः। उत्तरगुदाधरगुदौ गुदोत्तराधरभागौ। वपावहनं 'तैलवर्तिका' इति कथ्यते॥६॥

पितृजश्चायं गर्भः। नहि पितुर्ऋते गर्भोत्पत्तिः स्यात्, न च जन्म जरायुजानाम्। यानि खल्वस्य गर्भस्य पितृजानि, यानि चास्य पितृतः सम्भवतः सम्भवन्ति, तान्यनुव्याख्यास्यामः; तद्यथा— केशश्मश्रुनखलोमदन्तास्थिसिरास्नायुधमन्यः शुक्रं चेति (पितृजानि)॥७॥

शुक्रमिति विच्छिद्यपाठेन शुक्रस्य सर्वधातुसारस्योपादेयतां दर्शयति॥७॥

आत्मजश्चायं गर्भः। गर्भात्मा ह्यन्तरात्मा यः, तं 'जीव' इत्याचक्षते शाश्वतमरुजमजरमम-रमक्षयमभेद्यमच्छेद्यमलोड्यं विश्वरूपं विश्वकर्माणमव्यक्तमनादिम-निधनमक्षरमपि। स गर्भाशयमनुप्रविश्य शुक्रशोणिताभ्यां संयोगमेत्य गर्भत्वेन जनयत्यात्मनाऽऽत्मानम्, आत्मसञ्ज्ञा हि गर्भे। तस्य पुनरात्मनो जन्मानादित्वान्नोपपद्यते, तस्मान्न जात एवायमजातं गर्भं जनयति, अजातो ह्ययमजातं गर्भं जनयति; स चैव गर्भः कालान्तरेण बालयुवस्थविरभावान् प्राप्नोति, स यस्यां यस्यामवस्थायां वर्तते तस्यां तस्यां जातो भवति, या त्वस्य पुरस्कृतातस्यां जनिष्यमाणश्च, तस्मात् स एव जातश्चाजातश्च युगपद्भवति; यस्मिंश्चैतदुभयं सम्भवति जातत्वं जनिष्यमाणत्वं च स जातो जन्यते, स चैवानागतेष्ववस्थान्तरेष्वजातो जन्ययत्यात्मनाऽऽत्मानम्। सतो ह्यवस्थान्तरगमनमात्रमेव हि जन्म चोच्यते तत्र तत्र वयसि तस्यां तस्यामवस्थायां; यथा— सतामेव शुक्रशोणितजीवानां प्राक् संयोगाद्गर्भत्वं न भवति, तच्च संयोगाद्भवति; यथा— सतस्तस्यैव पुरुषस्य प्रागपत्यात् पितृत्वं न भवति, तच्चापत्याद्भवति; तथा सतस्तस्यैव गर्भस्य तस्यां तस्यामवस्थायां जातत्वमजातत्वं चोच्यते॥ ८॥

आत्मज इत्यादिना आत्मजत्वं व्युत्पादयति। अन्तरात्मोच्यत इत्यनेन गर्भकारणभूतमात्मानं षड् धातुसमुदायवर्त्यात्मशब्दाभिधेयाद् व्यावर्तयति। आचक्षत इति आगमेषु शाश्वतादिशब्दैर्ब्रुवते वृद्धाः।

अलोड्यमिति अक्षोभ्यम्। गर्भत्वेन जनयत्यात्मानमिति गर्भस्वरूपो यः षड्धातुक आत्मा तं जनयतीत्यर्थः। गर्भस्यात्मशब्दाभिधेयतामाह— आत्मसञ्ज्ञा हि गर्भे इति। तस्येत्यनेन परमात्मानं प्रत्यवमृशति। यस्मादस्यानादित्वाज्जन्म नोपपद्यते तस्माज्जात एवायमजातं गर्भं जनयतीति पक्षोऽन, इति योज्यम्। अथ जातः स न चेज्जनयति कथं तर्हि जनयतीत्यह— अजातो ह्ययमिति; नित्यो ह्ययमित्यर्थः। तेन नित्यत्वेनाकाशवन्न जातः सन्नन्तरात्मा गर्भस्वरूपमात्मानं जनयति। अतश्चान्तरात्मरूपतया नित्यविद्यमानत्वेनाजातः सन् गर्भरूपावस्थायां जात उच्यते। एवमजातत्वं जातत्वं चात्मनि द्वयमपि व्यपदिश्यते। एतदेवात्मनि जातत्वमजातत्वं च दर्शयितुं दृष्टान्तार्थं गर्भे एव जातत्वमजातत्वं च दर्शयति— स चैवेत्यादि। पुरस्कृतेति अग्रे भविष्यन्ती। यथा— बालस्य वृद्धत्वावस्थाऽजाता जन्यत इति च, तथा अजातो जनयत्यात्मनाऽऽत्मनमिति च शब्दप्रयोगसमर्थनमात्रमेतद् विवक्षाभेदाद्बोद्धव्यम्। अनेन चात्मन्यवस्थाभेदकृतजातत्वसमर्थनेन 'जातो वाजनयेत्, अजातो वा' इत्यादिग्रन्थकृतपूर्वपक्षः शब्दप्रयोगसमर्थनतया परिहृतः। परमार्थतस्तु नित्यत्वेनाजात एवात्मा आत्मनोऽजातावस्थां गर्भादिरूपां जनयति। तेन, नासतः कारणत्वं सतो वा जन्यत्वमिति पक्षः स्थित एव। सतो हीत्यादिना सत्कार्यपक्षं साङ्ख्यमतं दर्शयति। किंवा वयोभेदेन यदेवावस्थान्तरगमनं तदेव जन्मेति दर्शयति। तस्यां तस्यामवस्थायामिति च्छेदः। पितृत्वमिति पितृत्वेन व्यपदेश इत्यर्थः॥८॥

न खलु गर्भस्य न च मातुर्न पितुर्न चात्मनः सर्वभावेषु यथेष्टकारित्वमस्ति; ते किञ्चित् स्ववशात् कुर्वन्ति, किञ्चित् कर्मवशात्, क्वचिच्चैषां करणशक्तिर्भवति, क्वचिन्न भवति। यत्र सत्त्वादिकरणसम्पत्तत्र यथाबलमेव यथेष्टकारित्वम्, अतोऽन्यथा विपर्ययः। न च करणदोषादकरणमात्मासम्भवति गर्भजनने, दृष्टं चेष्टा योनिरैश्वर्यं मोक्षश्चात्मविद्भिरात्मायत्तम्। नह्यन्यः सुखदुःखयोः कर्ता। न चान्यतो गर्भो जायते जायमानः, नाङ्कुरोत्पत्तिरबीजात्॥९॥

यदुक्तं— यद्यात्मा आत्मानं जनयति तदा वशित्वादिगुणयुक्तं जनयेदिति, तत्रोत्तरमाह— न खल्वित्यादि। गर्भस्य सर्वभावेषु न मात्रादीनां यथेष्टकारित्वमिति योज्यम्। अत्र च यद्यप्यात्मैव प्रकृतः, तथाऽपि तुल्यसमाधानत्वेन मातापितरावप्युपातौ। यथा आत्मनः सर्वभावेषु यथेष्टकारित्वेनेष्टयोनिगमनादिप्रसक्तिः समाधीयते, तथा मातापित्रोरपि यथेष्टकारित्वेन पुत्रानेव जनयेयुरित्यादिपूर्वपक्षः परिहृतो भवति। अथ कुत एवात्मादीनां यथेष्टकारित्वं क्वचिन्न भवतीत्याह— किञ्चिदित्यादि। किञ्चिदिति न सर्वम्। तत्र मातापितरौ स्ववशौ मैथुनं गर्भकारणं सात्म्यरससेवादिकं चाचरतः, गर्भस्य जीवाधिष्ठानादौ तु कर्माधीने परवशौ; तथा, आत्माऽपि गर्भस्य चैतन्ये तथा धर्माधर्महेतुक्रियानुष्ठाने स्ववशः, कर्मजन्ये इष्टानिष्टयोन्यादिगमने तु धर्माधर्मपराधीन एव; तेन कर्माधीने विषये न मात्रादीनां यथेष्टकारित्वम्। यथेष्टकारित्वमपि मात्रादीनां क्वचिद्दर्शयन्नाह— क्वचिच्चैषामित्यादि। करणमुपकरणं साधनोपाय इति यावत्। सत्त्वं मनः, आदि प्रधानं येषां तानि सत्त्वादीनि मन-इन्द्रियशुक्रशोणितादीनि। यथाबलमिति यथाकर्म; बलशब्देनेहादृष्टमुच्यते। एतेन, यत्र मात्रादीनां पुत्रेच्छायामिष्टयोनिगमनादिकरणशक्तिर्भवति, कर्म चानुगुणं भवति, तत्रेप्सितपुत्रादिष्विष्टयोनिगमनादि कार्यं भवति; यथा— यदि तत्र विशुद्धभूरिशुक्रः पुरुषो भवति, स्त्री च विशुद्धयोन्याश्रयत्वादिगुणयुक्ता, पुत्रजनकं च कर्म तयोर्बलवत्, तदा पुत्रजन्माभिसन्धाय मैथुनमापद्यमानौ ईप्सितं पुत्रं जनयतः; तथा आत्माऽपि विशुद्धसत्त्वादिगुणयुक्तः शुभकर्मवान् तत्काले इष्टां योनिमनुध्यायति, तदाऽभीष्टयोनिगमनं सम्पादयत्यात्मन इत्यादि यथेष्टकारित्वोदाहरणं ज्ञेयम्। अतोऽन्यथा इति सत्त्वादिकरणाशक्तौ विगुणे च दैवे। विपर्यय इति न यथेष्टकारित्वम्। किंवा, क्वचिच्च मैथुनादावेषां पित्रादीनां स्ववशत्वं, तत् किमिति जीवोपक्रमादावपि न स्ववशत्वमेषां भवतीत्याह— क्वचिच्चैषामित्यादि। क्वचिदेव कार्ये यस्मात् किञ्चित् करणं मात्रादीनां शक्तं न सर्वत्र, तेन सर्वेष्वेव गर्भस्य भावेषु न स्ववशत्वमिति भावः। यत्रापि चैते मात्रादयः स्ववशाः सन्तः कुर्वन्ति, तत्रापि स्वीयस्वीयकरणयुक्ता एव कुर्वन्तीत्याह— यत्र सत्त्वेत्यादि। यथाबलमिति यथाशक्ति। अनेन च मात्रादयो गर्भस्य येषु विशेषेषु शक्ताः, तेषु सत्त्वादिकरणसम्पत्तौ यथेष्टकारिणो भवन्ति, न त्वशक्ये

विषये उपहतकरणा वा यथेष्टकारिणो भवन्तीति दर्शयति। अतोऽन्यथा विपर्यय इत्यस्य चार्थोऽग्रे व्याकृतः। ननु सत्त्वादिकरणदोषाच्चेदयमात्मा गर्भं न जनयति तथाविधं, हन्त तर्ह्यकारणमेवायमात्मा, कारणं हि यद्भवति तत् करोत्येव कार्यमित्याह— न चेत्यादि। करणदोषादकुर्वन् गर्भं कदाचिदात्मान गर्भजनने कारणं भवतीति न, अपितु भवत्येव कारणम्; एवं मन्यते— मृदाद्यभावात् घटमकुर्वन्नपि कुम्भकारः कारणमेव घटस्य भवति, घटजननशक्तियुक्तत्वात्; तथा आत्माऽपि करणदोषादकुर्वन्नपि तथाविधं गर्भं, तज्जननशक्तत्वेन भूयोदृष्टत्वात् कारणमेव भवति। तथेष्टयोनिगमने प्रसक्तिरपि प्रोद्भाविता आत्मनः कारणत्वेन सा क्वचिद्भवतीत्यपि दर्शयन्नाह— दृष्टं चेत्यादि। आत्माधीना योनिः पुरुषं प्रति इष्टा योनिः; तथा ऐश्वर्यादयश्चात्माधीना दृष्टाः, यथोक्तं कतिधापुरुषीये— "आवेशश्चेतसो ज्ञानं" (शा.अ.१) इत्यादिना। आत्मनः कारणत्वे हेत्वन्तरमाह— न ह्यन्य इत्यादि।— हि यस्मादात्मनोऽन्यः सुखदुःखयोः कर्ता नास्ति, किं त्वात्मैव सुखदुःखसाधनेन्द्रियकर्मशरीरादिकर्ता; तेन आत्मा कारणं गर्भस्य सुखदुःखाद्याधारस्येति भावः। अथ भूतान्येव कस्मात् संयोगवशाच्चेतनामासाद्य सुखादिकारणानि न भवन्तीत्याह— न चान्यत इत्यादि। अन्यत इति विजातीयात्। जायमान इति उत्पद्य मानः। सदृशमेव कारणात् कार्यमुत्पद्यते; येन न शणस्याङ्कुरोत्पत्तिर्नारिकेलबीजाद्भवति; अबीजादिति कार्यत्वेनाभिमताङ्कुरस्याबीजात्। एतेन, गर्भस्य यच्चैतन्यं तदचेतनेभ्यो भूतेभ्यो न भवति, किन्तु चेतनाधातोरात्मन एवेति दर्शयति॥९॥

यानि तु खल्वस्य गर्भस्यात्मजानि, यानि चास्यात्मतः सम्भवतः सम्भवन्ति, तान्यनुव्याख्यास्यामः तद्यथा— तासु तासु योनिषूत्पत्तिरायुरात्मज्ञानं मन इन्द्रियाणि प्राणापानौ प्रेरणं धारणमाकृतिस्वरवर्णविशेषाः सुखदुःखे इच्छाद्वेषौ चेतनाधृतिर्बुद्धिः स्मृतिरहङ्कारः प्रयत्नश्चेति (आत्मजानि)॥१०॥

एवमात्मजत्वं गर्भस्य व्युत्पाद्यात्मजान् विशेषानाह— यानीत्यादि। प्रेरणं धारणं चेन्द्रियाणामेव। अत्र च तत्तद्देवादिपश्वादियोनिगमनादौ धर्माधर्मजन्ये धर्माधर्मस्यापि जनकत्वेनात्मैव मूलकारणमुच्यते; आत्मज्ञानप्राणापानप्रेरणादौ तु मनः— करण आत्मैवाव्यवधानेन कारणम्॥१०॥

सात्म्यजश्चायं गर्भः। नह्यसात्म्यसेवित्वमन्तरेण स्त्रीपुरुषयोर्वन्ध्यत्वमस्ति, गर्भेषु वाऽप्यनिष्टो भावः। यावत् खल्वसात्म्यसेविनां स्त्रीपुरुषाणां त्रयो दोषाः प्रकुपिताः शरीरमुपसर्पन्तो न शुक्रशोणितगर्भाशयोपघातायोपपद्यन्ते, तावत् समर्था गर्भजननाय भवन्ति। सात्म्यसेविनां पुनः स्त्रीपुरुषाणामनुपहतशुक्रशोणितगर्भाशयानामृतकाले सन्निपतितानां जीवस्यानवक्रमणाद्गर्भा न प्रादुर्भवन्ति। नहि केवलं सात्म्यज एवायं गर्भः, समुदयोऽत्र कारणमुच्यते। यानि खल्वस्य गर्भस्य सात्म्यजानि, यानि चास्य सात्म्यतः सम्भवतः सम्भवन्ति, तान्यनुव्याख्यास्यामः; तद्यथा— आरोग्यमनालस्यमलोलुपत्वमिन्द्रियप्रसादः स्वरवर्णबीजसम्पत् प्रहर्षभूयस्त्वं चेति (सात्म्यजानि)॥ ११॥

सात्म्यजश्चेत्यादिना सात्म्यजत्वं व्युत्पादयति, असात्म्यसेवां च गर्भोपघातिनीं दर्शयन् सात्म्यसेवाया गर्भं प्रति कारणत्वं द्रढयति। असात्म्यसेविनामपि प्रजाभवनोपपत्तिं दर्शयन् 'असात्म्यसेविनश्च निखिलेनापत्याः स्युः' इति पूर्वपक्षं परिहरति। सात्म्यसेविनां पुनरित्यादिना तु ग्रन्थेन 'सात्म्यसेविनामेकान्तेन प्रजा स्यात्' इति यदुक्तं तत् परिहरति। सन्निपतितानामिति व्यवायमापन्नानाम्। अत्र स्वरवर्णौ सात्म्यजत्वेन तथा आत्मजत्वेन चोक्तौ, तेन द्वावप्यत्र कारणमिति ज्ञेयम्॥११॥

रसजश्चायं गर्भः। न हि रसादृते मातुः प्राणयात्राऽपि स्यात्, किं पुनर्गर्भजन्म। न चैवासम्यगुपयुज्यमाना रसा गर्भमभिनिर्वर्तयन्ति, न च केवलं सम्यगुपयोगादेव रसानां

गर्भोभिमिनिर्वृत्तिर्भवति, समुदायोऽप्यत्र कारणमुच्यते। यानि तु खल्वस्य गर्भस्य रसजानि, यानि चास्य रसतः सम्भवतः सम्भवन्ति, तान्यनुव्याख्यास्यामः; तद्यथा— शरीरस्याभिनिर्वृत्तिरभिवृद्धिः प्राणानुबन्धस्तृप्तिः पुष्टिरुत्साहश्चेति (रसजानि)॥१२॥

प्राणयात्राऽपि स्यादिति गर्भधारणकारणभूताया मातुरपि प्राणस्थितिरित्यर्थः। न चैवासम्यगुपयुज्यमाना इत्यादिना असात्म्यरसोपयोगस्य गर्भोपघातित्वं दर्शयति। असात्म्यरसोपयोगिनां प्रजाभवनं यत्, तदसात्म्यसेविप्रजाभवनन्यायतुल्यमिति नेह पुनर्दर्शितम्। समुदायोऽप्यत्र कारणमित्यनेन तु असम्यग्रससेविनां चापत्यभवने कारणं धर्मादि दर्शयति। अभिनिर्वृत्तिः अङ्गप्रत्यङ्गव्यक्तता। प्राणानुबन्ध इति बलानुबन्धः पुष्टिः उपचयः। वृद्धिस्तु दैर्घ्येण वृद्धिः। उत्साहः बलम्। इति शब्दः प्रकारे; तेनैवम्प्रकाराण्यन्यान्यपि वर्णादीनि रसजानीति दर्शयति। एवं पूर्वत्रापि इतिशब्दो व्याख्येयः। यदा त्वितिशब्दः परिसमाप्त्यर्थस्तदाऽप्याविष्कृतानां रसजानां परिसमाप्तिर्ज्ञेया; तेन अनाविष्कृता वर्णादयोऽपि रजसा लभ्यन्ते॥१२॥

अस्ति खलु सत्त्वमौपपादुकं; यज्जीवं स्पृक्शरीरेणाभिसम्बध्नाति, यस्मिन्नपगमनपुरस्कृते शीलमस्य व्यावर्तते, भक्तिर्विपर्यस्यते, सर्वेन्द्रियाण्युपतप्यन्ते, बलं हीयते, व्याधय आप्याय्यन्ते, यस्माद्धीनः प्राणाञ्जहाति, यदिन्द्रियाणामभिग्राहकं च 'मन' इत्यभिधीयते; तत् त्रिविधमाख्यायते— शुद्धं, राजसं, तामसमिति। येनास्य खलु मनो भूयिष्ठं, तेन द्वितीयायामाजातौ सम्प्रयोगो भवति; यदा तु तेनैव शुद्धेन संयुज्यते, तदा जातेरतिक्रान्ताया अपि स्मरति। स्मार्तं हि ज्ञानमात्मनस्तस्यैव मनसोऽनुबन्धादनुवर्तते, यस्यानुवृत्तिं पुरस्कृत्य पुरुषो 'जातिस्मर' इत्युच्यते। यानि खल्वस्य गर्भस्य सत्त्वजानि, यान्यस्य सत्त्वतः सम्भवतः सम्भवन्ति, तान्यनुव्याख्यास्यामः; तद्यथा— भक्तिः शीलं शौचं द्वेषः स्मृतिर्मोहस्त्यागो मात्सर्यं शौर्यं भयं क्रोधस्तन्द्रोत्साहस्तैक्ष्ण्यं मार्दवं गाम्भीर्यमनवस्थितत्वमित्येवमादयश्चान्ये, ते सत्त्वविकारा यानुत्तरकालं सत्त्वभेद-

मधिकृत्योपदेक्ष्यामः। नानाविधानि खलु सत्त्वानि, तानि सर्वाण्येकपुरुषे भवन्ति, न च भवन्त्येककालम्, एकं तु प्रायोवृत्त्याऽऽह॥१३॥

अस्तीत्यादिना मनस औपपादुकत्वमाक्षिप्तं समादधाति। अपिशब्दोऽवधारणे। अत्र च 'यज्जीवं स्पृक्शरीरेणाभिसम्बध्नाति' इत्यादिना मनसोऽसाधारणधर्मकथनमेवौपपादुकसाधनं भवति, मनोव्यतिरेकेणैतदुच्यमानधर्माणामसिद्धेः। नित्यमात्मानं स्पृशतीति स्पृक्, शरीरमातिवाहिकशरीरं; तेन स्पृक्शरीरेण कारणभूतेन जीवमात्मरूपमभिसम्बध्नाति भोगायतनशरीरेणेत्यर्थः। आतिवाहिकशरीरसद्भावश्च "भूतैश्चतुर्भिः सहितः सुसूक्ष्मैर्मनोजवो देहमुपैति देहात्" (शा.अ.२) इत्यनेन प्रतिपादितः।किंवा, जीवम् आत्मानं, स्पृक्शरीरेणेति स्पर्शवता शरीरेण, यन्मनोऽभिसम्बध्नाति तदुपपादुकमस्तीति योजना। एवं मन्यते— यदि मनोऽत्रात्मनः शरीरसम्बन्धेन स्वीक्रियते तदा व्यापकत्वादात्मनः सर्वत्रैवोपलब्ध्या भवितव्यं, न च भवति; तस्माद्यत्रैव स्पर्शवति शरीरे मनः प्रतिबद्धं भवति तत्रैवायं सुखाद्युपलभते। स्पृगितिविशेषणेन शरीरस्य मूत्रनखकेशादौ मनोगमनाभावादात्मनोऽनुपलब्धिं दर्शयति। अपगमनपुरस्कृते इति देहान्तरगमनाभिमुखे। भक्तिः इच्छा। यस्माद्धीन इति मनसा त्यक्तः। येनेति यथाभूतेन सात्त्विकेन राजसेन तामसेन वा मनसा भूयिष्ठमित्यभिप्रायः। द्वितीयायामाजाताविति द्वितीयजन्मनि; पूर्वजन्मनि यादृशं मनस्तादृशमेव जन्मान्तरे प्रायो भवतीत्यर्थः। केचित्तु, 'तेन न द्वितीयायां' इत्यादि पठन्ति। तत्रापि प्रायो द्वितीये जन्मनि तुल्येन मनसा योगो न भवति, कदाचित्तु भवतीत्यर्थः। यदुक्तं 'नास्य किञ्चित् पौर्वदेहिकमविदितं स्यात्' इति, तत् पौर्वदेहिकं ज्ञानं क्वचिद्भवतीति दर्शयन्नाह— यदा त्वित्यादि। शुद्धेनेति विशुद्धसत्त्वगुणेन। तस्यैवेति वक्ष्यमाणेन यस्येत्यनेन सम्बध्यते। योनियन्त्रपीडायां हि उद्भूतेन तमसा विप्लुतं मनो नातिक्रान्तजन्मगतं स्मरति; यस्तूद्भूतसत्त्वस्तमसा नाभिभूयते स स्मरत्येवातिक्रान्तजन्मानुभूतमिति भावः। पुरस्कृत्येति कारणत्वेनावधार्य। अयं च मनोधर्मसमूह इन्द्रियोपक्रमणीयोक्तोऽपि पुनरिह प्रकरणवशादुच्यमानो न पुनरुक्तदोषमावहति। यद्यपि सत्त्वस्य

गर्भजनकत्वं साक्षान्नोक्तं, तथाऽपि सत्त्वस्य यदुपपादुकत्वं गर्भं प्रति तेनैव सत्त्वस्य गर्भजनकत्वं प्रतिज्ञातं मन्तव्यम्। तेन 'यानि खल्वस्य गर्भस्य सत्त्वजानि' इत्यादिना गर्भे सत्त्वजभावकथनमुपपन्नमेव। गर्भकारणस्यापि च सत्त्वस्योपपादुकभाषया कारणत्वं यदुक्तं तद्देहाद्देहान्तरगमनरूपमनोधर्मस्य गर्भकारणत्वातिरिक्तस्य प्रतिपादनार्थम्। नानाविधानीति नानाविधसात्त्विकराजसतामसवृत्तिभिन्नानि। तान्येकपुरुषे भवन्तीत्यनेनैक एव पुरुषः कदाचिद्धर्मक्रियायां सात्त्विको भवति, कदाचित् कामचिन्तायां राजसः, कदाचिन्मोहे तमोमय इति दर्शयति। न भवन्त्येककालमिति एकदैव सात्त्विकादयो धर्मा न भवन्ति, किन्तु पर्यायेण भवन्ति। ननु यद्येकपुरुष एव सर्वे सात्त्विकादयो भवन्ति, तत् कथम् 'अयं सात्त्विकः' इत्यादिव्यपदेशो भवतीत्याह — एकं त्वित्यादि। प्रायोवृत्त्येति भूयिष्ठा यस्य सात्त्विकवृत्तयो भवन्ति स सात्त्विकः, यस्य भूयिष्ठं राजस्यो वृत्तयो भवन्ति स राजस उच्यते इत्यादि। एतदेव पूर्वमुक्तं— "यद्गुणं चाभीक्ष्णं पुरुषमनुवर्तते सत्त्वं, तत्सत्त्वमेवोपदिशन्ति बाहुल्यानुशयात्" (सू.अ.८) इति॥ १३॥

एवमयं नानाविधानामेषां गर्भकराणां भावानां समुदायादभिनिर्वर्तते गर्भः; यथा— कूटागारं नानाद्रव्यसमुदायात्, यथा वा— रथो नानारथाङ्गसमुदायात्; तस्मादेतदवोचाम— मातृजश्चायं गर्भः, पितृजश्च, आत्मजश्च, सात्म्यजश्च, रसजश्च, अस्ति च सत्त्वमौपपादुकमिति (होवाच भगवानात्रेयः)॥ १४॥

एवं मात्रादिकारणव्युत्पादनेन गर्भस्य समुदायप्रभवतां व्युत्पादितां दृष्टान्तेन द्रढयन्नाह— एवमयमित्यादि। कूटागारं वर्तुलाकारं गृहं जेन्ताकस्वेदप्रतिपादितम्; अन्ये तु वस्त्रादिकृतं सञ्चारिगृहं कूटागारमाहुः। अत्र च प्रकरणे यद्यपि मात्रादीनां सर्वेषां समुदितानामेव गर्भं प्रति कारणत्वं, तथाऽपि मातापित्रात्मसत्त्वानि विहाय सात्म्यरसयोरेव कारणत्वव्युत्पादने यत् 'समुदायोऽप्यत्र कारणम्' इत्युक्तं तत्रैवं मन्यते— अत्र यथा मात्रादयश्चत्वारोऽवश्यं गर्भं प्रति कारणभूता न तथा सात्म्यं रसो वा;

येन शुक्रशोणितसत्त्वात्मसंसर्गादेव गर्भो भवति, नावश्यं गर्भमेलके सात्म्यरसयोरपेक्षा; गर्भमेलकोत्तरकालं सात्म्यरसाभ्यां गर्भस्य हि पुष्ट्यादयो जन्यन्ते, तेन सात्म्ये रसे चावश्यं समुदायापेक्षां दर्शयता तत्रैव 'समुदायोऽप्यत्र कारणम्' इत्युक्तं, मात्रादयस्तु परस्परसमुदायमपेक्षमाणा अपि नावश्यं सात्म्यरससमुदायमादिगर्भमेलकेऽपेक्षन्त इति कृत्वा पुनस्तत्र समुदायापेक्षित्वं नोक्तम्। समुदायादेषां भावानामित्यनेन ग्रन्थेन यत् परस्परसमुदायापेक्षित्वं मात्रादीनां चतुर्णां, तदुक्तमेव। यदपि गर्भं प्रत्यविशेषेण सात्म्यरसयोरपि कारणत्वं, 'सात्म्यजश्चायं, रसजश्चायं' इत्यनेनोक्तं, तद्गर्भमेलकोत्तरकालं कारणत्वेन, तथा मातापित्रोरपि विशुद्धशुक्रशोणितोत्पादहेतुतया पारम्पर्येण कारणत्वादिति ज्ञेयम्॥१४॥

भरद्वाज उवाच— यद्ययमेषां नानाविधानां गर्भकराणां भावानां समुदायादभिनिर्वर्तते गर्भः कथमयं सन्धीयते, यदि चापि सन्धीयते कस्मात् समुदायप्रभवः सन् गर्भो मनुष्यविग्रहेण जायते, मनुष्यश्च मनुष्यप्रभव उच्यते; तत्र चेदिष्टमेतद्यस्मान्मनुष्यो मनुष्यप्रभवस्तस्मादेव मनुष्यविग्रहेण जायते, यथा— गौर्गोप्रभवः, यथा— चाश्वोऽश्वप्रभव इति; एवं सति यदुक्तमग्रे समुदयात्मक इति तदयुक्तम्। यदि च मनुष्यो मनुष्यप्रभवः, कस्माज्जडान्धकुब्जमूकवामनमिम्मिनव्यङ्गोन्मत्तकुष्ठिकिलासिभ्यो जाताः पितृसदृशरूपा न भवन्ति। अथात्रापि बुद्धिरेवं स्यात्— स्वेनैवायमात्मा चक्षुषा रूपाणि वेत्ति, श्रोत्रेण शब्दान्, घ्राणेन गन्धान्, रसनेन रसान्, स्पर्शनेन स्पर्शान्, बुद्ध्या बोद्धव्यमित्यनेन हेतुना न जडादिभ्यो जाताः पितृसदृशा भवन्ति। अत्रापि प्रतिज्ञाहानिदोषः स्यात्, एवमुक्ते ह्यात्मा सत्स्विन्द्रियेषु ज्ञः स्यादसत्स्वज्ञः; यत्र चैतदुभयं सम्भवति ज्ञत्वमज्ञत्वं च, सविकारश्चात्मा। यदि च दर्शनादिभिरात्मा विषयान् वेत्ति, निरिन्द्रियो दर्शनादिविरहादज्ञः स्यात्, अज्ञत्वादकारणम्, अकारणत्वाच्च नात्मेति वाग्वस्तुमात्रमेतद्वचनमनर्थं स्यादिति (होवाच भरद्वाजः)॥१५॥

पुनर्भरद्वाजः पृच्छति— यद्ययमित्यादि। कथं सन्धीयत इति कया परिपाठ्या मिलतीत्यर्थः। मनुष्यविग्रहेण जायत इति मनुष्यजातौ कस्मान्मनुष्यविग्रहेणैव जायत इत्यर्थः। समुदायात्मक इति यदुक्तं तदयुक्तमिति अत्र मात्राद्यतिरिक्तजातेः कारणत्वकथनेन तथा जातेरेव मनुष्यादिरूपाया बलवत्कारणत्वेन यथोक्तमात्रादिसमुदायप्रभवत्वं न युक्तमिति भावः। दूषणान्तरमाह— यदि चेत्यादि। जडो जडबुद्धिः, मिन्मिनः सानुनासिकाव्यक्तस्वरः। पितृसदृशरूपा इत्यत्र पितृशब्देन मातापितरौ ग्राह्यौ। कारणसदृशरूपत्वेन चेन्मनुष्या भवन्ति तदा जडादिरूपकारणजाता अपि कारणसदृशत्वेन जडादिरूपाः स्युरिति भावः। अत्र जडादिबहूदाहरणकरणं पक्षस्य बहूदाहरणसिद्धत्वेन दृढत्वप्रतिपादनार्थम्। कृतपूर्वपक्षे समाधानमाशङ्कते— अथात्रेत्यादि। स्वेनैवेति आत्मकर्मोपार्जितेनैव। तेन, इन्द्रियाणि यस्मादात्मजान्युक्तानि न तु मातापितृरूपमनुष्यजन्यानि, ततश्च पित्रोरिन्द्रियं प्रत्यकारणत्वेन न तदिन्द्रियसदृशानीन्द्रियाण्यस्य भवन्तीति भावः। स्वेनैवेति श्रोत्रादिभिरभिसम्बध्यते। जडादिभिर्जाता इत्यत्र आदिशब्दः प्रकारवाची, तेन कुब्जकुष्ठ्यादीनां ग्रहणम्। कुब्जत्वकुष्ठाद्याधारभूतं हि शरीरं नात्मजं, किन्तु मातापितृजमेव; ततश्च कुब्जादिजातस्य कुब्जत्वादिप्रसङ्गेनैवापकृतत्वं तदवस्थमेव। आशङ्कितं समाधानं दूषयति— अत्रापीत्यादि। प्रतिज्ञादोषः स्यादिति "अत्मा ज्ञः" (शा.अ.१) इत्यादिना आत्मनो ज्ञत्वप्रतिज्ञायाः, तथा "निर्विकारः परस्त्वात्मा" (सू.अ.१) इत्यादिना कृताया निर्विकारत्वप्रतिज्ञाया दोषः स्यादिति भावः। असतस्वज्ञ इत्यनेन कदाचिदज्ञत्वात् प्रतिज्ञातं ज्ञत्वं व्याहतम्, इन्द्रियाधीनत्वेन ज्ञत्वमात्मनः पराधीनं सन्न वास्तवं स्यादिति भावः। यत्रेत्यादिना सविकारत्वं साधयति। ज्ञत्वपरित्यागेनाज्ञत्वे प्रकृतेरन्यथाभूतत्वेन विकारो भवतीति भावः। सविकार इति 'विकारवान्' इत्यर्थो मतुब्लोपाज्ज्ञेयः। आत्मन इन्द्रियाधीनत्वेन ज्ञत्वे दूषणान्तरमाह— यदि चेत्यादि। अज्ञत्वादकारणमिति अज्ञत्वात् ज्ञानपूर्वकशरीरप्रेरणादौ न कारणं स्यादित्यर्थः। अकारणत्वाच्च नात्मेति शरीरप्रेरणादौ बुद्धिनिष्पाद्येऽकारणत्वादचेतनपञ्चभूतातिरिक्तश्चेतनाभिध आत्मशब्दवाच्य इत्यर्थः।वाग्वस्तुमात्रमिति अर्थरहितशब्दमात्रमेतद्— यदुच्यते— आत्मा स्वेन चक्षुषा रूपं पश्यतीत्यादि॥१५॥

आत्रेय उवाच— पुरस्तादेतत् प्रतिज्ञातं— सत्त्वं जीवं स्पृक्शरीरेणाभिसम्बध्नातीति। यस्मात्तु समुदायप्रभवः सन् स गर्भो मनुष्यविग्रहेण जायते, मनुष्यो मनुष्यप्रभव इत्युच्यते, तद्वक्ष्यामः— भूतानां चतुर्विधा योनिर्भवति— जराय्वण्डस्वेदोद्भिदः। तासां खलु चतसृणामपि योनीनामेकैका योनिरपरिसङ्ख्येयभेदा भवति, भूतानामाकृतिविशेषापरिसङ्ख्येयत्वात्। तत्र जरायुजानामण्डजानां च प्राणिनामेते गर्भकरा भावा यां यां योनिमापद्यन्ते, तस्यां तस्यां योनौ तथा तथा रूपा भवन्ति; यथा— कनकरजतताम्रत्रपुसीसकान्यासिच्यमानानि तेषु तेषु मधूच्छिष्टविग्रहेषु, तानि यदा मनुष्यबिम्बमापद्यन्ते तदा मनुष्यविग्रहेण जायन्ते, तस्मात् समुदायप्रभावः सन् गर्भो मनुष्यविग्रहेण जायते; मनुष्यश्च मनुष्यप्रभव उच्यते, तद्योनित्वात्॥ १६॥

आत्रेयः समादधाति— पुरस्तादित्यादि।— एतच्च 'कथमयं सन्धीयते' इत्यस्योत्तरम्। सत्त्वं शुक्रार्तवसन्धानकारणमित्यर्थः। भूतानामिति प्राणिनाम्। योनिः जातिः, यदाऽपि योनिशब्दः कारणवचनस्तदाऽपि जरायुजादिरूपयोनिजाता अपि जरायुजादय एवोच्यन्ते, कार्ये कारणोपचारात्। आकृतिः संस्थानं, तस्या विशेषाः परस्परविसदृशाकृतय एव नर-करि-तुरगादि-रूपाः। सम्भवे योनिभेदं दर्शयित्वा यथा योन्यनुकारो भवति तदाह— तत्रेत्यादि। गर्भकारा भावाः शुक्रादयः। मधूच्छिष्टविग्रहेष्विति सिक्थकेन मृत्तिकायां निर्मितसञ्चकरूपविग्रहेषु। मनुष्यबिम्बमिति मनुष्याकारं सिक्थककृतं सञ्चकम्। कनकादिबहुद्रव्योदाहरणं यथा कनकादीनां बहूनामपि मनुष्यसञ्चकसिक्थकस्थानां मनुष्याकृतिजनकत्वं, तथा शुक्रादीनामपि बहूनां मनुष्ययोनिपतितानां मनुष्यविग्रहकर्तृत्वमिति साधर्म्योदाहरणार्थम्। समुदायात्मकः सन्निति यद्यपि समुदायजन्यस्तथाऽपि योनिरूपकारणमहिम्ना स्वयोनिसदृश एव भवति नान्ययोनिसदृशः; न च कारणधर्मः पर्यनुयोगमर्हति। तेन, शुक्रादिसमुदायोऽपि कारणं भवति, मातापितरौ विशेषेण गर्भस्य सजातीयत्वे कारणं भवत इति न काचित् क्षतिः। तद्योनित्वादिति विशेषेण मनुष्यस्य कारणत्वात्॥ १६॥

यच्चोक्तं— यदि च मनुष्यो मनुष्यप्रभवः, कस्मान्न जडादिभ्यो जाताः पितृसदृशरूपा भवन्तीति; तत्रोच्यते— यस्य यस्य ह्यङ्गावयवस्य बीजे बीज भाग उपतप्तो भवति, तस्य तस्याङ्गावयवस्य विकृतिरुपजायते, नोपजायते चानुपतापात्; तस्मादुभयोपपत्तिरप्यत्र। सर्वस्य चात्मजानीन्द्रियाणि, तेषां भावाभावहेतुर्दैवं; तस्मान्नैकान्ततो जडादिभ्यो जाताः पितृसदृशरूपा भवन्ति॥१७॥

बीज इति शुक्रशोणिते। बीजस्याङ्गप्रत्यङ्गनिर्वर्तको भागो बीजभागः। उभयोपपत्तिरप्यत्रेति पितृसदृशरूपा भवन्ति न भवन्ति चेत्यर्थः। आत्मजानीति आत्मप्रतिबद्धकर्मजानि। भावाभावहेतुर्दैवमिति इन्द्रियभावे इन्द्रियजनकं शुभम्, इन्द्रियाभावे चाशुभं दैवं हेतुरित्यर्थः। उपसंहरति— तस्मादित्यादि। एवं मन्यते— मनुष्यबीजं हि प्रत्यङ्गबीजभागसमुदायात्मकं स्वसदृशप्रत्यङ्गसमुदायरूपपुरुषजनकम्, इन्द्रियाणि च भोगसाधनानि आत्मप्रतिबद्धकर्माधीनानि; तेन पिता यदि कुष्ठ्यपि भवति, बीजं चादुष्टं भवति कुष्ठाधारत्वगादिजनकं, ततो निष्कुष्ठान्येव त्वगादीन्यनुपतप्तत्वगादिबीजात् सदृशानि जायन्ते; यदा त्वतिवृद्धकुष्ठतया पित्रोर्बीजमपि कुष्ठजनकदोषेण दुष्टं भवति, तदा दुष्टत्वगादिबीजभागात् कुष्ठदुष्टैव त्वग् जायते। यदुक्तं— "दम्पत्योः कुष्ठबाहुल्याद्दुष्टशोणितशुक्रयोः। यदपत्यं तयोर्जातं ज्ञेयं तदपि कुष्ठितम्" (सु.नि.अ.५) इति। एवं कुष्ठिनोऽपि यदि हेतुबलाद् बीजे कुष्ठजनको दोषो भवति, तदा कुष्ठिनोऽपि कुष्ठवदपत्यं भवति। अन्धत्वादाविन्द्रियोपघातरूपे दुर्दैवमेव कारणं; तच्चान्धापत्येऽप्यवश्यमस्ति; तेन यदाऽन्धेऽपत्ये दृष्ट्युपघातकमशुभं भवति, तदा काकतालीयन्यायादन्धजातोऽप्यन्धो दृश्यते। एवं कुब्जादौ जडादौ च व्याख्येयम्॥१७॥

न चात्मा सत्स्विन्द्रियेषु ज्ञः, असत्सु वा भवत्यज्ञः; न ह्यसत्त्वः कदाचिदात्मा, सत्त्वविशेषाच्चोपलभ्यते ज्ञानविशेष इति॥१८॥

या चाज्ञत्वप्रसक्तिरात्मन्युक्ता, तत्राह— न चेत्यादि। इन्द्रियभावे तथेन्द्रियाभावेऽपि नित्यं ज्ञानवानेवात्मा इति प्रतिज्ञार्थः। न ह्यसत्त्वः कदाचिदित्यत्र हिशब्दो हेतौ; तेन यस्मात् सर्वदा

समनस्क एवात्मा, तेन बाह्येन्द्रियाभावेऽप्यन्तःकरणमनोयोगान्नित्यमात्मा मनःकरणको ज्ञानवानेवायमित्यर्थः। यत्त्वेतद्बाह्यविषयगतं ज्ञानं, तत् सत्त्वस्येन्द्रियाधिष्ठानविशेषाद्भवति; तेन, इन्द्रियभावे इन्द्रियजन्यं विशिष्टं ज्ञानं भवति; यत्तु केवलमनोजन्यमात्मज्ञानं, तद् भवत्येव सर्वदा; तस्माद्यन्नित्यभावि मनोसन्निधिमात्रजन्यमात्मज्ञानं, तत् सदैवास्ति॥ १८॥

भवन्ति चात्र—

न कर्तुरिन्द्रियाभावात् कार्यज्ञानं प्रवर्तते।

या क्रिया वर्तते भावैः सा विना तैर्न वर्तते॥ १९॥

जानन्नपि मृदोऽभावात् कुम्भकृन्न प्रवर्तते।

न चास्य ज्ञानजननशक्तिः पराहता भवतीत्याशयेनाह— नेत्यादि। यत्वैतदैन्द्रियकं विषयोपभोगवत्तद्भवति कदाचित्, कदाचिच्चेन्द्रियाभावान्न भवतीत्यध्यात्मविदो मन्यन्ते; किञ्च बाह्यज्ञानेऽपि ज्ञानजननशक्त एवायमात्मा, परं करणाभावात् कदाचिन्न प्रवर्तते। कार्यज्ञानमिति कार्यप्रवृत्तिजनकबाह्यविषयज्ञानं; तेन निर्विषयं ज्ञानमात्मन इन्द्रियाभावे भवतीति सूचयति। भावैरित्यत्र 'यैः' इति शेषः। वर्तते उत्पद्यते। अत्रैव दृष्टान्तमाह— जानन्नपीत्यादि। जानन्नपीति घटं कर्तुं जानन्नपीत्यर्थः। मृदो मृत्तिकाया अभावात्॥ १९॥—

श्रूयतां चेदमध्यात्ममात्मज्ञानबलं महत्॥ २०॥

इन्द्रियाणि च सङ्क्षिप्य मनः सङ्क्षिप्य चञ्चलम्॥

प्रविश्याध्यात्ममात्मज्ञः स्वे ज्ञाने पर्यवस्थितः॥ २१॥

सर्वत्रावहितज्ञानः सर्वभावान् परीक्षते।

आत्मनो ज्ञत्वे साधनान्तरमाह— श्रूयतामित्यादि। आत्मानमधि अध्यात्मम्। आत्मनो ज्ञानस्य बलमात्मज्ञानबलम्। संक्षिप्येति विषयेभ्यो व्यावर्त्य। मनः संक्षिप्येति मनोऽप्यात्मव्यतिरिक्तविषयान्निगृह्य। चञ्चलमिति स्वभावतः। स्वे ज्ञाने इति आत्मज्ञाने। सर्वभावान् परीक्षत इति विनाऽपीन्द्रियैः समाधिबलादेव यस्मात् सर्वज्ञो भवति, तस्माज्ज्ञस्वभाव एव निरिन्द्रियोऽप्यात्मा॥२०-२१॥—

गृह्णीष्व चे(वे)दमपरं भरद्वाज विनिर्णयम्॥२२॥

निवृत्तेन्द्रियवाक्चेष्टः सुप्तः स्वप्नगतो यदा।

विषयान् सुखदुःखे च वेत्ति नाज्ञोऽप्यतः स्मृतः॥२३॥

नात्मज्ञानादृते चैकं ज्ञानं किञ्चित् प्रवर्तते।

न ह्येको वर्तते भावो वर्तते नाप्यहेतुकः॥२४॥

अपरमपि लौकिकं निरिन्द्रियस्य ज्ञानसद्भावोदाहरणमाह— गृह्णीष्वेत्यादि। स्वप्नगत इति स्वप्नदर्शनावस्थां प्राप्तः। आत्मज्ञानविषयज्ञानयोर्विशेषमाह— नात्मेत्यादि। आत्मज्ञानान्नित्याद्विना, किञ्चिज्ज्ञानं विषयजम्, एकम् सहायं, न प्रवर्तते इन्द्रियादिकरणरूपसहायं विना नोत्पद्यते। आत्मज्ञानं च नित्यमेव साङ्ख्येऽप्युक्तं— "चिच्छक्तिरपरिणामिनी" इत्यादिना "आत्मनः" इत्यन्तेन। अत्रोपपत्तिमाह— न ह्येको वर्तते भाव इति। भावः उत्पत्तिधर्मा, एकः सन् कारणरहितः सन्, न वर्तते नोत्पद्यते। तथा भावः कारणजन्यत्वे सत्यपि अहेतुक इति अकर्तृको न वर्तते नोत्पद्यते, किन्तु कर्तृकुम्भकाराधिष्ठितान्येव मृच्चक्रादीनि प्रवर्तन्ते; तस्माद्विषयज्ञानान्यपि इन्द्रियमनोर्थैस्तथा कर्त्रा चात्मना जन्यन्त इति भावः॥२२-२४॥

तस्माज्ज्ञः प्रकृतिश्चात्माद्रष्टाकारणमेव च।

सर्वमेतद्भरद्वाज निर्णीतं जहि संशयम्॥२५॥

उपसंहरति— तस्मादित्यादि। अत्र चात्मनो ज्ञत्वाज्ञत्वप्रसक्त्याऽऽपादितं सविकारत्वमात्मनो नित्यज्ञानसाधनेनैव परिहृतमिति कृत्वा न पृथक् परिहृतम्। भरद्वाजशब्देनेह नात्रेयगुरुरुच्यते, किन्तु अन्य एव भरद्वाजगोत्रः कश्चित्; तेन, तस्य संशयच्चेदनमात्रेयेणोपपन्नमेव॥२५॥

तत्र श्लोकौ—

हेतुर्गर्भस्य निर्वृत्तौ वृद्धौ जन्मनि चैव यः।

पुनर्वसुमतिर्या च भरद्वाजमतिश्च या॥२६॥

प्रतिज्ञाप्रतिषेधश्च विशदश्चात्मनिर्णयः।

गर्भावक्रान्तिमुद्दिश्य खुड्डीकां तत्प्रकाशितम्॥२७॥

सङ्ग्रहे हेतुशब्दो गर्भादिषु जन्मान्तेषु सम्बध्यते। प्रतिज्ञाप्रतिषेधो भरद्वाजकृतो ज्ञेयः। तत्साधनं च यदात्रेयस्य तत् 'विशदश्चात्मनिर्णयः' इत्यनेनोक्तम्। तदिति सामान्येन मात्रादिप्रत्यवमर्शान्नपुंसकम्॥२६-२७॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते शारीरस्थाने खुड्डीकागर्भावक्रान्तिशारीरं नाम तृतीयोऽध्यायः॥३॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां शारीरस्थाने खुड्डीकागर्भावक्रान्तिशारीरं नाम तृतीयोऽध्यायः॥३॥

चतुर्थोऽध्यायः।

अथातो महतीं गर्भावक्रान्तिं शारीरं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

खुड्डीकागर्भावक्रान्तिप्रपञ्चत्वान्महत्या गर्भावक्रान्तेरनन्तरमभिधानम्॥१-२॥

यतश्च गर्भः सम्भवति, यस्मिंश्च गर्भसञ्ज्ञा, यद्विकारश्च गर्भः, यया चानुपूर्व्याऽभिनिर्वर्तते कुक्षौ, यश्चास्य वृद्धिहेतुः, यतश्चास्याजन्म भवति, यतश्च जायमानः कुक्षौ विनाशं प्राप्नोति, यतश्च कात्स्न्र्येनाविनश्यन् विकृतिमापद्यते, तदनुव्याख्यास्यामः॥३॥

यत इति यतः कारणात्। यद्विकार इति यन्मय इत्यर्थः।ययाऽऽनुपूर्व्या येनानुक्रमेणेत्यर्थः। कात्स्न्र्येनाविनश्यन्निति मरणमगच्छन्॥३॥

मातृतः पितृत आत्मतः सात्म्यतो रसतः सत्त्वत इत्येतेभ्यो भावेभ्यः समुदितेभ्यो गर्भः सम्भवति। तस्य ये येऽवयवा यतो यतः सम्भवतः सम्भवन्ति तान् विभज्य मातृजादीनवयवान् पृथक् पृथगुक्तमग्रे॥४॥

ये ये भावा मातृजपितृजप्रभृतयस्त्वग्लोहितादयः, यतो यतो मात्रादेः सम्भवन्ति, तान् मातृजादीनवयवान् पृथग्विभज्य, अग्रे पूर्वाध्याये; तेनात्र मातृजादयो नोक्ता इति वाक्यार्थः फलति। अयं चार्थो यद्यपि पूर्वाध्याय एवोक्तो "मातृजश्चायं" (शा.अ.३) इत्यादिना, तथाऽपि

प्रश्नक्रमविशुद्ध्यनुरोधात् पुनरिह कृतः; येन प्रथमं कारणं, तदनु कार्यरूपो गर्भः, तदनु गर्भधर्मोऽभिधेय इति क्रमेण प्रश्नः शोभते॥४॥

शुक्रशोणितजीवसंयोगे तु खलु कुक्षिगते गर्भसञ्ज्ञा भवति॥५॥

यत्तु "शुक्रशोणितसंसर्गमन्तर्गर्भाशयगतं" इत्यादिना, "गर्भोऽभिनिर्वर्तते" (शा.अ.३) इत्यन्तेनोक्तं, तत्रायमसौ गर्भशब्दाभिधेयोऽर्थ इति नाभिहितम्, अपेक्षते च; तेनेह गर्भसञ्ज्ञाभिधेयार्थव्याकरणमपुनरुक्तमेव। कुक्षिगते इति कुक्ष्येकदेशगतगर्भाशयगते। संयोगे इति सम्यग्योगे; तेन जीवस्यातिवाहिकशरीरेण योगः सङ्गृह्यते, न चात्मनोव्यापकत्वेन यो योगो गर्भजनकः। एवम्भूतश्च संयोगो यद्यपि कुक्षावेव भवति, तथाऽपि सिद्धमेवार्थं शिष्यं प्रतिपादयितुं "कुक्षिगते" इति पदं कृतम्॥५॥

गर्भस्तु खल्वन्तरिक्षवाय्वग्नितोयभूमिविकारश्चेतनाधिष्ठानभूतः। एवमनया युक्त्या पञ्चमहाभूतविकारसमुदायात्मको गर्भश्चेतनाधिष्ठानभूतः; स ह्यस्य षष्ठो धातुरुक्तः॥६॥

गर्भस्त्वित्यादि। गर्भारम्भकाण्यपि भूम्यादीनि परित्यज्यान्तरिक्षमादौ कृतं, वक्ष्यमाणभूतग्रहणानुरोधात्। वक्ष्यति हि— 'अन्तरिक्षं पूर्वमन्येभ्यो गुणेभ्य उपादत्ते' इत्यादि। चेतनाधिष्ठानभूत इति आत्मनो भोगायतनस्वरूप इत्यर्थः, चेतनाशब्देन ह्यात्मोच्यते; किंवा, भूतशब्दः सादृश्ये; तेनाधिष्ठानमिवात्मनः शरीरं, न तु परमार्थतो निराश्रयस्यात्मनो भोगायतनत्वव्यतिरेकेण शरीरमाश्रयो भवति। अनया युक्त्येति अनया भूतविकाररूपया योजनया पञ्चमहाभूतविकारसमुदायात्मको भवति, अन्यया युक्त्या कतिधापुरुषीयोक्तश्चतुर्विंशतिको भवति, तथा मातृजादिरूपचिन्तया मात्रादिसमुदायात्मको भवतीत्यर्थः। न चैतेषां पक्षाणां विरोधोऽस्ति; यतो

मातृजादिव्यपदेशोऽपि पञ्चमहाभूतविकारत्वमविरुद्धमेव, येन मातृजादयोऽप्यस्य महाभूतविकारा एव; उक्तं हि— "रसात्ममातापितृसम्भवानि भूतानि विद्याद्दश षट् च देहे" (शा.अ.२) इति; चतुर्विंशतिकत्वेऽपि च पञ्चमहाभूतात्मकरूपतैव तत्र प्रपञ्चिता। स हीत्यादि। अस्येति गर्भस्य॥६॥

यया चानुपूर्व्याऽभिनिर्वर्तते कुक्षौ तां व्याख्यास्यामः— गते पुराणे रजसि नवे चावस्थिते शुद्धस्नातां स्त्रियमव्यापन्नयोनिशोणितगर्भाशयामृतुमतीमाचक्ष्महे। तया सह तथाभूतया यदा पुमानव्यापन्नबीजो मिश्रीभावं गच्छति, तदा तस्य हर्षोदीरितः परः शरीरधात्वात्मा शुक्रभूतोऽङ्गादङ्गात् सम्भवति। स तथा हर्षभूतेनात्मनोदीरितश्चाधिष्ठितश्च बीजरूपो धातुः पुरुषशरीरादभिनिष्पत्त्योचितेन पथा गर्भाशयमनुप्रविश्यार्तवेनाभिसंसर्गमेति॥७॥

गत इति निवृत्ते। पुराण इति ऋतुकालातिक्रमसञ्चिते। नवे चावस्थित इतिवचनेन नवेऽप्यनवस्थिते गर्भकारणत्वं नास्तीति दर्शयति। शुद्धस्नातामित्यनेन शुद्धस्नातैव स्त्री गम्या नास्नाता, अशुद्धत्वादिति दर्शयति। स्त्यायत्यस्यां गर्भ इति स्त्री; अनेन वन्ध्यां निरस्यति। ऋतुमतीमित्यत्र प्रशंसायां मतुप्। तया सहेति तया स्त्रिया। तथाभूतयेति तादृगृतुयुक्तया। हर्षः प्रीतिविशेषः, तेनोदीरितः प्रेरितः। पर इति सारः; किंवा परकालोत्पन्नः परः, शुक्रं हि सर्वधातुभ्यः परमुत्पद्यते। शरीरधात्वात्मेति शरीरधातुरूपः। शुक्रभूत इति शुक्ररूप एवाङ्गादङ्गात् सम्भवति व्यज्यते। तेन नाङ्गेभ्यः शुक्रमुत्पद्यते, किन्तु शुक्ररूपतयैव स्थितं व्यज्यते। वचनं हि— "सर्वत्रानुगतं देहे शुक्रं" (चि.अ.२पा.४) इति। इर्षभूतेनेति हर्षमयतां गतेन; उदीरितश्चाधिष्ठितश्चेत्यनेन उदीरणकाले तथा निःसरणकाले हर्षमयात्माधिष्ठानं शुक्रस्य गर्भाशयप्राप्तिकारणं दर्शयति; यदि शुक्रप्रवृत्तिकाले पुरुषो हर्षरहितः स्यान्न तदा सम्यक् शुक्रप्रवृत्तिः, तथा वेगविघातान्न गर्भाशयप्राप्तिर्भवति। बीजरूपो धातुः शुक्रम्। अभिसंसर्गं सम्यङ्मूर्च्छनम्॥७॥

तत्र पूर्वं चेतनाधातुः सत्त्वकरणो गुणग्रहणाय प्रवर्तते; स हि हेतुः कारणं निमित्तमक्षरं कर्ता मन्ता वेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यो गुणी ग्रहणं प्रधानमव्यक्तं जीवो ज्ञः पुद्गलश्चेतनावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति। स गुणोपादानकालेऽन्तरिक्षं पूर्वतरमाकाशं सृजति, ततः क्रमेण व्यक्ततरगुणान् धातून् वाय्वादिकांश्चतुरः; तथा देहग्रहणेऽपि प्रवर्तमानः पूर्वतरमाकाशमेवोपादत्ते, ततः क्रमेण व्यक्ततरगुणान् धातून् वाय्वादिकांश्चतुरः। सर्वमपि तु खल्वेतद्गुणोपादानमणुना कालेन भवति॥८॥

सत्त्वं मनः करणं यस्य स सत्त्वकरणः; आत्मा निष्क्रियत्वेन क्रियावता मनसा यत् कार्यं करोति, तच्च कार्यं मनसा क्रियमाणमप्यचेतनेन चेतनावत आत्मन एवोच्यते। वचनं हि— "चेतनावान् यतश्चात्मा ततः कर्ता निरुच्यते" (शा.अ.१) इति। गुणग्रहणायेत्यत्र गुणशब्देन गुणगुणिनोरभेदोपचाराद्गुणवन्ति भूतान्युच्यन्ते। किंवा, गुणोऽप्रधानं, प्रधानं चात्मा, तद्व्यतिरिक्तानि च भूतानि गुणाः। कस्मादात्मा भूतानि गृह्णात्यप्रधानरूपाणीत्याशङ्कायामात्मनः प्राधान्यख्यापकान् पर्यायानाह— स हीत्यादि। न क्षरतीत्यक्षरम्। गुणी भूतरूपगुणवानित्यर्थः। गृह्णाति भूतानीति ग्रहणम्। एतैः पर्यायैरात्मनोऽभिधेयस्येतरपदार्थोपकार्यत्वेनाश्रयत्वं प्रसिद्धं दर्श्यते। पूर्वतरं प्रथममेव। अन्येभ्यो गुणेभ्य इति वाय्वादिभ्यः। अत्र गर्भे भूतग्रहणक्रमे दृष्टान्तमाह— यथेत्यादि। प्रलयस्य महाप्रलयस्य, अत्यये इति आदिसर्गे इत्यर्थः। सिसृक्षुरिति स्रष्टुमिच्छुः। भूतानि आकाशादीनि। सत्त्वोपादान इति मनःकरणः। महाप्रलये हि विकारस्य प्रकृतौ लयात् प्रकृतिपुरुषावेव परमव्यक्तरूपौ तिष्ठतः, ततश्च सर्गारम्भे प्रकृतेर्महदादिप्रपञ्च उत्पद्यते क्रमेण; तत्र प्रथममाकाशमुत्पद्यते, ततो वाय्वादीनि व्यक्तानीति साङ्ख्यसिद्धान्तः। आकाशस्य च जन्यत्वं साङ्ख्यमतेनैव ज्ञेयम्। देहग्रहणेऽपीति गर्भस्वरूपग्रहणेऽपि। उपादत्त इति शुक्रशोणितगतमाकाशमाकाशमयतया स्वीकरोति। व्यक्ततरगुणानिति आकाशमेकगुणमपेक्ष्य शब्दस्पर्शगुणोवायुर्व्यक्तरः, तमपेक्ष्य शब्दस्पर्शरूपगुण तेजो

व्यक्ततरमित्यादि। अयं च भूतग्रहणक्रम आगमसिद्ध एव, नात्र युक्तिस्तथाविधा हृदयङ्गमाऽस्ति। एतच्च भूतग्रहणं लघुनैव कालेन भवतीति दर्शयन्नाह— सर्वमित्यादि॥८॥

स सर्वगुणवान् गर्भत्वमापन्नः प्रथमे मासि सम्मूर्च्छितः सर्वधातुकलुषीकृतः खेटभूतो भवत्यव्यक्तविग्रहः सदसद्भूताङ्गावयवः॥९॥

द्वितीये मासि घनः सम्पद्यते पिण्डः पेश्यर्बुदं वा। तत्र घनः पुरुषः, पेशी स्त्री, अर्बुदं नपुंसकम्॥१०॥

सर्वधातुकलुषीकृत इति अव्यक्तसर्वधातुतया कलुषीकृतः। धातुशब्देन च भूतान्युच्यन्ते, किंवा रसादिधातुबीजानि। खेटः श्लेष्मा; तेन खेटभूत इति श्लेष्मसदृश इत्यर्थः। अव्यक्तविग्रह इत्यस्य विवरणं— सदसद्भूताङ्गावयव इति; विद्यमानाविद्यमानाङ्गप्रत्यङ्ग इत्यर्थः; अङ्गानां च बीजरूपतया स्थितत्वेन सत्त्वम्, अव्यक्तभावाच्चासत्त्वम्। किंवा, सदसद्भूताङ्गावयवो घनः सम्पद्यते इति योजना। घनः कठिनः। पिण्डो ग्रन्थ्याकारः। पेशी दीर्घा मांसपेश्याकारा। अर्बुदं वर्तुलोन्नतम्॥९-१०॥

तृतीये मासि सर्वेन्द्रियाणि सर्वाङ्गावयवाश्च यौगपद्येनाभिनिर्वर्तन्ते॥११॥

अङ्गानि शिरःप्रभृतीनि, तदवयवाश्चेत्यङ्गावयवाः। यौगपद्येनेति वचनेन "कुमारस्य शिरः पूर्वमभिनिर्वर्तते" (शा.अ.६) इत्यादिवक्ष्यमाणान्येकीयमतानि निषेधयति। यौगपद्येन हि सर्वाङ्गनिर्वृत्तिरिति सिद्धान्तः॥११॥

तत्रास्य केचिदङ्गावयवा मातृजादीनवयवान् विभज्य पूर्वमुक्ता यथावत्। महाभूतविकारप्रविभागेन त्विदानीमस्य तांश्चैवाङ्गावयवान् कांश्चित् पर्यायान्तरेणापरांश्चानुव्याख्यास्यामः। मातृजादयोऽप्यस्य

महाभूतविकारा एव। तत्रास्याकाशात्मकं शब्दः श्रोत्रं लाघवं सौक्ष्म्यं विवेकश्च, वाय्वात्मकं स्पर्शः स्पर्शनं रौक्ष्यं प्रेरणं धातुव्यूहनं चेष्टाश्च शारीर्यः, अग्न्यात्मकं रूपं दर्शनं प्रकाशः पक्तिरौष्ण्यं च, अबात्मकं रसो रसनं शैत्यं मार्दवं स्नेहः क्लेदश्च, पृथिव्यात्मकं गन्धो घ्राणं गौरवं स्थैर्यं मूर्तिश्चेति॥ १२॥

केचिदिति न सर्वे। तत्र मातृजाद्यङ्गकथनेन शब्दादयो य इह भूतविकारत्वेन वक्ष्यन्ते ते न सर्वे प्रोक्ताः, किं तु केचिदेव त्वगादयः। पर्यायान्तरेणेतिवचनाद्ये मातृजादयः 'त्वक् च लोहितं च' (शा.अ.३) इत्यादिनोक्तास्त इह न साक्षाद्वक्तव्याः, किन्तु ये त्वग्गता मूर्तिस्नेहमार्दवादयस्ते भूतजन्यत्वेनोच्यमानास्त्वचोऽभिधायका भवन्ति। एवं शोणितादिगतभूतविकारकथनेन शोणितादिकथनं ज्ञेयम्। त्वगादयो वक्ष्यमाणा इति भूतविकारसमुदायरूपा एव। त्वगादीनां मातृजादिरूपेण यदभिधानं, तन्मात्राद्यधीनत्वप्रतिपत्त्यर्थम्। पुनश्चेह भूतजन्यत्वेनाभिधानमङ्गानां क्षये वा वृद्धौ वा सत्यां तत्कारणभूतभूतोपयोगप्रतिषेधाभ्यां वृद्धिक्षयजननज्ञानार्थम्। यदङ्गं यद्भूतप्रभवं तदङ्गं तद्भूतप्रधानेन द्रव्येण वर्धते, क्षीयते च तद्विपरीतेन। लाघवं यद्यपि वायौ पठन्ति— "रूक्षः शीतो लघुश्चैव" (सू.अ.१) इत्यादिना, तथाऽपि आकाशेऽतिशयितं ज्ञेयं, तेनेहाकाशविकारे पठन्ति; आकाशं हि अत्यर्थसूक्ष्मत्वाद्वातादपि लघु। विवेको विच्छेदः। धातुव्यूहनं धातुरचना धातुवहनं च। दृश्यतेऽनेनेति दर्शनं चक्षुरिन्द्रियम्। मूर्तिः काठिन्यम्॥ १२॥

एवमयं लोकसम्मितः पुरुषः। यावन्तो हि लोके मूर्तिमन्तो भावविशेषास्तावन्तः पुरुषे, यावन्तः पुरुषे तावन्तो लोके इति; बुधास्त्वेवं द्रष्टुमिच्छन्ति॥ १३॥

एतद्भूतविकारमयत्वं शरीरस्य लोकसाम्येन ज्ञातं सन्मोक्षस्यापि परमाभीष्टस्य कारणं भवतीति लोकसाम्यं दर्शयन्नाह— एवमयमित्यादि। एवमिति पञ्चभूतविकारमयत्वेन। लोकसम्मिति इति

लोकतुल्यः। इह च भूतविकारमयत्वं यच्छरीरस्योक्तं तेन भूतविकारमयत्वमधिकृत्य सादृश्यमुक्तं लोकपुरुषयोः; यत्त्वाध्यात्मिकं लोकपुरुषयोः साम्यं पुरुषविचये वक्तव्यं, तदपीहानुक्तमपि 'यावन्तो हि' इत्यादिविशेषाभिधानेन सूचितं ज्ञेयम्। तेन, यावन्तो भावविशेषा आध्यात्मिका अन्तरात्मसत्त्वाहङ्कारादयो, भौतिका वा मूर्तिक्लेदादयः, ते पुरुषगता लोकेनापि समाना इति ज्ञेयम्। एतच्च लोकपुरुषयोः साम्यं पुरुषविचये व्यक्तं भविष्यति। एतच्च लोकपुरुषयोः साम्यकथनं मुमुक्षूणामेवोपयुक्तमिति दर्शयन्नाह— बुधास्त्वेवमित्यादि। बुधाः सम्यग्ज्ञानवन्तः, मोक्षयुक्ता इति यावत्। लोकपुरुषसाम्यकथनं च मोक्षार्थमेवेति पुरुषविचये स्वयमेव वक्ष्यति॥१३॥

एवमस्येन्द्रियाण्यङ्गावयवाश्च यौगपद्येनाभिनिर्वर्तन्तेऽन्यत्र तेभ्यो भावेभ्यो येऽस्य जातस्योत्तरकालं जायन्ते; तद्यथा— दन्ता व्यञ्जनानि व्यक्तीभावस्तथायुक्तानि चापराणि। एषा प्रकृतिः, विकृतिः पुनरतोऽन्यथा। सन्ति खल्वस्मिन् गर्भे केचिन्नित्या भावाः, सन्ति चानित्याः केचित्। तस्य य एवाङ्गावयवाः सन्तिष्ठन्ते, त एव स्त्रीलिङ्गं पुरुषलिङ्गं नपुंसकलिङ्गं वा बिभ्रति। तत्र स्त्रीपुरुषयोर्ये वैशेषिका भावाः प्रधानसंश्रया गुणसंश्रयाश्च, तेषां यतो भूयस्त्वं ततोऽन्यतरभावः। तद्यथा— क्लैब्यं भीरुत्वमवैशारद्यं मोहोऽनवस्थानमधोगुरुत्वमसहनं शैथिल्यं मार्दवं गर्भाशयबीजभागस्तथायुक्तानि चापराणि स्त्रीकराणि, अतो विपरीतानि पुरुषकराणि, उभयभागावयवा नपुंसककराणि भवन्ति॥१४॥

प्रकृतां तृतीयमासभवामिन्द्रियाद्यङ्गाभिनिर्वृत्तिमुपसंहरति— एवमस्येत्यादि। युगपदेव यौगपद्यं; यौगपद्यमित्यभिधानमिन्द्रियाणामपि सर्वाङ्गाभिनिर्वृत्तेः समकालतोपदर्शनार्थम्। किं दन्तादयोऽपि तृतीयमासे भवन्तीत्याशङ्क्याह— अन्यत्रेत्यादि। व्यञ्जनानि श्मश्रुस्तनादीनि। व्यक्तीभावः शुक्ररजसोराविर्भावः। तथायुक्तानीति जातोत्तरकालजत्वेन दन्तादिसदृशानि चाङ्गानि बुद्ध्यादीनि। एषा प्रकृतिरिति इन्द्रियाण्यङ्गावयवाश्च युगपद्भवन्ति, दन्तादयश्च जातस्यापि चिरेण भवन्तीत्येवंरूपो मनुष्यस्वभाव इत्यर्थः। अन्यथेति कदाचित् सदन्त एव जायत इत्यादिका विकृतिर्मनुष्यस्य। अथ

कस्माद्दन्तादयो गर्भादिजायमाना विकृतित्वेनोच्यन्त इत्याह— सन्तीत्यादि। खलुशब्दो हेतौ। नित्या इति यावच्छरीरभाविनः करचरणादयः, अनित्याश्च न यावच्छरीरभाविनो दन्तादयः। एतेन, अनित्यस्वभावानां दन्तादीनां गर्भाद्यजायमानत्वान्नित्यत्वं विकृतिरिति युक्तमित्यर्थः। अथ नित्यानित्येषु मध्ये के स्त्र्यादिलिङ्गं बिभ्रतीत्याह— तस्येत्यादि। सन्तिष्ठन्त इति यावच्छरीरं तिष्ठन्ति। एतेन, य एव नित्या उपस्थादयस्त एव स्त्रीलिङ्गतां पुंलिङ्गतां वा बिभ्रति। तत्रोपस्थरूपो नित्यो भावः स्त्रीलिङ्गं, शेफश्च पुंलिङ्गम्, उपस्थलिङ्गाकारविरहितं च रन्ध्रमात्रं नपुंसकलिङ्गं भवति। किंवा, स्त्रिया यल्लिङ्गं स्तनादि, पुरुषस्य वा श्मश्रुप्रभृति, नपुंसकस्य वा स्त्रीपुंसमानाकाररूपं जातोत्तरकालभावि, तदपि य एव नित्या भावा उरःकपोलप्रभृतयस्त एव कालवशाद्बिभ्रतीति वाक्यार्थः। उर एव हि स्तनारम्भकबीजयुक्तं स्त्रिया उत्तरकालं स्तनवद्भवति, एवं कपोल एव श्मश्रुबीजयुक्तः श्मश्रुवान् भवति। न चावश्यं यत् स्तनश्मश्रुप्रभृतीनां बीजं चेदस्ति शरीरे, तत् किमिति गर्भात् प्रभृति स्तनादि न जायत इति; यतो बीजमहिमाऽयं— यत् स्वकाल एव कार्यं करोति। यथा— अवनिपतितमपि शाल्यादिबीजमृतुप्राप्तावेवाङ्कुरं जनयति; न च स्वभाव उपालम्भमर्हति। 'यदैवाङ्गावयवयवाः सन्तिष्ठन्ते, तदैव स्त्र्यादिलिङ्गं बिभ्रति' इत्यादिपाठपक्षे तु व्यक्त एवार्थः। अथ कुतः समाने शुक्रादौ कारणे स्त्र्यादिविशेषो भवतीत्याह— वैशेषिका इति। वैशेषिका विशिष्टाः परस्परव्यावृत्ता इति यावत्। प्रधानसंश्रया इति आत्मसंश्रयाः। गुणसंश्रया इति शुक्रशोणितगतभूतसंश्रयाः; गुणशब्देनेह भूतान्युच्यन्ते। यत इति सप्तम्यां तसिः; तेन यस्मिन् वैशेषिके भावे भूयस्त्वं दैववशाद्भवति, ततो भावादन्यतरस्य स्त्रीरूपस्य पुंरूपस्य वा गर्भस्योत्पत्तिर्भवति; यदि स्त्रीकरा भावा क्लैब्यादयो भूयांसो भवन्ति तदा स्त्री जायते, विपर्यये पुमानित्यर्थः। तत्र स्त्रीकरान् भावानाह— तद्यथेत्यादि। अवैशारद्यं मोहः। शैथिल्यम् अनिबिडसंयोगता, यथा— दृढशणतन्तुविरलवापितपटस्य शैथिल्यं; मार्दवं तु निबिडसंयोगस्यापि सहजावयवमार्दवं, यथा— पट्टसूत्रे निरन्तरवापितपटस्य सहजावयवमार्दवं,

यथा— पट्टसूत्रे निरन्तरवापितपटस्य मृदुत्वम्। क्लैब्याद्यनवस्थानपर्यन्तं प्रधानसंश्रयं, शेषं गुणसंश्रयम्। तथायुक्तानीत्यनेन योनिबीजभागादीनि ग्राहयति। एते चाधोगुरुत्वादयो रजोधिक एव बीजे भवन्तीति ज्ञेयम्। तेन, "रक्तेन कन्यामधिकेन" (शा.अ.२) इति यदुक्तं तदनेन समं न विरुद्धं भवति। विपरीतानि अक्लैब्यादीनीत्यर्थः। उभयभागावयवा इति स्त्रीपुरुषकारका अवयवाः। नपुंसककराणीति नपुंसकनिर्देशोऽव्यक्तगुणाभिप्रायेण। तेन प्रथमं नपुंसककराणीति अव्यक्तगुणसन्दोहाभिप्रायेण प्रयुक्तं, ततः कानि तानीत्यपेक्षायां विशेषपरिग्रहादुभयभागावयवा इति पुंलिङ्गेन निर्देशो ज्ञेयः॥।१४॥

तस्य यत्कालमेवेन्द्रियाणि सन्तिष्ठन्ते, तत्कालमेव चेतसि वेदना निर्बन्धं प्राप्नोति; तस्मात्तदा प्रभृति गर्भः स्पन्दते, प्रार्थयते च जन्मान्तरानुभूतं यत् किञ्चित्, तद्दैहृदय्यमाचक्षते वृद्धाः। मातृजं चास्य हृदयं मातृहृदयेनाभिसम्बद्धं भवति रसवाहिनीभिः संवाहिनीभिः; तस्मात्तयोस्ताभिर्भक्तिः संस्पन्दते। तच्चैव कारणमवेक्षमाणा न द्वैहृदय्यस्य विमानितं गर्भमिच्छन्ति कर्तुम्। विमानने ह्यस्य दृश्यते विनाशो विकृतिर्वा। समानयोगक्षेमा हि तदा भवति गर्भेण केषुचिदर्थेषु माता। तस्मात् प्रियहिताभ्यां गर्भिणीं विशेषेणोपचरन्ति कुशलाः॥१५॥

सन्तिष्ठन्त इति अभिनिर्वर्तन्ते। वेदना सुखदुःखोपलब्धिः। निर्बन्धं प्राप्नोतीति सम्बन्धं प्राप्नोति, इन्द्रियोत्पादसमकालमेव सुखदुःखज्ञो भवतीति वाक्यार्थः। तस्मादिति सुखदुःखसम्बन्धात्; सुखोत्पादनार्थं दुःखपरिहारार्थं च स्पन्दते चलति, तथा प्रार्थयते च सुखहेतून् जन्मान्तरानुभूतानित्यर्थः। तद्गर्भप्रार्थनायुक्तं मातृहृदयं द्वैहृदय्यमिति वृद्धा ज्ञानवृद्धा आचक्षते। द्विहृदयस्य भावद् द्वैहृदय्यं मातृहृदयं गर्भहृदयेन समं हृदयद्वयं भवति। ननु गर्भहृदयं कथं मातृहृदयेन सम्बद्धं भवतीत्याह— मातृजमिति; मातृकारणकार्तवजम्। रसवाहिनीभिरिति गर्भपोषणार्थाभिर्मातृहृदयगर्भनाभिप्रतिबद्धाभी रसवाहिनीभिः। एतेन, यद् गर्भः प्रार्थयते, तया

प्रार्थनया रसवाहिनीभिर्हृदयमागतया माताऽपि तत्प्रार्थनावती भवति एवं मातृप्रार्थनयाऽपि गर्भः प्रार्थनावान् भवति। तयोरिति मातृगर्भयोः। भक्तिः इच्छा। ताभिरिति रसवाहिनीभिः। संस्पन्दत इति मातृहृदयाद्गर्भहृदयं याति, गर्भहृदयाच्च मातृहृदयमित्यर्थः। गर्भस्य विनाशो विकृतिर्वेति महता इच्छाविघातेन विनाशः, स्वल्पेन तु विकृतिः; किंवा गर्भेच्छापूर्विका मातुरिच्छा, तद्विघातेन विनाशो गर्भस्य, सा हीच्छा विहता साक्षाद्गर्भसम्बन्धितया सुकुमारतरं गर्भं वातप्रकोपाद्विनाशयति; या तु मातुरिच्छा विहता, सा मातरि वातक्षोभं जनयती समानयोगक्षेमे गर्भेऽपि मनाग्विकृतिजननाद्विकृतिं जनयति। एतदेव दर्शयति— समानयोगक्षेमा हीत्यादि।— योगः सुखहेतुयोगः, क्षेमः प्रत्यवायपरिहारः, एतौ योगक्षेमौ मातुर्गर्भेण समानौ भवतः। केषुचिदर्थेष्वितिवचनादतुल्ययोगक्षेमता च क्वचिद्भवतीति दर्शयति। तेन, नावश्यं मातुर्विकाराः क्षुदादयोगर्भे विकृतिमावहन्ति, गर्भस्य वा मातरीति दर्शयति। गर्भिणी विशेषेणेतिवचनादगर्भिण्यपि स्त्री ऋतुकाले प्रियहितोपचरणीया। यदुक्तं — "सहचर्यश्चैनां प्रियहिताभ्यां सततमुपचरेयुः" (शा.अ.८) इत्यादि॥१५॥

तस्या गर्भापत्तेर्द्वैहृदय्यस्य च विज्ञानार्थं लिङ्गानि समासेनोपदेक्ष्यामः। उपचारसाधनं ह्यस्य ज्ञाने, ज्ञानं च लिङ्गतः, तस्मादिष्टो लिङ्गोपदेशः। तद्यथा— आर्तवादर्शनमास्यसंस्रवणमनन्नाभिलाष-श्छर्दिररोचकोऽम्लकामता च विशेषेण श्रद्धाप्रणयनमुच्चावचेषु भावेषु गुरुगात्रत्वं चक्षुषोर्ग्लानिः स्तनयोः स्तन्यमोष्ठयोः स्तनमण्डलयोश्च कार्ष्ण्यमत्यर्थं श्वयथुः पादयोरीषल्लोमराज्युद्गमो योन्याश्चाटालत्वमिति गर्भे पर्यागते रूपाणि भवन्ति॥१६॥

उपचारसाधनं यथोचितोपचारकरणम्। अस्येति गृहीतस्य गर्भस्य तथा द्वैहृदय्यस्य च। तत्र गृहीतगर्भोपचारो यथा— "शङ्किता चेद्गर्भमापन्ना क्षीरमनुपस्कृतं काले काले पिबेत्" (शा.अ.८) इत्यादि द्विहृदयोपचारं चात्रैव वक्ष्यति। ज्ञानमिति गर्भस्य द्विहृदयस्य च ज्ञानम्। अम्लकामता विशेषेणेति च्छेदः। श्रद्धा इच्छा। उच्चावचेष्विति उच्चनीचेषु, भक्षणीयत्वेन कृतेषु चाकृतेषु चेत्यर्थः।

ईषत् पादयोः श्वयथुः। चाटालत्वं विवृतत्वम्। एतानि च लक्षणानि स्वरूपेण गर्भस्य भवन्ति, तृतीयमासयुक्तानि तु द्वैहृदय्यस्य च लिङ्गानि भवन्तीति ज्ञेयम्॥१६॥

सा यद्यदिच्छेत्तत्तदस्यै दद्यादन्यत्र गर्भोपघातकरेभ्यो भावेभ्यः॥१७॥

गर्भोपघातकरास्त्विमे भावा भवन्तिः; तद्यथा— सर्वमतिगुरूष्णतीक्ष्णं दारुणाश्च चेष्टाः; इमांश्चान्यानुपदिशन्ति वृद्धाः— देवतारक्षोऽनुचरपरिरक्षणार्थं न रक्तानि वासांसि बिभृयान्न मदकराणि मद्यान्यभ्यवहरेन्न यानमधिरोहेन्न मांसमश्नीयात् सर्वेन्द्रियप्रतिकूलांश्च भावान् दूरतः परिवर्जयेत्, यच्चान्यदपि किञ्चित् स्त्रियो विद्युः॥१८॥

दारुणाश्चेष्टा व्यवायादिकाः। देवतारक्षोऽनुचरेभ्यः परिरक्षणं देवतारक्षोऽनुचरपरिरक्षणम्। यदित्यादि। यच्चान्यत् स्त्रियो गर्भकालासेव्यत्वेन विद्युस्तदपि वर्जयेत्। वदन्ति हि स्त्रियः— "न गर्भिणी कूपमवलोकयेत्, न नदीपारं यायात्" इत्यादि। वृद्धस्त्रीवचनमप्यागममूलमेव, इह तु ग्रन्थविस्तरभयान्न दर्शितमिति भावः॥१७-१८॥

तीव्रायां तु खलु प्रार्थनायां काममहितमप्यस्यै हितेनोपहितं दद्यात् प्रार्थनाविनयनार्थम्। प्रार्थनासन्धारणाद्धि वायुः प्रकुपितोऽन्तःशरीरमनुचरन् गर्भस्यापद्यमानस्य विनाशं वैरूप्यं वा कुर्यात्॥१९॥

प्रार्थना ईप्सितार्थयाच्ञा, तस्यास्तु तीव्रत्वं बलवदिच्छाजन्यत्वमेव। हितोपहितमिति हितेन युक्तं, किंवा कल्पनया हितम्। प्रार्थनाया विनयनं विस्फोटनं, तदर्थम्। प्रार्थना च प्रार्थितलाभेनैवापयाति। प्रार्थनाविमानने दोषमाह— प्रार्थनेत्यादि। प्रार्थनायाः सम्यग्धारणं प्रार्थनासन्धारणम्। एतच्च स्तोकक्रमेणापि प्रार्थितादाने सति भवति, यथोक्तविधिना वा हितादाने सति इच्छा मनाक् समग्रा वा

खण्डिता भवति। इच्छाविघातश्च मनःक्षोभकरभयादिवद्वातप्रकोपको भवति। आपद्यमानस्येत्यनेन गर्भस्यातितरुणत्वेन मनागपि वातक्षोभासहत्वं दर्शयति। वैरूप्यविनाशविकल्पस्तु वातप्रकोपप्रकर्षापकर्षकृतो ज्ञेयः॥१९॥

चतुर्थे मासि स्थिरत्वमापद्यते गर्भः, तस्मात्तदा गर्भिणी गुरुगात्रत्वमधिकमापद्यते विशेषेण॥२०॥

तृतीयमासानुपूर्वीकथनप्रस्तावागतं गर्भस्य विशेषमभिधाय क्रमागतां चतुर्थमासानुपूर्वीमाह— चतुर्थ इत्यादि। स्थिरत्वमिति निबिडत्वम्। अत एव निबिडेन गुरुतरेण गर्भेणाक्रान्ता गर्भिणी गुरुगात्रा भवतीति युक्तम्॥२०॥

पञ्चमे मासि गर्भस्य मांसशोणितोपचयो भवत्यधिकमन्येभ्यो मासेभ्यः, तस्मात्तदा गर्भिणी कार्श्यमापद्यते विशेषेण॥२१॥

अधिकमन्येभ्य इत्यनेन मासान्तरेष्वपि स्तोकक्रमेण मांसादिवृद्धिं दर्शयति। येन शारीरेण भावेन गर्भ उपचीयते, तेन गर्भिणी हीयत इति युक्तमेव। यतो गर्भमांसादिपोषणेनैव क्षीण आहाररसो न मातुर्मांसादि सम्यक् पोषयति॥२१॥

षष्ठे मासि गर्भस्य बलवर्णोपचयो भवत्यधिकमन्येभ्यो मासेभ्यः, तस्मात्तदा गर्भिणी बलवर्णहानिमापद्यते विशेषेण॥२२॥

बलवर्णयोरुपचयो बलवर्णोपचयः; किंवा, उपचयोधातुपुष्टिः॥२२॥

सप्तमे मासि गर्भः सर्वैर्भावैराप्याय्यते, तस्मात्तदा गर्भिणी सर्वाकारैः क्लान्ततमा भवति॥२३॥

सर्वभावैरिति मांसशोणितादिभिः। युगपदेव सर्वैः सप्तमे गर्भ आप्याय्यते, पूर्वेषु तु मासेषु न सर्वैर्युगपदिति विशेषः। सर्वाकारैरिति सर्वमांसशोणितादिजन्यरूपैः। क्लान्ततमेति हीनतमा॥२३॥

अष्टमे मासि गर्भश्च मातृतो गर्भतश्च माता रसहारिणीभिः संवाहिनीभिर्मुहुर्मुहुरोजः परस्परत आददाते गर्भस्यासम्पूर्णत्वात्। तस्मात्तदा गर्भिणीमुहुर्महुर्मुदा युक्ता भवति मुहुर्मुहुश्च ग्लाना, तथा गर्भः; तस्मात्तदा गर्भस्य जन्म व्यापत्तिमद्भवत्योजसोऽनवस्थितत्वात्। तं चैवार्थमभिसमीक्ष्याष्टमं मासमगण्यमित्याचक्षते कुशलाः॥२४॥

अष्टम इत्यादि। रसवाहिनीभिरिति मातृहृदये गर्भनाड्यां च सम्बद्धाभी रसवाहिनीभिः। परस्परत ओज आददाते इति मातुरोजोगर्भ आदत्ते, गर्भस्य चौजो माता आदत्ते। ओजोऽनवस्थाने हेतुमाह— गर्भस्यासम्पूर्णत्वादिति। यस्माद्गर्भोऽसम्पूर्णः, तस्मादनिष्पन्नाश्रयं गर्भौजोऽनवस्थितं भवति। मातुरोजो गर्भं गच्छतीति यदुच्यते, तद्गर्भौज एव मातृसम्बद्धं सन्मात्रोज इति व्यपदिश्यते; यदि तु मातुरेव यदोजस्तद्गर्भं गच्छतीत्यर्थः स्यात्, तदा गर्भस्यासम्पूर्णत्वादिति हेतुः सम्पूर्णमातृदेहस्थितस्यौजसो गमनेऽसङ्गतः स्यात्; तथा, यथा गर्भौजसो मातर्यवस्थानसमये जन्म गर्भमरणकरं भवति, तथा मातुरोजसो गर्भावस्थाने सति यद्गर्भजन्म, तत्र मातुरपि मरणं स्यात्; न चैतदिष्टं, येनोभयथाऽपि गर्भस्यैवात्र मरणमुच्यते न मातुः, 'तदा गर्भस्य जन्म व्यापत्तिमद्भवति' इतिवचनेन। **जतूकर्णे**ऽप्यष्टमे जन्म गर्भविनाशायैव दर्शितम्। यदुक्तं— "स्त्रीगर्भावन्योन्यस्य ओज आददातेऽष्टमे, तस्मात्तदा प्रसूतिर्गर्भविनाशायैव" इति। अन्ये तु वर्णयन्ति— यत— "सत्यपि मातुरोजसो गर्भगमने जन्मादृष्टवशादेव गर्भस्यैव मरणाय भवति, न मातुः" इति। **सुश्रुतव्याख्यातार**स्तु— "अष्टममासे नैर्ऋतभागत्वाच्च गर्भस्य सत्यप्योजोऽनवस्थाने तुल्ये गर्भस्यैव नाशो न मातुः" इति वर्णयन्ति। गर्भिणी मुहुर्मुहुर्मुदा युक्ता भवतीति गर्भौजोयोगाद्धर्षयुक्ता भवति,

ओजोविगमनात्तु मुहुर्मुहुर्ग्लाना भवतीति योज्यम्। तथा गर्भ इति गर्भिणीवद्गर्भोऽपि मुहुर्मुहुर्मुदायुयुक्तो भवति, मुहुर्मुहुर्ग्लानो भवति। तस्मादिति पूर्वोक्तं गर्भव्यापत्तिहेतुं साक्षाद्ब्रूते। ओजसोऽनवस्थिततत्वादिति एतच्च व्याकृतमेव। अष्टममासस्य विशेषान्तरमाह— तं चैवेत्यादि। तं चैवार्थमिति गर्भव्यापत्तिरूपमर्थम्। अगण्यमिति न गणनया गर्भिण्यां प्रतिपादनीयम्। यदि हि गर्भिणी गण्यमानमष्टमं मासं गर्भजन्मव्यापत्तिकरं श्रृणुयात् ततो भीता स्यात्, तद्भयाच्च गर्भस्य वातक्षोभाद् व्यापत् स्यादिति भावः॥२४॥

तस्मिन्नेकदिवसातिक्रान्तेऽपि नवमं मासमुपादाय प्रसवकालमित्याहुरादशमान्मासात्। एतावान् प्रसवकालः, वैकारिकमतः परं कुक्षाववस्थानं गर्भस्य॥२५॥

तस्मिन्निति अष्टमे मासि। आदशमादिति वचनं प्रशस्ततरप्रसवकालाभिप्रायेण। **सुश्रुते** द्वादशमासपर्यन्तं सम्यक्प्रसवकालाभिधानं स्तोकदोषयोरेकादशद्वादशमासयोरल्पदोषत्वेनादोषपक्ष एव निक्षेपाद् बोद्धव्यम्॥२५॥

एवमनयाऽऽनुपूर्व्याऽभिनिर्वर्तते कुक्षौ॥२६॥

दत्तमुत्तरमुपसंहरति— एवमित्यादि॥२६॥

मात्रादीनां खलु गर्भकराणां भावानां सम्पदस्तथा वृत्तस्य सौष्ठवान्मातृतश्चैवोपस्नेहोपस्वेदाभ्यां कालपरिणामात् स्वभावसंसिद्धेश्च कुक्षौ वृद्धिं प्राप्नोति॥२७॥

'यश्चास्य वृद्धिहेतुः' इति प्रश्नस्योत्तरं— मात्रादीनामित्यादि। आदिग्रहणात् पित्रात्मसात्म्यरससत्त्वानि "मातृजश्चयं" (शा.अ.४) इत्यादिग्रन्थोक्तानि गृह्यन्ते। वृत्तस्य मातुराचाररूपस्य सौष्ठवं सुष्ठुत्वं

वृत्तसौष्ठवम्। मातृत इति पदं वृत्तसौष्ठवेन तथा उपस्नेहोपस्वेदाभ्यां च सम्बध्यते। रससात्म्यसौष्ठवं तु मात्रादिसम्पदा लब्धमेव। उपस्नेहो धातुनिष्यन्दसम्बन्धः, उपस्वेदः शरीरस्योष्मणा परं गर्भस्य स्वेदनम्; उपस्वेदश्च गर्भवृद्धिकरो भवत्येव, यथा— अण्डजानां पक्षतेरुपस्वेदनं वृद्धिकरं दृष्टम्। कालपरिणामादिति यथा यथा कालप्रकर्षस्तथा तथा वर्धते गर्भः। वृद्धिहेत्वन्तरमाह— स्वभावसंसिद्धेश्चेति। स्वभावेनैव कर्मजन्येन गर्भो भवति वर्धिष्णुरित्यर्थः। कर्मणा हि भोगलक्षणशरीरनिर्वर्तकेनारभ्यमाणं गर्भशरीरं वर्धिष्णुस्वभावमेवारब्धं, तेन वर्धत एव॥२७॥

मात्रादीनामेव तु खलु गर्भकराणां भावानां व्यापत्तिनिमित्तमस्याजन्म भवति॥२८॥

'कुतश्चास्याजन्म भवति' इत्यस्योत्तरं— मात्रेत्यादि। व्यापत्तिनिमित्तमिति व्यापत्तिकारणकं; तत्र मातुर्व्यापच्छोणितगर्भाशयादिदुष्टिः, पितुर्व्यापच्छुक्रदुष्टिरित्याद्यनुसरणीयम्॥२८॥

ये ह्यस्य कुक्षौ वृद्धिहेतुसमाख्याता भावास्तेषां विपर्ययादुदरे विनाशमापद्यते, अथवाऽप्यचिरजातः स्यात्॥२९॥

'यतश्च जायमानः' इत्यादिप्रश्नस्योत्तरं— ये ह्यस्येत्यादि। वृद्धिहेतुसमाख्याता भावाः "मात्रादीनां तु खलु गर्भकराणां भावानां सम्पदः" इत्यादिग्रन्थोक्ताः। अथवाऽप्यचिरजात इति यदा मात्रादीनां सर्वथा दोषवत्त्वेन विपर्ययो भवति, तदा विनाशमापद्यते गर्भः; यदा त्वल्पदोषवत्तया मनाग्विपर्ययो भवति, तदा अचिरजातो विपद्यत इति ज्ञेयम्॥२९॥

यतस्तु कार्त्स्न्येनाविनश्यन् विकृतिमापद्यते, तदनुव्याख्यास्यामः— यदा स्त्रिया दोषप्रकोपणोक्तान्यासेवमानाया दोषाः प्रकुपिताः शरीरमुपसर्पन्तः शोणितगर्भाशयावुपपद्यन्ते, न च

कात्स्न्र्येन शोणितगर्भाशयौ दूषयन्ति, तदेयं गर्भं लभते स्त्री; तदा तस्य गर्भस्य मातृजानामवयवानामन्यतमोऽवयवो विकृतिमापद्यत एकोऽथवाऽनेके, यस्य यस्य ह्यवयवस्य बीजे बीजभागे वा दोषाः प्रकोपमापद्यन्ते, तं तमवयवं विकृतिराविशति। यदा ह्यस्याः शोणिते गर्भाशयबीजभागः प्रदोषमापद्यते, तदा वन्ध्यां जनयति; यदा पुनरस्याः शोणिते गर्भाशयबीजभागावयवः प्रदोषमापद्यते, तदा पूतिप्रजां जनयति; यदा त्वस्याः शोणिते गर्भाशयबीजभागावयवः स्त्रीकराणां च शरीरबीजभागानामेकदेशः प्रदोषमापद्यते, तदा स्त्र्याकृतिभूयिष्ठामस्त्रियं वार्तां नाम जनयति, तां स्त्रीव्यापदमाचक्षते॥३०॥

अवशिष्टप्रश्नस्योत्तरं दर्शयितुमाह— यतस्त्वित्यादि। अत्राविनश्यन्नित्यत्र विनाशेन विकृतिरभिप्रेता, विकृतावपि विनाशशब्दो दृष्टः; यथा— असच्छीलत्वेन विकृते पुरुषे 'विनष्टोऽयम्' इति व्यपदेशः; एवं च सत्येकदेशेनापि विकृतौ विनाशशब्ददर्शने कात्स्न्र्येनेति विशेषणं युक्तं भवति। दोषप्रकोपणेनैव दोषप्रकोपणसेवायां लब्धायां पुनर्दोषप्रकोपणोक्तान्यासेवमानाया इति पदं दोषाणां स्वहेतुसेवया बलवन्तं प्रकोपं दर्शयितुं, परहेतुसेवयाऽपि हि स्तोकमात्रया अनुबन्धरूपदोषप्रकोपो भवति; यथा— अम्लेन पित्तं जन्यमानं श्लेष्मानुगतं जन्यते। 'नतु कात्स्न्र्येन दूषयन्ति' इति वचनेन कात्स्न्र्येन दुष्टौ गर्भजन्मैव न भवतीति दर्शयति। मातृजानामिति त्वग्लोहितादीनाम्। अन्यतम इति जातावेकवचनम्। तत्रैकोऽप्यवयवोऽन्यतमः, तथा अनेकेऽवयवा अन्यतमशब्देन प्रोक्ताः। अत एव 'एकोऽथवाऽनेके' इत्यन्यतमविवरणमुपपन्नं भवति। अन्यथा त्वन्यतमपदेनैकस्यैवावयवस्य गृहीतत्वात् 'अनेके' इति विवरणमसङ्गतं स्यात्। कुतः पुनरेकस्यानेकस्य वा विकृतिर्भवतीत्याह— यस्येत्यादि। बीज इति कृत्स्न एवारम्भके बीजे। बीजभागे वेत्यवयवबीजस्यैकदेशे। एतां विकृतिमेव शृङ्गग्राहिकतया वक्तुमाह— यदेत्यादि। शोणित इति आर्तवे। गर्भाशयजनको बीजभागो गर्भाशयबीजभागः; किंवा गर्भाशयस्य तथा बीजस्य चार्तवरूपस्य जनको भागः। गर्भाशयार्तवे च मातृजावयवमध्ये पतिते शोणितजन्ये एव; तेन, आर्तवेतरबीजभागस्य दुष्टिरुपपन्ना। आर्तवं च यद्यपि

द्वादशवर्षादूर्ध्वं व्यज्यते, तथाऽपि आर्तवोत्पत्तिर्गर्भकाल एव भवति। येन सतामेवार्तवदन्तश्मश्रुप्रभृतीनां काले व्यक्तिर्भवति; तेन, आर्तवारम्भकस्यापि बीजस्य गर्भकाले प्रदोष उपपन्नः। प्रदोष इत्यत्र प्रशब्देन दुष्टिप्रकर्षं प्रकृष्टवन्ध्यतारूपकार्यजनकं दर्शयति। गर्भाशयस्य तथाऽऽर्तवस्य चोपघातेन स्त्रिया वन्ध्यत्वं व्यक्तमेव। गर्भाशयबीजभागावयव इत्यत्रापि पूर्ववद्व्याख्येयम्। अवयवशब्देन गर्भाशयस्यार्तवस्य चैकदेश इहोच्यते। पूतिप्रजामिति म्रियमाणापत्याम्; अन्ये तु क्लिन्नाङ्गप्रत्यङ्गां पूतिमाहुः। स्त्रीकराणां शरीरबीजभागानामिति स्त्रीत्वव्यञ्जकस्तनोपस्थलोमराज्यादिजनकबीजभागानाम्। अस्त्रियमिति असम्पूर्णस्त्रीलक्षणाम्। वार्ता नामेति वार्तासञ्ज्ञा शास्त्रसमयकृता। स्त्रीव्यापदिति स्त्रीनिमित्ताऽऽर्तवदोषकृता व्यापत्। एवं तां पुरुषव्यापदमाचक्षते इत्यत्रापि पुरुषव्यापद्व्याख्येया॥३०॥

एवमेव पुरुषस्य यदा बीजे बीजभागः प्रदोषमापद्यते, तदा वन्ध्यं जनयति; यदा पुनरस्य बीजे बीजभागावयवः प्रदोषमापद्यते, तदा पूतिप्रजं जनयति; यदा त्वस्य बीजे बीजभागावयवः पुरुषकराणां च शरीरबीजभागानामेकदेशः प्रदोषमापद्यते, तदा पुरुषाकृतिभूयिष्ठमपुरुषं तृणपुत्रिकं नाम जनयति; तां पुरुषव्यापदमाचक्षते॥३१॥

बीजे इति शुक्रे। शुक्ररूपबीजजनको भागो बीजभागः। तदा वन्ध्यमित्यनेन पुरुषवन्ध्यं ब्रूते, इहापि प्रदोषव्याख्या पूतिप्रजाव्याख्या च पूर्ववत्। अपुरुषमिति असमस्तपुरुषलक्षणयुक्तम्। तृणपुत्रिकसञ्ज्ञाऽपि शास्त्रसमयसिद्धैव। वार्तातृणपुत्रिकयोर्व्यवायेच्छा परं भवति, नतु व्यवायसामर्थ्यमिति ब्रुवते॥३१॥

एतेन मातृजानां पितृजानां चावयवानां विकृतिव्याख्यानेन सात्म्यजानां रसजानां सत्त्वजानां चावयवानां विकृतिर्व्याख्याता भवति॥३२॥

एवं मातापितृजावयवैकदेशविकृतिवत् सात्म्यरससत्त्वजावयवविकृत्यतिदेशार्थमाह— एतेनेत्यादि। सात्म्यविभ्रमात्तु सात्म्यजानामारोग्यानालस्यादीनामन्यतमेन हीयते। एवं रससत्त्वयोरप्युन्नेयम्॥ ३२॥

निर्विकारः परस्त्वात्मा सर्वभूतानां निर्विशेषः; सत्त्वशरीरयोस्तु विशेषाद्विशेषोपलब्धिः॥३३॥

आत्मजोऽप्ययं गर्भ उक्तः, तत् कथमिह तद्विकृत्या विकृतिर्गर्भस्य नोच्यत इत्याह— निर्विकार इत्यादि। पर इत्यनेन मनःशरीरादिसमुदायादात्मानं व्यवच्छिनत्ति। सर्वभूतानां निर्विशेष इति सर्वेषु भूतेषु वर्तमानोऽप्ययं परमात्मा तुल्य एव। यस्तु तत्र सुखदुःखादिविशेष उपलभ्यते, स शरीरविशेषस्य तथा मनोविशेषस्य च सुखदुःखादिविशेषकारणस्य विशेषादुपलभ्यते; एतदेव 'शरीरसत्त्वयोस्तु' इत्यादिनोक्तम्। सुखादयस्तु न परमात्मविकाराः, किन्तु बुद्धिधर्मा एवेति दर्शितमेव। यानि चात्मजत्वेन गर्भे "तासु तासु योनिषूत्पत्तिः" (शा.अ.३) इत्यादिना ग्रन्थेन दर्शितानि, तान्यपि परमात्मविकारा न भवन्ति, किन्तु सत्त्वरजस्तमःप्रबलतारूपविकारजमनोविकारजन्यधर्माधर्मजन्यान्येव। तेन, सूक्ष्मचिन्तायामात्मजानि यान्युक्तानि, तान्यपि सत्त्वजान्येव। ततश्चेहात्मजावयवविकारोऽपि सत्त्वजावयवविकार एव बोद्धव्य इति भावः॥३३॥

तत्र त्रयः शरीरदोषा वातपित्तश्लेष्माणः, ते शरीरं दूषयन्ति; द्वौ पुनः सत्त्वदोषौ रजस्तमश्च, तौ सत्त्वं दूषयतः। ताभ्यां च सत्त्वशरीराभ्यां दुष्टाभ्यां विकृतिरुपजायते, नोपजायते चाप्रदुष्टाभ्याम्॥३४॥

'शरीरसत्त्वयोस्तु' इत्यादिना शरीरमनसी दुःखरूपविकारेऽपि कारणमुक्ते; तत्रैव च यैर्दोषैः शरीरं, मनश्च याभ्यां दोषाभ्यां युक्तं दुःखकारणं भवति, तानाह— तत्र त्रय इत्यादि। विकृतिरुपजायत इति शारीरमानसरोगरूपा विकृतिरुपजायते॥३४॥

तत्र शरीरं योनिविशेषाच्चतुर्विधमुक्तमग्रे॥३५॥

सम्प्रति, शरीरसत्त्वयोस्तु विशेषादित्यनेन दर्शिताञ् शरीरसत्त्वविशेषानेवाह— तत्रेत्यादि। चतुर्विधमिति जरायुजाण्डजोद्भिज्जसंस्वेदजम्। अग्रे इति खुड्डिकायाम्॥३५॥

त्रिविधं खलु सत्त्वं— शुद्धं, राजसं, तामसमिति। तत्र शुद्धमदोषमाख्यातं कल्याणांशत्वात्, राजसं सदोषमाख्यातं रोषांशत्वात्, तामसमपि सदोषमाख्यातं मोहांशत्वात्। तेषां तु त्रयाणामपि सत्त्वानामेकैकस्य भेदाग्रमपरिसङ्ख्येयं तरतमयोगाच्छरीरयोनिविशेषेभ्यश्चान्योन्यानुविधानत्वाच्च। शरीरं ह्यपि सत्त्वमनुविधीयते, सत्त्वं च शरीरम्। तस्मात् कतिचित्सत्त्वभेदाननूकाभिनिर्देशेन निदर्शनार्थमनुव्याख्यास्यामः॥३६॥

कल्याणांशत्वादिति शुभरूपांशत्वात्। मनो हि कल्याणभाग-रोषभाग-मोहभागैस्त्रिभागं; तत्र रोषांशमोहांशौ सदोषौ, अधर्महेतुतया। भेदाग्रमिति भेदप्रमाणम्। तरतमयोगादिति शुचितर-शुचितममनोभेदयोगात्। शरीरविशेषा बाल-युव-स्थविरादिविशेषाः, योनिविशेषास्तु मनुष्यपश्वादिजातिविशेषाः; किंवा, शरीरस्य नरपश्वादिजातिकृता विशेषाः शरीरयोनिविशेषाः, तेभ्यः। अथ शरीरभेदात् कथं मनोभेदो भवतीत्याह— अन्योन्यानुविधानाच्च। एतदेव विभजते— शरीरं ह्यपीत्यादि। सत्त्वानुरूपं शरीरं भवति, यदि शुद्धसत्त्वं भवति तदा देवादिशरीरं भवतीत्यादि; तथा शरीरानुरूपं च सत्त्वं भवति; यथा— पशुशरीरे तामसं, मनुष्यशरीरे राजसं, देवशरीरे

सात्त्विकमित्यादि ज्ञेयम्। किंवा, अन्योन्यानुविधानादिति सत्त्वरजस्तमसां परस्परानुविधानादित्यर्थः। अस्मिन् पक्षे 'शरीरं ह्यपि सत्त्वमनुविधीयते' इत्यादिना ग्रन्थेन व्यवहितमपि शरीरानुविधानं मनसो दुर्बोधत्वाद् व्याक्रियत इति व्याख्येयम्। सत्त्वभेदानिति मनोभेदान्। अनूकाभिनिर्देशेन सादृश्यनिर्देशेन॥३६॥

तद्यथा— शुचिं सत्याभिसन्धं जितात्मानं संविभागिनं ज्ञानविज्ञानवचनप्रतिवचनसम्पन्नं स्मृतिमन्तं कामक्रोधलोभमानमोहेर्ष्याहर्षामर्षापेतं समं सर्वभूतेषु ब्राह्मं विद्यात्॥(१)॥

इज्याध्ययनव्रतहोमब्रह्मचर्यपरमतिथिव्रतमुपशान्तमदमानरागद्वेषमोहलोभरोषं प्रतिभावचनविज्ञानोपधारणशक्तिसम्पन्नमार्षं विद्यात्॥(२)॥

ऐश्वर्यवन्तमादेयवाक्यं यज्वानं शूरमोजस्विनं तेजसोपेतमक्लिष्टकर्माणं दीर्घदर्शिनं धर्मार्थकामाभिरतमैन्द्रं विद्यात्॥३॥

लेखास्थवृत्तं प्राप्तकारिणमसम्प्रहार्यमुत्थानवन्तं स्मृतिमन्तमैश्वर्यलम्भिनं व्यपगतरागेर्ष्याद्वेषमोहं याम्यं विद्यात्॥(४)॥

शूरं धीरं शुचिमशुचिद्वेषिणं यज्वानमम्भोविहाररतिमक्लिष्टकर्माणं स्थानकोपप्रसादं वारुणं विद्यात्॥(५)॥

स्थानमानोपभोगपरिवारसम्पन्नं धर्मार्थकामनित्यं शुचिं सुखविहारं व्यक्तकोपप्रसादं कौबेरं विद्यात्॥(६)॥

प्रियनृत्यगीतवादित्रोल्लापकश्लोकाख्यायिकेतिहासपुराणेषु कुशलं गन्धमाल्यानुलेपनवसनस्त्रीविहारकामनित्यमनसूयकं गान्धर्वं विद्यात्॥(७)॥

इत्येवं शुद्धस्य सत्त्वस्य सप्तविधं भेदांशं विद्यात् कल्याणांशत्वात्; तत्संयोगात्तु ब्राह्ममत्यन्तशुद्धं व्यवस्येत्॥३७॥

संविभागिनमिति सम्यक्फलविभजनशीलम्। अतिथौ यथोचितमर्घ्यादियुक्तं व्रतमाचरतीति अतिथिव्रतः। लेखा कर्तव्याकर्तव्यमर्यादा, तत्र स्थितं वृत्तं यस्य स लेखास्थवृत्तः, तम्; अलङ्घितकर्तव्याकर्तव्यमित्यर्थः। असम्प्रहार्यमिति अशक्यवारणम्। ऐश्वर्यं लभत इति ऐश्वर्यलम्भी। स्थाने उचिते कोपः प्रसादश्च यस्य स स्थानकोपप्रसादः। सुखविहारमिति सुखक्रीडनम्। उल्लापः स्तोत्रम्। विहारः क्रीडा, किंवा स्त्रीभिः समं विहरणं स्त्रीविहारः। गान्धर्वमिति गान्धर्वसत्त्वम्। एवं ब्राह्ममित्यादावपि ज्ञेयम्। एवं च ब्राह्मादिभिः सत्त्ववाचकैः पदैरेवंशब्दप्रत्यवमृष्टैः सत्त्वस्य सप्तविधभेदकथनं समानकारणादुपपन्नं भवति। शुद्धस्येति सत्त्वगुणबहुलस्य। अथ कथमेते ब्राह्मादयः शुद्धसत्त्वस्यैव भेदा इत्याह— कल्याणांशत्वादिति। तत्संयोगादिति कल्याणांशसत्त्वस्य सम्यग्योगात्॥३७॥

शूरं चण्डमसूयकमैश्वर्यवन्तमौपधिकं रौद्रमननुक्रोशमात्मपूजकमासुरं विद्यात्॥(१)॥

अमर्षिणमनुबन्धकोपं छिद्रप्रहारिणं क्रूरमाहारातिमात्ररुचिमामिषप्रियतमं स्वप्नायासबहुलमीर्ष्युं राक्षसं विद्यात्॥(२)॥

महाशनं स्त्रैणं स्त्रीरहस्कामाममशुचिं शुचिद्वेषिणं भीरुं भीषयितारं विकृतविहाराहारशीलं पैशाचं विद्यात्॥(३)॥

क्रुद्धशूरमक्रुद्धभीरुं तीक्ष्णमायासबहुलं सन्त्रस्तगोचरमाहारविहारपरं सार्पं विद्यात्॥(४)॥

आहारकाममतिदुःखशीलाचारोपचारमसूयकमसंविभागिनमतिलोलुपमकर्मशीलं प्रैतं विद्यात्॥(५)॥

अनुषक्तकाममजस्रमाहारविहारपरमनवस्थितममर्षणमसञ्चयं शाकुनं विद्यात्॥(६)॥

इत्येवं खलु राजसस्य सत्त्वस्य षड्विधं भेदांशं विद्यात्, रोषांशत्वात्॥३८॥

औपधिकमिति छद्मप्रचारिणम्। अननुक्रोशमिति निर्दयम्। स्त्रिया समं रहसि स्थातुमिच्छतीति स्त्रीरहस्कामः। क्रुद्धशूरमक्रुद्धभीरुमिति क्रोधे सति शूरं, क्रोधेऽसति भीरुम्। गोचरशब्देन गोचरे

विषये प्रचारो लक्ष्यते, तेन सन्त्रस्तगोचरमिति सन्त्रस्तविषयप्रचारम्। पिशाचाद्भिन्न एव यथोक्ताचारः प्रेतः, तेन प्रैतमपि सत्त्वं पृथगुक्तम्॥३८॥

निराकरिष्णुममेधसं जुगुप्सिताचाराहारं मैथुनपरं स्वप्नशीलं पाशवं विद्यात्॥(१)॥
भीरुमबुधमाहारलुब्धमनवस्थितमनुषक्तकामक्रोधं सरणशीलं तोयकामं मात्स्यं विद्यात्॥(२)॥
अलसं केवलमभिनिविष्टमाहारे सर्वबुद्ध्यङ्गहीनं वानस्पत्यं विद्यात्॥(३)॥
इत्येवं तामसस्य सत्त्वस्य त्रिविधं भेदांशं विद्यान्मोहांशत्वात्॥३९॥

सरणशीलमिति गमनशीलम्। बुद्ध्यङ्गानि ऊहापोहविचारस्मृत्यादीनि उक्तानि॥३९॥

इत्यपरिसङ्ख्येयभेदानां त्रयाणामपि सत्त्वानां भेदैकदेशो व्याख्यातः; शुद्धस्य सत्त्वस्य सप्तविधो ब्रह्मर्षिशक्रयमवरुणकुबेरगन्धर्वसत्त्वानुकारेण, राजसस्य षड्विधो दैत्यपिशाचराक्षससर्पप्रेतशकुनि-सत्त्वानुकारेण, तामसस्य त्रिविधः पशुमत्स्यवनस्पतिसत्त्वानुकारेण, कथं च यथासत्त्वमुपचारः स्यादिति॥४०॥

सुखस्मरणार्थं शुद्धादिभेदेन बन्धीकृत्य सत्त्वभेदानाह— शुद्धस्येत्यादि। वनस्पतिसत्त्वानुकारेणेत्यन्तो ग्रन्थो भेदैकदेशो व्याख्यात इत्यनेन संयोजनीयः, क्रियान्तराभावात्। एते च सत्त्वभेदाः प्रायेण भवन्ति मनुष्येष्विति कृत्वा एत एवोदाहरणार्थमुक्ताः; एवमनुक्ता अपि विष्णु-शङ्कर-व्याघ्रादिसत्त्वानुकारेण सत्त्वभेदा बोद्धव्या एवेति दर्शयति। कथमित्यादि कथं नाम यथासत्त्वं सर्वप्राणिमनोभिर्मनुष्याणामुपचारः स्यादित्येतदर्थमुदाहरणरूपा अमी सत्त्वभेदा व्याख्याता इति वाक्यार्थः॥४०॥

केवलश्चायमुद्देशो यथोद्देशमभिनिर्दिष्टो भवति गर्भावक्रान्तिसम्प्रयुक्तः; तस्य चार्थस्य विज्ञाने सामर्थ्यं गर्भकराणां च भावानामनुसमाधिः, विघातश्च विघातकराणां भावानामिति॥४१॥

यथाप्रतिज्ञं व्याख्यातार्थमुपसंहरति— केवल इत्यादि। केवलः कृत्स्नः। उद्देश इति 'यतश्चायं गर्भः' इत्यादिग्रन्थकृतः। यथोद्देशमिति उद्देशक्रमानतिक्रमेण। सामर्थ्यमिति प्रयोजनम्। अनुसमाधिः अनुष्ठानम्। विघातः वर्जनम्। विघातकराणामिति गर्भविघातकराणाम्॥४१॥

तत्र श्लोकाः—

निमित्तमात्मा प्रकृतिर्वृद्धिः कुक्षौ क्रमेण च।
वृद्धिहेतुश्च गर्भस्य पञ्चार्थाः शुभसञ्ज्ञिताः॥४२॥
अजन्मनि च योहेतुर्विनाशे विकृतावपि।
इमांस्त्रीनशुभान् भावानाहुर्गर्भविघातकान्॥४३॥
शुभाशुभसमाख्यातानष्टौ भावानिमान् भिषक्।
सर्वथा वेद यः सर्वान् स राज्ञः कर्तुमर्हति॥४४॥
अवाप्त्युपायान् गर्भस्य स एवं ज्ञातुमर्हति।
ये च गर्भविघातोक्ता भावास्तांश्चाप्युदारधीः॥४५॥

अथैतेषु मध्ये के ते गर्भस्य शुभा ये गर्भेऽनुष्ठेयाः, के वा अशुभा ये वर्जनीया इत्याह— निमित्तमित्यादि। निमित्तमिति 'यतश्च गर्भः सम्भवति' इति ग्रन्थोद्दिष्टोऽर्थः। आत्मेति गर्भरूप आत्मा 'यस्मिंश्च गर्भसञ्ज्ञा' इति ग्रन्थोद्दिष्टोऽर्थः। प्रक्रियतेऽस्माद्गर्भ इति प्रकृतिः 'यद्विकारश्च गर्भः' इति ग्रन्थोद्दिष्टोऽर्थः। वृद्धिः कुक्षौ क्रमेण चेति 'ययाऽनुपूर्व्या कुक्षावभिनिर्वर्तते गर्भः' इति ग्रन्थोद्दिष्टोऽर्थः। वृद्धिहेतुरिति 'यश्चास्य वृद्धिहेतुः' इत्यादिनोद्दिष्टोऽर्थः। अजन्मनि च यो हेतुरित्यनेन 'यतश्चास्याजन्म

भवति’ इत्युद्दिष्टोऽर्थो गृह्यते। विनाशे च यो हेतुरित्यनेन ‘यतश्च जायमानः कुक्षौ विनाशं प्राप्नोति’ इत्युक्तोऽर्थो गृह्यते। विकृतावपाये हेतुरित्यनेन ‘यतश्च कार्त्स्न्येन’ इत्यादिनोक्तार्थसङ्ग्रहः। गर्भविघातत्वेनोक्ता गर्भविघातोक्ताः॥४२-४५॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते शारीरस्थाने महतीगर्भावक्रान्तिशारीरं नाम चतुर्थोऽध्यायः॥४॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां शारीरस्थाने महतीगर्भावक्रान्तिशारीरं नाम चतुर्थोऽध्यायः॥४॥

पञ्चमोऽध्यायः।

अथातः पुरुषविचयं शारीरं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

पूर्वाध्यायेऽभिहितं "यावन्तो हि लोके भावास्तावन्तः पुरुषे" (शा.अ.४) इति, तच्च न प्रपञ्चितं बहुवाच्यत्वात्; अतः प्रपञ्चाभिधानार्थं पुरुषविचयं ब्रूते। पुरुषस्य विचयनं लोकसामान्येन गणनं पुरुषविचयः, तमधिकृत्य कृतोऽध्यायः पुरुषविचयः॥१-२॥

'पुरुषोऽयं लोकसम्मितः' इत्युवाच भगवान् पुनर्वसुरात्रेयः। यावन्तो हि लोके (मूर्तिमन्तो) भावविशेषास्तावन्तः पुरुषे, यावन्तः पुरुषे तावन्तो लोके; इत्येवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच — नैतावता वाक्येनोक्तं वाक्यार्थमवगाहामहे, भगवता बुद्ध्या भूयस्तरमतोऽनुव्याख्यायमानं शुश्रूषामह इति॥३॥

तमुवाच भगवानात्रेयः— अपरिसङ्ख्येया लोकावयवविशेषाः, पुरुषावयवविशेषा अप्यपरिसङ्ख्येयाः; तेषां यथास्थूलं कतिचिद्भावान् सामान्यमभिप्रेत्योदाहरिष्यामः, तानेकमना निबोध सम्यगुपवर्ण्यमानानग्निवेश!। षड्धातवः समुदिताः 'पुरुष' इति शब्दं लभन्ते; तद्यथा— पृथिव्यापस्तेजो वायुराकाशं ब्रह्म चाव्यक्तमिति, एत एव च षड्धातवः समुदिताः 'पुरुष' इति शब्दं लभन्ते॥४॥

सम्मितः तुल्यः। लोकसम्मितत्वमेव विभजते— यावन्तो हीत्यादि। भगवता बुद्ध्याऽनुव्याख्यायमानमिति योजना। लोकस्य तरुतृणपश्वादिरूपा अवयवाः, तथा पुरुषस्य च

स्नायुकण्डराधमन्यादिरूपा अवयवा अपरिसङ्ख्येयाः; तेन, कार्त्स्न्याभिधानमशक्यम्; अतो ये ये लोकपुरुषयोः स्थूला अवयवाः, ते ते सामान्यप्रतिपादनार्थमुच्यन्त इति वाक्यार्थः। ब्रह्मणो विवरणम् — अव्यक्तमिति॥३-४॥

तस्य पुरुषस्य पृथिवी मूर्तिः, आपः क्लेदः, तेजोऽभिसन्तापः, वायुः प्राणः, वियत् सुषिराणि, ब्रह्म अन्तरात्मा। यथा खलु ब्राह्मी विभूतिर्लोके तथा पुरुषेऽप्यान्तरात्मिकी विभूतिः, ब्रह्मणो विभूतिर्लोके प्रजापतिरन्तरात्मनो विभूतिः पुरुषे सत्त्वं, यस्त्विन्द्रो लोके स पुरुषेऽहङ्कारः, आदित्यस्त्वादानं, रुद्रो रोषः, सोमः प्रसादः, वसवः सुखम्, अश्विनौ कान्तिः, मरुदुत्साहः, विश्वेदेवाः सर्वेन्द्रियाणि सर्वेन्द्रियार्थाश्च, तमो मोहः, ज्योतिर्ज्ञानं, यथा लोकस्य सर्गादिस्तथा पुरुषस्य गर्भाधानं, यथा कृतयुगमेवं बाल्यं, यथा त्रेता तथा यौवनं, यथा द्वापरस्तथा स्थाविर्यं, यथा कलिरेवमातुर्यं, यथा युगान्तस्तथा मरणमिति। एवमेतेनानुमानेनानुक्तानामपि लोकपुरुषयोरवयवविशेषाणामग्निवेश! सामान्यं विद्यादिति॥५॥

तस्येत्यादिना पुरुषे षड्धातून् दर्शयति। मूर्तिः काठिन्यम्। लोके षड्धातवो व्यक्ता एवेति न पुनर्विवेचिताः। ब्राह्मीति आत्मविशेषस्य जगत्स्रष्टुर्विभूतिः। प्रजापतिः दक्षनामा। आदानं ग्रहणम्; आदित्योऽप्याददातीत्यादानसाम्यमादित्यस्य। इह च मनःप्रभृतिषु प्राजापत्यादिरूपता आगमसिद्धैव ज्ञेया। सर्वेन्दियार्था विश्वेदेवा एव। सर्गादिरिति प्रलयानन्तरः कालः। अनुक्तानामित्यनेन मतिः बृहस्पतिः, कामः गन्धर्वः, इत्यादि सामान्यमूह्यम्॥५॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच एवमेतत् सर्वमनपवादं यथोक्तं भगवता लोकपुरुषयोः सामान्यम्। किन्त्वस्य सामान्योपदेशस्य प्रयोजनमिति॥६॥

भगवानुवाच— शृण्वग्निवेश! सर्वलोकमात्मन्यात्मानं च सर्वलोके सममनुपश्यतः सत्या बुद्धिः समुत्पद्यते। सर्वलोकं ह्यात्मनि पश्यतो भवत्यात्मैव सुखदुःखयोः कर्ता नान्य इति। कर्मात्मकत्वाच्च हेत्वादिभिर्युक्तः सर्वलोकोऽहमिति विदित्वा ज्ञानं पूर्वमुत्थाप्यतेऽपवर्गायेति। तत्र संयोगापेक्षीलोकशब्दः। षड्धातुसमुदायो हि सामान्यतः सर्वलोकः॥७॥

अनपवादमिति अबाध्यमानम्। किन्त्वस्य प्रयोजनमिति आयुर्वेदे किमप्येतत् साम्यकथने प्रयोजनमित्यर्थः। सत्या बुद्धिरुत्पद्यते इति अस्य योजनायां 'किञ्चास्याः प्रयोजनम्' इति शेषो ज्ञेयः। यथा च लोकपुरुषसाम्यं सत्यबुद्धिजनकं भवति तदाह— सर्वलोकं हीत्यादि। आत्मनि पश्यत इति आत्मनोऽभेदेन पश्यतः। आत्मशब्देन षड्धातुसमुदायात्मकः पुरुष इहोच्यते; तेन, यत्किञ्चिल्लोकगतं सुखदुःखजनकं, तदात्मरूपमेव; तेन बाह्यलोककृतमपि आत्मकृतमेव वैषयिकं नित्यदुःखानुसक्तं हेयं सुखं, तथा निसर्गहेयं दुःखं च पश्यन् रागद्वेषनिर्मुक्तः सन् सत्यज्ञानवान् भवतीति भावः। अथ सत्यज्ञानस्यापि किं प्रयोजनमित्याह— कर्मेत्यादि। लोकपुरुषसाम्यज्ञानेऽपि सत्यज्ञानस्यापवर्गानुष्ठानं प्रयोजनमिति वाक्यार्थः। अत्र कर्मात्मकत्वादिति कर्माधीनत्वात्। हेत्वादयोऽग्रे वक्ष्यमाणाः। कर्मपरवशः सन् हेत्वादिभिर्युक्तोऽयमात्मा प्रवर्तते, तत् कर्म तत्त्वज्ञानात् प्रवृत्त्युपरमे सति कारणाभावान्नोपपद्यते; उत्पन्नं च कर्म अरक्तस्य तत्त्वज्ञानेन, अदृष्टस्य चोपभोगात्, आत्यन्तिककर्मक्षयादात्यन्तिककर्मफलाभावरूपो मोक्षो भवतीति भावः। संयोगापेक्षीति षड्धातुमेलके पुरुषरूपे वर्तते इत्यर्थः। लोकशब्देनेह प्रकरणे लोकत इति कृत्वा पुरुष एवोच्यते, न जगद्रूपो लोकः। यतः, हेत्वादयो येऽत्र कर्मपरवशत्वेन लोके वक्तव्याः, ते पुरुष एव सम्भवन्ति। सर्वशब्देन सर्वप्राणिनो ग्राहयति॥६-७॥

तस्य हेतुः, उत्पत्तिः, वृद्धिः, उपप्लवः, वियोगश्च। तत्र हेतुरुत्पत्तिकारणं, उत्पत्तिर्जन्म, वृद्धिराप्यायनम्, उपप्लवो दुःखागमः, षड्धातुविभागो वियोगः सजीवापगमः स प्राणनिरोधः स भङ्गः स

लोकस्वभावः। तस्य मूलं सर्वोपप्लवानां च प्रवृत्तिः, निवृत्तिरुपरमः। प्रवृत्तिर्दुःखं, निवृत्तिः सुखमिति यज्ज्ञानमुत्पद्यते तत् सत्यम्। तस्य हेतुः सर्वलोकसामान्यज्ञानम्। एतत्प्रयोजनं सामान्योपदेशस्येति॥८॥

हेत्वादिपञ्चकं निर्दिश्य विभजते— तस्य हेतुरित्यादि। तस्य मूलमिति तस्य जीवापगमस्य कारणम्। सर्वोपप्लवानां चेति सर्वदुःखानाम्। प्रवृत्तिः रागद्वेषमूला प्रवृत्तिः। निवृत्तिरिति अप्रवृत्तिः। उपरमशब्दस्तु तस्येत्यनेन तथा सर्वोपप्लवानां चेत्यनेन च सम्बध्यते। तेन दुःखानां मरणस्य चोपरमो निवृत्तिकृत एव; निवृत्तिजन्यत्वेन च कार्यकारणयोरभेदोपचारादुपरमोऽपि निवृत्तिशब्दस्य सामानाधिकरण्येनोच्यते। प्रवृत्तिर्दुःखमिति च तथा निवृत्तिः सुखमिति च कार्यकारणयोरभेदोपचाराद्बोद्धव्यम्। सत्यज्ञानस्वरूपमाह— इति यज्ज्ञानमित्यादि। इतीति पूर्वप्रत्यवमर्शकम्। एतस्मिन् सत्यज्ञाने लोकपुरुषसामान्यज्ञानस्य हेतुत्वं दर्शयन्नाह— तस्येत्यादि॥८॥

अथाग्निवेश उवाच— किम्मूला भगवन्! प्रवृत्तिः, निवृत्तौ च क उपाय इति॥९॥

भगवानुवाच— मोहेच्छाद्वेषकर्ममूला प्रवृत्तिः। तज्जा ह्यहङ्कारसङ्गसंशयाभिसम्प्लवाभ्यवपातविप्रत्ययाविशेषानुपायास्तरुणमिव द्रुममतिविपुलशाखा-स्तरवोऽभिभूय पुरुषमवतत्यैवोत्तिष्ठन्ते; यैरभिभूतो न सत्तामतिवर्तते। तत्रैवञ्जातिरूपवित्तवृत्तबुद्धिशीलविद्याभिजनवयोवीर्यप्रभावसम्पन्नोऽहमित्यहङ्कारः, यन्मनोवाक्कायकर्म नापवर्गाय स सङ्गः, कर्मफलमोक्षपुरुषप्रेत्यभावादयः सन्ति वा नेति संशयः, सर्वावस्थास्वनन्योऽहमहं स्रष्टा स्वभावसंसिद्धोऽहमहं शरीरेन्द्रियबुद्धिस्मृतिविशेषराशिरिति ग्रहणमभिसम्प्लवः, मम मातृपितृभ्रातृदारापत्यबन्धुमित्रभृत्यगणो गणस्य चाहमित्यभ्यवपातः, कार्याकार्यहिताहितशुभाशुभेषु विपरीताभिनिवेशो विप्रत्ययः, ज्ञाज्ञयोः

प्रकृतिविकारयोः प्रवृत्तिनिवृत्त्योश्च सामान्यदर्शनमविशेषः, प्रोक्षणानशनाग्निहोत्रत्रिषवणाभ्यु-क्षणावाहनयाजनयजनयाचनसलिलहुताशनप्रवेशादयः समारम्भाः प्रोच्यन्ते ह्यनुपायाः। एवमयमधीधृतिस्मृतिरहङ्काराभिनिविष्टः सक्तः ससंशयोऽभिसम्प्लुतबुद्धिरभ्यवपतितोऽन्यथा-दृष्टिरविशेषग्राही विमार्गगतिर्निवासवृक्षः सत्त्वशरीरदोषमूलानां सर्वदुःखानां भवति। एवमहङ्कारादिभिर्दोषैर्भ्राम्यमाणो नातिवर्तते प्रवृत्तिं, सा च मूलमघस्य॥१०॥

प्रवृत्तेः संसाररूपायाः, तथा निवृत्तेर्मोक्षरूपायाः कारणमुपायं च पृच्छति— किम्मूलेत्यादि। मोहेत्याद्युत्तरम्। मोहेच्छाद्वेषकर्ममूलेति मोहान्मिथ्याज्ञानरूपादिच्छाद्वेषौ, तयोश्च धर्माधर्मरूपं कर्म, तच्च मूलं संसारस्येत्यर्थः। कथमेते मोहादयः संसारकारणमित्याह— तज्ज्ञा हीत्यादि। अत्र चाहङ्कारादौ यथायोग्यतया मोहादीनां कारणत्वं ज्ञेयम्। अहङ्कारादयश्चाष्टावग्रे वक्ष्यमाणा ज्ञेयाः। अवतत्येति व्याप्य। न सत्तामतिवर्तते इति न संसारे स्थितिमतिवर्तते। अत्राद्युक्तमहङ्कारं विवृणोति— तत्रैवमित्यादि। जात्यादिभिः प्रभावान्तैः सम्पन्न उत्कृष्टोऽहमिति ज्ञानमहङ्कारः। यदित्यादि सङ्गविवरणम्। कर्मफलादयः सन्ति न वेति यज्ज्ञानं, तत् संशयः। अभिसम्प्लवमाह— सर्वेत्यादि। आत्मनोऽभिमत अनात्मन्यभिसम्प्लवोऽभिसम्प्लवः; आत्मनोऽनात्मगोचरतया आत्मबुद्धिरित्यर्थः। सर्वावस्थास्विति सर्वासु शरीरावस्थासु षड्धातुसमुदायरूप एवानन्य इति यज्ज्ञानं तदिह ज्ञेयं; परमात्मनस्तु सर्वावस्थास्वनन्यत्वमिति यज्ज्ञानं, तत् सम्यग्ज्ञानमेव। एवमहं स्रष्टाऽहं स्वभावसंसिद्ध इत्यत्रापि शरीर एवाहङ्कारविषयो ज्ञेयः। अहं शरीरेन्द्रियबुद्धिविशेषराशिरित्यत्र शरीरादिष्वचेतनेष्वहङ्कारास्पदत्वेन चेतनत्वाभिमानो विरुद्ध इति ज्ञेयम्। ममेत्यादिना अभ्यवपातमाह; अभ्यवपातः परमार्थतोऽनात्मीये ममता। कार्येत्यादिना विप्रत्ययं ब्रूते। विपरीताभिनिवेशो विपर्ययेण ज्ञानं; यथा— कार्ये अकार्यम्, अकार्ये कार्यमित्यादि। ज्ञाज्ञयोरित्यादिनाऽविशेषमाह। अविशेषो विशेषाप्रतीतिः, विप्रत्ययस्तु विशेषाणां विपर्ययेण ग्रहणमिति भेदः। प्रोक्षणेत्यादिना अनुपायमाह। अनुपाया इति अन्योपायाः सन्तोऽपि परमपुरुषार्थे मोक्षे अनुपायाः। त्रिषवणं त्रिसन्ध्यस्नानम्।

सम्प्रत्यहङ्कारादीनां धीधृतिस्मृतिविभ्रंशमूलत्वेनाधीधृतिस्मृत्यभिधानपूर्वकं संसाररूपप्रवृत्तिनित्यानुबन्धशारीरमानसदुःखकारणत्वं व्युत्पादितानामहङ्कारादीनां सङ्क्षिप्याह— एवमित्यादिना। निवासवृक्ष इव निवासवृक्षः; तेन यथा निवासवृक्षः पक्षिणां नित्यमाश्रयो भवति, एवमहङ्कारादियुक्तोऽपि रोगस्य निवासो भवतीति दर्शयति। भ्राम्यमाण इति पुनःपुनरपि शरीरान्तराणि नीयमानः। नातिवर्तते प्रवृत्तिमिति संसारं न परित्यजति। एवं मोहेच्छाजन्यकर्ममूलतां प्रवृतेर्दर्शयित्वा, प्रवृत्तेरपि कर्मकारणतामाह— सा च मूलमघस्येति। प्रवृत्तिरपि धर्माधर्मरूपस्याघस्य मूलम्; इह च धर्माधर्मावविशेषेण संसारदुःखकारणतया अघशब्देनोक्तौ॥९-१०॥

निवृत्तिरपवर्गः; तत् परं प्रशान्तं तत्तदक्षरं तद्ब्रह्म स मोक्षः॥११॥

तत्र मुमुक्षूणामुदयनानि व्याख्यास्यामः। तत्र लोकदोषदर्शिनो मुमुक्षोरादित एवाचार्याभिगमनं, तस्योपदेशानुष्ठानम्, अग्नेरेवोपचर्या, धर्मशास्त्रानुगमनं, तदार्थावबोधः, तेनावष्टम्भः, तत्र यथोक्ताः क्रियाः, सतामुपासनम्, असतां परिवर्जनम्, असङ्गतिर्दुर्जनेन, सत्यं सर्वभूतहितमपरुषमनतिकाले परीक्ष्य वचनं, सर्वप्राणिषु चात्मनीवावेक्षा, सर्वासामस्मरणमसङ्कल्पनमप्रार्थनमनभिभाषणं च स्त्रीणां, सर्वपरिग्रहत्यागः, कौपीनं प्रच्छादनार्थं, धातुरागनिवसनं, कन्थासीवनहेतोः सूचीपिप्पलकं, शौचाधानतोर्जलकुण्डिका, दण्डधारणं, भैक्षचर्यार्थं पात्रं, प्राणधारणार्थमेककालमग्राम्यो यथोपपन्नोऽभ्यवहारः, श्रमापनयनार्थं शीर्णशुष्कपर्णतृणास्तरणोपधानं, ध्यानहेतोः कायनिबन्धनं, वनेष्वनिकेतवासः, तन्द्रानिन्द्रालस्यादिकर्मवर्जनं, इन्द्रियार्थेष्वनुरागोपतापनिग्रहः, सुप्तस्थितगतप्रेक्षिताहारविहारप्रत्यङ्गचेष्टादिकेष्वारम्भेषु स्मृतिपूर्विका प्रवृत्तिः, सत्कारस्तुतिगर्हावमानक्षमत्वं, क्षुत्पिपासायासश्रमशीतोष्णवातवर्षासुखदुःखसंस्पर्शसहत्वं, शोकदैन्यमानोद्वेगमदलोभरागेर्ष्याभयक्रोधादिभिरसंचलनम्, अहङ्कारादिषूपसर्गसञ्ज्ञा, लोकपुरुषयोः सर्गादिसामान्यावेक्षणं, कार्यकालात्ययभयं, योगारम्भे सततमनिर्वेदः, सत्त्वोत्साहः, अपवर्गाय

धीधृतिस्मृतिबलाधानं; नियमनमिन्द्रियाणां चेतसि, चेतस आत्मनि, आत्मनश्च; धातुभेदेन शरीरावयवसङ्ख्यानमभीक्ष्णं, सर्वं कारणवद्दुःखमस्वमनित्यमित्यभ्युपगमः, सर्वप्रवृत्तिष्वघसञ्ज्ञा, सर्वसन्न्यासे सुखमित्यभिनिवेशः; एष मार्गोऽपवर्गाय, अतोऽन्यथा बध्यते; इत्युदयनानि व्याख्यातानि॥१२॥

सम्प्रति निवृत्तावुपायं वक्तुं निवृत्तिमेव तावदुपादेयताप्रतिपादकपर्यायैराह— निवृत्तिरित्यादि। 'उत्' इत्यव्ययं मोक्ष इत्यर्थे; उदयनानि हि मोक्षोपाया इत्यर्थः। लोकदोषदर्शिन इति हेतुगर्भं विशेषणं; तेन नित्यं दुःखाक्रान्तलोकदर्शनाद्विरक्तस्य सत इति दर्शयति। आचार्य इह मोक्षशास्त्रोपदेष्टा। तेनावष्टम्भ इति शात्रावबोधेन धैर्यं करणीयं, मनागपि तत्र कथन्ता न कर्तव्येत्यर्थः। यथोक्ताः क्रियाः 'कर्तव्याः' इति शेषः। आत्मनीवावेक्षेति यथा आत्मन्यनपकार्यताबुद्धिस्तथा सर्वप्राणिषु कर्तव्या। असङ्कल्पनमिति अभावनम्। कौपीनं प्रच्छादनार्थमिति कटिवेष्टनार्थं; किंवा कौपीनार्थं प्रच्छादनार्थं च। सूचीपिप्पलकं सूचीस्थापनपात्रम्। भैक्षचर्यार्थं पात्रं भिक्षापात्रमित्यर्थः। प्राणयात्रार्थमित्यनेन यावन्मात्रेणाहारेण प्राणयात्रा भवति तावन्मात्र आहारः कर्तव्यः, न तु रागादिति दर्शयति। एवं श्रमापनयनार्थमित्यादावपि तावन्मात्रप्रयोजनता व्याख्येया। कायनिबन्धनं योगपट्टम्। अनिकेतवास इति अगृहवासः, एतेन वनेऽपि न गृहं कृत्वा स्थातव्यमिति दर्शयति। इन्द्रियार्थेषु शब्दादिषु अनुरागस्य तथोपतापस्य च द्वेषरूपस्य निग्रहः कर्तव्यः। स्मृतिपूर्विका प्रवृतिरिति कोऽहं, किमर्थं रागत्यागादिकमारभ्यते, इत्यादि सर्वदा स्मर्तव्यमित्यर्थः। सत्कारः पूजा, सत्कारे स्तुतौ च सत्यामहृष्टत्वं, तथा गर्हायामवमाने च निर्द्वेषत्वं सत्कारादिक्षमित्वं ज्ञेयम्। क्षुधादिषु चानुद्वेगः क्षुधादिसहत्वम्। असंवसनम् असंवासः। अहङ्कारादयोऽष्टाविहैवोक्ताः। उपसर्गसञ्ज्ञेति अनर्थहेतुत्वभावना। लोकपुरुषयोः सर्गादिसामान्यावेक्षणामिति यथा इहैव लोकपुरुषयोरादिसर्गतः प्रभृति सामान्यमुक्तं, तथाऽवेक्षणमित्यर्थः। कार्यकालात्ययभयमिति मोक्षानुगुणकर्तव्यस्य कालातिपातभयं करणीयम्। नियमनमिन्द्रियाणां चेतसीति इन्द्रियाणि बाह्यविषयनिवृत्तानि मनस्येव

नियतानि कर्तव्यानि; चेतसश्चिन्त्यादिविषयेभ्यो व्यावृत्तस्य परमात्मन्यात्मज्ञानार्थं नियमनं कर्तव्यम्; आत्मनश्चात्मनि नियमनमिति योजना। तेन, आत्माऽपीन्द्रियादिविषयेभ्यो व्यावर्त्यात्मनि नियन्तव्यः। धातुभेदेन शरीरावयवसङ्ख्यानमिति शरीरस्य रसमलस्नाय्वादिरूपतया ज्ञानम्। शरीरं हि रसमलस्नाय्वादिरूपतया भाव्यमानं वैराग्यहेतुर्भवति; यथा— "मज्जाऽस्थ्ना रजसा प्लीह्ना यकृता शकृताऽपि च। पूर्णाः स्नायुसिराभिश्च स्त्रियश्चर्मप्रसेविकाः" इत्यादिका वैराग्यभावना। कारणवदित्यनेन नित्यात्मव्यतिरिक्तं सर्वमनित्यं दर्शयति। दुःखमिति दुःखहेतुः। अस्वमिति आत्मव्यतिरिक्तमनात्मीयं च। सर्वसन्न्यासे सर्वप्रवृत्त्युपरमे॥११-१२॥

भवन्ति चात्र—

एतैरविमलं सत्त्वं शुद्ध्युपायैर्विशुध्यति।

मृज्यमान इवादर्शस्तैलचेलकचादिभिः॥१३॥

ग्रहाम्बुदरजोधूमनीहारैरसमावृतम्।

यथाऽर्कमण्डलं भाति भाति सत्त्वं तथाऽमलम्॥१४॥

ज्वलत्यात्मनि संरुद्धं तत् सत्त्वं संवृतायने।

शुद्धः स्थिरः प्रसन्नार्चिर्दीपो दीपाशये यथा॥१५॥

अविमलमिति क्रियाविशेषणम्। ग्रहः राहुः। सत्त्वस्य पञ्चैवेन्द्रियाणि ज्ञानावरकाणि भवन्तीति कृत्वा सूर्यस्यापि पञ्चैव ग्रहादयश्चावरका उक्ताः। ज्वलतीति केवलात्मज्ञानजनकत्वेन प्रकाशते। आत्मनि संरुद्धमिति इन्द्रियेभ्यो व्यावृत्यात्मनियतम्। संवृतायन इति आत्मपक्षेऽपि संवृतेन्द्रियरूपच्छिद्रे आत्मनीति ज्ञेयम्। दीपाशयः दीपधारिका, गृहं वा॥१३-१५॥

शुद्धसत्त्वस्य या शुद्धा सत्या बुद्धिः प्रवर्तते।

यया भिनत्त्यतिबलं महामोहमयं तमः॥१६॥

सर्वभावस्वभावज्ञो यया भवति निःस्पृहः।

योगं यया साधयते साङ्ख्यः सम्पद्यते यया॥१७॥

यया नोपैत्यहङ्कारं नोपास्ते कारणं यया।

यया नालम्बते किञ्चित् सर्वं सन्न्यस्यते यया॥१८॥

याति ब्रह्म यया नित्यमजरं शान्तमव्ययम्।

विद्या सिद्धिर्मतिर्मेधा प्रज्ञा ज्ञानं च सा मता॥१९॥

शुद्धसत्त्वमभिधाय तज्जन्यां मोक्षसाधनत्वेनात्यर्थोपादेयां सत्यां बुद्धिं विविधैरुपयुक्तैः स्वरूपैराह— शुद्धेत्यादि। महामोहः अनादिमिथ्याज्ञानम्। निःस्पृह इति उपादित्साजिहासाशून्यः। योगमिति विषयव्यावृत्तस्य मनस आत्मन्येव परं योगम्। सङ्ख्या तत्त्वज्ञानं, तया वर्तत इति साङ्ख्यः। नोपास्ते कारणमिति न सुखदुःखकारणं सेवते। नालम्बते सेवते। नालम्बते किञ्चिदिति क्वचिदप्यास्थानं न करोति। सन्न्यस्यत इति सर्वत्रोदासीनो भवति। ब्रह्मेति मोक्षम्। विद्यासिद्ध्यादयश्च यद्यपि ज्ञानविशेषेऽपि प्रसिद्धाः, तथाऽपीह प्रकरणात् तत्त्वज्ञानपरा एव ज्ञेयाः॥१६-१९॥

लोके विततमात्मानं लोकं चात्मनि पश्यतः।

परावरदृशः शान्तिर्ज्ञानमूला न नश्यति॥२०॥

लोके विततमात्मानमिति लोकरूपमात्मानं, तथा लोकं चात्मनि शरिरात्ममेलकरूपे पश्यतः, 'व्यवस्थितं' इति शेषः। परावरदृश इति परम् आत्मानम्, अवराणि आत्मव्यतिरिक्तानि प्रवृत्यादीनि, यः पश्यति तस्य परावरदृशः। ज्ञानमूलेत्यनेन मोहमूलामस्थिरां शान्तिं निरस्यति॥२०॥

पश्यतः सर्वभावान् हि सर्वावस्थासु सर्वदा।
ब्रह्मभूतस्य संयोगो न शुद्धस्योपपद्यते॥२१॥

अथ जीवन्मुक्तस्य किमिति सुखदुःखहेतुधर्माधर्मसंयोगो न भवतीत्याह— पश्यत इत्यादि। पश्यति इति पश्यत एव परं, न तु रज्यतो नापि द्विषत इत्यर्थः। ब्रह्मभूतस्येति ब्रह्मसदृशस्य जीवन्मुक्तस्येति व्याख्येयं; सर्वथा मुक्ते हि ज्ञानमपि नास्ति, तेन पश्यत इति न स्यात्। संयोग इति धर्माधर्मसम्बन्धः॥

नात्मनः करणाभावाल्लिङ्गमप्युपलभ्यते।
स सर्वकरणायोगान्मुक्त इत्यभिधीयते॥२२॥

अथ मुक्तात्मनः किं लक्षणमित्याह— नेत्यादि। आत्मन इति मुक्तात्मनः। करणाभावादिति मनःप्रभृतिकरणाभावात्। उक्तं हि— "करणानि मनोबुद्धिर्बुद्धिकर्मेन्द्रियाणि च" (शा.अ.१) इति, मनःप्रभृत्यभावाच्च शरीराभावोऽप्यर्थलब्ध एव; सर्वाभावाच्चात्मनि किमपि लक्षणं नास्ति, स्वरूपेण चात्माऽतीन्द्रिय एव; तेन आत्मा उपलब्धियोग्यताभावान्नोपलभ्यते, तल्लिङ्गान्यप्यभावादेव नोपलभ्यन्त इति भावः॥२२॥

विपापं विरजः शान्तं परमक्षरमव्ययम्।
अमृतं ब्रह्म निर्वाणं पर्यायैः शान्तिरुच्यते॥२३॥
एतत्तत् सौम्य! विज्ञानं यज्ज्ञात्वा मुक्तसंशयाः।
मुनयः प्रशमं जग्मुर्वीतमोहरजःस्पृहाः॥२४॥

विपापमित्यादिना मोक्षस्वरूपप्रकाशकान् पर्यायानाह। यज्ज्ञात्वेति ज्ञानं प्राप्येत्यर्थः; किंवा, स्वप्रकाशकत्वाज्ज्ञानस्य ज्ञानमपि ज्ञेयं भवतीति बोद्धव्यम्॥२३-२४॥

तत्र श्लोकौ—

सप्रयोजनमुद्दिष्टं लोकस्य पुरुषस्य च।
सामान्यं मूलमुत्पत्तौ निवृत्तौ मार्ग एव च॥२५॥
शुद्धसत्त्वसमाधानं सत्या बुद्धिश्च नैष्ठिकी।
विचये पुरुषस्योक्ता निष्ठा च परमर्षिणा॥२६॥

सङ्ग्रहे शुद्धसत्त्वसमाधानमित्यनेन 'एतैरविमलं' इत्यादिना 'दीपाशये यथा' इत्यन्तेन ग्रन्थेनोक्तार्थः सङ्गृहीतः। 'शुद्धसत्त्वस्य' इत्यादिना सत्या बुद्धिरुक्ता। नैष्ठिकीति सत्याबुद्धेरेव विशेषणं; नैष्ठिकी मोक्षसाधिका; निष्ठा मोक्षः॥२५-२६॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते शारीरस्थाने पुरुषविचयशारीरं नाम पञ्चमोऽध्यायः॥५॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायां शारीरस्थाने पुरुषविचयशारीरं नाम पञ्चमोऽध्यायः॥५॥

षष्ठोऽध्यायः।

अथातः शरीरविचयं शारीरं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

शरीरविचयः शरीरोपकारार्थमिष्यते। ज्ञात्वा हि शरीरतत्त्वं शरीरोपकारकरेषु भावेषु ज्ञानमुत्पद्यते। तस्माच्छरीरविचयं प्रशंसन्ति कुशलाः॥३॥

पुरुषविचयं मोक्षोपयुक्तत्वेन पुरुषोपकारकमभिधाय, व्याक्रियमाणचिकित्सोपयुक्तं शरीरोपकारकं शरीरविचयं ब्रूते। शरीरस्य विचयनं विचयः शरीरस्य प्रविभागेन ज्ञानमित्यर्थः। शरीरोपकारार्थमिति शरीरारोग्यार्थम्। अथ कथं शरीरज्ञानं शरीरोपकारकमित्याह— ज्ञात्वा हीत्यादि। शरीरस्य रक्तादिरूपस्य स्वभावरूपं तत्त्वं ज्ञात्वैव इदमस्य वृद्धस्य धातोरसमानगुणतया ह्रासकत्वेनोपकारकमिति, तथोक्तविपर्ययाच्चापकारकमिति ज्ञानं जायते, नोपकार्यशरीर-तत्त्वज्ञानेऽसतीति वाक्यार्थः॥१-३॥

तत्र शरीरं नाम चेतनाधिष्ठानभूतं पञ्चमहाभूतविकारसमुदायात्मकं समयोगवाहि। यदा ह्यस्मिञ् शरीरे धातवो वैषम्यमापद्यन्ते तदा क्लेशं विनाशं वा प्राप्नोति। वैषम्यगमनं हि पुनर्धातूनां वृद्धिह्रासगमनमकार्त्स्न्येन प्रकृत्या च॥४॥

समुदितस्यैव तावच्छरीरस्य स्वरूपमाह— तत्रेत्यादि। चेतनाशब्देन ज्ञानकारणमात्मोच्यते, भूतशब्द उपमाने; तेन, चेतनाया आत्मसम्बन्धिन्याः शरीरे एवोपलम्भादात्मनः शरीरमधिष्ठानमिति भवति; परमार्थस्तु चेतना आत्माश्रया, आत्मा च निराश्रय एव; किंवा चेतनस्यात्मनोऽधिष्ठानभूतमिति

चेतनाधिष्ठानभूतम्। पञ्चानां महाभूतानां विकारा रसादयः शरीरारम्भकाः, तेषां समुदायो मेलकः, स आत्मा स्वरूपं यस्य तत्तथा। समुदायशब्देन च समुदायारम्भका धातव एवोच्यन्ते; तेन, न संयोगमात्रस्य शरीरत्वप्रसक्तिः। किंवा, समुदायः संयोग एवोच्यतां, तथाऽपि समुदाय आत्मा कारणं यस्य शरीरस्य द्रव्यरूपस्य तत् पञ्चमहाभूतविकारसमुदायात्मकं शरीरमेव। समेन उचितप्रमाणेन धातूनां मेलकेन सम्यङ्नीरोगतया वहतीति समयोगवाहि। यदा तु धातूनां न्यूनातिरिक्तत्वेन विषमो मेलको भवति, तदा असमयोगवाहीति दर्शयन्नाह— यदा हीत्यादि। लघुना वैषम्येण रोगमात्रजनकेन क्लेशं, महता त्वसाध्यरोगजनकेन वैषम्येण विनाशं मरणं प्राप्नोति शरीरम्। अथ किं तद्वैषम्यमित्याह — वैषम्यगमनमित्यादि। वैषम्यगमनं वैषम्यावस्थाप्राप्तिः, वैषम्यमेव कादाचित्कमित्यर्थः; यदि हि वैषम्यमित्येव ब्रूयात्, तदा सहजसिद्धमपि धातूनां यन्न्यूनातिरिक्तत्वेन वैषम्यं तदपि शिष्येण गृह्येत; तेन, गमनपदप्रक्षेपात् सहजं वैषम्यं परित्यज्य स्वप्रमाणापेक्षयैव कदाचिदुत्पद्यमानं वैषम्यं दर्शयति। वृद्धिह्रासगमनं चेह व्यस्तं समस्तं च वैषम्यं ज्ञेयम्। वृद्धिह्रासस्यैव विशेषानाह— अकात्स्न्र्येन प्रकृत्या चेति; अकात्स्न्र्येति एकदेशेन, प्रकृत्येति सकलेन स्वभावेन। एतेन च रसादीनां चांशेन वृद्धिह्रासौ, तथा कात्स्न्र्ये वृद्धिह्रासावुपगृहीतौ भवतः। अन्ये तु, 'अकात्स्न्र्येन' इतिपदं क्लेशं विनाशं वा प्राप्नोतीत्यनेन समं योजयन्ति। तेन, यदाऽपि धातवो वैषम्यमापद्यन्ते, तदाऽपि नावश्यं क्लेशविनाशौ भवतः, अकात्स्न्र्येनेतिपदेन क्लेशविनाशव्यभिचारस्याभिहितत्वात्; दृष्टं चैतत्, यथा— वृष्यप्रयोगाच्छुक्रवृद्धौ सत्यामपि न क्लेशविनाशौ भवतः, तथा बालस्य वर्धमानधातोरपि गुण एव परं दृश्यते। तच्च नातिसुन्दरं, यतो बालस्य वर्धमानधातोरपि वयोऽनुरूपाः प्राकृतमानस्थिता एव धातवो भवन्ति, तेन न ते प्राकृतमाना वृद्धा उच्यन्ते; या तु वृष्यप्रयोगजा शुक्रवृद्धिः, सा यदि विकारकारिका न भवति तदा तु प्राकृतमानान्तर्गतैव। एतदेव धातूनां प्राकृतमानं— यदविकारकारित्वम्। अञ्जल्यादिमानं तु अदूरान्तरेणाभिहितमपि नित्यपरोक्षतया पुनः स्वाभाविकधातुलक्षणैरेव ज्ञातव्यं; तस्माच्छुक्रस्य यावती वृद्धिरदोषा, तावती प्राकृतमानावस्थारूपैव। प्राकृतमानातिरिक्तौ चेह वृद्धिह्रासौ वैषम्यगमनशब्देनोच्येते, तस्मादाद्यैव व्याख्या। तथा न केवलं वृद्धिह्रासगमनमेव वैषम्यगमनं, किन्तु

प्रकृत्या च वैषम्यगमनं धातूनां भवतीति व्याख्यानयन्ति; तथाहि— "प्रकृतिस्थं यदा पित्तं मारुतः श्लेष्मणः क्षये" (सू.अ.१७) इत्यादौ प्रकृतिस्थस्यापि दोषस्य विकारकर्तृत्वमुच्यते, विकारकारकस्य च दोषस्य प्रकृतिस्थताऽपि वैषम्यार्थक्रियाकारित्वेन वैषम्यशब्देनोच्यते। तदपि नातिसुन्दरम्। येन, प्रदेशान्तरेष्वपि त्रिविधां गतिं प्रतिपाद्य प्रकृतिस्थता धातूनां निर्विकारा एवोक्ता; यथा— "क्षीणा जहति लिङ्गं स्वं, समाः स्वं कर्म कुर्वते। दोषाः प्रवृद्धाः स्वं लिङ्गं दर्शयन्ति यथाबलम्" (सू.अ.१७); तथा "विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते। सुखसञ्ज्ञकमारोग्यं विकारो दुःखमेव च" (सू.अ.९) एवमादिषु। यत्तु "प्रकृतिस्थं यदा पित्तं" इत्यादौ स्वमानावस्थितस्यापि पित्तादेर्विकारकर्तृत्वं, तच्छरीरप्रदेशान्तरनीतस्य पित्तादेस्तत्र तत्र प्रदेशे वृद्धस्यैव विकारकर्तृत्वं; स्वमानस्थितोऽपि दोषः प्रदेशान्तरं नीतः सन् तत्प्रदेशस्थदोषापेक्षया वृद्ध एव भवति, तेन तत्रापि वृद्धस्यैव विकारकर्तृत्वं, प्रपञ्चितश्चायमर्थस्तत्रैव ग्रन्थे। यत्रापि स्वमानस्थितानामेव रक्तादीनां वातादिदुष्ट्या विकारकर्तृत्वं, तत्रापि वातादय एव वृद्धाः प्राधान्येन विकारकराः, रक्तादयोऽपि तत्र दुष्टदोषसम्बन्धाधीनस्वगुणा वृद्धस्वगुणा वा भवन्ति, ततो गुणहानिवृद्धिभ्यां वृद्धिह्रासौ दूष्येऽपि तिष्ठत एवेति न प्रकृतिस्थस्य विकारकारित्वमिति पश्यामः॥४॥

यौगपद्येन तु विरोधिनां धातूनां वृद्धिह्रासौ भवतः। यद्धि यस्य धातोर्वृद्धिकरं तत्ततो विपरीतगुणस्य धातोः प्रत्यवायकरं सम्पद्यते॥५॥

उपयुक्तभेषजेन यथा वृद्धिह्रासौ भवतस्तदाह— यौगपद्येनेत्यादि। विरोधिनामिति परस्परविरुद्धगुणानाम्। एतदेवोपपत्त्या साधयन्नाह— यद्धीत्यादि। यद्धि भेषजं, यथा— क्षीरं कफशुक्रादिवृद्धिकरं, तत् कफशुक्रादेर्विपरीतगुणस्य वातादेः प्रत्यवायकरं भवति, ह्रासकरं भवतीत्यर्थः। विपरीतस्येति कर्तव्ये यद्विपरीतगुणस्येति करोति, तेन जातिवैपरीत्याद्गुणवैपरीत्यमेव

ह्रासकारणं प्राधान्येन दर्शयति। तेन, गोमूत्रं द्रवत्वेन जात्या समानमपि कटूष्णरूक्षादि-विपरीतगुणयोगात् कफस्यापहारकमेव॥५॥

तदेव तस्माद्भेषजं सम्यगवचार्यमाणं युगपन्न्यूनातिरिक्तानां धातूनां साम्यकरं भवति, अधिकमपकर्षति न्यूनमाप्याययति॥६॥

उपपादितं यौगपद्येन धातूनां वृद्धिह्रासगमनमुपसंहरन्नाह— तदेवेत्यादि। सम्यगुपचर्यमाणमित्यनेन उचितमात्रादिप्रयोगं, तथा धातुसाम्यावधिभेषजप्रयोगं च दर्शयति; मात्रादिविगुणं हि भेषजं न स्वोचितां क्रियां करोति; यथा— वृद्धस्य कफस्य क्षीणस्य च पित्तस्य क्षयवृद्धिभ्यां साम्यार्थं यदुपयुज्यते कट्वादि तत् साम्यापत्त्युत्तरकालमप्युपयुज्यमानं पित्तवृद्ध्या कफक्षयेण च पुनर्वैषम्यमावहति; तस्मादेतद्दोषव्यावृत्त्यर्थं सम्यगुपचर्यमाणमिति कृतम्। ननु, पूर्वमुक्तं भेषजेन विरोधिनां धातूनां वृद्धिह्रासौ भवतः, उपसंहारे तु धातूनां साम्यकर भेषजं भवतीत्युच्यते, तत्कथं नार्थभेद इत्याशङ्क्य वृद्धिह्रासकरमेव धातुसाम्यकरं भवतीति दर्शयन्नाह— अधिकमपकर्षति, न्यूनमाप्याययतीति। एवम्भूतं च धातुसाम्यकरणं यत्रैव विरोधिनां वृद्धिह्रासौ विद्येते तत्रैव ज्ञेयं, न सर्वत्र। तेन यत्र वृद्धिरेव परं दोषाणां न क्षयः कस्यचित्, तत्र यथा वृद्धस्य दोषस्य क्षयाधानमुक्तं न तथा क्षीणस्य वर्धनमिति ज्ञेयम्॥६॥

एतावदेव हि भैषज्यप्रयोगे फलमिष्टं स्वस्थवृत्तानुष्ठाने च यावद्धातूनां साम्यं स्यात्। स्वस्था ह्यपि धातूनां साम्यानुग्रहार्थमेव कुशला रसगुणानाहारविकारांश्च पर्यायेणेच्छन्त्युपयोक्तुं सात्म्यसमाज्ञातान्; एकप्रकारभूयिष्ठांश्चोपयुञ्जानास्तद्विपरीतकरसमाज्ञातया चेष्टया सममिच्छन्ति कर्तुम्॥७॥

उक्तधातुसाम्यस्योपादेयतां दर्शयितुं भेषजप्रयोगस्य तथा स्वस्थवृत्तानुष्ठानस्य धातुसाम्यातिरिक्तं फलं निषेधयन्नाह— एतावदेवेत्यादि। एतावदेवेत्यनेन वक्ष्यमाणधातुसाम्यं प्रत्यवमृशति। धातुसाम्यात्मको रोगप्रशमो हि भेषजसाध्यो न धातुसाम्यादतिरिच्यते, तथा स्वस्थस्योजस्कररसायनेनापि धातुसाम्यमेव विशिष्टमाधीयते; तेन धातुसाम्यादतिरिक्तमायुर्वेदसाध्यं नास्तीति भावः। उक्तं च— "धातुसाम्यक्रिया चोक्ता तन्त्रस्यास्य प्रयोजनम्" (सू.अ.१) इति। ननु स्वस्थे धातुसाम्यं सिद्धमेव, न च सिद्धं साध्यते, तत् कथं स्वस्थवृत्तानुष्ठानेऽपि धातुसाम्यमेव फलमित्याह— स्वस्था ह्यपीत्यादि। साम्यानुग्रहार्थमिति सत एव साम्यस्य परापरसाम्योत्पादेन परिपालनार्थम्। रसा मधुरादयः। गुणा गुर्वादयः। आहारविकाराः आद्यखाद्यलेह्यपेयरूपा यवाग्वादयः। पर्यायेणेति उचितेन क्रमेण; स च क्रमो यथा— मधुरमुपयुज्य तज्जन्यकफवृद्ध्यादिप्रतिबन्धार्थं कट्वाद्युपयोज्यमित्यादिरसक्रमः, तथा गुरुमुपयुज्य तत्कार्यप्रतिबन्धार्थं लघूपयोग इत्येवंप्रकारो गुणानामुपयोक्रमः, आहारविकारेष्वपि खाद्याद्युपयुज्य तत्पाकार्थं पेयोपयोग इत्यादिकः क्रमः। गुणशब्देन च रसा अपि प्राप्यन्ते, तथाऽपि रसाः प्राधान्यात् पृथगुक्ताः। सात्म्यसमाम्नातानिति रसगुणानित्यस्य तथा आहारविकारांश्चेत्यस्य विशेषणम्। सात्म्याश्च ते अभ्यासेन तथा समत्वेन च स्वाभाविकपथ्यत्वेनाम्नाता इति सात्म्यसमाम्नाताः, समशब्देन ह्यत्र पथ्यमुच्यते; किंवा सर्वदा सात्म्यत्वेन समाम्नाताः सात्म्यसमाम्नाताः; तेन, असात्म्यानां रसादीनामुपयोगमेव प्रतिक्षिपति। अथ यत्र तावद्रसादयः पर्यायेणोपयुज्यन्ते तत्र साधु, यत्र त्वेकप्रकारा एव रसादयः कुतश्चिद्धेतोरभ्यस्यन्ते तत्र को विधिरित्याह— एकप्रकारेत्यादि। तत उपयुक्तैकप्रकाररसादिभूयिष्ठाद् रसादेर्विपरीतमर्थं करोतीति तद्विपरीतकरी समाम्नाता चेष्टा, तया चेष्टया समं कर्तुमिच्छन्तीति। एकप्रकारभूयिष्ठाद्युपयोगेनाधीयमानवैषम्यं शरीरं समं समधातु कर्तुमिच्छन्ति। एतदुदाहरणं यथा— मधुरप्रकारभूयिष्ठं य आहारप्रकारमुपयुङ्क्ते तस्य मधुरसमानकफादिवृद्धिमाशङ्क्य कफादिकर्मक्षयकरी या व्यायामादिचेष्टा तया साम्यमाधीयते। किंवा, तद्विपरीतकरी तथा समत्वेन च आम्नाता या चेष्टा सा तद्विपरीतकरसमाम्नाता, तेन क्रियमाणमतियोगादि निषेधयति॥७॥

देशकालात्मगुणविपरीतानां हि कर्मणामाहारविकाराणां च क्रियोपयोगः सम्यक्, सर्वातियोग-सन्धारणम्, असन्धारणमुदीर्णानां च गतिमतां, साहसानां च वर्जनं, स्वस्थवृत्तमेतावद्धातूनां साम्यानुग्रहार्थमुपदिश्यते॥८॥

सम्प्रति प्रस्तावागतं स्वस्थवृत्तं समासेनाह— देशेत्यादि। देशादिभिर्गुणशब्दः सम्बध्यते। आत्मशब्देनेह शरीरमुच्यते। देशविपरीतं कर्म यथा— मरौ स्वप्नः, कालविपरीतं कर्म यथा— वसन्ते व्यायामः, आत्मविपरीतं कर्म यथा— स्थूलशरीरे व्यायामजागरणादि। एवमाहारप्रभेदाश्च देशकालादिविपरीता उन्नेयाः। कर्मणां क्रिया, आहारविकाराणां चोपयोग इति यथासङ्ख्यं योजनीयम्। सम्यगिति क्रियया उपयोगेन च समं ज्ञेयम्। अतिक्रान्तो योगमित्यतियोगो मिथ्यातियोगायोगरूपो ज्ञेयः; तेन, सर्वेषां कालबुद्धीन्द्रियार्थमिथ्यायोगादीनां वर्जनं सर्वातियोगसन्धारणम्। कालमिथ्यायोगादेस्तु दुष्परिहरस्य प्रतिक्रियैव वर्जनम्। गतिमतामिति पुरीषादीनां बहिर्गमनशीलानाम्। साहसानाम् अयथाबलमारम्भादीनाम्॥८॥

धातवः पुनः शारीराः समानगुणैः समानगुणभूयिष्ठैर्वाऽप्याहारविकारैरभ्यस्यमानैर्वृद्धिं प्राप्नुवन्ति, ह्रासं तु विपरीतगुणैर्विपरीतगुणभूयिष्ठैर्वाऽप्याहारैरभ्यस्यमानैः॥९॥

अथ रसादिधातूनां वृद्धिह्रासावुक्तौ यादृशाभ्यामाहाराभ्यां क्रियेते तद्दर्शयितुमाह— धातव इत्यादि। शारीरा इति पदेनाध्यात्मिकान् बुद्ध्यादीन् व्यवच्छिनत्ति, यतो न बुद्ध्यादयः समानगुणाद्वर्धन्ते, असमानगुणाद्वा ह्रसन्ति। समाना एव परं गुणा यस्य तत्समानगुणं, यथा— मांसं मांसस्य; समानगुणभूयिष्ठं यदल्पसमानगुणं, यथा— शुक्रस्य क्षीरं; क्षीरस्यातिद्रवत्वाच्छुक्रेऽल्पसमानगुणम्।

अभ्यस्यमानैरित्यनेन सकृदुपयोगाद् वृद्धिं ह्रासं च निषेधयति। विपरीता एव परं गुणा यस्य तद्विपरीतगुणम्। अल्पसमानगुणं तु विपरीतगुणभूयिष्ठम्॥९॥

तत्रेमे शरीरधातुगुणाः सङ्ख्यासामर्थ्यकराः; तद्यथा— गुरुलघुशीतोष्णस्निग्ध-रूक्षमन्दतीक्ष्णस्थिरसर-मृदुकठिनविशदपिच्छिलश्लक्ष्णखरसूक्ष्मस्थूलसान्द्रद्रवाः। तेषु ये गुरवस्ते गुरुभिराहारविकारगुणै-रभ्यस्यमानैराप्याय्यन्ते, लघवश्च ह्रसन्ति; लघवस्तु लघुभिराप्याय्यन्ते, गुरवश्च ह्रसन्ति। एवमेव सर्वधातुगुणानां सामान्ययोगाद्वृद्धिः, विपर्ययाद्ध्रासः। तस्मान्मांसमाप्याय्यते मांसेन भूयस्तरमन्येभ्यः शरीरधातुभ्यः, तथा लोहितं लोहितेन, मेदो मेदसा, वसा वसया, अस्थि तरुणास्थ्ना, मज्जा मज्ज्ञा, शुक्रं शुक्रेण, गर्भस्त्वामगर्भेण॥१०॥

अथ के ते शरीरधातुगुणा ये भेषजगुणैः समाना असमाना वा उच्यन्त इत्याह— तत्रेत्यादि। शरीरधातुगुणा इति विशेषणेनाप्रस्तुतत्वेनानभिधेयानात्मगुणान् बुद्ध्यादीन् निरस्यति। परादयस्तु यद्यपि शरीरधातुगुणा भवन्ति, तथाऽपि ते वृद्धिं ह्रासं च प्रत्यनतिप्रयोजनत्वादिहानुक्ताः। रसस्तु प्रधानत्वेन प्रकरणान्तरोक्त एवेति नेहोक्तः। स्पर्शस्तु शीतोष्णसङ्गृहीत एव। शब्दरूपगन्धास्तु परादिवद् वृद्धौ ह्रासे च नातिप्रयोजना इति नोक्ताः। सङ्ख्या ज्ञानं गणना वा, तत्र सामर्थ्यं कुर्वन्तीति सङ्ख्यासामर्थ्यकराः। एते हि गुर्वादयो ज्ञाता विंशतिर्गुर्वादयो भवन्तीति यज्ज्ञानं, सङ्ख्यासामर्थ्यरूपं तत् कुर्वन्ति। परस्परविपर्ययात्मकान् द्वन्द्वान् दशगुणान् दर्शयित्वा तेषां च द्रव्यसम्बद्धानां शृङ्गग्राहिकया कर्माह— तेष्वित्यादि। लघवश्च ह्रसन्तीति च्छेदः। शेषशीतादिगुणानां वृद्धिमतिदेशेनाह— एवमित्यादि। सामान्ययोगादिति समानैकरूपार्थयोगात्। तच्च सामान्यं सर्वथा समानगुणजातिरूपं भवति; यथा— पोष्यपोषकयोर्मांसयोः। क्वचिच्च विजातीयेऽपि गुणा एव पोष्यपोषकवृत्तयो भवन्ति; यथा— क्षीरशुक्रयोः। तत्रात्यर्थवृद्धिकर्तृत्वेन प्रथमं जातिरूपमेव सामान्यं सर्वगुणसामान्ययुक्तमुदाहरति— तस्मादित्यादि। भूयस्तरमन्येभ्य इत्यनेन मांसेन समानगुणभूयिष्ठतया रक्तादिवृद्धिरति क्रियते, भूयसी तु सर्वथा सामान्ययोगान्मांसस्य वृद्धिः क्रियत

इति दर्शयति। लोहितं लोहितेनेत्येवमादौ 'भूयस्तरमन्येभ्यः' इत्यनुवर्तनीयम्। गर्भस्त्वामगर्भेणेत्यत्र आमगर्भेणाण्डादिरूपेण समुदितानां मांसादीनां सम्यगनिष्पन्नानां च वृद्धिरुच्यते॥ १०॥

यत्र त्वेवंलक्षणेन सामान्येन सामान्यवतामाहारविकाराणामसान्निध्यं स्यात्, सन्निहितानां वाऽप्ययुक्तत्वान्नोपयोगो घृणित्वादन्यस्माद्वा कारणात्, स च धातुरभिवर्धयितव्यः स्यात्, तस्य ये समानगुणाः स्युराहारविकारा असेव्याश्च, तत्र समानगुणभूयिष्ठानामन्यप्रकृतीनामप्याहारविकाराणामुपयोगः स्यात्। तद्यथा— शुक्रक्षये क्षीरसर्पिषोरुपयोगो मधुरस्निग्धशीतसमाख्यातानां चापरेषां द्रव्याणां, मूत्रक्षये पुनरिक्षुरसवारुणीमण्डद्रवमधुराम्ललवणोपक्लेदिनां, पुरीषक्षये कुल्माषमाषकुष्कुण्डा-जमध्ययवशाकधान्याम्लानां, वातक्षये कटुकतिक्तकषायरूक्षलघुशीतानां, पित्तक्षयेऽम्ललवणकटुकक्षारोष्णतीक्ष्णानां, पित्तक्षयेऽम्ललवणकटुकक्षारोष्णतीक्ष्णानां, श्लेष्मक्षये स्निग्धगुरुमधुरसान्द्रपिच्छिलानां द्रव्याणाम्। कर्मापि यद्यस्य धातोर्वृद्धिकरं तत्तदासेव्यम्। एवमन्येषामपि शरीरधातूनां सामान्यविपर्ययाभ्यां वृद्धिह्रासौ यथाकालं कार्यौ। इति सर्वधातूनामेकैकशोऽतिदेशतश्च वृद्धिह्रासकराणि व्याख्यातानि भवन्ति॥ ११॥

सम्प्रति समानगुणभूयिष्ठेन विजातीयेन वृद्धिमाह— यत्रेत्यादि। एवं लक्षणेनेति तुल्यजातिरूपेण। उक्तार्थं विवृणोति— घृणित्वादित्यादि। अन्यस्माद्वा कारणादित्यभक्ष्यामगर्भशुक्रादिभक्षण-जन्याधर्मोत्पत्तेः। तत्रेत्यनेन असन्निहितान् घृणया कारणान्तरेण च सन्निहितानप्यसेव्यान् प्रत्यवमृशति। अन्यप्रकृतीनामिति विजातीयानाम्। अत्रोदाहरणमाह— तद्यथेत्यादि। शुक्रे क्षीणे यदि शुक्रान्तरं न प्राप्यते, प्राप्तं वा घृणादिवशादनुपयोज्यं स्यात्, तदा समानगुणभूयिष्ठानां क्षीरादीनामुपयोगः कर्तव्य इत्यर्थः। मूत्रादावपि घृणादिना सजातीयप्रयोगाविषये समानगुण-भूयिष्ठप्रयोगमाह— मूत्रेत्यादि। कुष्कुण्डं पललादिच्छत्रिका। अजमध्यं छागान्तराधिः। द्रव्याणामुपयोग इति योजना। आहारं वृद्धिकरमभिधाय विहारमपि वृद्धिकरमाह— कर्मेत्यादि।

कर्मशब्देनेहास्याचिन्तादयोऽपि गृह्यन्ते। कर्म तु प्रायः प्रभावादेव वृद्धिकरं भवतीति कृत्वाऽत्र समानगुणतापरिग्रहो न कृतः। साक्षादनुक्तानामपि धातूनामुक्तन्यायानुसारेण वृद्धिह्रासमभिदर्शयति — एवमित्यादि। यथाकालमिति क्रियाकालानतिपातेन। उक्तं प्रकरणमुपसंहरति— इति सर्वेत्यादि। एकैकश इत्यनेन मांसमाप्याय्यते मांसेनेत्यादिनोक्तं गृह्णाति। अतिदेशतश्चेत्यनेन एवमन्येषामपि धातूनामित्यादिनोक्तं गृह्णाति॥ ११॥

कार्त्स्न्येन शरीरवृद्धिकरास्त्विमे भावा भवन्ति; तद्यथा— कालयोगः, स्वभावसंसिद्धिः, आहारसौष्ठवम्, अविघातश्चेति॥ १२॥

वृद्धिप्रस्तावात् सर्वशरीरवृद्धिकरानाह— कार्त्स्न्येनेत्यादि। कालयोग इति वृद्धिकारकयौवना-दिकालयोगः। यौवनादौ हि सप्तदशवत्सरादिकाललक्षणे कालमहिम्नैव वृद्धिर्भवति। स्वभावशब्देनादृष्टमुच्यते। तेन स्वभावसंसिद्धशरीरवृद्धिहेतुरदृष्टम्। आहारसौष्ठवमिति आहारसम्पत्। अविघातश्चेति शरीरवृद्धिविघातकरातिव्यवायमनोभिघातादिविरहः॥ १२॥

बलवृद्धिकरास्त्विमे भावा भवन्ति। तद्यथा— बलवत्पुरुषे देशे जन्म बलवत्पुरुषे काले च, सुखश्च कालयोगः, बीजक्षेत्रगुणसम्पच्च, आहारसम्पच्च, शरीरसम्पच्च, सात्म्यसम्पच्च, सत्त्वसम्पच्च, स्वभावसंसिद्धिश्च, यौवनं च, कर्म च, संहर्षश्चेति॥ १३॥

वृद्धिप्रस्तावाच्च बलवृद्धिकरान् भावानाह— बलेत्यादि। देशमहिम्ना बलवन्तः पुरुषा यस्मिन् देशे सैन्धवादौ स बलवत्पुरुषो देशः, तत्र जातो देशमहिम्नैव बलवान् भवति; यथा सैन्धवा बलवन्तः पुरुषाः। परिणामस्यापि प्रशस्तस्य हेतुतामाह— बलवत्पुरुषे काले चेति। कालो हेमन्तशिशिरादिरूपः। हेमन्ते शिशिरे वा काले जायमानस्य स कालो बलं जनयति। सुखश्च

कालयोग इति साधारणकालयोगः। बीजस्य शुक्ररूपस्य, तथा क्षेत्रस्यार्तवगर्भाशयरूपस्य, गुणानां प्रशस्तधर्माणां सम्पत् बीजक्षेत्रगुणसम्पत्। अत्र बीजक्षेत्रयोर्निर्दोषताऽपि सम्पत् स्यात्, तेन निर्दोषतातिरिक्तसारत्वादिबीजक्षेत्रगुणप्राप्त्यर्थं गुणग्रहणं ज्ञेयम्। सत्त्वसम्पच्चेति सत्त्वसम्पदाऽपि शरीरे बलं भवतीति ज्ञेयम्। वचनं हि— "शरीरं ह्यपि सत्त्वमनुविधीयते" (शा.अ.४) इति। स्वभावसंसिद्धिः बलजनककर्मसंसिद्धिः। कर्म व्यायामादि कर्मेत्यर्थः; व्यायामादिकर्माभ्यासाद्धि बलं भवति॥१३॥

आहारपरिणामकरास्त्विमे भावा भवन्ति। तद्यथा— ऊष्मा, वायुः, क्लेदः, स्नेहः, कालः, समयोगश्चेति॥१४॥

प्रशस्तगुणाभिधानप्रस्तावादाहारपरिणामस्यापि प्रशस्तस्य हेतुतामाह— आहारेत्यादि। काल इति पाककालो निशावसानादिरूपः। समयोग इति आहारस्य प्रकृत्याद्यष्टाहारविधिविशेषायतन-सम्यग्योगः॥१४॥

तत्र तु खल्वेषामूष्मादीनामाहारपरिणामकराणां भावानामिमे कर्मविशेषा भवन्ति। तद्यथा ऊष्मा पचति, वायुरपकर्षति, क्लेदः शैथिल्यमापादयति, स्नेहो मार्दवं जनयति, कालः पर्याप्तिमभिनिर्वर्तयति, समयोगस्त्वेषां परिणामधातुसाम्यकरः सम्पद्यते॥१५॥

अत्र चाहारपरिणामकरेषु ऊष्मैव साक्षात् पाके व्याप्रियते, वाय्वादयस्तु तस्य पचतो व्यापारविशेषेण सहायतां यान्तीति दर्शयन्नाह— तत्रेत्यादि। वायुरपकर्षतीति ऊष्मस्थानाद् विदूरस्थितमन्नमूष्मसमीपं नयति। यदुक्तम्— "अन्नमादानकर्मा तु प्राणः कोष्ठं प्रकर्षति" (चि.अ.१५) इति। वायुर पकर्षतीत्युपलक्षणं, तेन अग्न्युत्तेजनमपि समानाख्यस्य वायोर्बोद्धव्यम्। उक्तं हि—

“समानेनावधूतोऽग्निः.........पचति” (चि.अ.१५) इति। पर्याप्तिमिति पाकनिष्पत्तिं; सत्यप्यूष्मादिव्यापारे कालवशादेव पाको भवति, नोष्मादिव्यापारमात्रादिति भावः। समयोग-स्त्वेषामिति एषामाहारद्रव्याणां प्रकृत्यादीनां यः समयोगः, स परिणामकरो धातुसाम्यकरश्च भवति; यदा हि प्रकृत्यादिविरुद्ध आहारो भवति, तदा प्रकृत्यादिदोषादेव न सम्यक्परिणामो भवति। एतदूष्मादिव्यापारप्रतिपादकं ग्रन्थान्तरं यथा— “अन्नमादानकर्मा तु प्राणः कोष्ठं प्रकर्षति। तद्द्रवैर्भिन्नसङ्घातं स्नेहेन मृदुतां गतम्। समानेनावधूतोऽग्निरुदर्यः पवनेन तु। काले पक्वं समं सम्यक् पचत्यायुर्विवृद्धये” (चि.अ.१५) इति॥ १५॥

परिणमतस्त्वाहारस्य गुणाः शरीरगुणभावमापद्यन्ते यथास्वमविरुद्धाः; विरुद्धाश्च विहन्युर्विहताश्च विरोधिभिः शरीरम्॥ १६॥

अथ कया परिपाठ्या परिणाममापद्यमान आहारो धातुसाम्यकरो भवतीत्याह— परिणमत इत्यादि। परिणमत इति वर्तमाननिर्देशेन यो यथा यथा आहारांशः परिणमते स तथा तथा शरीरगुणरूपतां याति, न कृत्स्नाहारपरिणाममपेक्षत इति दर्शयति। यथास्वमविरुद्धा इति ये आहारगुणा यस्मिन् शरीरगुणेऽविरुद्धास्त एव तद्रूपतां यान्ति। यथा— आहारस्य कठिनो भागो मांसास्थ्यादिकठिनभागपोषको भवति, द्रवांशस्तु शोणितादिरूपो भवतीत्यादि। विरुद्धाश्च विहन्युरिति शरीरगुणविरुद्धास्तु आहारगुणा विहन्युः ह्रासयेयुरित्यर्थः। अथ ते शरीरगुणा आहारगुणविहताः सन्तः किं कुर्वन्तीत्याह— विहता इत्यादि। विहतास्तु विरोधिभिः शरीरं विहन्युरिति योजना; विरोधिभिरिति विपरीतैराहारगुणैः, विहता इति क्षयं नीताः। किंवा विरोधिभिरिति यथा दुग्धमत्स्यादिविरुद्धाहारैर्विहताः शरीरगुणाः शरीरं हन्युः; चकाराद् विरुद्धगुणैश्च क्षयं नीताः शरीरं हन्युरिति दर्शयति॥ १६॥

शरीरगुणाः पुनर्द्विविधाः सङ्ग्रहेण— मलभूताः, प्रसादभूताश्च। तत्र मलभूतास्ते ये शरीरस्याबाधकराः स्युः। तद्यथा— शरीरच्छिद्रेषूपदेहाः पृथग्जन्मानो बहिर्मुखाः, परिपक्वाश्च धातवः, प्रकुपिताश्च वातपित्तश्लेष्माणः, ये चान्येऽपि केचिच्छरीरे तिष्ठन्तो भावाः शरीरस्योपघातायोपपद्यन्ते, सर्वांस्तान्मले सञ्चक्ष्महे; इतरांस्तु प्रसादे, गुर्वादींश्च द्रवान्तान् गुणभेदेन, रसादींश्च शुक्रान्तान् द्रव्यभेदेन॥१७॥

अथ कतिप्रकारास्ते शरीरगुणा इत्याह— शरीरेत्यादि। सङ्ग्रहेण सङ्क्षेपेण; तेन विस्तरेण धातूपधात्वादिविभागेन बहवश्च भवन्ति। भूतशब्दः स्वरूपे। आबाधकरा इति पीडाकरा इत्यर्थः। पृथग्जन्मान इति पिचोलिकासिङ्घाणकादिभेदेन नानारूपाः। बहिर्मुखा इत्यनेन य एव च्छिद्रमलाः प्रभूततया बहिर्निःसरणाभिमुखः, त एव पीडाकर्तृत्वेन मलाख्याः; ये तु स्रोत-उपलेपमात्रकारकास्ते गुणकर्तृतया न मलाख्याः। परिपक्वाश्च धातव इति पाकात् पूयतां गताश्च शोणितादयोऽपि मलाख्याः; किंवा 'अपरिपक्वा' इति पाठः, तदा सामा धातवो मलाख्या इति ज्ञेयम्। कुपिताश्चेति पदेन वातादयः सामान्येन क्षीणा वृद्धा वा गृह्यन्ते; विकृतिमात्रं हि वातादीनां कोपः। ये चान्येऽपीत्यादिना विमार्गगतान् पीडाकारकाञ् शरीरधातून् तथाऽजीर्णादीन् ग्राहयन्ति। मल इति एकवचनं जातौ। इतरानिति अविकारकरान् स्व(स)मानस्थितपुरीषवातादीन्; पुरीषवातादयोऽपि शरीरावष्टम्भकाः प्रसादा एव, गुणकर्तृत्वात्। मलप्रसादभेदेन शरीरगतभावानभिधाय पुनर्द्रव्यगुणभेदानाह— गुर्वादींश्चेत्यादि। गुर्वादयो द्रवान्ताः पश्चादुक्ता एव। अत्र च ये मला उपधातवश्च नोक्तास्ते गुर्वादिगुणाधारत्वेन ग्राह्याः; किंवा, इतरांस्तु निराबाधान् मलादीन् प्रसादे सञ्चक्ष्महे, तथा गुर्वादींश्च (तथा रसादींश्च) निर्विकारान् द्रव्यगुणरूपान् प्रसादे सञ्चक्ष्महे इति व्याख्येयम्॥१७॥

तेषां सर्वेषामेव वातपित्तश्लेष्माणो दुष्टा दूषयितारो भवन्ति, दोषस्वभावात्। वातादीनां पुनर्धात्वन्तरे कालान्तरे प्रदुष्टानां विविधाशितपीतीयेऽध्याये विज्ञानान्युक्तानि। एतावत्येव दुष्टदोषगतिर्यावत्

संस्पर्शनाच्छरीरधातूनाम्। प्रकृतिभूतानां तु खलु वातादीनां फलमारोग्यम्। तस्मादेषां प्रकृतिभावे प्रयतितव्यं बुद्धिमद्भिरिति॥१८॥

अथ यदेतत् पुरीषादीनां मलत्वं तद्दूषणाद्भवति, तेन तेषां दूषकहेतुमाह— तेषामित्यादि। तेषामिति पुरीषादीनां रसादीनां च। दुष्टा इति स्वहेतूपचिताः, क्षीणास्तु नान्यदुष्टिं दोषाः कुर्वन्तीति प्रतिपादितमेव। अथ धात्वन्तराश्रयिणां वातादीनां दुष्टानां किं लक्षणं, येन ते ज्ञातव्या इत्याह— वातादीनामित्यादि। विज्ञानानीति लक्षणानि; रसाद्याश्रयदुष्टवातादिलक्षणं तावद्विविधाशितपीतीये प्रोक्तम्। "केशमूत्रनखाद्याश्रयदुष्टदोषलक्षणं तु यद(त्त)त्र नोक्तं तत् कथं ज्ञेयमित्याह— एतावत्येवेत्यादि। केशादौ दुष्टानामपि वातादीनां गतिर्नास्तीति वाक्यार्थः। यावत् संस्पर्शनादिति स्पर्शनेन्द्रियं व्याप्य, तेन शरीरधातूनां दूषणे स्पर्शनेन्द्रियपर्यन्तमेव दुष्टदोषगतिर्भवति; तेन न केशादिषु दुष्टदोषगतिः। यत्तु पलितादिकेशे मृतनखे वा पुष्पं तत् स्पर्शवच्छरीरसंस्थितेनैव दोषेण कृतं, न पुनर्भृतनखे केशेष्वपि स्वमार्गचारी दोषः प्रचरति" इति ब्रुवते। वयं तु ब्रूमः— विविधाशितपीतीयोक्तदुष्ट्या सर्वदुष्ट्युपसङ्ग्रहो भवतीति दर्शयन्नाह— एतावत्येवेत्यादि। यावत् संस्पर्शनादिति स्पर्शसम्बन्धात्; तेन, शरीरधातूनां यावत् स्पर्शनाद्दुष्टदोषगतिर्भवति, सा च सर्वा विविधाशितपीतीयोक्तैव, न ततोऽधिका दुष्टिर्देहस्यास्ति। तत्र हि "मलानाश्रित्य दुष्टास्तु भेदशोषप्रदूषणम्" (सू.अ.२८) इति ग्रन्थेन कृत्स्नमलग्रहणात् केशनखौ मलौ गृहीतावेव। एतेन तु नखाग्रकेशाग्रस्फुटनादिमृतनखाग्रकेशाग्रगतेन दोषेणैव कृतं भवति। अथ दुष्टा वातादयो दुष्टिलक्षणानि कुर्वन्ति, प्रकृतिस्थास्तु किं कुर्वन्तीत्याह— प्रकृतिभूतानामित्यादि॥१८॥

भवति चात्र—

शरीरं सर्वथा सर्वं सर्वदा वेद यो भिषक्।

आयुर्वेदं स कार्त्स्न्येन वेद लोकसुखप्रदम्॥१९॥

सम्प्रत्युक्तप्रकरणजन्यशरीरज्ञानस्य फलमाह— शरीरमित्यादि॥१९॥

एवंवादिनं भगवन्तमात्रेयमग्निवेश उवाच श्रुतमेतद्यदुक्तं भगवता शरीराधिकारे वचः। किन्नु खलु गर्भस्याङ्गं पूर्वमभिनिर्वर्तते कुक्षौ, कुतो मुखः कथं चान्तर्गतस्तिष्ठति, किमाहारश्च वर्तयति, कथम्भूतश्च निष्क्रामति, कैश्चायमाहारोपचारैर्जातः सद्यो हन्यते, कैरव्याधिरभिवर्धते, किञ्चास्य देवादिप्रकोपनिमित्ता विकाराः सम्भवन्ति आहोस्विन्न, किञ्चास्य कालाकालमत्योर्भावा-भावयोर्भगवानध्यवस्यति, किञ्चास्य परमायुः, कानि चास्य परमायुषो निमित्तानीति॥२०॥

शरीरविचायकं प्रकरणं समाप्य गर्भशरीरविचायकं प्रकरणमारभते— एवंवादिनमित्यादि। कुक्षावित्यन्तेनैकः प्रश्नः, कुतोमुखः कथं चान्तर्गतस्तिष्ठतीति द्वितीयः, निष्क्रामतीत्यन्तेन तृतीयः, कैश्चायमाहारोपचारैर्जातः सद्यो हन्यत इति चतुर्थः, कैरव्याधिरभिवर्धत इति पञ्चमः, आहोस्विन्नेत्यन्तः षष्ठः। शेषं प्रश्नत्रयं पूर्वप्रश्नद्वयस्य व्यवच्छेदकमेव, एवं नव प्रश्नाः। अध्यवस्यतीति निश्चिनोति॥२०॥

तमेवमुक्तवन्तमग्निवेशं भगवान् पुनर्वसुरात्रेय उवाच— पूर्वमुक्तमेतद्गर्भावक्रान्तौ यथाऽयमभिनिर्वर्तते कुक्षौ, यच्चास्य यदा सन्तिष्ठतेऽङ्गजातम्। विप्रतिवादास्त्वत्र बहुविधाः सूत्रकृतामृषीणां सन्ति सर्वेषां; तानपि निबोधोच्यमानान्— शिरः पूर्वमभिनिर्वर्तते कुक्षाविति कुमारशिरा भरद्वाजः पश्यति, सर्वेन्द्रियाणां तदधिष्ठानमिति कृत्वा; हृदयमिति काङ्कायनो बाह्लीकभिषक्, चेतनाधिष्ठानत्वात्; नाभिरिति भद्रकाप्यः, आहारागम इति कृत्वा; पक्वाशयगुदमिति भद्रशौनकः, मारुताधिष्ठानत्वात्; हस्तपादमिति बडिशः, तत्करणत्वात् पुरुषस्य; इन्द्रियाणीति जनको वैदेहः, तान्यस्य बुद्ध्यधिष्ठानानीति कृत्वा; परोक्षत्वादचिन्त्यमिति मारीचिः कश्यपः; सर्वाङ्गाभिनिर्वृत्तिर्युगपदिति

धन्वन्तरिः; तदुपपन्नं, सर्वाङ्गानां तुल्यकालाभिनिर्वृत्तत्वाद्ध्दयप्रभृतीनाम्। सर्वाङ्गानां ह्यस्य हृदयं मूलमधिष्ठानं च केषाञ्चिद्भावानाम्, नच तस्मात् पूर्वाभिनिर्वृत्तिरेषां; तस्माद्धृदयप्रभृतीनां सर्वाङ्गानां तुल्यकालाभिनिर्वृत्तिः, सर्वे भावा ह्यन्योन्यप्रतिबद्धाः; तस्माद्यथाभूतदर्शनं साधु॥२१॥

यथाक्रममुत्तराण्याह— पूर्वमित्यादि।— पूर्वमुक्तमिति यच्चास्य यदा सन्तिष्ठतेऽङ्गजातं तदपि गर्भावक्रान्तौ "एवमस्य युगपदिन्द्रियाण्यङ्गावयवाश्च यौगपद्येनाभिनिर्वर्तन्तेऽन्यत्र तेभ्यो भावेभ्यो येऽस्य जातस्योत्तरकालं जायन्ते" (शा.अ.४) इत्यादिना ग्रन्थेनोक्तम्। यद्यपि 'कथमभिनिर्वर्तते कुक्षौ' इति नेह पृष्टं, तथाऽप्यभिनिर्वृत्तिक्रमोपदर्शनेन 'किन्नु खलु गर्भस्याङ्गं पूर्वमभिनिर्वर्तते' इति प्रश्नस्य यथोक्तोत्पादक्रमोपदर्शनादुत्तरत्वं भवतीति मत्त्वोक्तं— उक्तमेतद्गर्भावक्रान्तौ यथाऽयमभिनिर्वर्तते कुक्षाविति। उक्तामपि युगपदङ्गाभिनिर्वृत्तिं मतान्तरोद्धारेण स्थिरीकर्तुमाह— विप्रतिवादास्त्वत्रेत्यादि। पक्वाशयश्च गुदं चेति पक्वाशयगुदं; किंवा पक्वाशयसमीपस्थं गुदं पक्वाशयगुदम्, उत्तरगुदमित्यर्थः। इन्द्रियाणीति इन्द्रियाधिष्ठानानि नयनगोलकादीनि। तदुपपन्नमिति धन्वन्तरिवचनमुपपन्नम्; अत्र हेतुमाह— सर्वाङ्गानामित्यादिना हृदयप्रभृतीनामित्यन्तेन। अत्र च प्रतिज्ञाहेत्वोरेकत्वं नाशङ्कनीयं; धन्वन्तरिवचनमुपपन्नमिति प्रतिज्ञा, तदभिहितार्थस्य युगपदङ्गाभिनिर्वृत्तिरूपस्य सिद्धत्वादिति हेत्वर्थः प्रतिज्ञार्थाद्भिन्न एव। ये तु 'तुल्यकालाभिवृद्धत्वात्' इति पठन्ति, तेषां हेत्वर्थो व्यक्त एव। येन, उत्तरकालमिति सर्वाङ्गानां युगपद्वृद्धिदर्शनं; समानकालवर्धमानानां फलानामिव समानकालमेव जन्मानुमीयते, असमानकालजातानां हि न समानकाला समा वृद्धिर्भवति। पूर्वर्षीणां मतानि हृदयपूर्वाभिनिर्वृत्तिदूषणेनैव समानन्यायाद्दूषयन्नाह— सर्वाङ्गानां ह्यस्येत्यादि। मूलमिव मूलं, तदुपघातेन सर्वाङ्गोपघातात्। अधिष्ठानमिति आश्रयः। तत्रौजःप्रभृतीनामधिष्ठानं हृदयं भवति; न च तस्मात् पूर्वाभिनिर्वृत्तिरिति न च तथाविधमूलत्वान्नाप्यधिष्ठानत्वाच्च पूर्वाभिनिर्वृत्तिर्भवति। यदि हि मूलं कारणमिति मतं स्यात्, तदा कार्येभ्योऽङ्गेभ्यः प्राक् हृदयं स्यादपि; न चेहाङ्गानां हृदयं कारणं किंतु प्रधानं, प्राधान्यं च तदुपघातेन

सर्वोपघातादिति। यश्चाप्याश्रयाश्रयिभावः, स चापि सहोत्पन्नत्वादेव हृदयमाश्रयि तदाश्रितौजःप्रभृतीनां भवतीति भावः। तदेवं चेद्धृदस्य प्रधानस्यापि पूर्वोत्पादो नास्ति, तदा शिरःप्रभृतीनामपि पूर्वोत्पादो नास्त्येवेति कृत्वोपसंहरन्नाह— तस्मादित्यादि। युगपदभिनिर्वृत्तौ हेत्वन्तरमाह— सर्वभावा हीत्यादि। भावा इति शारीरा भावाः। अन्योन्यप्रतिबद्धा इति यस्मात् सर्वभावाः परस्परप्रतिबद्धा एव सिरास्नाय्वादिभिर्जायन्ते, तेन समाननिबन्धनत्वाद् युगपदेव भवन्ति। यथाभूतदर्शनमिति यथार्थदर्शनं, तच्च धन्वन्तरिमतमेव॥२१॥

गर्भस्तु खलु मातुः पृष्ठाभिमुख ऊर्ध्वशिराः सङ्कुच्याङ्गान्यास्तेऽन्तःकुक्षौ॥२२॥

गर्भस्त्वित्यादि द्वितीयप्रश्नस्योत्तरम्॥२२॥

व्यपगतपिपासाबुभुक्षस्तु खलु गर्भः परतन्त्रवृत्तिर्मातरमाश्रित्य वर्तयत्युपस्नेहोपस्वेदाभ्यां गर्भाशये सदसद्भूताङ्गावयवः, तदनन्तरं ह्यस्य कश्चिल्लोमकूपायनैरुपस्नेहः कश्चिन्नाभिनाड्ययनैः। नाभ्यां ह्यस्य नाडी प्रसक्ता, नाड्यां चापरा, अपरा चास्य मातुः प्रसक्ता हृदये, मातृहृदयं ह्यस्य तामपरामभिसम्प्लवते सिराभिः स्यन्दमानाभिः; स तस्य रसो बलवर्णकरः सम्पद्यते, स च सर्वरसवानाहारः। स्त्रिया ह्यापन्नगर्भायास्त्रिधा रसः प्रतिपद्यते— स्वशरीरपुष्टये, स्तन्याय, गर्भवृद्धये च। सतेनाहारेणोपष्टब्धः (परतन्त्रवृत्तिर्मातरमाश्रित्य) वर्तयत्यन्तर्गतः॥२३॥

व्यपगत इत्यादि 'किमाहारश्च वर्तयति' इति प्रश्नस्योत्तरम्। परतन्त्रवृत्तिरिति मात्राधीनवृत्तिः। एतदेव विवृणोति— मातरमित्यादि। उपस्नेहः निस्यन्दः। सदसद्भूताङ्गावयव इति च्छेदः। तदनन्तरमिति अङ्गप्रत्यङ्गव्यक्तौ सत्याम्। नाभिसंसक्ता नाडी नाभिनाडी। अयनैरिति मार्गैः। अपरा गर्भस्य

नाभिनाडीप्रतिबद्धा 'अमरा' इति लोके ख्याता। अभिसम्प्लवते इति व्याप्नोति। एतच्चापरादिजन्म गर्भादृष्टवशाद्भवति॥२३॥

स चोपस्थितकाले जन्मनि प्रसूतिमारुतयोगात् परिवृत्त्यावाक्शिरा निष्क्रामत्यपत्यपथेन, एषा प्रकृतिः, विकृतिः पुनरतोऽन्यथा। परं त्वतः स्वतन्त्रवृत्तिर्भवति॥२४॥

कथम्भूतः स निष्कामतीत्यस्योत्तरं— स चोपस्थितकाल इत्यादि।— उपस्थितकाल इति प्रत्यासन्नकाले। विकृतिः पुनरतोऽन्यथेत्यनेन विकृत्याचरणेनापि निर्गमो भवतीति दर्शयति। स्वतन्त्रवृत्तिर्भवतीति स्वयङ्कृतेन स्तन्यपानादिना वर्तते, न गर्भस्थ इव मातुरेवाहारेण परं वर्तत इत्यर्थः॥२४॥

तस्याहारोपचारौ जातिसूत्रीयोपदिष्टावविकारकरौ चाभिवृद्धिकरौ भवतः॥२५॥

ताभ्यामेव च विषमसेविताभ्यां जातः सद्य उपहन्यते तरुरिवाचिरव्यपरोपितो वातातपाभ्याम-प्रतिष्ठितमूलः॥२६॥

कैश्चायमित्यादिप्रश्नस्योत्तरं— तस्येत्यादि। जातिसूत्रीयोपदिष्टाविति अनागतावेक्षणेनानागते भूतवत्प्रयोगाद्बोद्धव्यम्। अचिरव्यपरोपितः अदीर्घकालारोपितः॥२५-२६॥

आप्तोपदेशादद्भुतरूपदर्शनात् समुत्थानलिङ्गचिकित्सितविशेषाच्चादोषप्रकोपानुरूपा देवादिप्रकोपनिमित्ता विकाराः समुपलभ्यन्ते॥२७॥

किञ्चास्येत्यादिप्रश्नस्योत्तरम्— आप्तोपदेशादित्यादि। आप्तोपदेशोऽत्र कुमारतन्त्रोपदेशो ब्रह्मादिप्रणीतः। तत्र हि कुमाराणां देवादिनिमित्तविकाराः प्रतिपाद्यन्ते; देवादिग्रहणेन च तदनुचरा अपि गृह्यन्ते। स्कन्दग्रहादयः **सुश्रुतो**क्ता देवादयश्चाष्टौ। यदुक्तं— "देवास्तथा शत्रुगणाश्च तेषां गन्धर्वयक्षाः पितरो भुजङ्गाः। तथैव रक्षांसि पिशाचजातिरेषोऽष्टको देवगणो ग्रहाख्यः" (सू.उ.अ.६०) इति। अनुमानमप्यत्राह— अद्भुतेत्यादि। न यद्भवति तदद्भुतम्, आश्चर्यमिति यावत्; तच्चामानुषबलज्ञानशोभादि ज्ञेयं; एतद्धि दोषाजन्यत्वाद् देवादिकारणं गमयति। समुत्थानादिविशेष आगन्तूनामागन्तुविकारेषु स्फुट एव। अदोषप्रकोपानुरूपा इति दोषप्रकोपजन्यरोगविधर्माणः॥२७॥

कालाकालमृत्य्वोस्तु खलु भावाभावयोरिदमध्यवसितं नः— "यः कश्चिन् म्रियते स काल एवम्रियते, न हि कालच्छिद्रमस्ति" इत्येके भाषन्ते। तच्चासम्यक्। न ह्यच्छिद्रता सच्छिद्रता वा कालस्योपपद्यते, कालस्वलक्षणस्वभावात्। तत्राहुरपरे— यो यदा म्रियते स तस्य नियतो मृत्युकालः; स सर्वभूतानां सत्यः, समक्रियत्वादिति। एतदपि चान्यथाऽर्थग्रहणम्। न हि कश्चिन्न म्रियत इति समक्रियः। कालो ह्यायुषः प्रमाणमधिकृत्योच्यते। यस्य चेष्टं यो यदा म्रियते स तस्य मृत्युकाल इति, तस्य सर्वे भावा यथास्वं नियतकाला भविष्यन्ति; तच्च नोपपद्यते, प्रत्यक्षं ह्यकालाहारवचनकर्मणां फलमनिष्टं विपर्यये चेष्टं; प्रत्यक्षतश्चोपलभ्यते खलु कालाकालव्यक्तिस्तासु तास्ववस्थासु तं तमर्थमभिसमीक्ष्य, तद्यथा— कालोऽयमस्य व्याधेराहारस्यौषधस्य प्रतिकर्मणो विसर्गस्य, अकालो वेति। लोकेऽप्येतद्भवति— काले देवो वर्षत्यकाले देवो वर्षति, काले शीतमकाले शीतं, काले तपत्यकाले तपति, काले पुष्पफलमकाले च पुष्पफलमिति। तस्मादुभयमस्ति— काले मृत्युरकाले च; नैकान्तिकमत्र। यदि ह्यकाले मृत्युर्न स्यान्नियतकालप्रमाणमायुः सर्वं स्यात्; एवं गते हिताहितज्ञानमकारणं स्यात्, प्रत्यक्षानुमानोपदेशाश्चाप्रमाणानि स्युर्ये प्रमाणभूताः सर्वतन्त्रेषु, यैरायुष्याण्यनायुष्याणि चोपलभ्यन्ते। वाग्वस्तुमात्रमेतद्वादमृषयो मन्यन्ते— नाकाले मृत्युरस्तीति॥२८॥

कालाकालेत्यादौ इदमध्यवसितमित्यनेन प्रकरणव्यवस्थापनीयोऽयमर्थः ‘तस्मादुभयमस्ति काले मृत्युरकाले च’ इति ग्रन्थवक्ष्यमाणं प्रत्यवमृशति। एकीयमतमाह— यः कश्चिदित्यादि। न हि कालच्छिद्रमस्तीति कालरहितः कश्चिदवकाशोऽस्ति, यं कालशून्यमवकाशमासाद्याकालमृत्युः स्यादिति भावः। एतद्दूषयति— तच्चेत्यादिना। सान्तरं यदवयवि द्रव्यं तत्। सच्छिद्रमित्युच्यते, यच्च निरन्तरं तदच्छिद्रम्। तेन कालस्य निरवयवस्य सच्छिद्रताऽच्छिद्रता वा न सम्भवति; तेन यदुच्यते— ‘कालस्याच्छिद्रत्वान्न कालमृत्युरस्ति’ इति, तदयुक्तमिति भावः। यत्त्वकालमृत्युव्यापकत्वेन कालस्योपचरितच्छिद्रत्वं तदुत्तरवक्ष्यमाणैकीयमतदूषणेनैव दूषितम्। कालस्वलक्षणस्वभावादिति कालस्वलक्षणे सच्छिद्रताया अच्छिद्रतायाश्चाभावादित्यर्थः। एकीयमतान्तरमाह— तत्राहुरित्यादि। यो यदा म्रियते स एव तस्य नियतो मृत्युकाल इति कथं ज्ञायते इत्याह— स सर्वभूतानां सत्यः समक्रियत्वादितिः, यस्मात् कालः सर्वभूतानामविशेषेण मारकतया समक्रियः, न रागात् किञ्चिद्धतं न मारयति, न द्वेषाद्वा किञ्चिद्धन्ति, किन्तु सर्वाण्येव निहन्ति, तेन सर्वभूतानामयं सत्यो रागद्वेषशून्य इत्यर्थः। ततश्च रागद्वेषशून्यतया उचितकाले एव परं मारयति, नानुचित इति भावः। दूषयति— एतदपीत्यादिना। न हि कश्चिन्न म्रियत इति कृत्वा समक्रियः कालो भवत्येव। यत्तु शतवर्षादिलक्षणमायुःप्रमाणमधिकृत्य भवता समक्रियः कालोऽभिधीयते; यदि शतवर्षाद्यायुःप्रमाणेऽपि समक्रियः स्यात्, तदा न शतवर्षादर्वागूर्ध्वं वा कश्चिन्म्रियेत, दृश्यते चैतत्; तस्मादेवम्भूतसमक्रियत्वे कालस्य उचितशतवर्षाद्यायुःप्राप्तेरर्वाङ्मरणमकालमृत्युशब्दाभिधेयमिहायुर्वेदे तन्निरस्तं भवतीति भावः। अकालमृत्युप्रतिषेधे दूषणान्तरमाह— यस्येत्यादि। सर्वभावा इति मृत्युव्यतिरिक्ता अप्याहारवचनादयः। प्रत्यक्षमिति सुव्यक्तप्रमाणे नेत्यर्थः। कालाकालव्यक्तिस्तासु तास्ववस्थास्विति तास्ता अवस्थाः शरीरादेस्तं तं व्याध्याहारादिकमर्थं बुद्धिस्थीकृत्य कालाकालशब्देनोच्यन्त इत्यर्थः। तत्र तृतीयदिनज्वरयुक्तायां तृतीयज्वरिणोऽवस्थायां तृतीयज्वरं प्रति कालोऽयमस्येति व्यपदिश्यते, विपर्यये चाकाल इति व्यपदेशः; तथा ग्लान्यादियुक्तायां शरीरावस्थायामाहाररूपमर्थमुद्दिश्य कालोऽयमाहारस्येति ज्ञानं भवति, विपर्यये

चाकालोऽयमित्युदाहरणमुन्नेयम्। विसर्गस्येति व्याधिमोक्षस्य। इह प्रकरणे कालशब्देनोचितः कालोऽभिधीयते, अकालशब्देनानुचितः कालः; न तु कालविरहः। सिद्धान्तमुपसंहरति— तस्मादित्यादि। नैकान्तिकमिति कालमृत्युरेव परं भवति, किंवा अकालमृत्युरेव परं भवतीत्यैकान्तिकपक्षो नास्ति। अकालमृत्योरभावपक्षे दूषणान्तरमाह— यदि हीत्यादि। हिताहितज्ञानमकालमृत्युप्रतिषेधार्थं विधीयते, स एव चेदकालमृत्युर्नास्ति तदा हिताहितज्ञानं निष्प्रयोजनं स्यादित्यर्थः। प्रत्यक्षानुमानोपदेशाश्चाप्रमाणानि स्युरिति आयुर्वेदसम्बद्धा प्रत्यक्षादय आयुष्यानायुष्योपदर्शका आयुष्यानायुष्यार्थाभावादप्रमाणभूताः स्युरिति भावः। दूषितं पक्षं निःसारतया दर्शयन्नाह— वागित्यादि॥२८॥

वर्षशतं खल्वायुषः प्रमाणमस्मिन् काले॥२९॥

'किञ्चास्य परमायुः' इत्यस्य प्रश्नस्योत्तरमाह— वर्षशतमित्यादि। अस्मिन् काले इति कलौ॥२९॥

तस्य निमित्तं प्रकृतिगुणात्मसम्पत् सात्म्योपसेवनं चेति॥३०॥

शेषप्रश्नस्योत्तरं— तस्येत्यादि। प्रकृतिगुणात्मसम्पदिति प्रकृतिसम्पत्, गुणसम्पत्, आत्मसम्पत्। तत्र प्रकृतिसम्पत् समवातादिप्रकृतिता, समप्रकृतिर्हि चिरायुर्भवति; गुणसम्पत्तु सारसंहननादिभिरायुष्मल्लक्षणैर्योगः, किंवा प्रकृतेर्मातृपित्राद्युपकरणस्य गुणसम्पत् सा प्रकृतिगुणसम्पत्; आत्मनस्तु चिरायुष्ट्वकारकधर्मयुक्तता सम्पत्॥३०॥

तत्र श्लोकाः—

शरीरं यद्यथा तच्च वर्तते क्लिष्टमामयैः।

यथा क्लेशं विनाशं च याति ये चास्य धातवः॥३१॥

वृद्धिह्रासौ यथा तेषां क्षीणानामौषधं च यत्।

देहवृद्धिकरा भावा बलवृद्धिकराश्च ये॥३२॥

परिणामकरा भावा या च तेषां पृथक् क्रिया।

मलाख्याः सम्प्रसादाख्या धातवः प्रश्न एव च॥३३॥

नवको निर्णयश्चास्य विधिवत् सम्प्रकाशितः।

तथ्यः शरीरविचये शारीरे परमर्षिणा॥३४॥

सङ्ग्रहे ये चास्य धातव इति यादृशाश्चास्य धातव इत्यर्थः। एतच्च 'वैषम्यगमनं पुनर्धातूनां' इत्यादिग्रन्थेन धातुधर्मप्रकाशकत्वेनोक्तं ज्ञेयम्। अन्ये तु ये चास्य धातव इत्यनेन 'मांसं मांसेन वर्धते' इत्यादि धातुरूपाणां पुनर्मांसादीनां सङ्ग्रहोऽयमिति वदन्ति। वृद्धिह्रासौ यथा तेषामित्यनेन 'धातवः पुनः' इत्यादिग्रन्थार्थं गृह्णाति। क्षीणानामौषधं च यदिति मांसमाप्याय्यते मांसेनेत्यादि सङ्गृह्णाति। या च तेषां पृथक् क्रियेत्यनेन तेषामाहारपरिणामकराणामूष्मप्रभृतीनां पृथक्कर्म यदुक्तं 'ऊष्मा पचति' इत्यादिना ग्रन्थेन तद्गृह्यते॥३१-३४॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते शारीरस्थाने शरीरविचयशारीरं नाम षष्ठोऽध्यायः॥६॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायां शरीरविचयशारीरं नाम षष्ठोऽध्यायः॥६॥

सप्तमोऽध्यायः।

अथातः शरीरसङ्ख्याशारीरं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

शरीरसङ्ख्यामवयवशः कृत्स्नं शरीरं प्रविभज्य सर्वशरीरसङ्ख्यानप्रमाणज्ञानहेतोर्भगवन्तमात्रेयमग्निवेशः पप्रच्छ॥३॥

पूर्वाध्याये धातुभेदेन शरीरमभिधाय एतदेव शरीरमवयवसङ्ख्याभेदेन प्रतिपादयितुं शरीरसङ्ख्याध्यायोऽभिधीयते। अवयवसङ्ख्याभेदेन च शरीरज्ञानं प्राधान्येन साक्षात् साधनं चिकित्सोपयुक्तं कथयिष्यत्यध्यायान्ते 'शरीरसङ्ख्या यो वेद' इत्यादिना। अवयवशः शरीरं प्रविभज्य शरीरसङ्ख्यां पप्रच्छेति योजना। पृच्छाप्रयोजनमाह— सर्वशरीरसङ्ख्यानप्रमाणज्ञानहेतोरिति।— सङ्ख्यानस्य प्रमाणमियत्ता सङ्ख्यानप्रमाणं, तच्च 'षट् त्वचः' इत्यादिग्रन्थवाच्यं; किंवा सङ्ख्यानं च प्रमाणं च सङ्ख्यानप्रमाणं; तत्र 'षट् त्वचः' इत्यादि सङ्ख्यानं, 'दशोदकाञ्जलयः' इत्यादि शरीरावयवप्रमाणं; किंवा 'सङ्ख्या-नाम-प्रमाणज्ञानहेतोः' इति पाठः, तत्र सङ्ख्यानस्य प्रमाणस्य च दत्तमेवोदाहरणं, नामज्ञानं तु 'एका गोजिह्विका' इत्यादिग्रन्थेन भवतीति व्याख्यानयन्ति॥१-३॥

तमुवाच भगवानात्रेयः— शृणु मत्तोऽग्निवेश! सर्वशरीरमाचक्षाणस्य यथा प्रश्नमेकमना यथावत्। शरीरे षट् त्वचः; तद्यथा— उदकधरा त्वग्बाह्या, द्वितीया त्वसृग्धरा, तृतीया सिध्मकिलाससम्भवाधिष्ठाना, चतुर्थी दद्रूकुष्ठसम्भवाधिष्ठाना, पञ्चमी त्वलजीविद्रधिसम्भवाधिष्ठाना, षष्ठी तु यस्यां छिन्नायां ताम्यत्यन्ध इव च तमः प्रविशति यां चाप्यधिष्ठायारूंषि जायन्ते पर्वसु

कृष्णरक्तानि स्थूलमूलानि दुश्चिकित्स्यतमानि च; इति षट् त्वचः। एताः षडङ्गं शरीरमवतत्य तिष्ठन्ति॥४॥

आचक्षाणस्येत्यत्र 'मतं' इति शेषः; तेन सर्वं शरीरमाचक्षाणस्य मे मतं शृण्विति योजना। ततश्च 'नटस्य शृणोति' इति— वदनुपयोगे षष्ठी। किं च 'मे वचनं शृणु' इत्यनेन मतान्तरमप्यस्ति शरीरावयवसङ्ख्यान इति सूचयति। ततश्च **सुश्रुते**— "सप्त त्वचः, त्रीण्यस्थिशतानि" (सु.शा.अ.५) इत्यादिना यदिह प्रतिपादितसङ्ख्याविरुद्धमुच्यते, तच्छल्यशास्त्रोपयुक्तत्वादिति दर्शयति। यदुक्तं **सुश्रुते**— "त्रीणि सषष्ठीनि शतान्यस्थ्नां वेदविदो भाषन्ते, शल्यतन्त्रे तु त्रीण्येव शतानि" (सु.शा.अ.५) इति। अनेन वचनेन योऽन्योऽपि त्वगादिसङ्ख्याभेदश्चरकसुश्रुतयोः स स्वतन्त्रोपयुक्तसङ्ख्योपादानादुन्नेयः। सिध्मकिलाससम्भवाधिष्ठानेति सिध्मकिलासौ यतो दोषात् सम्भवतस्तस्य दोषस्याधिष्ठानभूता; एवमुत्तरत्रापि व्याख्येयम्। ताम्यतीत्यस्य विवरणम्— 'अन्ध इव तमः प्रविशति' इति; किंवा ताम्यतीति तमोयुक्त इव चेष्टते। अरूंषीति व्रणानि। पर्वस्विति अवयवसन्धिषु॥४॥

तत्रायं शरीरस्याङ्गविभागः; तद्यथा— द्वौ बाहू, द्वे सक्थिनी, शिरोग्रीवम्, अन्तराधिः, इति षडङ्गमङ्गम्॥५॥

षडङ्गतामुक्तां शरीरस्य विभजते— तत्रायमित्यादि। शिरश्च ग्रीवा च शिरोग्रीवम्; एतच्चैक्यविवक्षया ज्ञेयम्। अन्तराधिः मध्यम्॥५॥

त्रीणि सषष्ठीनि शतान्यस्थ्नां सह दन्तोलूखलनखेन। तद्यथा— द्वात्रिंशद्दन्ताः, द्वात्रिंशद्दन्तोलूखलानि, विंशतिर्नखाः, षष्टिः पाणिपादाङ्गुल्यस्थीनि, विंशतिः पाणिपादशलाकाः, चत्वारि पाणिपादशलाकाधिष्ठानानि, द्वे पार्ष्ण्योरस्थिनी, चत्वारः पादयोर्गुल्फाः, द्वौ मणिकौ हस्तयोः,

चत्वार्यरत्न्योरस्थीनि, चत्वारि जङ्घयोः, द्वे जानुनी, द्वे जानुकपालिके, द्वावूरुनलकौ, द्वौ बाहुनलकौ, द्वावंसौ, द्वे अंसफलके, द्वावक्षकौ, एकं जत्रु, द्वे तालुके, द्वे श्रोणिफलके, एकं भगास्थि, पञ्चचत्वारिंशत् पृष्ठगतान्यस्थीनि, पञ्चदश ग्रीवायां, चतुर्दशोरसि, द्वयोः पार्श्वयोश्चतुर्विंशतिः पर्शुकाः, तावन्ति स्थालकानि, तावन्ति चैव स्थालकार्बुदानि, एकं हन्वस्थि, द्वे हनुमूलबन्धने, एकास्थि नासिकागण्डकूटललाटं, द्वौ शङ्खौ, चत्वारि शिरःकपालानीति; एवं त्रीणि सषष्ठीनि शतान्यस्थ्नां सह दन्तोलूखलनखेनेति॥६॥

सषष्ठीनीति षष्ट्याऽधिकानि। दन्तानामुलूखला यत्राश्रिता दन्ताः। यद्यपि नखा विविधाशितपीतीये मलभागपोष्यत्वेन मले एव प्रक्षिप्ताः, तथाऽपीहास्थितारूपयोगस्यापि विद्यमानत्वादस्थिगणनायां पठिताः। प्रत्यङ्गुलि पर्वत्रयं, तेन विंशत्यङ्गुलिगतमस्थ्नां विंशतित्रयं भवति। वृद्धाङ्गुष्ठे यद्धस्तपादप्रविष्टं तत्तृतीयं पर्व ज्ञेयम्। वृद्धाङ्गुष्ठशलाकाऽपि स्वल्पप्रमाणा ज्ञेया। अङ्गुलीनां शलाका यत्र संलग्नास्तच्छलाकाधिष्ठानम्। जानु जङ्घोर्वोः सन्धिः। अक्षकौ अर्वाक् जत्रुसन्धेः कीलकौ। तालुके ताल्वस्थिनी। भगास्थि अभिमुखं कटीसन्धानकारकं तिर्यगस्थि। स्थालकानीति पर्शुकानां मूलस्थानलग्नानि। स्थालकार्बुदानि तु पर्शुकामूलान्यर्बुदाकाराण्यस्थीनि। नासिकागण्डकूटललाटानामेकमूलत्वादेकमेवास्थि गणनीयं, ये तु पृथग्गणनां कुर्वन्ति तेषां नासागण्डकूटललाटानां त्रयाणां त्रीण्येवास्थीनीति न सङ्ख्यापूरणम्॥६॥

पञ्चेन्द्रियाधिष्ठानानि; तद्यथा— त्वग्, जिह्वा, नासिका, अक्षिणी, कर्णौ च। पञ्च बुद्धीन्द्रियाणि; तद्यथा — स्पर्शनं, रसनं, घ्राणं, दर्शनं, श्रोत्रमिति। पञ्च कर्मेन्द्रियाणि; तद्यथा— हस्तौ, पादौ, पायुः, उपस्थः, जिह्वा चेति॥७॥

हृदयं चेतनाधिष्ठानमेकम्॥८॥

अक्षिणी कर्णौ च पृथक्त्वेऽपि एकैकेन्द्रियाधिष्ठानत्वेनैकत्वेनैव ग्राह्ये। एवं हस्तौ पादौ च एकतया ग्राह्यौ॥७-८॥

दश प्राणायतनानि; तद्यथा— मूर्धा, कण्ठः, हृदयं, नाभिः, गुदं, बस्तिः, ओजः, शुक्रं, शोणितं, मांसमिति। तेषु षट् पूर्वाणि मर्मसङ्ख्यातानि॥९॥

इह दशप्राणायतनेषु दशप्राणायतनीयोक्तौ शङ्खौ परित्यज्य नाभिर्मांसं च गृहीतं, तेन नाभिमांसयोरपि प्राणायतनत्वं तथा शङ्खयोश्च पाठद्वयदर्शनाद्बोद्धव्यम्। यदुक्तं दशप्राणायतनीये— "दशैवायतनान्याहुः प्राणा येषु प्रतिष्ठिताः, शङ्खौ मर्मत्रयं कण्ठो रक्तं शुक्रौजसी गुदम्" (सू.अ.२९) इति॥९॥

पञ्चदश कोष्ठाङ्गानि; तद्यथा— नाभिश्च, हृदयं च, क्लोम च, यकृच्च, प्लीहा च, वृक्कौ च, बस्तिश्च, पुरीषाधारश्च, आमाशयश्च, पक्वाशयश्च, उत्तरगुदं च, अधरगुदं च, क्षुद्रान्त्रं च, स्थूलान्त्रं च, वपावहनं चेति॥१०॥

क्लोम पिपासास्थानम्। बस्तिः मूत्राशयः। उत्तरगुदः यत्र पुरीषमवतिष्ठते, येन तु पुरीषं निष्क्रामति तदधरगुदम्। वपावहनं मेदःस्थानं 'तैलवर्तिका' इति ख्यातम्॥१०॥

षट्पञ्चाशत् प्रत्यङ्गानि षट्स्वङ्गेषूपनिबद्धानि, यान्यपरिसङ्ख्यातानि पूर्वमङ्गेषु परिसङ्ख्यायमानेषु, तान्यन्यैः पर्यायैरिह प्रकाश्यानि भवन्ति। तद्यथा— द्वे जङ्घापिण्डिके, द्वे ऊरुपिण्डिके, द्वौ स्फिचौ, द्वौ वृषणौ, एकं शेफः, द्वे उखे, द्वौ वङ्क्षणौ, द्वौ कुकुन्दरौ, एकं बस्तिशीर्षम्, एकमुदरं, द्वौ स्तनौ, द्वौ श्लेष्मभुवौ, द्वे बाहुपिण्डिके, चिबुकमेकं, द्वावोष्ठौ, द्वे सृक्कण्यौ, द्वौ दन्तवेष्टकौ, एकं तालु, एका गलशुण्डिका, द्वे

उपजिह्विके, एका गोजिह्विका, द्वौ गण्डौ, द्वे कर्णशष्कुलिके, द्वौ कर्णपुत्रकौ, द्वे अक्षिकूटे, चत्वार्यक्षिवर्त्मानि, द्वे अक्षिकनीनिके, द्वे भ्रुवौ, एकाऽवटुः, चत्वारि पाणिपादहृदयानि॥ ११॥

षट्पञ्चाशत् प्रत्यङ्गानीति 'तद्यथा— द्वे जङ्घापिण्डिके' इत्यादिग्रन्थवक्ष्यमाणानि। यानीत्यादि यानि वक्ष्यमाणानि षट्पञ्चाशत् प्रत्यङ्गानि, पूर्वमङ्गेषु हस्तादिषु षट्सु, परिसङ्ख्यायमानेष्वपरिसङ्ख्यातानि, तान्यन्यैः पर्यायैः प्रकाश्यानि भवन्तीति योजना। पर्यायाश्च जङ्घापिण्डिकादयः शब्दा एव। एतेन हस्तादिषडङ्गकथनेनैव तदाश्रिता अपि जङ्घापिण्डिकादय उक्ता एव, सम्प्रति त्ववयवविशेषव्यवहारार्थं जङ्घापिण्डिकादयः पृथगुक्ता इति वाक्यार्थः। 'पूर्वमङ्गेषु' इत्यस्य स्थाने 'पूर्वमन्येषु' इति वा पाठः; तत्राप्यन्यशब्देन हस्तादीनि षडङ्गानि ग्राह्याणि। उरवे इति कक्षशिरोपार्श्वयोर्निम्नभागौ। कुकुन्दरौ स्फिचोरुपरि उन्नतभागौ। बस्तिशिरो नाभेरधः। श्लेष्मभुवौ कण्ठस्य पार्श्वयोर्व्यवस्थितौ कठिनौ भागौ। सृक्कण्यौ वदनान्ते। द्वे उपजिह्विके इति जिह्वाया अधोगता जिह्वा तथा उपरिगता ग्राह्या। एका गोजिह्विकेति गौर्वाक्, तस्याः कारणभूता जिह्वा गोजिह्वा; तेन वचनकारणभूता प्रधानजिह्वैव गृह्यते। कर्णशष्कुलिके कर्णगतावर्तकौ। कर्णपुत्रकौ तु बाह्यकर्णावेव। अक्षिकूटके अक्षिगोलके। द्वे अक्षिकनीनिके इत्यत्र कनीनिकाशब्देन नासायाः सममक्षिसन्धिरभिधीयते। अवटुः घाटा। चत्वारि पाणिपादहृदयानीति पाण्योः पादयोश्च तलानि मध्यानि चत्वारीत्यर्थः। एतावतैव षट्पञ्चाशत् प्रत्यङ्गानि पूर्यन्ते॥ ११॥

नव महन्ति छिद्राणि— सप्त शिरसि, द्वे चाधः॥ १२॥

एतावद्दृश्यं शक्यमपि निर्देष्टुम्॥ १३॥

नव महान्ति छिद्राणीति ग्रन्थं व्याकरोति— सप्त शिरसि द्वे चाध इति। एतावद्दृश्यमिति एतावत्त्वगादि दृश्यं प्रायः प्रत्यक्षोपलब्धिविषयमित्यर्थः॥१२-१३॥

अनिर्देश्यमतः परं तर्क्यमेव। तद्यथा— नव स्नायुशतानि, सप्त सिराशतानि, द्वे धमनीशते, चत्वारि पेशीशतानि, सप्तोत्तरं मर्मशतं, द्वे सन्धिशते, एकोनत्रिंशत्सहस्राणि नव च शतानि षट्पञ्चाशत्कानि सिराधमनीनामणुशः प्रविभज्यमानानां मुखाग्रपरिमाणं, तावन्ति चैव केशश्मश्रुलोमानीति। एतद्यथावत्सङ्ख्यातं त्वक्प्रभृति दृश्यं, तर्क्यमतः परम्। एतदुभयमपि न विकल्पते, प्रकृतिभावाच्छरीरस्य॥१४॥

अतः परं तर्क्यमेवेति अतस्त्वगादेः परं यत् स्नाय्वादि तत् प्रायस्तर्क्यमेव अनुमानगम्यमेवेत्यर्थः। यद्यपि स्नाय्वाद्यपि प्रत्यक्षं भवति, तथाऽपीह वक्ष्यमाणसङ्ख्यायुक्तं सर्वं स्नाय्वादि न प्रत्यक्षेण सुकरग्रहमिति तर्क्यमित्युक्तम्। स्नाय्वादिभेदानेवाह— नव स्नायुशतानीत्यादि। अणुशः प्रविभज्यमानानामिति अणुप्रभेदेन भिद्यमानानाम्। मुखाग्रपरिमाणमिति मुखरूपस्याग्रस्य परिमाणम्। अत्र यान्येव सप्त सिराशतानि धमनीशतद्वयं चोक्तं तदेव सूक्ष्मप्रतानाग्रभेदगणनया एकोनत्रिंशत्सहस्राणि नव च शतानि षट्पञ्चाशत्कानि भवन्ति, स्थूलगणनतया तु पूर्वसङ्ख्या सिराधमन्यन्तर्भवतीति न विरोधः। तावन्ति चैव केशश्मश्रुलोमानीति एकोनत्रिंशत्सहस्राणि नवशतानि षट्पञ्चाशत्कानि केशश्मश्रुलोम्नां भवन्तीत्यर्थः। एतच्च केशादिसङ्ख्यानं स्थूलसिरामुखगतकेशादिविभागेन ज्ञेयं, सूक्ष्मतमविभागेन तु केशादीनां बहुत्वमपि शास्त्रान्तरोक्तं भवतीति ज्ञेयम्। एतत् त्वक्प्रभृति दृश्यं तर्क्यं च स्नाय्वादि यथावत् सङ्ख्यातमिति योजना। सम्प्रति यथोक्तं त्वगादीनां मानं प्रकृतिस्थे शरीरे न व्यभिचरतीति दर्शयन्नाह— एतदुभयमित्यादि। उभयमिति दृश्यं तर्क्यं च। प्रकृतिभावादिति अविकृतत्वाच्छरीरस्य। यत्र तु शरीरं विकृतं भवति तत्र यथोक्तं त्वगादिमानमपि विकृतं भवतीति भावः। किंवा, एतद्यथावत्सङ्ख्यातमिति छेदः। एकीयमतमाह—

'त्वक्प्रभृति दृश्यं तर्क्यमेव चैके' इति पाठः। अर्थस्तु— त्वक्प्रभृति यदुक्तं दृश्यं तदपि तर्क्यमेवेत्येके आचार्या ब्रुवते, तदुभयमिति तदेकीयमतमस्मन्मतं च, न विकल्पते इति यथोक्तावयवसङ्ख्या(व्य)तिरेकेण न व्यवस्थाप्यते; प्रकृतिभावाच्छरीरस्येति पूर्ववद् व्याख्येयम्। एतेन यत्त्वगादि तर्क्यमेव वा भवतु, दृश्यं तर्क्यभेदभिन्नं वा भवतु, तथाऽपि यथोक्तं सङ्ख्यां नातिक्रामतीति वाक्यार्थः॥१४॥

यत्त्वञ्जलिसङ्ख्येयं तदुपदेक्ष्यामः; तत् परं प्रमाणमभिज्ञेयं, तच्च वृद्धिह्रासयोगि, तर्क्यमेव। तद्यथा— दशोदकस्याञ्जलयः शरीरे स्वेनाञ्जलिप्रमाणेन, यत्तु प्रच्यवमानं पुरीषमनुबध्नात्यतियोगेन तथा मूत्रं रुधिरमन्यांश्च शरीरधातून्, यत्तु सर्वशरीरचरं बाह्या त्वग्बिभर्ति, यत्तु त्वगन्तरे व्रणगतं लसीकाशब्दं लभते, यच्चोष्मणाऽनुबद्धं लोमकूपेभ्यो निष्पतत् स्वेदशब्दमवाप्नोति, तदुदकं दशाञ्जलिप्रमाणं; नवाञ्जलयः पूर्वस्याहारपरिणामधातोः, यं 'रस' इत्याचक्षते; अष्टौ शोणितस्य, सप्त पुरीषस्य, षट् श्लेष्मणः, पञ्च पित्तस्य, चत्वारो मूत्रस्य, त्रयो वसायाः, द्वौ मेदसः, एको मज्जायाः, मस्तिष्कस्यार्धाञ्जलिः, शुक्रस्य तावदेव प्रमाणं, तावदेव श्लैष्मिकस्यौजस इति। एतच्छरीरतत्त्वमुक्तम्॥१५॥

ननु यथा प्रकृतिस्थे शरीरे यथोक्तं मानं त्वगादि न व्यभिचरति, तथा किं प्रकृतिस्थे शरीरे तदुदकाद्यपि यथोक्तं मानं न व्यभिचरतीत्याह— यत्त्वञ्जलीत्यादि। यत्तु उदकादि अञ्जलिसङ्ख्येयमग्रे वक्ष्यमाणं, तदुदकादेः परमुत्कृष्टं प्रमाणम्। तेन प्रकृतिस्थेऽपि शरीरे उदकादि वृद्धिह्रासयोगि भवतीति तर्क्यमेव। एतेन, यदुदकादेरिह प्रमाणमभिधातव्यं तत् प्रकृष्टस्योदकादेः प्रमाणं; तेनोक्तप्रमाणात् किञ्चिन्न्यूनमपि तथाऽधिकमपि यदुदकादिमानं तदपि प्रकृतमानमेव। दशोदकाञ्जय इत्यादावभिधायापि तदुदकं दशाञ्जलिप्रमाणमिति पुनर्यत् करोति, तेन मध्यग्रन्थकृतलसीकास्वेदादिसञ्ज्ञया उदकस्यानन्यतां दर्शयति। पूर्वस्येति प्रथमस्य। वसा मांसस्नेहः। मस्तिष्कः शिरोगतस्नेहः। श्लैष्मिकस्यौजस इत्यनेन

यदोजोऽष्टबिन्दुकं तद्व्यतिरिक्तस्यौजस ओजोवहधमनीवाह्यस्य विशुद्धश्लेष्मसमानगुण-स्यार्धाञ्जलिप्रमाणतां दर्शयति। ओजो हि परावरभेदेन द्विविधमर्थेदशमहामूलीये दर्शितमेव॥ १५॥

तत्र यद्विशेषतः स्थूलं स्थिरं मूर्तिमद्गुरुखरकठिनमङ्गं नखास्थिदन्तमांसचर्मवर्चःकेशश्मश्रु-लोमकण्डरादि तत् पार्थिवं गन्धो घ्राणं च; यद्द्रवसरमन्दस्निग्धमृदुपिच्छिलं रसरुधिरवसाकफपित्त-मूत्रस्वेदादि तदाप्यं रसो रसनं च; यत् पित्तमूष्मा च यो या च भाः शरीरे तत् सर्वमाग्नेयं रूपं दर्शनं च; यदुच्छ्वासप्रश्वासोन्मेषनिमेषाकुञ्चनप्रसारणगमनप्रेरणधारणादि तद्वायवीयं स्पर्शः स्पर्शनं च; यद्विविक्तं यदुच्यते महान्ति चाणूनि स्रोतांसि तदान्तरीक्षं शब्दः श्रोत्रं च; यत् प्रयोक्तृ तत् प्रधानं बुद्धिर्मनश्च। इति शरीरावयवसङ्ख्या यथास्थूलभेदेनावयवानां निर्दिष्टा॥ १६॥

शरीरावयवसङ्ख्यां प्रमाणतोऽभिधाय पार्थिवादिभेदेनावयवानभिधातुमाह— तत्रेत्यादि। सरं किञ्चिद्गतिमत्। मन्दं मन्दक्रियम्। विविक्तमिति विभक्तम्। यदुच्यत इति वचनमित्यर्थः। शब्दग्रहणेनेह वचनव्यतिरिक्तः शब्दः शारीरो गृह्यते, वचनस्य यदुच्यत इतिपदेनैव गृहीतत्वात्। प्रयोक्तृ इति यच्छरीरादिप्रेरकं चेतनम्। यथास्थूलभेदेनेति वचनात् सूक्ष्मावयवभेदेन परमाणुरूपेणासङ्ख्येयतां वक्ष्यमाणां सूचयति। अतिबहुत्वादित्यनेनातिबहुत्वमपि गङ्गावालुकानामिवासङ्ख्यातहेतुर्भवतीति दर्शयति॥ १६॥

शरीरावयवास्तु परमाणुभेदेनापरिसङ्ख्येया भवन्ति, अतिबहुत्वादतिसौक्ष्म्यादतीन्द्रियत्वाच्च। तेषां संयोगविभागे परमाणूनां कारणं वायुः कर्मस्वभावश्च॥ १७॥

अतिसौक्ष्म्यादिति अतिसूक्ष्मबुद्धिबोध्यत्वात्। अतीन्द्रियत्वं च परमाणूनां स्वभावसिद्धमेवास्मदादीन् प्रति। यत्तु सूक्ष्ममतीन्द्रियं वा तत् परिसङ्ख्यातुं नितरामेव दुःशकं भवतीति युक्तं हेतुत्रयमपरिसङ्ख्याने।

अथैते विषयकलिताः परमाणवः कथं शरीरारम्भे संयुज्यन्ते, शरीरविनाशे च वियुज्यन्त इत्याह— तेषामित्यादि। ननु यदि वायुः कारणं परमाणूनां संयोगविभागे, तत् किमिति सर्वदा तौ न करोतीत्याह — कर्मस्वभावश्चेति। न केवलो वायुः किन्तु कर्मस्वभावपरिगृहीत एव। तेन यदा संयोजकस्वभावेन कर्मणा परिगृहीतो वायुर्भवति तदा परमाणूनां संयोगं कुर्वञ्छरीरमारभते; यदा तु वियोजनस्वभावेन कर्मणा वायुः परिगृहीतो भवति तदा विभागं परमाणूनां विनाशरूपं जनयतीत्यर्थः॥१७॥

तदेतच्छरीरं सङ्ख्यातमनेकावयवं दृष्टमेकत्वेन सङ्गः, पृथक्त्वेनापवर्गः। तत्र प्रधानमसक्तं सर्वसत्तानिवृत्तौ निवर्तते इति॥१८॥

इदानीं शरीरसङ्ख्यानफलमाह— तदेतदित्यादि। परमार्थतोऽनेकावयवमपि त(स)च्छरीरं सङ्ख्याने मोहादेकत्वेन दृष्टं सङ्ग उच्यते सङ्गहेतुर्भवतीत्यर्थः। एकत्वेन हि शरीरं पश्यन् तदुपकाराय प्रवर्तमानो रागद्वेषाभ्यां सक्तो भवति। अपवर्ग इति अपवर्गहेतुरित्यर्थः। शरीरं हि पृथगवयवभेदेन भाव्यमानं न ममतास्पदं भवति, ममताभावाच्च न तदुपकारकापकारकेषु रागद्वेषौ भवतः, तदभावाच्च प्रवृत्त्युपरमे सति धर्माधर्माभावादपवर्गो भवतीत्यर्थः। शरीरपृथक्त्वसङ्ख्याने यथा मोक्षो भवति तदाह— तत्रेत्यादि। प्रधानम् आत्मा। तत्रेति शरीरपृथक्त्वभावनायाम्। असक्तमिति यथोक्तक्रमेण रागद्वेषरहितम्। सर्वसत्तानिवृत्ताविति सर्वत्रोपकारके वाऽपकारके च भावे आस्थानिवृत्तौ सत्याम्। निवर्तत इति संसारो निवर्तते॥१८॥

तत्र श्लोकौ—

शरीरसङ्ख्यां यो वेद सर्वावयवशो भिषक्।
तदज्ञाननिमित्तेन स मोहेन न युज्यते॥१९॥
अमूढो मोहमूलैश्च न दोषैरभिभूयते।

निर्दोषो निःस्पृहः शान्तः प्रशाम्यत्यपुनर्भवः॥२०॥

इममेव गद्योक्तमर्थं श्लोकेनाह— शरीरेत्यादि। तदज्ञाननिमित्तेनेति शरीरैकतारूपमिथ्याज्ञानजन्येन। मोहेनेति 'अहं स्थिरशरीरी एको, ममेदमुपकारकं, ममेदमुपकारकम्' इत्यादिरूपेण मोहेन। मोहमूलैरिति मोहकारणकैः। दोषैरिति रागद्वेषैः; निर्दोषत्वेन निःस्पृहो भवति, रागद्वेषमूला हीच्छा तदभावान्न भवति, निःस्पृहश्च सन् सर्वक्रियोपरमाच्छान्तो भवति, शान्तश्च सन् प्रशाम्यति संसरणे विश्राम्यति; ततश्च नास्य पुनर्भवो जन्मरूपो भवतीति॥१९-२०॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते शारीरस्थाने शरीरसङ्ख्याशारीरं नाम सप्तमोऽध्यायः॥७॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायां शारीरस्थाने शरीरसङ्ख्याशारीरं नाम सप्तमोऽध्यायः॥७॥

अष्टमोऽध्यायः।

अथातो जातिसूत्रीयं शारीरं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

सम्प्रति पारिशेष्याज्जातिसूत्रीय उच्यते। जातिशब्देन जन्मकारणमुच्यते, तस्य सूत्रं जन्मोपायकथनं, तदधिकृत्य कृतोऽध्यायो जातिसूत्रीयः॥१-२॥

स्त्रीपुंसयोरव्यापन्नशुक्रशोणितगर्भाशययोः श्रेयसीं प्रजामिच्छतोस्तदर्थाभिनिर्वृत्तिकरं कर्मोपदेक्ष्यामः॥३॥

स्त्रीपुंसयोरिति क्रमनिर्देशं कृत्वा 'अव्यापन्नशोणितगर्भाशयशुक्रयोः' इति निर्देशो यथाक्रमानुरोधाद्यद्यपि युज्यते, तथाऽप्यल्पाक्षरं पूर्वं निपततीति न्यायमाश्रित्य क्रमभेदेन निर्देशः कृतः। श्रेयसीं प्रजामिच्छतोरित्यत्र श्रेयसी प्रजा गुणवान् पुत्रो गुणवती च कन्याऽभिप्रेता, यतोऽत्र कन्योत्पादविधानमपि लेशतः करिष्यति; तेन निर्गुणयोः कन्यापुत्रयोस्तथा नपुंसकस्य चाश्रेयस्त्वेन व्युदासः; अन्ये तु पुत्रमेव श्रेयसीं प्रजामाहुः; यतोऽत्र सर्वं पुत्रमेवोद्दिश्य विधानं प्रायः करिष्यति। तदर्थाभिनिर्वृत्तिकरमिति श्रेयःप्रजारूपप्रयोजननिष्पादकम्॥३॥

अथाप्येतौ स्त्रीपुंसौ स्नेहस्वेदाभ्यामुपपाद्य, वमनविरेचनाभ्यां संशोध्य, क्रमेण प्रकृतिमापादयेत्। संशुद्धौ चास्थापनानुवासनाभ्यामुपाचरेत्; उपाचरेच्च मधुरौषधसंस्कृताभ्यां घृतक्षीराभ्यां पुरुषं, स्त्रियं तु तैलमाषाभ्याम्॥४॥

अथापीत्यादौ अथशब्दोऽधिकारे, अपिशब्दो विशेषार्थः। तेनाव्यापन्नशुक्रशोणितगर्भाशययोरपि स्त्रीपुंसयोः श्रेयःप्रजाजनकगुणाधानार्थं स्नेहादिकर्मकरणमिति दर्शयति। यद्यप्येताविति पदेनैवाधिकृतौ स्त्रीपुंसौ लब्धौ, तथाऽपि पुनर्यतः स्त्रीपुंसाविति करोति तेन युगपदेव स्त्रीपुंसौ स्नेहनादिवक्ष्यमाणकर्मणा योज्याविति दर्शयति। क्रमेणेति पेयादिक्रमेण। स च क्रमो वमने विरेचने च पृथक् पृथक् प्रदेशान्तरोक्तक्रमन्यायेन बोद्धव्यः। पुनः 'संशुद्धौ च' इति वचनात् सम्यक्शुद्धयोरेवास्थापनानुवासने कर्तव्ये, नासम्यक्शुद्धयोरिति दर्शयति। मधुरौषधशब्देन सर्वमधुरौषधग्रहणं, मधुरस्य विशेषेण शुक्रवृद्धिकरत्वात्; अन्ये तु मधुरौषधशब्देन जीवनीयगणमिच्छन्ति॥४॥

ततः पुष्पात् प्रभृति त्रिरात्रमासीत ब्रह्मचारिण्यधःशायिनी, पाणिभ्यामन्नमजर्जरपात्राद्भुञ्जाना, न च काञ्चिन्मृजामापद्येत। ततश्चतुर्थेऽहन्येनामुत्साद्य सशिरस्कं स्नापयित्वा शुक्लानि वासांस्याच्छादयेत् पुरुषं च। ततः शुक्लवाससौ स्रग्विणौ सुमनसावन्योन्यमभिकामौ संवसेयातां स्नानात् प्रभृति युग्मेष्वहःसु पुत्रकामौ, अयुग्मेषु दुहितृकामौ॥५॥

न च न्युब्जां पार्श्वगतां वा संसेवेत। न्युब्जाया वातो बलवान् स योनिं पीडयति, पार्श्वगताया दक्षिणे पार्श्वे श्लेष्मा स च्युतः पिदधाति गर्भाशयं, वामे पार्श्वे पित्तं तदस्याः पीडितं विदहति रक्तं शुक्रं च, तस्मादुत्ताना बीजं गृह्णीयात्; तथाहि यथास्थानमवतिष्ठन्ते दोषाः। पर्याप्ते चैनां शीतोदकेन परिषिञ्चेत्। तत्रात्यशिता क्षुधिता पिपासिता भीता विमनाः शोकार्ता क्रुद्धाऽन्यं च पुमांसमिच्छन्ती मैथुने चातिकामा वा न गर्भं धत्ते, विगुणां वा प्रजां जनयति। अतिबालामतिवृद्धां दीर्घरोगिणीमन्येन वा विकारेणोपसृष्टां वर्जयेत्। पुरुषेऽप्येत एव दोषाः। अतः सर्वदोषवर्जितौ स्त्रीपुरुषौ संसृज्येयाताम्॥६॥

सञ्जातहर्षौ मैथुने चानुकूलाविष्टगन्धं स्वास्तीर्णं सुखं शयनमुपकल्प्य मनोज्ञं हितमशनमशित्वा नात्यशितौ दक्षिणपादेन पुमानारोहेत् वामपादेन स्त्री॥७॥

तत्र मन्त्रं प्रयुञ्जीत— "अहिरसि आयुरसि सर्वतः प्रतिष्ठाऽसि धाता त्वा ददतु विधाता त्वा दधातु ब्रह्मवर्चसा भव" इति। "ब्रह्मा बृहस्पतिर्विष्णुःसोमःसूर्यस्तथाऽश्विनौ। भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम्" इत्युक्त्वा संवसेयाताम्॥८॥

पुष्पादिति आर्तवदर्शनात्। ब्रह्मचारिणीति अधःशायिनीति च त्रिरात्रमित्यनेन सम्बध्यते। अधःशायिनीति नोच्चशय्याशायिनी। पाणिभ्यामन्नमजर्जरपात्राद्भुञ्जानेति पाण्योरुपर्यस्फुटितं पात्रं दत्त्वा तत्रस्थमन्नं भुञ्जाना। न च काञ्चिन्मृजामिति शरीरावयवेषु कृत्स्नशरीरे वा मार्जनम्। पुरुषं च चतुर्थेऽहनि उत्साद्येत्यादिग्रन्थोक्तक्रियया योजयेदिति योजना। स्नानात् प्रभृतीति संवसेयातामित्यनेन सम्बध्यते। तेन स्नानात् प्रभृति मैथुनं विधीयते न तु स्नानदिनात् प्रभृति, पुत्रकामयोर्युग्मदिनविधानात्। युग्मदिनं तु प्रथमर्तुदिनात् प्रभृत्येव गणनीयम्। यदुक्तं **हारीते**— "चतुर्थीषष्ठ्यष्टमीद्वादशीषु गुणवन्तमायुष्मन्तं पुत्रं जनयति, पञ्चमीनवम्येकादशीषु कन्यां गुणवतीं, सप्तम्यां दुर्भगां कन्याम्" इति। न्युब्जामिति अधोमुखीम्। पर्याप्ते इति समाप्ते मैथुने। मैथुने चातिकामेति निवृत्तेच्छेऽपि पुरुषे मैथुनमिच्छन्ती। अन्येन वा विकारेणेति कुष्ठादिना जुगुप्सितेन रोगेण। आरोहेत् शयनमिति सम्बन्धः। 'अहिरसि' इत्यादि 'ददतु मे सुतम्' इत्यन्तो मन्त्रः॥५-८॥

सा चेदेवमाशासीत— बृहन्तमवदातं हर्यक्षमोजस्विनं शुचिं सत्त्वसम्पन्नं पुत्रमिच्छेयमिति, शुद्धस्नानात् प्रभृत्यस्यै मन्थमवदातयवानां मधुसर्पिर्भ्यां संसृज्य श्वेताया गोः सरूपवत्सायाः पयसाऽऽलोड्य राजते कांस्ये वा पात्रे काले काले सप्ताहं सततं प्रयच्छेत् पानाय। प्रातश्च शालियवान्नविकारान् दधिमधुसर्पिर्भिः पयोभिर्वा संसृज्य भुञ्जीत, तथा सायमवदातशरणशयना-सनपानवसनभूषणा च स्यात्। सायं प्रातश्च शश्वच्छ्वेतं महान्तं वृषभमाजानेयं वा हरिचन्दनाङ्गदं पश्येत्। सौम्याभिश्चैनां कथाभिर्मनोनुकूलाभिरुपासीत। सौम्याकृतिवचनोपचारचेष्टांश्च स्त्रीपुरुषा-

नितरानपि चेन्द्रियार्थानवदातान् पश्येत्। सहचर्यश्चैनां प्रियहिताभ्यां सततमुपचरेयुस्तथा भर्ता। न च मिश्रीभावमापद्येयातामिति। अनेन विधिना सप्तरात्रं स्थित्वाऽष्टमेऽहन्याप्लुत्याद्भिः सशिरस्कं सह भर्त्रा अहतानि वस्त्राण्याच्छादयेदवदातानि, अवदाताश्च स्रजो भूषणानि च बिभृयात्॥९॥

हर्यक्षं सिंहविक्रमं; हर्यक्षता सामुद्रकैः स्तुता, तेनोपादेया। इच्छेयमित्यनेकार्थत्वाद्धातूनां लभेयमित्यर्थः; तेन 'आशासीत' इत्यस्य 'इच्छेयं' इत्यनेन न पौनरुक्त्यमिति व्याख्यानयन्ति। काले काले इति सायम्प्रातः। अत्र च मन्थपानस्य तथा शालियवान्नभोजनस्य च विहितत्वादुभावपि काले काले मात्रया करणीयौ। शरणं गृहम्। आजानेयम् उत्तमकुलजातमश्वम्। हरिचन्दनशब्देन श्वेतचन्दनं विवक्षितं, हरिशब्दस्यानेकार्थत्वात्; हरिशब्देन श्वेतस्यैव ग्रहणं, प्रशस्तत्वात्; अङ्गदः अङ्गरागः; किंवा अङ्गदः बाहुभूषणम्। पश्येदिति उपलभेत; तेन श्रोत्रमनोभ्यामपि अवदातत्वग्रहणं लभ्यते॥९॥

तत ऋत्विक् प्रागुत्तरस्यां दिश्यगारस्य प्राक्प्रवणमुदक्प्रवणं वा प्रदेशमभिसमीक्ष्य, गोमयोदकाभ्यां स्थण्डिलमुपलिप्य, प्रोक्ष्य चोदकेन, वेदीमस्मिन् स्थापयेत्। तां पश्चिमेनाहतवस्त्रसञ्चये श्वेतार्षभे वाऽप्यजिन उपविशेद् ब्राह्मणप्रयुक्तः, राजन्यप्रयुक्तस्तु वैयाघ्रे चर्मण्यानडुहे वा, वैश्यप्रयुक्तस्तु रौरवे बास्ते वा। तत्रोपविष्टः पालाशीभिरैङ्गुदीभिरौदुम्बरीभिर्माधूकीभिर्वा समिद्भिरग्निमुपसमाधाय, कुशैः परिस्तीर्य, परिधिभिश्च परिधाय, लाजैः शुक्लाभिश्च गन्धवतीभिः सुमनोभिरुपकिरेत्। तत्र प्रणीयोदपात्रं पवित्रपूतमुपसंस्कृत्य सर्पिराज्यार्थं यथोक्तवर्णानाजानेयादीन् समन्ततः स्थापयेत्॥१०॥

ततः पुत्रकामा पश्चिमतोऽग्निं दक्षिणतो ब्राह्मणमुपविश्यान्वालभेत सह भर्त्रा यथेष्टं पुत्रमाशासाना। ततस्तस्या आशासानाया ऋत्विक् प्रजापतिमभिनिर्दिश्य योनौ तस्याः कामपरिपूरणार्थं काम्यामिष्टिं निर्वर्तयेद् 'विष्णुर्योनिं कल्पयतु' इत्यनयर्चा। ततश्चैवाज्येन स्थालीपाकमभिघार्य त्रिर्जुहुया-

द्यथाम्नायम्। मन्त्रोपमन्त्रितमुदपात्रं तस्यै दद्यात् सर्वोदकार्थान् कुरुष्वेति। ततः समाप्ते कर्मणि पूर्वं दक्षिणपादमभिहरन्ती प्रदक्षिणमग्निमनुपरिक्रामेत् सह भर्त्रा। ततो ब्राह्मणान् स्वस्ति वाचयित्वाऽऽज्यशेषं प्राश्नीयात् पूर्वं पुमान्, पश्चात् स्त्री; न चोच्छिष्टमवशेषयेत्। ततस्तौ सह संवसेयातामष्टरात्रं, तथाविधपरिच्छदावेव च स्यातां, तथेष्टपुत्रं जनयेताम्॥११॥

या तु स्त्री श्यामं लोहिताक्षं व्यूढोरस्कं महाबाहुं च पुत्रमाशासीत, या वा कृष्णं कृष्णमृदुदीर्घकेशं शुक्लाक्षं शुक्लदन्तं तेजस्विनमात्मवन्तम्; एष एवानयोरपि होमविधिः। किन्तु परिबर्हो वर्णवर्जं स्यात्। पुत्रवर्णानुरूपस्तु यथाशीरेव तयोः परिबर्होऽन्यः कार्यः स्यात्॥१२॥

शूद्रा तु नमस्कारमेव कुर्यात् (देवाग्निद्विजगुरुतपस्विसिद्धेभ्यः)॥१३॥

या या च यथाविधं पुत्रमाशासीत तस्यास्तस्यास्तां तां पुत्राशिषमनुनिशम्य तांस्ताञ्जनपदान्मनसाऽनुपरिक्रामयेत्। ततो या या येषां येषां जनपदानां मनुष्याणामनुरूपं पुत्रमाशासीत सा सा तेषां तेषां जनपदानां मनुष्याणामाहारविहारोपचारपरिच्छदाननुविधत्स्वेति वाच्या स्यात्। इत्येतत् सर्वं पुत्राशिषां समृद्धिकरं कर्म व्याख्यातं भवति॥१४॥

स्थण्डिलं पूजनस्थानम्। वेदीं पिण्डिकाम्। तां पश्चिमेनेति वेदिकायाः पश्चिमे। श्वेतार्षभे वाऽप्यजिने इति श्वेतवृषभचर्मणि वेत्यर्थः। ब्राह्मणप्रयुक्त इति यदि ब्राह्मणेन पुत्रेष्ट्यर्थं प्रयुक्तः स्यात् तदा स ऋत्विक् श्वेतवस्त्रसञ्चये श्वेतवृषभचर्मणि वा उपविशेत्। राजन्यप्रयुक्तस्तु वैयाघ्रादिचर्मणि 'उपविशेत्' इति शेषः। रुरुः हरिणविशेषः। परिधिभिरिति चतुर्भिः पलाशबृहद्दण्डैः। परिधायेति वेष्टयित्वा। पवित्रमेव पूतं मन्त्रेण पवित्रपूतं, तच्चोदपात्रविशेषणम्। उपसंस्कृत्येति तदुदपात्रमेव संस्कारमन्त्रैरुपसंस्कृत्य। सर्पिराज्यार्थमिति नवनीतं घृतार्थं; किंवा सर्पिर्घृतमेव, आज्यार्थमिति मन्त्रपूतघृतकरणार्थम्; आज्यशब्देन मन्त्राभिमन्त्रितं घृतमुच्यते। पश्चिमतोऽग्निं दक्षिणतो ब्राह्मणमिति यथा पूर्वेणाग्निर्वामे च ब्राह्मणो भवति तथेत्यर्थः। अनुलभेतेति ऋत्विक्प्रयुक्ता

ऋत्विग्विधानमनुकुर्यादित्यर्थः। प्रजापतिमभिनिर्दिश्येति ब्रह्माणमभिमन्त्र्य। योनौ कामपूरणार्थमग्नाविष्टिं निर्वपेत् इष्टिं कुर्यात्। विष्णुर्योनिमित्यादिका इष्टिसाधिका ऋक्। पाकमिति चरुम्। अभिघार्येति मिश्रीकृत्य। यथाम्नायमिति यथावेदम्। किन्तु परिबर्हो वर्णवर्जमिति परिबर्हः शयनासनपुष्पादिपरिच्छदः; तेन यथाविधा पुत्रेच्छा तथावर्णः परिबर्हः कर्तव्य इति वाक्यार्थः। शूद्राविधानमाह— शूद्रा त्वित्यादि। नमस्कारमेव कुर्यादिति शूद्राया मन्त्रे होमे चानधिकारात् नमस्कारमात्रकरणम्॥१०-१४॥

न खलु केवलमेतदेव कर्म वर्णवैशेष्यकरं भवति। अपि तु तेजोधातुरप्युदकान्तरिक्षधातुप्रायोऽवदातवर्णकरो भवति, पृथिवीवायुधातुप्रायः कृष्णवर्णकरः, समसर्वधातुप्रायः श्यामवर्णकरः॥१५॥

वर्णविशेषकरं हेत्वन्तरमाह— न तु खल्वित्यादि। तेजोधातुः कृष्णवर्णे श्यामवर्णे च वर्तते॥१५॥

सत्त्ववैशेष्यकराणि पुनस्तेषां तेषां प्राणिनां मातापितृसत्त्वान्यन्तर्वत्न्याः श्रुतयश्चाभीक्ष्णं स्वोचितं च कर्म सत्त्वविशेषाभ्यासश्चेति॥१६॥

वर्णविशेषहेतुमभिधाय सत्त्वभेदहेतुमाह— सत्त्वेत्यादि। मातापितृसत्त्वानीति मातापित्रनुकारेण सत्त्वानि प्रायः प्रभावादेव भवन्ति। अन्तर्वत्नी गर्भिणी। श्रुतयश्चाभीक्ष्णमिति यथा गर्भिणी गीतादि शृणोति, तथासत्त्वमपत्यं जनयति। स्वोचितं च कर्मेति गर्भेणोपार्जितं कर्म स्वफलानुरूपं सत्त्वं जनयति। सत्त्वविशेषाभ्यासश्चेति यथाविधं सत्त्वं पुरुषोऽभ्यस्यति जन्मान्तरे तथासत्त्व एव जायते। वचनं हि— "जन्म जन्म यदभ्यस्तं दानमध्ययनं तपः। तेनैवाभ्यासयोगेन तच्चैवाभ्यसते नरः" इति॥१६॥

यथोक्तेन विधिनोपसंस्कृतशरीरयोः स्त्रीपुरुषयोर्मिश्रीभावमापन्नयोः शुक्रं शोणितेन सह संयोगं समेत्याव्यापन्नमव्यापन्नेन योनावनुपहतायामप्रदुष्टे गर्भाशये गर्भमभिनिर्वर्तयत्येकान्तेन। यथा— निर्मले वाससि सुपरिकल्पिते रञ्जनं समुदितगुणमुपनिपातादेव रागमभिनिर्वर्तयति, तद्वत्; यथा वा क्षीरं दध्नाऽभिषुतमभिषवणाद्विहाय स्वभावमापद्यते दधिभावं, शुक्रं तद्वत्॥१७॥

सम्प्रति गर्भोत्पत्तिक्रममाह— यथोक्तेनेत्यादि। यथोक्तेन विधिनेति पञ्चकर्मोक्तेन। रञ्जनं रागद्रव्यम्। दध्यभिषुतमिति दध्ना स्तोकमात्रेण मिश्रितम्। आपद्यते दधिभावमिति दधित्वमापद्यते। तद्वदिति यथा क्षीरं दधि भवति, रञ्जनं रागो वा भवति, तथा शुक्रं गर्भमभिनिर्वर्तयति। शुक्रं यथोक्तं शोणितयुक्तमित्यर्थः॥१७॥

एवमभिनिर्वर्तमानस्य गर्भस्य स्त्रीपुरुषत्वे हेतुः पूर्वमुक्तः। यथा हि बीजमनुपतप्तमुप्तं स्वां स्वां प्रकृतिमनुविधीयते व्रीहिर्वा व्रीहित्वं यवो वा यवत्वं तथा स्त्रीपुरुषावपि यथोक्तं हेतुविभागमनुविधीयेते॥१८॥

यथोक्तं हेतुविभागमनुविधीयेते इति "रक्तेन कन्यामधिकेन पुत्रं शुक्रेण" (शा.अ.२) इत्यादिग्रन्थोक्तविभागं स्त्रीपुरुषजनकमनुविधीयेते॥१८॥

तयोः कर्मणा वेदोक्तेन विवर्तनमुपदिश्यते प्राग्व्यक्तीभावात् प्रयुक्तेन सम्यक्। कर्मणां हि देशकालसम्पदुपेतानां नियतमिष्टफलत्वं, तथेतरेषामितरत्वम्। तस्मादापन्नगर्भां स्त्रियमभिसमीक्ष्य प्राग्व्यक्तीभावाद्गर्भस्य पुंसवनमस्यै दद्यात्। गोष्ठे जातस्य न्यग्रोधस्य प्रागुत्तराभ्यां शाखाभ्यां शुङ्गे अनुपहते आदाय द्वाभ्यां धान्यमाषाभ्यां सम्पदुपेताभ्यां गौरसर्षपाभ्यां वा सह दध्नि प्रक्षिप्य पुष्येण पिबेत्, तथैवापराञ्जीवकर्षभकापामार्गसहचरकल्कांश्च युगपदेकैकशो यथेष्टं वाऽप्युपसंस्कृत्य पयसा,

कुड्यकीटकं मत्स्यकं वोदकाञ्जलौ प्रक्षिप्य पुष्येण पिबेत्, तथा कनकमयान् राजतानायसांश्च पुरुषकानग्निवर्णानणुप्रमाणान् दध्नि पयस्युदकाञ्जलौ वा प्रक्षिप्य पिबेदनवशेषतः पुष्येण, पुष्येणैव च शालिपिष्टस्य पच्यमानस्योष्माणमुपाघ्राय तस्यैव च पिष्टस्योदकसंसृष्टस्य रसं देहल्यामुपनिधाय दक्षिणे नासापुटे स्वयमासिञ्चेत् पिचुना। यच्चान्यदपि ब्राह्मणा ब्रूयराप्ता वा स्त्रियः पुंसवनमिष्टं तच्चानुष्ठेयम्। इति पुंसवनानि॥१९॥

सम्प्रति स्त्रीत्वे पुरुषत्वे च रक्ताधिकत्वं तथा शुक्राधिकत्वं च पूर्वोक्तं हेतुमनूद्य वैदिकं पुत्रजनकं विधानान्तरमाह— तयोरित्यादि। वेदोक्तेनेति आयुर्वेदोक्तेन। प्राग्व्यक्तीभावादिति यावन्न स्त्रीत्वं पुंस्त्वं वा गर्भस्य व्यक्तं भवति तावदेव तद्वक्ष्यमाणं कर्म लिङ्गपरिवृत्तिकरं भवति। व्यक्तिस्तु द्वितीये मासे भवति; यदुक्तं— "द्वितीये मासे घनः सम्पद्यते" (शा.अ.४) इत्यादि; किंवा तृतीये मासे अङ्गप्रत्यङ्गाभिव्यक्तेर्व्यक्तीभावो ज्ञेयः, द्वितीये तु मासे ग्रन्थ्यादिरूपे गर्भे प्रत्यङ्गव्यक्तीभावो न व्यक्तः; तेन वक्ष्यमाणं कर्म मासद्वयं यावत् कर्तव्यम्। प्रयुक्तेनेति पूर्वेण सम्बध्यते। नियतं निश्चितम्। तथेतरेषामितरत्वमिति कर्मणां देशकालविगुणानामनिष्टफलं निश्चितमित्यर्थः। पुंसवनमिति पुंस्त्वकारकं कर्म। गोष्ठः गवां विश्रामस्थानम्। अत्र च स्थानादि विशेषपरिग्रह एव फलदो भवतीति वचनादुन्नीयते, नात्रास्मादृशां युक्तयः प्रभवन्ति। धान्यमाषशब्देन व्रीहिमाषं ग्राहयन्ति, सुवर्णमाषं च व्यावर्तयन्ति। गौरसर्षपः श्वेतसर्षपः। पुष्येणेति पुष्यनक्षत्रेण। यथेष्टमित्यनेन द्विशस्त्रिशो वा पिबेदित्यपि दर्शयति। कुड्यकीटः 'कवडिगणा' इति ख्यातः; किंवा ज्येष्ठी कुड्यकीटः। **जतूकर्ण**ऽप्यत्र प्रयोगे 'भित्तिमत्स्यः' इति पठ्यते, भित्तिमत्स्यशब्देन च पाश्चात्ये 'ज्येष्ठी' उच्यते। मत्स्यकः ह्रस्वमत्स्यः। देहली गृहद्वाराधःकाष्ठं, तत्रोपनिधाय 'शिर' इति शेषः; किंवा आत्मानमेव देहल्यामुपनिधीयेति मन्तव्यम्। यदुक्तं **जतूकर्णे**— "देहल्यामासीना" इति॥१९॥

अत ऊर्ध्वं गर्भस्थापनानि व्याख्यास्यामः— ऐन्द्री ब्राह्मी शतवीर्या सहस्रवीर्याऽमोघाऽव्यथा शिवाऽरिष्टा वाट्यपुष्पी विष्वक्सेनकान्ता चेत्यासामोषधीनां शिरसा दक्षिणेन वा पाणिना धारणं, एताभिश्चैव सिद्धस्य पयसः सर्पिषो वा पानम्, एताभिश्चैव पुष्ये पुष्ये स्नानं, सदा च ताः समालभेत। तथा सर्वासां जीवनीयोक्तानामोषधीनां सदोपयोगस्तैस्तैरुपयोगविधिभिः। इति गर्भस्थापनानि व्याख्यातानि भवन्ति॥२०॥

सम्प्रति स्थितस्य गर्भस्य गर्भोपघातकभावप्रभावखण्डकत्वेन यत् पुनः स्थितिकारकं तद्गर्भस्थापनमुच्यते— अत ऊर्ध्वमित्यादिना। ऐन्द्री गोरक्षकर्कटी। शतवीर्यासहस्रवीर्ये दूर्वाद्वयम्। अमोघा पाटला। अव्यथा गूडूची। अरिष्टा कटुरोहिणी। वाट्यपुष्पी पीतबला। विष्वक्सेनकान्ता प्रियङ्गुः॥२०॥

गर्भोपघातकरास्त्विमे भावा भवन्ति; तद्यथा— उत्कटविषमकठिनासनसेविन्या वातमूत्रपुरीषवेगानुपरुन्धत्या दारुणानुचितव्यायामसेविन्यास्तीक्ष्णोष्णातिमात्रसेविन्याः प्रमिताशनसेविन्या गर्भो म्रियतेऽन्तः कुक्षेः, अकाले वा स्रंसते, शोषी वा भवति; तथाऽभिघातप्रपीडनैः श्वभ्रकूपप्रपातदेशावलोकनैर्वाऽभीक्ष्णं मातुः प्रपतत्यकालेगर्भः, तथाऽतिमात्रसङ्क्षोभिभिर्यानैर्यानेन, अप्रियातिमात्रश्रवणैर्वा। प्रततोत्तानशायिन्याः पुनर्गर्भस्य नाभ्याश्रया नाडी कण्ठमनुवेष्टयति, विवृतशायिनी नक्तञ्चारिणी चोन्मत्तं जनयति, अपस्मारिणं पुनः कलिकलहशीला, व्यवायशीला दुर्वपुषमह्रीकं स्त्रैणं वा, शोकनित्या भीतमपचितमल्पायुषं वा, अभिध्यात्री परोपतापिनमीर्ष्युं स्त्रैणं वा, स्तेना त्वायासबहुलमतिद्रोहिणमकर्मशीलं वा, अमर्षिणी चण्डमौपधिकमसूयकं वा स्वप्ननित्या तन्द्रालुमबुधमल्पाग्निं वा, मद्यनित्या पिपासालुमल्पस्मृतिमनवस्थितचित्तं वा, गोधामांसप्राया शार्करिणमश्मरिणं शनैर्मेहिणं वा, वराहमांसप्राया रक्ताक्षं क्रथनमतिपरुषरोमाणं वा, मत्स्यमांसनित्या चिरनिमेषं स्तब्धाक्षं वा, मधुरनित्या प्रमेहिणं मूकमतिस्थूलं वा, अम्लनित्या रक्तपित्तिनं त्वगक्षिरोगिणं

वा, लवणनित्या शीघ्रवलीपलितं खालित्यरोगिणं वा, कटुकनित्या दुर्बलमल्पशुक्रमनपत्यं वा, तिक्तनित्या शोषिणमबलमनुपचितं वा, कषायनित्या श्यावमानाहिनमुदावर्तिनं वा, यद्यच्च यस्य यस्य व्याधेर्निदानमुक्तं तत्तदासेवमानाऽन्तर्वत्नी तन्निमित्तविकारबहुलमपत्यं जनयति। पितृजास्तु शुक्रदोषा मातृजैरपचारैर्व्याख्याताः। इति गर्भोपघातकरा भावा भवन्त्युक्ताः। तस्मादहितानाहारविहारान् प्रजासम्पदमिच्छन्ती स्त्री विशेषेण वर्जयेत्। साध्वाचारा चात्मानमुपचरेद्धिताभ्यामाहार-विहाराभ्यामिति॥२१॥

बालस्याचिरजातस्यापि गर्भव्यपदेशो भवति, तेन कुक्षेर्बहिरपि मरणसद्भावे अन्तःकुक्षेरिति विशेषणमुपपन्नम्। प्रततोत्तानशायिनी उत्तानशयनशीला। विवृते अनावृते देशे शयनशीला विवृतशायिनी। विवृतशायिनी तथा नक्तञ्चारिणी च रक्षःप्रभृतिभूताभिगमनीया भवति; ततश्च भूतैरभिभूतो गर्भ उन्मत्तो भवतीति युक्तम्। कलिः वाचिकः, कलहस्तु शारीरकः। स्त्रैणं स्त्रीवशम्। अभिध्यात्री मनसा द्रोहणशीला। औपधिकं शाठ्यप्रचारिणम्। क्रथनम् अकस्मादुच्छ्वासावरोधः, तद्वानपि 'क्रथन' इत्युच्यते। मधुरनित्येह गर्भिणीविहितं क्षीरं विहायान्यमधुरानुसेविनी बोद्धव्या; क्षीरस्य तु विहितत्वेन प्राशस्त्यम्। तत्र षण्णामपि रसानामत्यर्थोपयोगे दोषमभिधाय यत् पुनर्मद्यादीनामत्यर्थसेवने पृथग्दोषं ब्रूते, तद्द्रव्यप्रभावस्य दोषविशेषाभिधानार्थमिति ज्ञेयम्। यद्वस्तुसेवया ये विकारा इह गर्भस्योचितनिदाना दृश्यन्ते ते तावदुचितोत्पादा एव। यथा— निद्रातिसेवया तन्द्रालुः, मधुरसेवया मेही, अम्लेन रक्तपित्तादियुक्त इत्यादि। ये तु हेत्वसदृशा विकारा गर्भस्य दृश्यन्ते, यथा— गोधामांसेन शर्कराश्मरीत्यादि, तेऽपि द्रव्यप्रभावादेव ज्ञेयाः। यद्यपि गर्भग्रहणात् प्रागपि स्त्रिया अपथ्यसेवाऽऽर्तवदुष्टिद्वारा गर्भे विकारं जनयति, तथा पुरुषस्यापथ्यसेवा शुक्रदुष्टिद्वारा गर्भे दुष्टिं जनयतीति इहैव 'पितृजास्तु' इत्यादिना ग्रन्थेन वक्तव्यं, तथाऽपि गृहीतगर्भायाः स्त्रिया अपचारविशेषेणाव्यवधानाद्गर्भदुष्टिकरा भवन्तीति कृत्वा 'तत्तदासेवमानाऽन्तर्वत्नी' इत्युक्तम्। मातृजैरपचारैर्व्याख्याता इति यथा मातुरपचारानुरूपा

गर्भव्याधयो भवन्ति; एवं पितुरपि व्यवायात् प्रागपचारेण शुक्रदुष्ट्याऽपचारानुरूपा व्याधयो भवन्तीत्यर्थः। स्त्री विशेषेणेत्यनेन पुरुषोऽपि वर्जयेदिति दर्शयति। साध्वाचारेति मङ्गलाचारशीला॥ २१॥

व्याधींश्चास्या मृदुमधुरशिशिरसुखसुकुमारप्रायैरौषधाहारोपचारैरुपचरेत्, न चास्या वमनविरेचनशिरोविरेचनानि प्रयोजयेत्, न रक्तमवसेचयेत्, सर्वकालं च नास्थापनमनुवासनं वा कुर्यादन्यत्रात्ययिकाद्व्याधेः। अष्टमं मासमुपादाय वमनादिसाध्येषु पुनर्विकारेष्वात्ययिकेषु मृदुभिर्वमनादिभिस्तदर्थकारिभिर्वोपचारः स्यात्। पूर्णमिव तैलपात्रमसङ्क्षोभयताऽन्तर्वत्नी भवत्युपचर्या॥२२॥

सा चेदपचाराद् द्वयोस्त्रिषु वा मासेषु पुष्पं पश्येन्नास्या गर्भः स्थास्यतीति विद्यात्; अजातसारो हि तस्मिन् काले भवति गर्भः॥२३॥

सा चेच्चतुष्प्रभृतिषु मासेषु क्रोधशोकासूयेर्ष्याभयत्रासव्यवायव्यायामसङ्क्षोभ-सन्धारणविषमाशनशयनस्थानक्षुत्पिपासातियोगात् कदाहाराद्वा पुष्पं पश्येत्, तस्या गर्भस्थापनविधिमुपदेक्ष्यामः। पुष्पदर्शनादेवैनां ब्रूयात्— शयनं तावन्मृदुसुखशिशिरास्तरणसं-स्तीर्णमीषदवनतशिरस्कं प्रतिपद्यस्वेति। ततो यष्टीमधुकसर्पिर्भ्यां परमशिशिरवारिणी संस्थिताभ्यां पिचुमाप्लाव्योपस्थसमीपे स्थापयेत्तस्याः, तथा शतधौतसहस्रधौताभ्यां सर्पिर्भ्यामधोनाभेः सर्वतः प्रदिह्यात्, सर्वतश्च गव्येन चैनां पयसा सुशीतेन मधुकाम्बुना वा न्यग्रोधादिकषायेण वा परिषेचयेदधो नाभेः, उदकं वा सुशीतमवगाहयेत्, क्षीरिणां कषायद्रुमाणां च स्वरसपरिपीतानि चेलानि ग्राहयेत्, न्यग्रोधादिशुङ्गासिद्धयोर्वा क्षीरसर्पिषोः पिचुं ग्राहयेत्, अतश्चैवाक्षमात्रं प्राशयेत्, प्राशयेद्वा केवलं क्षीरसर्पिः, पद्मोत्पलकुमुदकिञ्जल्कांश्चास्यै समधुशर्करान् लेहार्थं दद्यात्, शृङ्गाटकपुष्करबीज-

कशेरुकान् भक्षणार्थं, गन्धप्रियङ्गसितोत्पलशालूकोदुम्बरशलाटुन्यग्रोधशुङ्गानि वा पाययेदेनामाजेन पयसा, पयसा चैनां बलातिबलाशालिषष्टिकेक्षुमूलकाकोलीश्टतेन समधुशर्करं रक्तशालीनामोदनं मृदुसुरभिशीतलं भोजयेत्, लावकपिञ्जलकुरङ्गशम्बरशशहरिणैणकालपुच्छकरसेन वा घृतसुसंस्कृतेन सुखशिशिरोपवातदेशस्थां भोजयेत्, क्रोधशोकायासव्यवायव्यायामेभ्यश्चाभिरक्षेत्, सौम्याभिश्चैनां कथाभिर्मनोनुकूलाभिरुपासीत; तथाऽस्या गर्भस्तिष्ठति॥ २४॥

मृदुभिर्वमनादिभिरिति मृदुद्रव्यकृतैरल्पमात्रैश्च वमनादिभिरित्यर्थः। तदर्थकारिभिर्वेति यथा वमनार्थकारि निष्ठीवनं, विरेचनार्थकारिणी फलवर्तिः, इत्यादिभिरुपचारः कर्तव्यः। सन्धारणं वेगसन्धारणम्। कदाहारः कुत्सिताहारः। शिशिरं शीतम्। यष्टीमधुकसिद्धं सर्पिः यष्टीमधुकसर्पिः। चेलानि ग्राहयेदित्यत्र 'योनिं' इति शेषः। अतश्चैवेति न्यग्रोधादिशुङ्गात्। किंवा 'क्षीरसर्पिषः' इत्यस्मिन् पाठे क्षीरोत्थितं सर्पिः क्षीरसर्पिः॥ २२-२४॥

यस्याः पुनरामान्वयात् पुष्पदर्शनं स्यात्, प्रायस्तस्यास्तद्गर्भोपघातकरं भवति, विरुद्धोपक्रमत्वात्तयोः॥ २५॥

यस्याः पुनरुष्णतीक्ष्णोपयोगाद्गर्भिण्या महति सञ्जातसारे गर्भे पुष्पदर्शनं स्यादन्यो वा योनिस्रावस्तस्या गर्भो वृद्धिं न प्राप्नोति निःस्रुतत्वात्; स कालमवतिष्ठतेऽतिमात्रं, तमुपविष्टकमित्याचक्षते केचित्। उपवासव्रतकर्मपरायाः पुनः कदाहारायाः स्नेहद्वेषिण्या वातप्रकोपणोक्तान्यासेवमानाया गर्भो वृद्धिं न प्राप्नोति परिशुष्कत्वात्; स चापि कालमवतिष्ठतेऽतिमात्रम्, अस्पन्दनश्च भवति, तं तु नागोदरमित्याचक्षते॥ २६॥

आमान्वयादिति आमजनकहेतोः सकाशादित्यर्थः। विरुद्धोपक्रमत्वादिति गर्भस्रावे हि स्तम्भनं कर्तव्यं, तच्च शीतं मृदु मधुरं च; तच्चामविरुद्धम्, आमजनकत्वात्; इति विरुद्धोपक्रमता। अन्यो वेति आर्तवलक्षणव्यतिरिक्तः। यद्यपि केचिदित्युक्तं, तथाऽप्यप्रतिषेधादाचार्यस्याप्येतत् सम्मतम्॥२५-२६॥

नार्योस्तयोरुभयोरपि चिकित्सितविशेषमुपदेक्ष्यामः— भौतिकजीवनीयबृंहणीयमधुरवातहरसिद्धानां सर्पिषां पयसामामगर्भाणां चोपयोगो गर्भवृद्धिकरः; तथा सम्भोजनमेतैरेव सिद्धैश्च घृतादिभिः सुभिक्षायाः, अभीक्ष्णं यानवाहनापमार्जनावजृम्भणैरुपपादनमिति॥२७॥

यस्याः पुनर्गर्भः प्रसुप्तो न स्पन्दते तां श्येनमत्स्यगवयशिखिताम्रचूडतित्तिरीणामन्यतमस्य सर्पिष्मता रसेन माषयूषेण वा प्रभूतसर्पिषा मूलकयूषेण वा रक्तशालीनामोदनं मृदुमधुरशीतलं भोजयेत्। तैलाभ्यङ्गेन चास्या अभीक्ष्णमुदरबस्तिवङ्क्षणोरुकटीपार्श्वपृष्ठप्रदेशानीषदुष्णेनोपचरेत्॥२८॥

यस्याः पुनरुदावर्तविबन्धः स्यादष्टमे मासे न चानुवासनसाध्यं मन्येत ततस्तस्यास्तद्विकारप्रशमन-मुपकल्पयेन्निरूहम्। उदावर्तो ह्युपेक्षितः सहसा सगर्भां गर्भिणीं गर्भमथवाऽतिपातयेत्। तत्र वीरणशालिषष्टिककुशकाशेक्षुवालिकावेतसपरिव्याधमूलानां भूतीकानन्ताकाश्मर्यपरूषकमधुकमृ-द्वीकानां च पयसाऽर्धोदकेनोद्गमय्य रसं प्रियालबिभीतक-मज्जतिलकल्कसम्प्रयुक्तमीषल्लवणमनत्युष्णं च निरूहं दद्यात्। व्यपगतविबन्धां चैनां सुखसलिलपरिषिक्ताङ्गीं स्थैर्यकरमविदाहिनमाहारं भुक्तवतीं सायं मधुरकसिद्धेन तैलेनानुवासयेत्। न्युब्जां त्वेनामास्थापनानुवासनाभ्यामुपचरेत्॥२९॥

चिकित्सितविशेषमित्यत्र विशेषशब्देन गर्भव्याध्यन्तरापेक्षया चिकित्सितविशेषो ज्ञेयः; उपविष्टकनागोदरयोस्तु विशिष्टैवेह चिकित्सा वक्तव्या; किंवा 'यस्याः पुनर्गर्भः प्रसुप्तो न स्पन्दते' इत्यादिना योऽवस्थायां विशेषो वक्तव्यस्तमपेक्ष्योक्तं— चिकित्सितविशेषमिति। भौतिकं भूतोपघातहितं वचागुग्गुल्वादि; किंवा महापैशाचिकं घृतं वक्ष्यमाणं द्रष्टव्यम्। सुभिक्षाया इति

सुबुभुक्षायाः। न चानुवासनसाध्यं मन्येतेति सामत्वादुदावर्तस्य नानुवासनसाध्यता भवतीति ज्ञेयम्। तद्विकारप्रशमनमिति उदावर्तप्रशमनमित्यर्थः। तदुदावर्तप्रशमनं निरूहमाह— तत्रेत्यादि। परिव्याधो वेतसभेदः। उद्गमय्य रसमिति क्वाथं निष्पाद्य। क्वाथादिपरिमाणं च निरूहपरिमाणपरिभाषयैव कर्तव्यम्। न्युब्जामिति अधोमुखीम्॥२७-२९॥

यस्याः पुनरतिमात्रदोषोपचयाद्वा तीक्ष्णोष्णातिमात्रसेवनाद्वा वातमूत्रपुरीषवेगविधारणैर्वा विषमाश(स)नशयनस्थानसम्पीडनाभिघातैर्वा क्रोधशोकेर्ष्याभयत्रासादिभिर्वा साहसैर्वाऽपरैः कर्मभिरन्तःकुक्षेर्गर्भो म्रियते, तस्याः स्तिमितं स्तब्धमुदरमाततं शीतमश्मान्तर्गतमिव भवत्यस्पन्दनो गर्भः, शूलमधिकमुपजायते, न चाव्यः प्रादुर्भवन्ति, योनिर्न प्रस्रवति, अक्षिणी चास्याः स्रस्ते भवतः, ताम्यति, व्यथते, भ्रमते, श्वसिति, अरतिबहुला च भवति, न चास्या वेगप्रादुर्भावो यथावदुपलभ्यते; इत्येवंलक्षणां स्त्रियं मृतगर्भेयमिति विद्यात्॥३०॥

अश्मान्तर्गतमिवेति अन्तर्गतप्रस्तरमिवेत्यर्थः। आवी प्रसवकालशूलम्॥३०॥

तस्य गर्भशल्यस्य जरायुप्रपातनं कर्म संशमनमित्याहुरेके, मन्त्रादिकमथर्ववेदविहितमित्येके, परिदृष्टकर्मणा शल्यहर्त्रा हरणमित्येके। व्यपगतगर्भशल्यां तु स्त्रियमामगर्भां सुरासीध्वरिष्टमधुमदिरासवानामन्यतममग्रे सामर्थ्यतः पाययेद्गर्भकोष्ठशुद्ध्यर्थमर्तिविस्मरणार्थं प्रहर्षणार्थं च, अतः परं सम्प्रीणनैर्बलानुरक्षिभिरस्नेहसम्प्रयुक्तैर्यवाग्वादिभिर्वा तत्कालयोगिभिराहारैरुपचरे-द्दोषधातुक्लेदविशोषणमात्रं कालम्। अतः परं स्नेहपानैर्बस्तिभिराहारवि-धिभिश्च दीपनीयजीवनीयबृंह-णीयमधुरवातहरसमाख्यातैरुपचरेत्। परिपक्वगर्भशल्यायाः पुनर्विमुक्तगर्भशल्यायास्तदहरेव स्नेहोपचारः स्यात्॥३१॥

'एके' इति वचनेन अप्रतिषेधेन च जरायुपातनकर्मादीनां त्रयाणामपि मृतगर्भापहरणं प्रति सम्यक्साधनता नास्तीति दर्शयति। दोषधातुक्लेदविशोषणमात्रं कालमित्यनेन दोषधातुक्लेदविशोषणावधितां यथोक्तक्रमस्य दर्शयति॥ ३१॥

परमतो निर्विकारमाप्याय्यमानस्य गर्भस्य मासे मासे कर्मोपदेक्ष्यामः। प्रथमे मासे शङ्किता चेद्गर्भमापन्ना क्षीरमनुपस्कृतं मात्रावच्छीतं काले काले पिबेत्, सात्म्यमेव च भोजनं सायं प्रातश्च भुञ्जीत; द्वितीये मासे क्षीरमेव च मधुरौषधसिद्धं; तृतीये मासे क्षीरं मधुसर्पिर्भ्यामुपसंसृज्य; चतुर्थे मासे क्षीरनवनीतमक्षमात्रमश्नीयात्; पञ्चमे मासे क्षीरसर्पिः; षष्ठे मासे क्षीरसर्पिर्मधुरौषधसिद्धं; तदेव सप्तमे मासे। तत्र गर्भस्य केशा जायमाना मातुर्विदाहं जनयन्तीति स्त्रियो भाषन्ते; तन्नेति भगवानात्रेयः, किन्तु गर्भोत्पीडनाद्वातपित्तश्लेष्माण उरः प्राप्य विदाहं जनयन्ति, ततः कण्डूरुपजायते, कण्डूमूला च किक्किसावाप्तिर्भवति। तत्र कोलोदकेन नवनीतस्य मधुरौषधसिद्धस्य पाणितलमात्रं काले कालेऽस्यै पानार्थं दद्यात्, चन्दनमृणालकल्कैश्चास्याः स्तनोदरं विमृद्नीयात्, शिरीषधातकीसर्षपमधुकचूर्णैर्वा, कुटजार्जकबीजमुस्तहरिद्राकल्कैर्वा, निम्बकोलसुरसमञ्जिष्ठाकल्कैर्वा, पृषतहरिणशशरुधिरयुतया त्रिफलया वा; करवीरपत्रसिद्धेन तैलेनाभ्यङ्गः; परिषेकः पुनर्मालतीमधुकसिद्धेनाम्भसा; जातकण्डूश्च कण्डूयनं वर्जयेत्त्वग्भेदवैरूप्यपरिहारार्थम्, असह्यायां तु कण्ड्वामुन्मर्दनोद्धर्षणाभ्यां परिहारः स्यात्; मधुरमाहारजातं वातहरमल्पमस्नेहलवणमल्पोदकानुपानं च भुञ्जीत। अष्टमे तु मासे क्षीरयवागूं सर्पिष्मतीं काले काले पिबेत्; तन्नेति भद्रकाप्यः, पैङ्गल्याबाधो ह्यस्या गर्भमागच्छेदिति; अस्त्वत्र पैङ्गल्याबाध इत्याह भगवान् पुनर्वसुरात्रेयः, न त्वेवैतन्न कार्यम्; एवं कुर्वती ह्यरोगाऽऽरोग्यबलवर्णस्वरसंहननसम्पदुपेतं ज्ञातीनामपि श्रेष्ठमपत्यं जनयति। नवमे तु खल्वेनां मासे मधुरौषधसिद्धेन तैलेनानुवासयेत्। अतश्चैवास्यास्तैलात् पिचुं योनौ प्रणयेद्गर्भस्थानमार्गस्नेहनार्थम्। यदिदं कर्म प्रथमं मासं समुपादायोपदिष्टमानवमान्मासात्तेन गर्भिण्या गर्भसमये गर्भधारिणीकुक्षिकटीपार्श्वपृष्ठं मृदूभवति, वातश्चानुलोमः सम्पद्यते, मूत्रपुरीषे च प्रकृतिभूते सुखेन

मार्गमनुपद्येते, चर्मनखानि च मार्दवमुपयान्ति, बलवर्णौ चोपचीयेते; पुत्रं चेष्टं सम्पदुपेतं सुखिनं सुखेनैषा काले प्रजायत इति॥३२॥

गर्भस्य प्रतिमासिकं कर्माह— परमत इत्यादि। तन्नेति भगवानात्रेय इति युगपदेव तृतीये मासेऽङ्गप्रत्यङ्गनिष्पत्तेः केशा अपि तदैव जाताः क्रमेण वर्धन्ते न सप्तमे मासे इति भावः अथ कथं तर्हि सप्तमे मासि विशेषेण कण्डूर्भवतीत्याह— गर्भोत्पीडनादित्यादि। किक्किसः चर्मविदरणम्। स्तनावुदरं च स्तनोदरम्। कोलं बदरी। परिहारः 'कण्ड्वाः' इति शेषः। पैङ्गल्यं पिङ्गलनेत्रता। सा च यद्यपि पित्तकृता, यदुक्तं **शालाक्ये**— "पित्तेऽत्यर्थप्रदुष्टे तु नेत्रयोः पिङ्गलाक्षिता" इति; तथाऽपीहाष्टममासीयगर्भे क्षीरयवाग्वाहारसम्बन्धप्रभावादेव पैङ्गल्यं भवतीति ज्ञेयम्। न त्वेवैतन्न कार्यमिति पैङ्गल्यस्याल्पदोषत्वादुत्तरकालं सुकरप्रतिक्रियत्वाच्च क्षीरयवाग्ववचारणे बहुगुणलाभात् कर्तव्यमेव क्षीरयवागूसेवनमिति भावः। अतश्चैवेति मधुरौषधसिद्धतैलात्। गर्भधारिणी अपरा। अत्र पुत्रमिति प्रशस्तत्वे नोक्तं, तेन कन्यां चेति बोद्धव्यम्; अतो न प्रतिमासीयेन कर्मणा पुत्रजन्मैव परं भवतीति व्याकृतम्॥३२॥

प्राक् चैवास्या नवमान्मासात् सूतिकागारं कारयेदपहृतास्थिशर्कराकपाले देशे प्रशस्तरूपरसगन्धायां भूमौ प्राग्द्वारमुदग्द्वारं वा बैल्वानां काष्ठानां तैन्दुकैङ्गुदकानां भाल्लातकानां वार(रु)णानां खादिराणां वा; यानि चान्यान्यपि ब्राह्मणाः शंसेयुरथर्ववेदविदस्तेषां; वसनालेपनाच्छादनापिधानसम्पदुपेतं वास्तुविद्याहृदययोगाग्निसलिलोदूखलवर्चःस्थानस्नानभूमिमहानसमृतुसुखं च॥३३॥

यत्र गर्भिणी प्रसूता यत्र च तिष्ठति तत् सूतिकागारमुच्यते। बिल्वादीनां काष्ठानामगारं कारयेदिति सम्बन्धः। वारणः पुन्नागः, वरुणो वा। वसनं वस्त्रम्, आच्छादनम् आस्तरणम्, अपिधानं कपाटम्।

वास्तुविद्याहृदयं वास्तुविद्यातत्त्वं, तद्योगादग्न्यादीनां स्थानं यत्र गृहे तत्तथा; वास्तुविन्मतेन विभक्ताग्न्यादिस्थानं तद्गृहं कर्तव्यमित्यर्थः। वर्तमानर्तुमपेक्ष्य सुखमृतुसुखम्॥३३॥

तत्र सर्पिस्तैलमधुसैन्धवसौवर्चलकालविड्लवणविडङ्गकुष्ठकिलिमनागरपिप्पलीपिप्पलीमूल-हस्तिपिप्पलीमण्डूकपर्ण्यैलालाङ्गली-वचाचव्यचित्रकचिरबिल्वहिङ्गुसर्षपलशुनकतककणकणिका-नीपातसीबल्वजभूर्जकुलत्थमैरेयसुरासवाः सन्निहिताः स्युः; तथाऽश्मानौ द्वौ, द्वे कु(च)ण्डमुसले, द्वे उदूखले, खरवृषभश्च, द्वौ च तीक्ष्णौ सूचीपिप्पलकौ सौवर्णराजतौ, शस्त्राणि च तीक्ष्णायसानि, द्वौ च बिल्वमयौ पर्यङ्कौ, तैन्दुकैङ्गुदानि च काष्ठान्यग्निसन्धुक्षणानि, स्त्रियश्च बह्व्यो बहुशः प्रजाताः सौहार्दयुक्ताः सततमनुरक्ताः प्रदक्षिणाचाराः प्रतिपत्तिकुशलाः प्रकृतिवत्सलास्त्यक्तविषादाः क्लेशसहिन्योऽभिमताः, ब्राह्मणाश्चाथर्ववेदविदः; यच्चान्यदपि तत्र समर्थं मन्येत, यच्चान्यच्च ब्राह्मणा ब्रूयुः स्त्रियश्च वृद्धास्तत् कार्यम्॥३४॥

सर्पिस्तैलादीनां चात्र गृहे स्थापनीयानां वक्तव्य एव तावदुपयोगः; बहुत्वेन येषां तु न वक्तव्यस्तेषामप्ययमुपयोग उन्नेयः। किलिमं देवदारु। कणः 'कुण्डक' इति ख्यातः; कणिका तु कुण्डकात् स्थूलास्तण्डुलावयवा उच्यन्ते। तण्डुला येन कुड्यन्ते तन्मुसलम्। कुण्डमुसले इति ह्रस्वमुसले, किंवा 'चण्डमुसले' इति पाठः; तदा गुरुतरमुसले इत्यर्थः। यद्यपि मुसलग्रहणं निषिद्धं, तथाऽप्युत्तरकालं द्वारे मुसलस्थापनं वक्तव्यमिति साधु मुसलोपादानम्। सूच्याकारे शस्त्रे सूचीपिप्पलकौ; किंवा सूची यत्र स्थाप्यते स सूचीपिप्पलकः। पर्यङ्कः खट्वा। समर्थं मन्येतेति उपयुक्तं मन्येत॥३४॥

ततः प्रवृत्ते नवमे मासे पुण्येऽहनि प्रशस्तनक्षत्रयोगमुपगते प्रशस्ते भगवति शशिनि कल्याणे कल्याणे च करणे मैत्रे मुहूर्ते शान्तिं हुत्वा गोब्राह्मणमग्निमुदकं चादौ प्रवेश्य गोभ्यस्तृणोदकं मधुलाजांश्च प्रदाय

ब्राह्मणेभ्योऽक्षतान् सुमनसो नान्दीमुखानि च फलानीष्टानि दत्त्वोदकपूर्वमासनस्थेभ्योऽभिवाद्य पुनराचम्य स्वस्ति वाचयेत्। ततः पुण्याहशब्देन गोब्राह्मणं समनुवर्तमाना प्रदक्षिणं प्रविशेत् सूतिकागारम्। तत्रस्था च प्रसवकालं प्रतीक्षेत॥३५॥

शान्तिं कृत्वेति शान्तिहोमं कृत्वा। नान्दीमुखानि च फलानि नान्दीमुखश्राद्धाय हितानि फलानि; किंवा नान्दी मुरजः, तन्मुखाकृतीनि फलानि खर्जूरादीनि। पुण्याहशब्दो मङ्गलशब्दः। प्रदक्षिणं यथा भवति तथा गोब्राह्मणं समनुवर्तमाना॥३५॥

तस्यास्तु खल्विमानि लिङ्गानि प्रजननकालमभितो भवन्ति; तद्यथा— क्लमो गात्राणां, ग्लानिराननस्य, अक्ष्णोः शैथिल्यं, विमुक्तबन्धनत्वमिव वक्षसः, कुक्षेरवस्रंसनम्, अधोगुरुत्वं, वङ्क्षणबस्तिकटीकुक्षिपार्श्वपृष्ठनिस्तोदः, योनेः प्रस्रवणम्, अनन्नाभिलाषश्चेति; ततोऽनन्तरमावीनां प्रादुर्भावः, प्रसेकश्च गर्भोदकस्य॥३६॥

आवीप्रादुर्भावे तु भूमौ शयनं विदध्यान्मृद्वास्तरणोपपन्नम्। तदध्यासीत सा। तां ततः समन्ततः परिवार्य यथोक्तगुणाः स्त्रियः पर्युपासीरन्नाश्वासयन्त्यो वाग्भिर्ग्राहिणीयाभिः सान्त्वनीयाभिश्च॥३७॥
सा चेदावीभिः सङ्क्लिश्यमाना न प्रजायेताथैनां ब्रूयात्— उत्तिष्ठ, मुसलमन्यतरं गृहीष्व, अनेनैतदुलूखलं धान्यपूर्णं मुहुर्मुहुरभिजहि मुहुर्मुहुरवजृम्भस्व चङ्क्रमस्व चान्तराऽन्तरेति; एवमुपदिशन्त्येके। तन्नेत्याह भगवानात्रेयः। दारुणव्यायामवर्जनं हि गर्भिण्याः सततमुपदिश्यते, विशेषतश्च प्रजननकाले प्रचलितसर्वधातुदोषायाः सुकुमार्या नार्या मुसलव्यायामसमीरितो वायुरन्तरं लब्ध्वा प्राणान् हिंस्यात्, दुष्प्रतीकारतमा हि तस्मिन् काले विशेषेण भवति गर्भिणी; तस्मान्मुसलग्रहणं परिहार्यमृषयो मन्यन्ते, जृम्भणं चङ्क्रमणं च पुनरनुष्ठेयमिति। अथास्यै दद्यात् कुष्ठैलालाङ्गलिकीवचाचित्रकचिरबिल्वचव्यचूर्णमुपघ्रातुं, सा तन्मुहुर्मुहुरुपजिघ्रेत्, तथा भूर्जपत्रधूमं

शिंशपासारधूमं वा। तस्याश्चान्तराऽन्तरा कटीपार्श्वपृष्ठसक्थिदेशानीषदुष्णेन तैलेनाभ्यज्यानुसुखमवमृद्नीयात्। अनेन कर्मणा गर्भोऽवाक् प्रतिपद्यते॥३८॥

स यदा जानीयाद्विमुच्य हृदयमुदरमस्यास्त्वाविशति, बस्तिशिरोऽवगृह्णाति, त्वरयन्त्येनामाव्यः, परिवर्ततेऽधो गर्भ इति; अस्यामवस्थायां पर्यङ्कमेनामारोप्य प्रवाहयितुमुपक्रमेत। कर्णे चास्या मन्त्रमिममनुकूला स्त्री जपेत्—

'क्षितिर्जलं वियत्तेजो वायुर्विष्णुः प्रजापतिः।

सगर्भां त्वां सदा पान्तु वैशल्यं च दिशन्तु ते॥

प्रसूष्व त्वमविक्लिष्टमविक्लिष्टा शुभानने!।

कार्तिकेयद्युतिं पुत्रं कार्तिकेयाभिरक्षितम्' इति॥३९॥

ताश्चैनां यथोक्तगुणाः स्त्रियोऽनुशिष्युः— अनागतावीर्मा प्रवाहिष्ठाः; या ह्यनागतावीः प्रवाहते व्यर्थमेवास्यास्तत् कर्म भवति, प्रजा चास्या विकृता विकृतिमापन्ना च, श्वासकासशोषप्लीहप्रसक्ता वा भवति। यथा हि क्षवथूद्गारवातमूत्रपुरीषवेगान् प्रयतमानोऽप्यप्राप्तकालान्न लभते कृच्छ्रेण वाऽप्यवाप्नोति, तथाऽनागतकालं गर्भमपि प्रवाहमाणा; यथा चैषामेव क्षवथ्वादीनां सन्धारणमुपघातायोपपद्यते, तथा प्राप्तकालस्य गर्भस्याप्रवाहणमिति। सा यथानिर्देशं कुरुष्वेति वक्तव्या स्यात्। तथा च कुर्वती शनैः पूर्वं प्रवाहेत, ततोऽनन्तरं बलवत्तरम्। तस्यां च प्रवाहमाणायां स्त्रियः शब्दं कुर्युः— 'प्रजाता प्राजाता धन्यं धन्यं पुत्रम्' इति। तथाऽस्या हर्षेणाप्याय्यन्ते प्राणाः॥४०॥

उपदेष्टव्यार्थाभिधायिनी वाक् ग्राहणीया। अवजृम्भस्वेति गात्राणि प्रसारयस्व। अन्तरं लब्ध्वेति हेतुमासाद्य॥३६-४०॥

यदा च प्रजाता स्यात्तदैवैनामवेक्षेत— काचिदस्या अपरा प्रपन्ना न वेति। तस्याश्चेदपरा न प्रपन्ना स्यादथैनामन्यतमा स्त्री दक्षिणेन पाणिना नाभेरुपरिष्टाद्बलवन्निपीड्य सव्येन पाणिना पृष्ठत उपसङ्गृह्य तां सुनिर्धूतं निर्धुनुयात्। अथास्याः पार्ष्ण्या श्रोणीमाकोटयेत्। अस्याः स्फिचावुपसङ्गृह्य सुपीडितं पीडयेत्। अथास्या बालवेण्या कण्ठतालु परिमृशेत्। भूर्जपत्रकाचमणिसर्पनिर्मोकैश्चास्या योनिं धूपयेत्। कुष्ठतालीसकल्कं बल्वजयूषे मैरेयसुरामण्डे तीक्ष्णे कौलत्थे व यूषे मण्डूकपर्णीपिप्पलीसम्पाके वा सम्प्लाव्य पाययेदेनाम्। तथा सूक्ष्मैलाकिलिमकुष्ठनागर विडङ्गपिप्पलीकालागुरुचव्यचित्रकोपकुञ्चिकाकल्कं खरवृषभस्य वा जीवतो दक्षिणं कर्णमुत्कृत्य दृषदि जर्जरीकृत्य बल्वजक्काथादीनामाप्लावनानामन्यतमे प्रक्षिप्याप्लाव्य मुहूर्तस्थितमुद्धृत्य तदाप्लावनं पाययेदेनाम्। शतपुष्पाकुष्ठमदनहिङ्गुसिद्धस्य चैनां तैलस्य पिचुं ग्राहयेत्। अतश्चैवानुवासयेत्। एतैरेव चाप्लावनैः फलजीमूतेक्ष्वाकुधामार्गवकुटजकृतवेधनहस्तिपिप्पल्युपहितैरास्थापयेत्। तदास्थापनमस्याः सह वातमूत्रपुरीषैर्निर्हरत्यपरामासक्तां वायोरेवाप्रतिलोमगत्वात्। अपरां हि वातमूत्रपुरीषाण्यन्यानि चान्तर्बहिर्मार्गाणि सज्जन्ति॥४१॥

सुनिर्धूतमिति क्रियाविशेषणम्। आकोटयेदिति पीडयेत्। बालकृता वेणी बालवेणी। बल्वजयूषः बल्वजक्काथः। मण्डूकपिप्पली मण्डूकपर्णी; किंवा मण्डूका मण्डूकपर्णी, पिप्पली पिप्पल्येव, तयोः सम्पाकः क्काथ इत्यर्थः। तथेत्यनेन बल्वजयूषादौ सूक्ष्मैलादीनां पानं विधीयते। खरवृषभश्चण्डबलीबर्दः। एतैरेव चेति बल्वजयुषादिभिः। अन्तर्बहिर्मार्गाणि सज्जन्तीति बहिर्गमनशीलानि पुरीषादीनि, अन्तः अभ्यन्तरदेशे संसक्तानि भवन्ति॥४१॥

तस्यास्तु खल्वपरायाः प्रपतनार्थे कर्मणि क्रियमाणे जातमात्रस्यैव कुमारस्य कार्याण्येतानि कर्माणि भवन्ति; तद्यथा— अश्मनोः सङ्घट्टनं कर्णयोर्मूले, शीतोदकेनोष्णोदकेन वा मुखपरिषेकः, तथा स

क्लेशविहतान् प्राणान् पुनर्लभेत। कृष्णकपालिकाशूर्पेण चैनमभिनिष्पुणीयुर्यद्यचेष्टः स्याद् यावत् प्राणानां प्रत्यागमनम् (तत्तत् सर्वमेव कार्यम्)। ततः प्रत्यागतप्राणं प्रकृतिभूतमभिसमीक्ष्य स्नानोदकग्रहणाभ्यामुपपादयेत्॥४२॥

अथास्य ताल्वोष्ठकण्ठजिह्वाप्रमार्जनमारभेताङ्गुल्या सुपरिलिखितनखया सुप्रक्षालितोपधानकार्पास-सपिचुमत्या। प्रथमं प्रमार्जितास्यस्य चास्य शिरस्तालु कार्पासपिचुना स्नेहगर्भेण प्रतिसंछादयेत्। ततोऽस्यानन्तरं सैन्धवोपहितेन सर्पिषा कार्यं प्रच्छर्दनम्॥४३॥

शीतोदकेनोष्णोदकेन वेति विकल्पो ऋतुभेदेन ज्ञेयाः; ग्रीष्मकाले शीतोदकेन, शीतकाले तूष्णोदकेनेत्यर्थः। क्लेशविहतानिति योनियन्त्रपीडनादिक्लेशपराहतान्। कृष्णकपालिका ईषिका नलमुञ्जवंशादिभवा, तत्कृतः शूर्पः कृष्णकपालिकाशूर्पः; तेन निष्पुणीयुः वीजयेयुरित्यर्थः। अथ कियन्तं कालं तद्वीजनमित्याह— यावत् प्राणानां प्रत्यागमनमिति। उदकग्रहणं मलमार्गशौचार्थम्। उपधानम् आवरणं, तच्चेहाङ्गुल्या कार्पासपिचुनैव॥४२-४३॥

ततः कल्पनं नाड्याः। अतस्तस्याः कल्पनविधिमुपदेक्ष्यामः— नाभिबन्धनात् प्रभृत्यष्टाङ्गुलमभिज्ञानं कृत्वा छेदनावकाशस्य द्वयोरन्तरयोः शनैर्गृहीत्वा तीक्ष्णेन रौक्मराजतायसानां छेदनानामन्यत-मेनार्धधारेण छेदयेत्। तामग्रे सूत्रेणोपनिबध्य कण्ठेऽस्य शिथिलमवसृजेत्। तस्य चेन्नाभिः पच्येत, तां लोध्रमधुकप्रियङ्गुसुरदारुहरिद्राकल्कसिद्धेन तैलेनाभ्यज्यात्, एषामेव तैलौषधानां चूर्णेनावचूर्णयेत्। इति नाडीकल्पनविधिरुक्तः सम्यक्॥४४॥

अष्टाङ्गुलमभिज्ञानं कृत्वेति अष्टाङ्गुले चिह्नं कृत्वा। अर्धधारः तिर्यग्धारः शस्त्रविशेषः। तामिति च्छिन्नावशिष्टाङ्गुलां नाडीम्। कण्ठेऽवसृजेदिति नाड्यग्रबद्धं सूत्रं कुमारस्य कण्ठे निबध्नीयात्॥४४॥

असम्यक्कल्पने हि नाड्या आयामव्यायामोत्तुण्डिता-पिण्डलिका-विनामिका-विजृम्भिकाबाधेभ्यो भयम्। तत्राविदाहिभिर्वातपित्तप्रशमनैरभ्यङ्गोत्सादनपरिषेकैः सर्पिर्भिश्चोपक्रमेत गुरुलाघवमभिसमीक्ष्य॥४५॥

नाड्या अविधिकल्पने दोषमाह— असम्यगित्यादि। आयामो दैर्घ्यं, व्यायामो विस्तारः, ताभ्यामुत्तुण्डिता आयामव्यायामोत्तुण्डिता, दीर्घपीनत्वयुतेत्यर्थः; पिण्डलिका परिमण्डलयुता; विनामिका अन्तोच्छूना मध्यनिम्ना; विजृम्भिका तु मुहुर्मुहुर्वृद्धिमती। गुरुलाघवमभिसमीक्ष्येति नाडीपाककारकपित्ते तथा वाते चायामव्यायामोत्तुण्डितादिविकारचतुष्टयकारके यो दोषो गुरुः स उपचरितव्यस्त्वरयेत्यर्थः॥४५॥

अतोऽनन्तरं जातकर्म कुमारस्य कार्यम्। तद्यथा— मधुसर्पिषी मन्त्रोपमन्त्रिते यथाम्नायं प्रथमं प्राशितुं दद्यात्। स्तनमत ऊर्ध्वमेतेनैव विधिना दक्षिणं पातुं पुरस्तात् प्रयच्छेत्। अथातः शीर्षतः स्थापयेदुदकुम्भं मन्त्रोपमन्त्रितम्॥४६॥

जातमात्रस्य वेदोक्तं कर्म जातकर्म। यथाम्नायमिति यथागमं मन्त्रोपमन्त्रिते। एतेनैव विधिनेति स्तन(न्य)मप्यभिमन्त्रितं पाययेदित्यर्थः॥४६॥

अथास्य रक्षां विदध्यात्— आदानीखदिरकर्कन्धुपीलुपरूषकशाखाभिरस्या गृहं समन्ततः परिवारयेत्। सर्वतश्च सूतिकागारस्य सर्षपातसीतण्डुलकणकणिकाः प्रकिरेयुः। तथा तण्डुलबलिहोमः सततमुभयकालं क्रियेतानामकर्मणः। द्वारे च मुसलं देहलीमनु तिरश्चीनं न्यसेत्। वचाकुष्ठक्षौमकहिङ्गुसर्षपातसीलशुनकणकणिकानां रक्षोघ्नसमाख्यातानां चौषधीनां पोट्टलिकां बद्ध्वा

सूतिकागारस्योत्तरदेहल्यामवसृजेत्, तथा सूतिकायाः कण्ठे सपुत्रायाः, स्थाल्युदककुम्भपर्यङ्केष्वपि, तथैव च द्वयोर्द्वारपक्षयोः। कणककण्टकेन्धनवानग्निस्तिन्दुककाष्ठेन्धनश्चाग्निः सूतिकागारस्याभ्यन्तरतो नित्यं स्यात्। स्त्रियश्चैनां यथोक्तगुणाः सुहृदश्चानुश्चानुजागृयुर्दशाहं द्वादशाहं वा। अनुपरतप्रदानमङ्गलाशीःस्तुतिगीतवादित्रमन्नपानविशदमनुरक्तप्रहृष्टजनसम्पूर्णं च तद्वेश्म कार्यम्। ब्राह्मणश्चाथर्ववेदवित् सततमुभयकालं शान्तिं जुहुयात् स्वस्त्ययनार्थं कुमारस्य तथा सूतिकायाः। इत्येतद्रक्षाविधानुमुक्तम्॥४७॥

आदानी घोषकभेदः। तण्डुलबलिहोमः कियत्कालं कर्तव्य इत्याह— आनामकर्मण इति।— दशाहं यावदित्यर्थः; दशाहे तु नामकर्म भविष्यति। **जतूकर्णे**ऽप्युक्तं— "तण्डुलबलिहोमो द्विकालमादशाहम्" इति। रक्षोघ्नसमाख्यातानामित्यनेन गुग्गुल्वादीन् ग्राहयति। उत्तरदेहल्यामिति द्वारोपरि; अन्ये तु देहलीं द्वाराधःकाष्ठमाहुः॥४७॥

सूतिकां तु खलु बुभुक्षितां विदित्वा स्नेहं पाययेत परमया शक्त्या सर्पिस्तैलं वसां मज्जानं वा सात्म्यीभावमभिसमीक्ष्य पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरचूर्णसहितम्। स्नेहं पीतवत्याश्च सर्पिस्तैलाभ्यामभ्यज्य वेष्टयेदुदरं महताऽच्छेन वाससा; तथा तस्या न वायुरुदरे विकृतिमुत्पादयत्यनवकाशत्वात्। जीर्णे तु स्नेहे पिप्पल्यादिभिरेव सिद्धां यवागूं सुस्निग्धां द्रवां मात्रशः पाययेत्। उभखतःकालं चोष्णोदकेन च परिषेचयेत् प्राक् स्नेहयवागूपानाभ्याम्। एवं पञ्चरात्रं सप्तरात्रं वाऽनुपाल्य क्रमेणाप्याययेत्। स्वस्थवृत्तमेतावत् सूतिकायाः॥४८॥

कुमारस्य जातकर्माभिधाय सूतिकायाः कर्तव्यमाह— सूतिकां त्वित्यादि। बुभुक्षितामित्यनेन यावता कालेन बुभुक्षिता भवति तदा स्नेहपानं कर्तव्यम्। परमया शक्त्येति उत्तमया शक्त्या लक्षिता स्नेहं पिबेत्; 'यावता स्नेहेन बलविरोधो न भवति तावन्मात्रं स्नेहं पिबेत्' इत्यध्याहर्तव्यम्।

सात्म्यीभावमभिसमीक्ष्येति सर्पिरादिषु यद्यस्याः सात्म्यं तत् तस्यै देयम्। अच्छेनेति निर्मलेन। उभयतःकालमिति पदमुष्णोदकेन परिषेचयेदित्यनेन योज्यम्। तदेव कालद्वयमाह— प्रागित्यादि। पौर्वाह्णिकः स्नेहपानपरिषेकः कारयितव्यः, तथा जीर्णे स्नेहे परिषेचितां यवागूः पाययितव्येत्यर्थः। अयं तु व्यवहारो नानूपदेशे प्रबलकफत्वात् प्राणिनां, किन्तु जाङ्गलदेशव्यवहार इति ज्ञेयम्॥४८॥

तस्यास्तु खलु यो व्याधिरुत्पद्यते स कृच्छ्रसाध्यो भवत्यसाध्यो वा, गर्भवृद्धिक्षयितशिथिलसर्वधातुत्वात्, प्रवाहणवेदनाक्लेदनरक्तनिःस्रुतिविशेषशून्यशरीरत्वाच्च; तस्मात्तां यथोक्तेन विधिनोपचरेत्; भौतिकजीवनीयबृंहणीयमधुरवातहरसिद्धैरभ्यङ्गोत्सादनपरिषेकावगाहनान्नपानविधिभिर्विशेषतश्चोपचरेत्; विशेषतो हि शून्यशरीराः स्त्रियः प्रजाता भवन्ति॥४९॥

सूतिकाया मिथ्योपचारेण व्याधिर्भवन् कृच्छ्रसाध्योऽसाध्यो वा यथा भवति तथा दर्शयन् यथोक्तक्रमस्यावधानेन कर्तव्यतां दर्शयितुमाह— तस्यास्त्वित्यादि। गर्भवृद्ध्या धात्वन्तरापोषणेन क्षयिताश्च शिथिलीकृताश्च सर्वे धातवो यस्याः सा तथा। गर्भव्यपगम एतावच्छरीरशून्यत्वे हेतुः तथा प्रवाहणवेदनाक्लेदरक्तनिःस्रुतिश्च विशेषेण हेतुरित्याह— प्रवाहणेत्यादि। यथोक्तेनेति स्नेहपानादिना। एतेन यथोक्तविधिकरणमेव दुश्चिकित्स्यस्य सूतिकाव्याधेर्निदानवर्जनरूपमुत्तमं भेषजमिति दर्शयति। यत्तूत्पन्ने व्याधौ विहितं भेषजं तत् प्रायो न सिध्यतीति कृत्वा नेहोक्तम्। भौतिकं भूतहरम्॥४९॥

दशमे त्वहनि सपुत्रा स्त्री सर्वगन्धौषधैर्गौरसर्षपलोध्रैश्च स्नाता लघ्वहतशुचिवस्त्रं परिधाय पवित्रेष्टलघुविचित्रभूषणवती च संस्पृश्य मङ्गलान्युचितामर्चयित्वा च देवतां शिखिनः शुक्लवाससोऽव्यङ्गांश्च ब्राह्मणान् स्वस्ति वाचयित्वा कुमारमहतानां च वाससां सञ्चये प्राक्शिरसमुदक्शिरसं वा संवेश्य देवतापूर्वं द्विजातिभ्यः प्रणमतीत्युक्त्वा कुमारस्य पिता द्वे नामनी

कारयेन्नाक्षत्रिकं नामाभिप्रायिकं च। तत्राभिपायिकं घोषवदाद्यन्तस्थान्तमूष्मान्तं वाऽवृद्धं त्रिपुरुषानूकमनवप्रतिष्ठितं, नाक्षात्रिकं तु नक्षत्रदेवतासमानाख्यं द्व्यक्षरं चतुरक्षरं वा॥५०॥

उचितामिति या यस्य देवता सदा पूज्यत्वेनोचिता तामर्चयित्वा। शिखिन इति पावकान्; किंवा शिखा चूडा तद्वतो ब्राह्मणानमुण्डान्। नक्षत्रदेवतासंयुक्तमिति यस्मिन् नक्षत्रे कुमारो जातस्तस्य नक्षत्रस्य या देवता ज्योतिःशास्त्रे, तस्या नाम कर्तव्यमित्यर्थः। किंवा 'द्वे नामनी कारयेत्तन्नाक्षत्रिकमाभिप्रायिकं च' इत्यादिपाठः। तत्रापि नाक्षत्रिकं व्याख्यातमेव; आभिप्रायिकेषु घोषवदित्यादि विशेषणम्। घोषा वर्गचतुर्था 'घझढधभाः', अन्तस्था 'यरलवाः', 'शषसहा' ऊष्माणः॥५०॥

वृत्ते च नामकर्मणि कुमारं परीक्षितुमुपक्रमेतायुषः प्रमाणज्ञानहेतोः। तत्रेमान्यायुष्मतां कुमाराणां लक्षणानि भवन्ति। तद्यथा— एकैकजा मृदवोऽल्पाः स्निग्धाः सुबद्धमूलाः कृष्णाः केशाः प्रशस्यन्ते, स्थिरा बहला त्वक्, प्रकृत्याऽतिसम्पन्नमीषत्प्रमाणातिवृत्तमनुरूपमातपत्रोपमं शिरः, व्यूढं दृढं समं सुश्लिष्टशङ्खसन्ध्यूर्ध्वव्यञ्जनसम्पन्नमुपचितं वलिभमर्धचन्द्राकृति ललाटं, बहलौ विपुलसमपीठौ समौ नीचैर्वृद्धौ पृष्ठतोऽवनतौ सुश्लिष्टकर्णपुत्रकौ महाच्छिद्रौ कर्णौ, ईषत्प्रलम्बिन्यावसङ्गते समे संहते महत्यौ भ्रुवौ, समे समाहितदर्शने व्यक्तभागविभागे बलवती तेजसोपपन्ने स्वङ्गापाङ्गे चक्षुषी, ऋज्वी महोच्छ्वासा वंशसम्पन्नेषदवनताग्रा नासिका, महदृजुसुनिविष्टदन्तमास्यम्, आयामविस्तारोपपन्ना श्लक्ष्णा तन्वी प्रकृतिवर्णयुक्ता जिह्वा, श्लक्ष्णं युक्तोपचयमूष्मोपपन्नं रक्तं तालु, महानदीनः स्निग्धोऽनुनादी गम्भीरसमुत्थो धीरः स्वरः, नातिस्थूलौ नातिकृशौ विस्तारोपपन्नावास्यप्रच्छादनौ रक्तावोष्ठौ, महत्यौ हनू, वृत्ता नातिमहती ग्रीवा, व्यूढमुपचितमुरः, गूढं जत्रु पृष्ठवंशश्च, विप्रकृष्टान्तरौ स्तनौ, असम्पातिनी स्थिरे पार्श्वे, वृत्तपरिपूर्णायतौ बाहू सक्थिनी अङ्गुलयश्च, महदुपचितं पाणिपादं, स्थिरा वृत्ताः स्निग्धास्ताम्रास्तुङ्गाः कूर्माकाराः करजाः, प्रदक्षिणावर्ता सोत्सङ्गा च नाभिः, उरस्त्रिभागहीना समा समुपचितमांसा कटी, वृत्तौ स्थिरोपचितमांसौ नात्युन्नतौ नात्यवनतौ स्फिचौ, अनुपूर्वं

वृत्तावुपचययुक्तावूरू, नात्युपचिते नात्यपचिते एणीपदे प्रगूढसिरास्थिसन्धी जङ्घे, नात्युपचितौ नात्यपचितौ गुल्फौ, पूर्वोपदिष्टगुणौ पादौ कूर्माकारौ, प्रकृतियुक्तानि वातमूत्रपुरीषगुह्यानि तथा स्वप्नजागरणायासस्मितरुदितस्तनग्रहणानि, यच्च किञ्चिदन्यदप्यनुक्तमस्ति तदपि सर्वं प्रकृतिसम्पन्नमिष्टं, विपरीतं पुनरनिष्टम्। इति दीर्घायुर्लक्षणानि॥५१॥

नामकर्मणीति नामकरणसमयक्रियमाणहोमादिकर्मणि, नामैव वा कर्म नामकर्म। स्थिरेति अश्लथा। ईषत्प्रमाणातिवृत्तं शिर इति उत्सर्गापवादन्यायेन बोद्धव्यम्। तेन यदुक्तं पूर्वं— "षडङ्गुलोत्सेधं द्वात्रिंशदङ्गुलपरिणाहं शिरः" एतच्चाभिधायोक्तं— "तत्रायुर्बलं" इत्यादि यावत् "प्रमाणवति शरीरे; विपर्ययस्तु हीनेऽधिके वा" (वि.अ.८) इति; तत्र शिरसि किञ्चित्प्रमाणाधिकता एतद्वचनादपवादभूताऽप्यतीव प्रशस्ता भवतीति ज्ञेयम्। एवं 'महदुपचितं पाणिपादम्' इत्यत्रापि व्याख्येयम्। अनुरूपमित्यनेन शरीरानुरूपतां शिरसो दर्शयन्नुक्तलक्षणादनतिवृद्धिं शिरसो दर्शयति; अतिवृद्धं हि शरीराननुरूपं भवति, तच्चाप्रशस्तमेव। ऊर्ध्वव्यञ्जनमिति ऊर्ध्वरेखात्रयरूपलक्षणयुक्तं; **जतूकर्णे** हि त्रिरेखं ललाटमुक्तम्। नीचैर्वृद्धाविति अनुद्गतौ सन्तावनुक्रमववृद्धौ। असङ्गते दूरान्तरे। व्यक्तभागविभागे इति प्रव्यक्तकृष्णशुक्लादिविभागे। शोभनानि वर्त्मादीनि अङ्गानि अपाङ्गे च ययोस्ते स्वङ्गापाङ्गे। अत्र अङ्गग्रहणेनैव अपाङ्गस्य लब्धस्यापि पुनः करणं विशेषेणापाङ्गशोभोपदर्शनार्थम्। आस्यप्रच्छादनौ आस्यं प्रच्छादयितुं क्षमौ मुखावरकौ। पृष्ठवंशश्च गूढ इति योजनीयम्। असम्पातिनी सुनिर्गते, किंवा अलक्ष्ये। प्रकृतियुक्तेति देहानुरूपा। एणीपदे इति एणीजङ्घासदृशे। प्रकृतियुक्तानीति नातिबहूनि नात्यल्पानि च॥५१॥

अतो धात्रीपरीक्षामुपदेक्ष्यामः। अथ ब्रूयात्— धात्रीमानय समानवर्णां यौवनस्थां निभृतामनातुरामव्यङ्गामव्यसनामविरूपामजुगुप्सितां देशजातीयामक्षुद्रामक्षुद्रकर्मिणीं कुले जातां

वत्सलामरोगां जीवद्वत्सां पुंवत्सां दोग्ध्रीमप्रमत्तामनुच्चारशायिनीमनन्त्यावसायिनीं कुशलोपचारां शुचिमशुचिद्वेषिणीं स्तनस्तन्यसम्पदुपेतामिति॥५२॥

समानवर्णामिति तुल्यजातीयाम्। यौवनस्थामित्यनेन बालावृद्धयोरसम्पूर्णक्षीणधातुत्वेन तयोर्निरासं करोति। निभृतामिति विनीताम्। अविरूपामिति अविकृतावयवाम्। अव्यङ्गामिति अहीनाङ्गीम्। देशजातीयां समानदेशजाम्। अनन्त्यावसायिनीमिति शूद्राभिप्रायेण, शूद्रस्य हि सवर्णत्वेन चाण्डालादिस्त्री प्रसक्ता, सा च निषिध्यते; ब्राह्मणादीनां त्वसवर्णत्वेनैव सा निरस्ता; किंवा ब्राह्मणादीनामपि पतितब्राह्मण्याद्या अनन्त्यावसायिनीमितिशब्देन क्षिप्यते॥५२॥

तत्रेयं स्तनसम्पत्— नात्यूर्ध्वौ नातिलम्बावनतिकृशावनतिपीनौ युक्तपिप्पलकौ सुखप्रपानौ चेति (स्तनसम्पत्)॥५३॥

युक्तपिप्पलकाविति उच्चैःस्तनवृन्तौ॥५३॥

स्तन्यसम्पत्तु प्रकृतिवर्णगन्धरसस्पर्शम्, उदपात्रे च दुह्यमानमुदकं व्येति प्रकृतिभूतत्वात्; तत् पुष्टिकरमारोग्यकरं चेति (स्तन्यसम्पत्)॥५४॥

अतोऽन्यथा व्यापन्नं ज्ञेयम्। तस्य विशेषाः— श्यावारुणवर्णं कषायानुरसं विशदमनालक्ष्यगन्धं रूक्षं द्रवं फेनिलं लघ्वतृप्तिकरं कर्शनं वातविकाराणां कर्तृ वातोपसृष्टं क्षीरमभिज्ञेयं; कृष्णनीलपीतताम्रावभासं तिक्ताम्लकटुकानुरसं कुणपरुधिरगन्धि भृशोष्णं पित्तविकाराणां कर्तृ च पित्तोपसृष्टं क्षीरमभिज्ञेयम्, अत्यर्थशुक्लमतिमाधुर्योपपन्नं लवणानुरसं घृततैलवसामज्जगन्धि पिच्छिलं तन्तुमदुकपात्रेऽवसीदच्छ्लेष्मविकाराणां कर्तृ श्लेष्मोपसृष्टं क्षीरमभिज्ञेयम्॥५५॥

उदकं व्येतीति उदकं विशेषेण एति व्याप्नोतीत्यर्थः। **जतूकर्ण**ऽप्युक्तम्— "उदके विसर्पत् क्षीरं प्रशस्तम्" इति। वातादिदुष्टक्षीरलक्षणान्याह— श्यावेत्यादि। लवणानुरसमिति श्लेष्मदुष्टे क्षीरे दोषदूष्यसम्मूर्च्छनप्रभावाज्ज्ञेयं, येन श्लेष्मदुष्टे लवणरसता भवति; एतत्पृथग्लक्षणयोगाच्च द्वन्द्वसन्निपातदुष्टिरप्युन्नेया॥५४-५५॥

तेषां तु त्रयाणामपि क्षीरदोषाणां प्रतिविशेषमभिसमीक्ष्य यथास्वं यथादोषं च वमनविरेचनास्थापनानुवासनानि विभज्य कृतानि प्रशमनाय भवन्ति। पानाशनविधिस्तु दुष्टक्षीराया यवगोधूमशालिषष्टिकमुद्गहरेणुककुलत्थसुरासौवीरकमैरेयमेदकलशुनकरञ्जप्रायः स्यात्। क्षीरदोषविशेषांश्चावेक्ष्यावेक्ष्य तत्तद्विधानं कार्यं स्यात्। पाठामहौषधसुरदारुमुस्तमूर्वागुडूची-वत्सकफलकिराततिक्तककटुकरोहिणीसारिवाकषायाणां च पानं प्रशस्यते, तथाऽन्येषां तिक्तकषायकटुकमधुराणां द्रव्याणां प्रयोगः क्षीरविकारविशेषानभिसमीक्ष्य मात्रां कालं च। इति क्षीरविशोधनानि॥५६॥

चिकित्सामाह— तेषामित्यादि। प्रतिविशेषमभिसमीक्ष्येति प्रति प्रति वातादीनां कोष्ठाश्रयित्वोदीर्णत्वादिशोधनानुगुणं विशेषमभिवीक्ष्य। यथास्वमित्यनेन श्लेष्मणि वमनं, पित्ते विरेचनं, वायावास्थापनानुवासने, इत्यात्मीयमात्मीयं संशोधनं दर्शयति। यथादोषमित्यनेन प्रवृद्धे दोषेऽतिमात्रं संशोधनं, स्तोके स्तोकमात्रं दर्शयति। विभज्येति यथास्वमित्यनेन योज्यम्। 'प्रकृतिविशेषम्' इति यदा पाठस्तदा प्रकृतिविशेषमपि धात्र्या अवेक्ष्य वमनादीनां बहुत्वाल्पत्वविशेषः कर्तव्य इत्यर्थः। तत्तद्विधानं कार्यं स्यादिति तत्तद्द्वन्द्वदोषप्रतिकूलमाहारविधानं कार्यं स्यात्। कषायाणामिति बहुवचनाद्व्यस्तसमस्तानां पाठादीनां कषाया गृह्यन्ते॥५६॥

क्षीरजननानि तु मद्यानि सीधुवर्ज्यानि, ग्राम्यानूपौदकानि च शाकधान्यमांसानि, द्रवमधुराम्ललवण-भूयिष्ठाश्चाहाराः, क्षीरिण्यश्चौषधयः, क्षीरपानमनायासश्च, वीरणषष्टिकशालीक्षुवालिकादर्भकुशकाशगुन्द्रेत्कटमूलकषायाणां च पानमिति (क्षीरजननानि)॥५७॥

क्षीरिण्यश्च दुग्धिकाकलम्बिकादयो दृश्यमानक्षीराः॥५७॥

धात्री तु यदा स्वादुबहुलशुद्धदुग्धा स्यात्तदास्नातानुलिप्ता शुक्लवस्त्रं परिधायैन्द्रीं ब्राह्मीं शतवीर्यां सहस्रवीर्याममोघामव्यथां शिवामरिष्टां वाट्यपुष्पीं विष्वक्सेनकान्तां वा बिभ्रत्योषधिं कुमारं प्राङ्मुखं प्रथमं दक्षिणं स्तनं पाययेत्। इति धात्रीकर्म॥५८॥

अमोघादयोऽनन्तरं व्याकृता एव। अव्यथा गुडूची॥५८॥

अतोऽनन्तरं कुमारागारविधिमनुव्याख्यास्यामः— वास्तुविद्याकुशलः प्रशस्तं रम्यमतमस्कं निवातं प्रवातैकदेशं दृढमपगतश्वापदपशुदंष्ट्रिमूषिकपतङ्गं सुविभक्तसलिलोलूखलमूत्रवर्चःस्थानस्नानभूमि-महानसमृतुसुखं यथर्तुशयनासनास्तरणसम्पन्नं कुर्यात्; तथा सुविहितरक्षाविधान-बलिमङ्गलहोमप्रायश्चित्तं शुचिवृद्धवैद्यानुरक्तजनसम्पूर्णम्। इति कुमारागारविधिः॥५९॥

शयनासनास्तरणप्रावरणानि कुमारस्य मृदुलघुशुचिसुगन्धीनि स्युः; स्वेदमलजन्तुमन्ति मूत्रपुरीषोपसृष्टानि च वर्ज्यानि स्युः; असति सम्भवेऽन्येषां तान्येव च सुप्रक्षालितोपधानानि सुधूपितानि शुद्धशुष्काण्युपयोगं गच्छेयुः॥६०॥

सुप्रक्षालितोपधानानीति सुधौतोत्तरप्रच्छादनानि। शुद्धशुष्काणीति धौतान्यपि यदा मलादिरागेणापि रहितानि भवन्ति शुष्काणि च तदैवोपयोज्यानि; सुधौतं ह्यार्द्रमपि स्यात्, तथा गाढराग मलादिभावितं धौतमप्यशुद्धं स्यात्, तस्मादुक्तं— शुद्धशुष्काणीति॥५९-६०॥

धूपनानि पुनर्वाससां शयनास्तरणप्रावरणानां च यवसर्षपातसीहिङ्गुगुग्गुलुवचा-चोरकवयःस्थागोलोमीजटिलापलङ्कषाशोकरोहिणीसर्पनिर्मोकाणि घृतयुक्तानि स्युः॥६१॥

वयःस्था ब्राह्मी, गोलोमी श्वेतदूर्वा, जटिला मांसी॥६१॥

मणयश्च धारणीयाः कुमारस्य खड्गरुरुगवयवृषभाणां जीवतामेव दक्षिणेभ्यो विषाणेभ्योऽग्राणि गृहीतानि स्युः; ऐन्द्र्याद्याश्चौषधयो जीवकर्षभकौ च, यानि चान्यान्यपि ब्राह्मणाः प्रशंसेयुरथर्ववेदविदः॥६२॥

मणय इति मुक्तादिमणयः, अथर्ववेदोक्ताश्च। खड्गादीनां शृङ्गाग्राणि धारणीयानि स्युरिति योजना। उक्तं हि **जतूकर्णे**—"रुरुखड्गादीनां जीवतां दक्षिणशृङ्गाग्राणि निकृत्तानि धारयेत" इति। जीवकर्षभकौ प्रजा-स्थापनोक्तौ। ओषधय ऐन्द्र्याद्या दश तत्रैवोक्ताः॥६२॥

क्रीडनकानि खलु कुमारस्य विचित्राणि घोषवन्त्यभिरामाणि चागुरूणि चातीक्ष्णाग्राणि चानास्य प्रवेशीनि चाप्राणहराणि चावित्रासनानि स्युः॥६३॥

न ह्यस्य वित्रासनं साधु। तस्मात्तस्मिन् रुदत्यभुञ्जाने वाऽन्यत्र विधेयतामगच्छति राक्षसपिशाचपूतनाद्यानां नामान्याह्वयता कुमारस्य वित्रासनार्थं नामग्रहणं न कार्यं स्यात्॥६४॥

यदि त्वातुर्यं किञ्चित् कुमारमागच्छेत् तत् प्रकृतिनिमित्तपूर्वरूपलिङ्गोपशयविशेषैस्तत्त्वतोऽनुबुध्य सर्वविशेषानातुरौषधदेशकालाश्रयानवेक्षमाणश्चिकित्सितुमारभेतैनं मधुरमृदुलघुसुरभिशीतशङ्करं कर्म प्रवर्तयन्। एवंसात्म्या हि कुमारा भवन्ति। तथा ते शर्म लभन्ते चिराय। अरोगे त्वरोगवृत्तमातिष्ठेद्देशकालात्मगुणविपर्ययेण वर्तमानः, क्रमेणासात्म्यानि परिवर्त्योपयुञ्जानः सर्वाण्यहितानि वर्जयेत्। तथा बलवर्णशरीरायुषां सम्पदमवाप्नोतीति॥६५॥

एवमेनं कुमारमायौवनप्राप्तेर्धर्मार्थकौशलागमनाच्चानुपालयेत्॥६६॥

प्रकृतीत्यादौ प्रकृतिः वातादयः, निमित्तं बाह्यं रूक्षादि वातादिकारणम्। सर्वविशेषानित्यादौ आतुरशब्देनातुर्यहेतुर्व्याधिर्गृह्यते, आश्रयशब्देन तु शरीरम्। शं कल्याणं करोतीति शङ्करम्। देशकालेत्यादौ आत्मशब्देन शरीरमुच्यते, तेन देशस्य तथा कालस्य तथा शरीरस्य च यो गुणः शीतादिस्तद्विपरीताहाराचारादिसेवायां वर्तमानः स्वस्थवृत्तं कुर्यात्। अन्यत्रापि स्वस्थवृत्ते प्रोक्तं— "देशकालादिगुणविपरीतानामाहारविहाराणां क्रियोपयोगः सम्यक्" (शा.अ.६) इति। स्वस्थवृत्तान्तरमाह— क्रमेणेत्यादि। क्षीरतः क्षीरान्ने, ततोऽन्नमेव। तत्राप्यन्ने मधुरादि यद्बालानां सात्म्यं भवति तेन क्रमेण नवेगान्धारणीयोक्तेन "उचितादहिताद्धीमान् क्रमशो विरमेन्नरः" (सू.अ.७) इत्यादिस्वस्थवृत्तोक्तेन क्रमेणोपयुञ्जान इत्यर्थः। तथा, वस्त्वन्तरसात्म्यसेवायामपि। बालस्यैवमेव व्याख्यानम्। स्वस्थवृत्ताचरणफलमाह— तथेत्यादि॥६३-६६॥

इति पुत्राशिषां समृद्धिकरं कर्म व्याख्यातम्। तदाचरन् यथोक्तैर्विधिभिः पूजां यथेष्टं लभतेऽनसूयक इति॥६७॥

तत्र श्लोकौ—

पुत्राशिषां कर्म समृद्धिकारकं यदुक्तमेतन्महदर्थसंहितम्।

तदाचरन् ज्ञो विधिभिर्यथातथं पूजां यथेष्टं लभतेऽनसूयकः॥६८॥

शरीरं चिन्त्यते सर्वं दैवमानुषसम्पदा।

सर्वभावैर्यतस्तस्माच्छारीरं स्थानमुच्यते॥६९॥

पुत्राशिषां समृद्धिकरमिति पुत्रप्रार्थनानुरूपफलकरमित्यर्थः। पुत्राशिषामित्यध्यायार्थसङ्ग्रहश्लोकः। ज्ञ इति पुरुषविशेषणं प्राधान्यात् कृतम्। तेन पुरुषपुत्रलाभेन नार्या अपि पुत्रलाभोऽर्थादेव लभ्यते। अनुरूपपुत्रलाभे कथं मे पुत्रः स्यादित्यसूयां न वहतीत्यनसूयकः। केचिच्छारीरस्थानशब्द-व्युत्पत्तिदर्शकं श्लोकं पठन्ति— शरीरमित्यादि। स च व्यक्तार्थ एव॥६७-६९॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते शारीरस्थाने जातिसूत्रीयं शारीरं नामाष्टमोऽध्यायः॥८॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायां शारीरस्थाने जातिसूत्रीयं शारीरं नामाष्टमोऽध्यायः॥८॥

शारीरस्थानं सम्पूर्णम्।

इन्द्रियस्थानम्।

प्रथमोऽध्यायः।

अथातो वर्णस्वरीयमिन्द्रियं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

शारीरे चिकित्साधिकरणं शरीरं प्रतिपाद्य चिकित्सा वक्तव्या, सा च साध्य एव रोगे वक्तव्या नासाध्यरोगे, यदुक्तं— "अर्थविद्यायशोहानिमुपक्रोशमसङ्ग्रहम्। प्राप्नुयान्नियतं वैद्यो योऽसाध्यं समुपाचरेत्" (सू.अ.१०) इति; न च रिष्टप्रतिपत्तिमन्तराऽसाध्यत्वप्रतिपत्तिरिति रिष्टप्रतिपादकमिन्द्रियस्थानमेव चिकित्सास्थानात् प्रागुच्यते। इन्द्रशब्देन प्राण उच्यते, तस्यान्तर्गतस्य लिङ्गं रिष्टाख्यमिन्द्रियं; यदुक्तं **व्याकरणे**— "इन्द्रियमिन्द्रलिङ्गं" (पा.अ.५.२.९३) इत्यादि; तस्येन्द्रियस्य स्थानमिन्द्रियस्थानम्। तत्रापि चेन्द्रियस्थाने वक्तव्ये व्यक्ततमरिष्टाभिधायकतया वर्णस्वरीयमिन्द्रियमुच्यते, अत्र हि यानि रिष्टानि वक्तव्यानि तानीतररिष्टेभ्यश्चक्षुरादिग्राह्यतया व्यक्ततमानि। वर्णस्वरावधिकृत्य कृतो वर्णस्वरीयः, इन्द्रियस्य रिष्टरूपस्य प्रतिपादकोऽध्याय इन्द्रियः, तं व्याख्यास्यामः। एवमन्यत्रापि पुष्पितकमित्याद्यपीन्द्रियविशेषणं व्याख्येयम्॥१-२॥

इह खलु वर्णश्च स्वरश्च गन्धश्च रसश्च स्पर्शश्च चक्षुश्च श्रोत्रं च घ्राणं च रसनं च स्पर्शनं च सत्त्वं च भक्तिश्च शौचं च शीलं चाचारश्च स्मृतिश्चाकृतिश्च प्रकृतिश्च विकृतिश्च बलं च ग्लानिश्च मेधा च हर्षश्च रौक्ष्यं च स्नेहश्च तन्द्रा चारम्भश्च गौरवं च लाघवं च गुणाश्चाहारश्च विहारश्चाहारपरिणामश्चोपायश्चापायश्च व्याधिश्च व्याधिपूर्वरूपं च वेदनाश्चोपद्रवाश्च च्छाया च प्रतिच्छाया च स्वप्नदर्शनं च दूताधिकारश्च पथि चौत्पातिकं चातुरकुले भावावस्थान्तराणि च

भेषजसंवृत्तिश्च भेषजविकारयुक्तिश्चेति परीक्ष्याणि प्रत्यक्षानुमानोपदेशैरायुषः प्रमाणावशेषं जिज्ञासमानेन भिषजा॥३॥

इन्द्रियस्थानप्रतिपाद्यं कृत्स्नं विषयमाह— इहेत्यादि। इह इन्द्रियस्थाने। खलुशब्दो वाक्यालङ्कारे। इह च यद्यपीन्द्रियाण्येव विषयवर्णादिग्राहकतया अग्रे वक्तुं युज्यन्ते, तथाऽपि तेषामतीन्द्रियत्वेन तदाश्रयरिष्टानामव्यक्तत्वं; तेन, प्रव्यक्तानि वर्णादीन्येव प्रव्यक्तरिष्टाधिकरणान्यग्रेऽभिधीयन्ते। वर्णादिष्वपि च यथा व्यक्तत्वं तथा पूर्वनिपातः। मेघादिशब्दस्तु यद्यपि वर्णादपि व्यक्तस्तथाऽपि शब्दविशेष एवेह ताल्वादिसम्पाद्यः स्वरशब्दाभिधेयो रिष्टाधिकरणत्वेनाभिमतः, स च वर्णापेक्षयाऽव्यक्त एव। इहेत्यादावसमासेन प्रत्येकमपि वर्णादीनां रिष्टाधिकरणत्वं दर्शयति; समासे हि समुदायस्यैव रिष्टाधिकरणकतया परीक्षितव्यत्वं शङ्क्येत। वर्णशब्देन च वर्णसहचरिताश्चक्षुर्ग्राह्या रौक्ष्यादयोऽपि गृह्यन्ते; अत एव वर्णप्रस्ताव एव वक्ष्यति— यत्— "वर्णग्रहणेन ग्लानिहर्षरौक्ष्यस्नेहा व्याख्याताः" इति। स्वरादिग्रहणेन च स्वराद्यभावोऽपि गृह्यते, तेनाङ्गुलिपर्वशब्दाभाव-गन्धाभावादयोऽपि रिष्टान्यवरुध्यन्ते। स्पर्शग्रहणेन च स्पर्शोपलभ्यकाठिन्याद्यवरोधः। सत्त्वं मनः; सत्त्वविकृतेरुदाहरणं यथा— "औत्सुक्यं भजते सत्त्वं चेतो भीराविशत्यपि" (इं.अ.१२) इत्यादि। भक्तिः इच्छा। शीलं सहजं वृत्तम्। आचारः शास्त्रशिक्षाकृतो व्यवहारः। भक्त्यादयो यद्यपि सत्त्वविकारत्वेन सत्त्वग्रहणेनैव लभ्यन्ते; यदुक्तं— "भक्तिः शीलं शौचं द्वेषः स्मृतिर्मोहस्त्यागोऽमात्सर्यं भयं क्रोधस्तन्द्रोत्साहस्तैक्ष्ण्यं मार्दवं गाम्भीर्यमनवस्थितत्वमित्येवमादयः सत्त्वविकाराः" (शा.अ.३) इति; तथाऽपि भक्त्यादीनामपि पृथगरिष्टाधिकरणत्वेनेह पृथक्करणम्। निद्रादौर्बल्यात्तन्द्रेति तन्द्राशब्देन निद्रोच्यते; अत्र च रिष्टमुक्तं यथा— "निद्रा नित्या भवति वा न वा" (इं.अ.११) इति। आरम्भ इति अरिष्टव्याध्युत्पादारम्भः; यदुक्तं— "श्वयथुर्यस्य कुक्षिस्थो हस्तपादं प्रधावति" (इं.अ.९) इत्यादि। गौरवे रिष्टं यथा— "निष्ठ्यूतं च पुरीषं च रेतश्चाम्भसि मज्जति" (इं.अ.९) इत्यादि। लाघवे रिष्टं— गुरूणामङ्गानां लाघवं ज्ञेयम्। गुणरिष्टं यथा— "गुणाः शरीरदेशानां

शीतोष्णमृदुदारुणाः। विपर्यासेन लक्ष्यन्ते स्थानेष्वन्येषु तद्विधाः" (इं.अ.१२) इति। आहाररिष्टं यथा— "आहारमुपयुञ्जानो भिषजा सूपकल्पितम्" (इं.अ.१२) इत्यादि। आहारपरिणामरिष्टं यथा— "दुर्बलो बहु भुङ्क्ते यो प्रागभुक्त्वाऽन्नमातुरः। अल्पमूत्रपुरीषश्च" (इं.अ.७) इति। उपाय उपगमनं व्याधिमेलक इत्यर्थः; यदुक्तं— "सहसा ज्वरसन्तापस्तृष्णा मूर्च्छा बलक्षयः। विश्लेषणं च सन्धीनां" (इं.अ.८) इति। व्याध्यपगमनमपायः; यदुक्तं— "यं नरं सहसा रोगो दुर्बलं परिमुञ्चति" (इं.अ.९) इत्यादि। व्याधिश्चेति व्याधिरेव रिष्टं यथा— "वाताष्ठीला सुसंवृत्ता दारुणा हृदि तिष्ठति" (इं.अ.१०) इति। छाया भौतिकी पञ्चरूपा, प्रतिच्छाया तु देहच्छाया; प्रतिच्छायया च नेत्रकुमारिकाऽपि प्रतिच्छायारूपा गृहीतव्या। अयं च छायादिभेदः पन्नरूपीयेन्द्रिये दर्शयितव्यः। आतुरकुले भावावस्थारिष्टं यथा— "अग्निपूर्णानि पात्राणि भिन्नानि विशिखानि च। भिषङ्मुमूर्षतां वेश्म प्रविशन्नेव पश्यति" (इं.अ.१२) इत्यादि। भेषजसंवृत्तै रिष्टं यथा— "यमुद्दिश्यातुरं वैद्यः संवर्तयितुमौषधम्। यतमानो न शक्नोति दुर्लभं तस्य जीवितम्" (इं.अ.१२) इति। भेषजस्य विकारेण समं युक्तिर्भैषजविकारयुक्तिः; तत्र रिष्टं यथा— "विज्ञातं बहुशः सिद्धं विधिवच्चावचारितम्। न सिध्यत्यौषधं यस्य तस्य नास्ति चिकित्सितम्" (इं.अ.१२) इति। शेषं तु रिष्टोदाहरणं व्यक्तम्। इति समाप्तौ। प्रत्यक्षपूर्वकत्वात् सर्वप्रमाणानामिहादौ प्रत्यक्षं कृतम्। यद्यपि वर्णादय आयुर्लक्षणप्रतिपादिता दीर्घायुःप्रमाणजिज्ञासायामपि परीक्ष्यन्ते, तथाऽपीह रिष्टप्रकरणे आयुःप्रमाणावशेषज्ञानार्थमेव परीक्षणीयाः, अत उक्तं— प्रमाणावशेषं जिज्ञासमानेनेति॥ ३॥

तत्र तु खल्वेषां परीक्ष्याणां कानिचित् पुरुषमनाश्रितानि, कानिचिच्च पुरुषसंश्रयाणि। तत्र यानि पुरुषमनाश्रितानि तान्युपदेशतो युक्तितश्च परीक्षेत, पुरुषसंश्रयाणि पुनः प्रकृतितो विकृतितश्च॥ ४॥

पुरुषमनाश्रितानि दूताद्याश्रयाणि रिष्टानि। युक्तितश्चेत्यनुमानत इत्यर्थः, अत्र युक्तेरपि रिष्टत्वावधारणे क्षमत्वात्। प्रत्यक्षं हि दूतादीनां स्वरूपमात्रं गृह्णाति, रिष्टं तु दूतादीनामागमादेव ज्ञायते।

पुरुषाश्रयिवर्णादिगतरिष्टग्रहणे तु प्रत्यक्षमपि तत्तदरिष्टविशेषग्रहणे तत्तद्विशेषेण व्याप्रियत इति मत्वाऽत्र तत्प्रतिषिद्धम्। अनुमानं तु रिष्टत्वेन प्रतिपादितमनिमित्तत्वादिधर्मविचारे व्याप्रियते, एवं सर्वत्र। प्रकृतितश्चेति पुरुषाश्रयविकृतिज्ञानहेतुतया प्रकृती रिष्टज्ञाने व्याप्रियते, यतः प्रकृतिज्ञानाधीनं विकृतिज्ञानं भवति; प्रकृतिविकृतिपरीक्षा त्वत्राधिकृतैः प्रसिद्धैः प्रत्यक्षादिभिरेव ज्ञेया॥४॥

तत्र प्रकृतिर्जातिप्रसक्ता च, कुलप्रसक्ता च, देशानुपातिनी च, कालानुपातिनी च वयोऽनुपातिनी च, प्रत्यात्मनियता चेति। जातिकुलदेशकालवयःप्रत्यात्मनियता हि तेषां तेषां पुरुषाणां ते ते भावविशेषा भवन्ति॥५॥

प्रकृतिं विभजते— तत्रेत्यादि। जातिप्रसक्ता यथा— ब्राह्मणजातौ शौचं, कुलप्रसक्ता यथा— किञ्चिदेव कुलं शुच्याचारवद्भवति, देशानुपातिनी यथा— अन्तर्वेदिवासिनः शुचयो भवन्ति, कालानुपातिनी यथा— कृतयुगे शौचं, वयोऽनुपातिनी यथा— बाल्येऽशौचं, प्रत्यात्मनियता यथा— कश्चिदेव पुरुषः प्रकृत्या शुचिर्भवति; इत्याद्युदाहरणीयम्। कुतः पुनर्जात्यादिनियता प्रकृतिर्भवतीत्यत्र हेतुमाह— जातिकुलेत्यादि। ते ते भावविशेषा इति शुचित्वाशौचादयः॥५॥

विकृतिः पुनर्लक्षणनिमित्ता च, लक्ष्यनिमित्ता च, निमित्तानुरूपा च॥६॥

रिष्टाधिकाराधिकृतां विकृतिं विवेचयितुं सर्वानेव विकृतिभेदानाह— विकृतिरित्यादि॥६॥

तत्र लक्षणनिमित्ता नाम सा यस्याः शरीरे लक्षणान्येव हेतुभूतानि भवन्ति दैवात्; लक्षणानि हि कानिचिच्छरीरोपनिबद्धानि भवन्ति, यानि हि तस्मिंस्तस्मिन् काले तत्राधिष्ठानमासाद्य तां तां विकृतिमुत्पादयन्ति॥(१)॥

हेतुभूतानीति हेतुसदृशानि। तेन दैवमेव नखरेखापद्मादिसामुद्रिकोक्तलक्षणयुक्ते शरीरे राज्यधनगमनवधबन्धनादिरूपविकृतिप्राप्तौ हेतुः, लक्षणानि तु दैवनिमित्तानि बोधकमात्राणि, अत एव दैवादित्युक्तं; दैवं च प्राक्तनं कर्मोच्यते। विकृतिमुत्पादयन्तीत्यत्रापि दैवादिति योजनीयं; तेन, दैवबलादेव लक्षणानां राज्यधनवधबन्धनादिरूपविकृतिकर्तृत्वम्। तस्मिंस्तस्मिन् काले इत्यनेन लक्षणसूचितादृष्टपरिपाककाले नियतत्वं विकृतेर्दर्शयति। लक्षणासूचिताश्च राज्यादय इह पुरुषस्य कदाचिद्भवन्तोऽस्वाभाविका एवेति कृत्वा विकृतिशब्देनोच्यन्ते॥(१)॥

लक्ष्यनिमित्ता तु सा यस्या उपलभ्यते निमित्तं यथोक्तं निदानेषु॥(२)॥

यथोक्तं निदानेष्विति यथा— रूक्षादिसेवया वातादिप्रकोपरूपा विकृतिर्निदानोक्तेत्यर्थः॥(२)॥

निमित्तानुरूपा तु निमित्तार्थानुकारिणी या, तामनिमित्तां निमित्तमायुषः प्रमाणज्ञानस्येच्छन्ति भिषजो भूयश्चायुषः क्षयनिमित्तां प्रेतेलिङ्गानुरूपां, यामायुषोऽन्तर्गतस्य ज्ञानार्थमुपदिशन्ति धीराः। यां चाधिकृत्य पुरुषसंश्रयाणि मुमूर्षतां लक्षणान्युपदेक्ष्यामः। इत्युद्देशः। तं विस्तरेणानुव्याख्यास्यामः॥ ७॥

निमित्तानुरूपेति निमित्तसदृशी। तदेव स्फोटयति—

निमित्तार्थानुकारिणीति।— निमित्तस्य योऽर्थः कार्यजननरूपः कार्यबोधनरूपो वा तमनुकरोतीति निमित्तार्थानुकारिणी। रिष्टाख्या हि विकृतिर्मरणे तस्यैवावबोधने वा निमित्तं भवति। अपरमपि निमित्तानुरूपाया विकृतेर्विशेषमाह— तामित्यादि। अनिमित्तामिति तदात्वेऽनुपलभ्यमाननिमित्तां, न तु पुनः सर्वथैवाहेतुकीं, यत 'आयुषः क्षयनिमित्ताम्' इत्यनन्तरमस्य विशेषणं कथयिष्यति; रिष्टस्य हि

न रौक्ष्यादिना शरीरसम्बन्धादि निमित्तमुपलभ्यते। यद्वा, आयुःक्षयरूपं यन्निमित्तं तद्विद्यमानमपि नान्यैरुपलभ्यते, किन्तु तदेव हि रिष्टादुन्नीयते; तेन, अव्यक्तनिमित्तत्वमिहानिमित्तत्वं ज्ञेयम्। अत्र गतायुष्ट्वमेव सकलपुरुषसंश्रितरिष्टव्यापकं कारणं साधु। यत्तु वक्ष्यति— "क्रियापथमतिक्रान्ताः केवलं देहमाश्रिताः। चिह्नं कुर्वन्ति यद्दोषास्तदरिष्टं प्रचक्षते" (इं.अ.११) इति, तद्दूतादिगतरिष्टाव्यापकतया पुरुषाश्रयिरिष्टमात्राभिप्रायेण ज्ञेयम्। आयुषः प्रमाणज्ञानस्येति आयुःशेषप्रमाणज्ञानस्येत्यर्थः। भूय इति अत्यर्थम्। तेनात्यर्थमायुःक्षयनिमित्तां प्रत्यासन्नायुःक्षयजन्यामिति यावत्। यामिति क्षीणायुःकार्याम्। प्रेतलिङ्गानुरूपामिति प्रेतसदृशीं; "मला दन्तेषु जायन्ते प्रेताकृतिरुदीर्यते" (इं.अ.१२) इत्यादिग्रन्थवक्ष्यमाणाम्। इमां हि विकृतिमायुषोऽन्तर्ग(ग)तस्य ज्ञानार्थं वदन्ति। या त्वन्या प्रेतलिङ्गाननुरूपा वर्णाश्रया सा प्रत्यासन्नमरणबोधिका; तेन सा नात्यर्थनात्यर्थक्षीणायुःकार्येत्यर्थः। एवं 'भूयश्च' इत्यादिना 'धीराः' इत्यन्तेन निमित्तानुरूपविकृतिविशेषस्य कार्यविशेषं मरणलक्षणमभिधाय पुनः सामान्येनानिमित्ताया धर्मान्तरमाह— यामधिकृत्येत्यादि। पुरुषसंश्रयाणीति विशेषणेन पुरुषानाश्रितदूतादिरिष्टे नावश्यमनिमित्तताऽस्तीति दर्शयति। यतो दूताधिकारादौ यानि रिष्टानि तानि दृश्यमाननिमित्तान्यप्यागमादेव रिष्टत्वेनावधार्यन्ते। यथा— "मुक्तकेशोऽथवा नग्ने रुदत्यप्रयतेऽथवा। भिषगभ्यागतं दृष्ट्वा दूतं मरणमादिशेत्" (इं.अ.१२) इति। अत्र च भिषजो मुक्तकेशवचनाद्दृश्यत एव कारणं, तथा दूतागमने चातुरस्य प्रेरणादि कारणमस्त्येव, तेनानिमित्तत्वमातुराश्रयिरिष्ट एव। अन्ये तु, एवंभूतवैद्यदूतसमागमः परिहर्तव्यत्वेन ज्ञातः सन् यदा दैवाद्भवति, तदा दैवनिमित्तः सन् रिष्टं भवति; तेन, सर्वरिष्टव्यापिकैवेयमनिमित्तता; भूयश्चेत्यादिग्रन्थेन तु प्रेतलिङ्गानुरूपां विकृतिं भूय आयुषोऽन्तर्ग(ग)तस्य ज्ञानार्थमुपदिशन्ति, तथा पुरुषसंश्रयाणि भूय उपदेक्ष्यन्ते, पुरुषानाश्रयाणि तु स्वल्पग्रन्थेनोपदेक्ष्यन्ते इति व्याख्यानयन्ति। इत्युद्देश इन्द्रियस्थानार्थोद्देश इत्यर्थः॥७॥

तत्रादित एव वर्णाधिकारः। तद्यथा— कृष्णः, श्यामः, श्यामावदातः, अवदातश्चेति प्रकृतिवर्णाः शरीरस्य भवन्ति; यांश्चापरानुपेक्षमाणो विद्यादनूकतोऽन्यथा वाऽपि निर्दिश्यमानांस्तज्ज्ञैः॥८॥

प्रकृतिज्ञानान्तरीयकत्वाद्विकृतिज्ञानस्य प्रकृतिवर्णानेव तावदाह— कृष्ण इत्यादि। अवदातो गौरः। इह च प्रायेण ये वर्णाः प्रकृत्या भवन्ति ते प्रकृतिवर्णा उच्यन्ते, ये तु प्रायेण विकृत्या भवन्ति ते विकृतिवर्णा उच्यन्ते, इति ज्ञेयम्। तेन प्रकृतिवर्णा अपि कदाचिद्विकृतिवर्णा भवन्ति, तथा विकृतिवर्णा अपि जन्मप्रभृतिजायमानतया कदाचित् प्रकृतिवर्णा भवन्तीति ज्ञेयम्। अनुक्तप्रकृतिवर्णातिदेशार्थमाह — यांश्चेत्यादि। उपेत्य ईक्षमाण इति उपेक्षमाणः। अनूकत इति सादृश्यतः; अनेन च श्यामेत्यादिवर्णशब्देन निर्दिश्यमानान् विद्यादिति योजना। तज्ज्ञैरिति वर्णभेदनामज्ञैः॥८॥

नीलश्यावताम्रहरितशुक्लाश्च वर्णाः शरीरस्य वैकारिका भवन्ति; यांश्चापरानुपेक्षमाणो विद्यात् प्राग्विकृतानभूत्वोत्पन्नान्। इति प्रकृतिविकृतिवर्णा भवन्त्युक्ताः शरीरस्य। तत्र प्रकृतिवर्णमर्धशरीरे विकृतिवर्णमर्धशरीरे, द्वावपि वर्णौ मर्यादाविभक्तौ दृष्ट्वा; यद्येवं सव्यदक्षिणविभागेन, यद्येवं पूर्वपश्चिमविभागेन, यद्युत्तराधरविभागेन, यद्यन्तर्बहिर्विभागेन, आतुरस्यारिष्टमिति विद्यात्; एवमेव वर्णभेदो मुखेऽप्यन्यत्र वर्तमानो मरणाय भवति॥९॥

नीलेत्यादिना (विकृतिजायमानतया) विकृतिवर्णानाह। इह, 'अपरान्' इति वचनेन विकृतिवर्णसङ्करजा वर्णा ज्ञेयाः। विकृतिवर्णान्तरमाह— प्रागित्यादि। प्राग्विकृतानिति पूर्ववर्णादन्यथाभूतानित्यर्थः। तेनापि, येन श्यामेन सता रसायनोपयोगाद्गौरवर्णत्वं प्राप्तं, स च त्यक्तरसायनः कालवशात् पुनः श्यामवर्णो भवति तस्यापि पूर्वगौरवर्णाद्विकृतिः श्यामवर्णो भवन् रिष्टं स्यादित्याह— अभूत्वोत्पन्नानिति; तेन नायं दोषः; अत्र हि पूर्वभूत एव वर्णः पुनर्भवति, तेन न रिष्टम्। मर्यादाविभक्ताविति समसीमाव्यवस्थापितौ। पूर्वपश्चिमविभागेनेति अभिमुखपृष्ठभागेनेत्यर्थः।

अन्तर्बहिर्विभागेनेति अत्रान्तर्गतो वर्णो मुखनासाकर्णश्रोत्रान्तर्गततया उन्नेयः। अन्यत्रेति अवान्तरे हस्तपादादौ॥९॥

वर्णभेदेन ग्लानिहर्षरौक्ष्यस्नेहा व्याख्याताः॥१०॥

वर्णभेदेनेति यथा वर्णविभागेन रिष्टं, तथा ग्लान्यादिविभागेनापीत्यर्थः। हर्ष इहोपचयो ज्ञेयः, मानसहर्षस्येह चाक्षुषाधिकारेऽसङ्गतत्वात्॥१०॥

तथा पिप्लुव्यङ्गतिलकालकपिडकानामन्यतमस्याननने जन्मातुरस्यैवमेव्माप्रशस्तं विद्यात्॥११॥

तथेत्यादौ पिप्लुप्रभृतीनामपि वर्णवत् सव्यदक्षिणादिविभागेन जन्म रिष्टं भवतीत्येवमेवशब्देनोच्यते॥११॥

नखनयनवदनमूत्रपुरीषहस्तपादौष्ठादिष्वपि च वैकारिकोक्तानां वर्णानामन्यतमस्य प्रादुर्भावो हीनबलवर्णोन्द्रियेषु लक्षणमायुषः क्षयस्य भवति॥१२॥

नखेत्यादौ बलहान्याद्यभावे सति न रिष्टम्॥१२॥

यच्चान्यदपि किञ्चिद्वर्णवैकृतमभूतपूर्वं सहसोत्पद्येतानिमित्तमेव हीयमानस्यातुरस्य शश्वत्, तदरिष्टमिति विद्यात्। इति वर्णाधिकारः॥१३॥

यच्चेत्यादिनाऽनुक्तवर्णारिष्टं सङ्गृह्णाति। अभूतपूर्वमिति पूर्वव्याकृतरसायनविहितवर्णप्रादुर्भावव्युदासार्थम्। सहसोत्पद्यत इत्यनेन रिष्टानां शीघ्रस्वभावं दर्शयति। अनिमित्तमिति पूर्वोक्तार्थमेव। हीयमानस्य शश्वदिति स्वभावकथनं, रिष्टोत्पत्त्या हीयमानता शश्वदवश्यं भवति॥१३॥

स्वराधिकारस्तु— हंसक्रौञ्चनेमिदुन्दुभिकलविङ्ककाककपोतजर्जरानुकाराः प्रकृतिस्वरा भवन्ति; यांश्चापरानुपेक्षमाणोऽपि विद्यादनूकतोऽन्यथा वाऽपि निर्दिश्यमानांस्तज्ज्ञैः। एडककलग्रस्ताव्यक्तगद्गदक्षामदीनानुकीर्णास्त्वातुराणां स्वरा वैकारिका भवन्ति; यांश्चापरानुपेक्षमाणोऽपि विद्यात् प्राग्विकृतानभूत्वोत्पन्नान्। इति प्रकृतिविकृतिस्वरा व्याख्याता भवन्ति॥१४॥

क्रमागतं स्वरमाह— स्वरेत्यादि। जर्जरः वाद्यभाण्डविशेषः। यांश्चेत्यादि पूर्ववद् व्याख्येयम्। एडको मेषः, किंवा अरण्यच्छागलः; कलः सूक्ष्मः; ग्रस्तः सर्वथाऽनुच्चारः; क्षामः रूक्षः; दीनः दुःखोच्चार्यमाणस्वरः; अनुकीर्ण उपर्युपर्युच्चार्यमाणः॥१४॥

तत्र प्रकृतिवैकारिकाणां स्वराणामाश्वभिनिर्वृत्तिः स्वरानेकत्वमेकस्य चानेकत्वमप्रशस्तम्। इति स्वराधिकारः॥१५॥

इति वर्णस्वराधिकारौ यथावदुक्तौ मुमूर्षतां लक्षणज्ञानार्थमिति॥१६॥

प्रकृतेर्वैकारिका अन्यथाभूता इति प्रकृतिवैकारिकाः। स्वरानेकत्वमिति कदाचिदेडकस्वरत्वं, कदाचित् कलस्वरत्वमित्यादि। एकस्य चानेकत्वमिति एकस्यैव स्वरस्य चानेकत्वमिव प्रतिभाति। अनिमित्तमिति सर्वत्र सम्बध्यते॥ १५-१६॥

भवन्ति चात्र—

यस्य वैकारिको वर्णः शरीर उपपद्यते।
अर्धे वा यदि वा कृत्स्ने निमित्तं न च नास्ति सः॥ १७॥
नीलं वा यदि वा श्यावं ताम्रं वा यदि वाऽरुणम्।
मुखार्धमन्यथा वर्णो मुखार्धेऽरिष्टमुच्यते॥ १८॥
स्नेहो मुखार्धे सुव्यक्तो रौक्ष्यमर्धमुखे भृशम्।
ग्लानिरर्धे तथा हर्षो मुखार्धे प्रेतलक्षणम्॥ १९॥
तिलकाः पिप्लवो व्यङ्गा राजयश्च पृथग्विधाः।
आतुरस्याशु जायन्ते मुखे प्राणान् मुमुक्षतः॥ २०॥
पुष्पाणि नखदन्तेषु पङ्को वा दन्तसंश्रितः।
चूर्णको वाऽपि दन्तेषु लक्षणं मरणस्य तत्॥ २१॥
ओष्ठयोः पादयोः पाण्योरक्ष्णोर्मूत्रपुरीषयोः।
नखेष्वपि च वैवर्ण्यमेतत् क्षीणबलेऽन्तकृत्॥ २२॥
यस्य नीलावुभावोष्ठौ पक्वजाम्बवसन्निभौ।
मुमूर्षुरिति तं विद्यान्नरो धीरो गतायुषम्॥ २३॥
एको वा यदि वाऽनेको यस्य वैकारिकः स्वरः।
सहसोत्पद्यते जन्तोर्हीयमानस्य नास्ति सः॥ २४॥
यच्चान्यदपि किञ्चित् स्याद्वैकृतं स्वरवर्णयोः।

बलमांसविहीनस्य तत् सर्वं मरणोदयम्॥२५॥

तत्र श्लोकः—

इति वर्णस्वरावुक्तौ लक्षणार्थं मुमूर्षताम्।

यस्तौ सम्यग्विजानाति नायुर्ज्ञाने स मुह्यति॥२६॥

अयमेवार्थो गद्योक्तः स्पष्टार्थं सुखग्रहणार्थं च श्लोकेनोच्यते— यस्येत्यादिना। तिलका इत्यादौ मुखे इति मुखार्धे। ओष्ठाविति द्विवचनमुक्त्वाऽपि यत् 'उभौ' इति करोति, तेन सकलौष्ठव्याप्तिं दर्शयति। मुमूर्षुरित्युकत्वाऽपि यत् 'गतायुषं' इति करोति, तेन रिष्टयुक्तो मुमूर्षुर्गतायुरीति दर्शयति; अजातरिष्टस्तु प्रतिक्रियाभावान्मुमूर्षुरगतायुरपि भवति। मरणोदयमिति मरणकारणमिति ज्ञानार्थम्॥१७-२६॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने वर्णस्वरीयमिन्द्रियं नाम प्रथमोऽध्यायः॥१॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायामिन्द्रियस्थाने वर्णस्वरीयमिन्द्रियं नाम प्रथमोऽध्यायः॥१॥

द्वितीयोऽध्यायः।

अथातः पुष्पितकमिन्द्रियं व्याख्यास्यामह॥१॥

इति ह स्माह भगवानात्रेयः।२॥

पुष्पं यथा पूर्वरूपं फलस्येह भविष्यतः।
तथा लिङ्गमरिष्टाख्यं पूर्वरूपं मरिष्यतः॥३॥

वर्णस्वरानन्तरं गन्धस्याधिकृतत्वान्निर्दिष्टत्वाच्च तदाश्रयिरिष्टप्रतिपादकं पुष्पितकमुच्यते— पुष्पं यथेत्यादि। प्रकरणार्थो यद्यपि सकलेन्द्रियसाधारणतया प्रथमाध्याय एव वक्तुं युज्यते, तथाऽपीह पुष्पानुकारेण गन्धाश्रयिरिष्टस्य वाच्यत्वात्, पुष्पं प्रकृतं, तत्प्रसङ्गाच्च रिष्टस्य पुष्पधर्मख्यापकमपि प्रकरणमिहोच्यते। पुष्पं यथेत्यादौ अव्यभिचरितफलसम्बन्धमेव पुष्पं ज्ञेयम्, अत एव 'अप्येवं तु' इत्यादिना फलपुष्पयोः परस्परव्यभिचारं दर्शयति॥१-३॥

अप्येवं तु भवेत् पुष्पं फलेनाननुबन्धि यत्।
फलं चापि भवेत् किञ्चिद्यस्य पुष्पं न पूर्वजम्॥४॥
न त्वरिष्टस्य जातस्य नाशोऽस्ति मरणादृते।
मरणं चापि तन्नास्ति यन्नारिष्टपुरःसरम्॥५॥

पुष्पफलदृष्टान्तेन रिष्टमरणयोर्दुर्बोधत्वात् पुष्पफलव्यभिचारमपि
शिष्यो गृह्णीयादिति तन्निरासार्थमाह— अप्येवमित्यादि। फलेनानुबन्धीति यथा— वेतसपुष्पम्। यस्य पुष्पं न पूर्वजमिति यथा— अश्वत्थादिफलम्। जातस्येति सम्पूर्णस्य, किञ्चिदुदिते ह्यरिष्टेऽसम्पूर्णे

नावश्यं मृत्युः। अन्ये तु जातस्य नियतस्येति वर्णयन्ति; द्विविधं हि रिष्टं— नियतं चानियतं च; तत्र नियतं "मृतमेव तमात्रेयो व्याचचक्षे पुनर्वसुः" (इं.अ.७) इत्यादि, अनियतं यथा— "संशयप्राप्तमात्रेयो मन्यते तस्य जीवितम्" (इं.अ.९), "अरोगः संशयं गत्वा कश्चिदेव प्रमुच्यते" (इं.अ.५) इति; तथाऽनियतारिष्टाभिप्रायेणैव **सुश्रुत**ऽप्युक्तं— "ध्रुवं त्वरिष्टे मरणं ब्राह्मणैस्तत् किलामलैः। रसायनतपोजप्यतत्परैर्वा निवार्यते" इति। (सु.सू.अ.) एतच्चान्ये न मन्यन्ते, आचार्येण रिष्टमरणयोरव्यभिचारस्य महता प्रयत्नेन दर्शितत्वात्। संशयप्राप्तमिति वचनं मरणप्रतिपादकमेवाचार्येण भङ्ग्यन्तरेणोक्तं, यथाऽऽचार्यस्य रिष्टार्थस्तथा तद्ग्रन्थ एव व्याख्यास्यामः। यत्तु रसायनादिना बाध्यत्वं रिष्टस्य तदनुमतमेव, रसायनमहेश्वरप्रसादादयो हि सर्वलोकमर्यादामपि हन्तुं क्षमाः, अतस्तेन तद्व्यभिचारमवेक्ष्येह ग्रन्थः क्रियते; महेश्वरो हि भस्मीभूतं कामं पुनर्जीवयति स्म, तपसा च रामेण मृतोऽपि विप्रपुत्रः पुनर्जीवित इत्याद्यनुसरणीयम्। अन्ये तु कालमृत्यावेव रिष्टपूर्वकं मरणं भवतीति वर्णयन्ति, वदन्ति च— "यद्यकालमृत्यौ रिष्टं भवति तदा वर्णाद्यं मृत्युप्रदं रिष्टं तद्विफलं स्यात्, येन कालमृत्यावुचिताचरणेऽपि परं मृत्युर्भवति नाकालमृत्यौ, तत्र रिष्टे जाते यद्युचिता क्रिया क्रियते न तदा मृत्युर्भवितुमर्हति; तेन कालमृत्युगतमेव रिष्टम्" इति। तच्च न, अविशेषेण कालाकालमरणे रिष्टसद्भावनियमाभिधानात्। अकालमृत्यौ च यदैव क्रियापथमतिक्रान्तेऽपचारजनितो व्याधिर्भवति, तदैव परं रिष्टं भवति, अत एवोक्तं— "क्षणेन हि रिष्टानि प्रादुर्भवन्ति" इति। यश्चैनं (वं) न स्वीकरोति तस्य नियतायुषोऽपचारजन्यव्याधेरसाध्यता कदाऽपि न स्यात्; येन, यथा— अपचारजा दोषा अतिशयप्रमादादसाध्यव्याधिजनका भवन्ति, तथा मरणपूर्वरिष्टजनका अपि भवन्ति॥४-५॥

मिथ्यादृष्टमरिष्टाभमनरिष्टमजानता।

अरिष्टं वाऽप्यसम्बुद्धमेतत् प्रज्ञापराधजम्॥६॥

यत्र कुत्रचिद्रिष्टमरणव्यभिचारिज्ञानं भवति तद्भ्रान्तमिति दर्शयन्नाह— मिथ्येत्यादि। अरिष्टाभमिति अरिष्टसदृशम्। मिथ्यादृष्टमिति रिष्टत्वेन ज्ञातम्; एतदनरिष्टे रिष्टज्ञानं प्रज्ञापराधजं; तथा रिष्टमपि सूक्ष्मरूपतया मारके व्याधावसम्बन्धं भवति, एतदपि प्रज्ञापराधजं मिथ्याज्ञानम्। तेन रिष्टे सत्यपि मरणं न भवतीति ज्ञानं भ्रान्तं, तथा रिष्टं विनाऽपि क्वचिन्मरणं भवतीति ज्ञानं भ्रान्तम्। ततश्च सिद्धोऽव्यभिचारो मरणरिष्टयोरिति वाक्यार्थः॥६॥

ज्ञानसम्बोधनार्थं तु लिङ्गैर्मरणपूर्वजैः।
पुष्पितानुपदेक्ष्यामो नरान् बहुविधैर्बहून्॥७॥

ज्ञायते मरणमनेनेति ज्ञानं रिष्टं, तस्य सम्यग्बोधनं ज्ञानसम्बोधनम्। मरणपूर्वजैरिति मरणपूर्वभाविभिः। पुष्पिता यथा वृक्षादयो गन्धवन्तो भवन्ति तथा रिष्टगन्धप्रयुक्ता ये भवन्ति ते पुष्पिताः, तान् पुष्पितान्। बहुविधैर्लिङ्गैर्बहून् पुष्पितानिति योजना॥७॥

नानापुष्पोपमो गन्धो यस्य भाति दिवानिशम्।
पुष्पितस्य वनस्येव नानाद्रुमलतावतः॥८॥
तमाहुः पुष्पितं धीरा नरं मरणलक्षणैः।
स ना संवत्सराद्देहं जहातीति विनिश्चयः॥९॥
एवमेकैकशः पुष्पैर्यस्य गन्धः समो भवेत्।
इष्टैर्वा यदि वाऽनिष्टैः स च पुष्पित उच्यते॥१०॥
समासेनाशुभान् गन्धानेकत्वेनाथवा पुनः।
आजिघ्रेद्यस्य गात्रेषु तं विद्यात् पुष्पितं भिषक्॥११॥
आप्लुतानाप्लुते काये यस्य गन्धाः शुभाशुभाः।

व्यत्यासेनानिमित्ताः स्युः स च पुष्पित उच्यते॥ १२॥

तद्यथा— चन्दनं कुष्ठं तगरागुरुणी मधु।

माल्यं मूत्रपुरीषे च मृतानि कुणपानि च॥ १३॥

ये चान्ये विविधात्मानो गन्धा विविधयोनयः।

तेऽप्यनेनानुमानेन विज्ञेया विकृतिं गताः॥ १४॥

इदं चाप्यतिदेशार्थं लक्षणं गन्धसंश्रयम्।

वक्ष्यामो यदभिज्ञाय भिषङ्मरणमादिशेत्॥ १५॥

वियोनिर्विदुरो गन्धो यस्य गात्रेषु जायते।

इष्टो वा यदि वाऽनिष्टो न स जीवति तां समाम्॥ १६॥

एतावद्गन्धविज्ञानं,....................................।

वनस्येत्युक्तेऽपि यत् 'नानाद्रुमलतावतः' इति करोति, तेन भिन्नजातीयं वनं ग्राहयति; वनं हि स्वजातीयवृक्षाणामपिस्यात्, यथा— चम्पकवनमशोकवनमित्यादि; नानात्वं च पुष्पाणामेकजातीयानामपि कलिकाद्यवस्थाभेदादपि स्यात्, तस्मात् साधु विशेषणं— नानाद्रुमलतावत इति। मरणलक्षणैर्यथोक्तैर्गन्धैस्तं पुष्पितमाहुरिति योज्यम्। संवत्सरादिति संवत्सराभ्यन्तरे। एवमिति दिवानिशम्। समासेनेत्यादिना पुष्पव्यतिरिक्तशवाद्यशुभगन्धयोगेनापि पुष्पितत्वं, 'परिभाष्यते' इति शेषः; समासेनेति मेलकेन। आप्लुतेत्यादौ आप्लुतानाप्लुतविशेषव्यत्यासः, तथा शुभाशुभगन्धानां व्यत्यासश्च ज्ञेयः। पुष्पितत्वाभिधानं च यत्र यत्र, तत्र तत्र संवत्सरान्तं जीवितं पूर्ववचनाद्भवति। तद्यथेत्यादिना शुभाशुभद्रव्याण्याह। मृतानीति मानुषव्यतिरिक्तानि गवादीनि मृतानि, कुणपानि तु मानुषशरीराणी। विविधयोनय इत्यनेन नानाद्रव्यकृतधूपवर्त्यादिगन्धान् ग्राहयति; विविधात्मान इत्यनेन तु अकृत्रिमनानाद्रव्यगन्धा उच्यन्ते। अनेनानुमानेनेति

'आप्लुतानाप्लुते' इत्यादिग्रन्थोक्तरिष्टानुसारेण। अतिदेशार्थमिति अनुक्तज्ञानार्थम्। वियोनिरिति निर्हेतुकः। विदूर इति स्थायी॥८-१६॥—

..............................रसज्ञानमतः परम्।
आतुराणां शरीरेषु वक्ष्यते विधिपूर्वकम्॥१७॥
यो रसः प्रकृतिस्थानां नराणां देहसम्भवः।
स एषां चरमे काले विकारं भजते द्वयम्॥१८॥
कश्चिदेवास्यवैरस्यमत्यर्थमुपपद्यते।
स्वादुत्वमपरश्चापि विपुलं भजते रसः॥१९॥
तमनेनानुमानेन विद्याद्विकृतिमागतम्।
मनुष्यो हि मनुष्यस्य कथं रसमवाप्नुयात्॥२०॥
मक्षिकाश्चैव यूकाश्च दंशाश्च मशकैः सह।
विरसादपसर्पन्ति जन्तोः कायान्मुमूर्षतः॥२१॥
अत्यर्थरसिकं कायं कालपक्कस्य मक्षिकाः।
अपि स्नातानुलिप्तस्य भृशमायान्ति सर्वशः॥२२॥

वैरस्यमिति अनिष्टरसताम्। कथमिति आक्षेपे; तेन न कथमपीत्यर्थः। अवाप्नुयादिति जानीयात्। अत्यर्थरसिकमिति अतिस्वादुरसम्। कालपक्कास्येति पूर्णकालस्य। सर्वश इति सर्वगात्रेषु॥१७-२२॥

तत्र श्लोकः—

सामान्येन मयोक्तानि लिङ्गानि रसगन्धयोः।
पुष्पितस्य नरस्यैतत्फलं मरणमादिशेत्॥२३॥

सङ्ग्रहश्लोके सामान्येन पुष्पितस्येति वचनाद्रसरिष्टेऽपि पुष्पितत्वमस्य विवक्षितं, तेन रसरिष्टेऽपि संवत्सराभ्यन्तरे मरणमिति फलति॥२३॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने पुष्पितकमिन्द्रियं नाम द्वितीयोऽध्यायः॥२॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायामिन्द्रियस्थाने पुष्पितकमिन्द्रियं नाम द्वितीयोऽध्यायः॥२॥

तृतीयोऽध्यायः।

अथातः परिमर्शनीयमिन्द्रियं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

वर्णे स्वरे च गन्धे च रसे चोक्तं पृथक् पृथक्।
लिङ्गं मुमूर्षतां सम्यक् स्पर्शेष्वपि निबोधत॥३॥

इन्द्रियार्थानुगतरिष्टपारिशेष्यात् स्पर्शगतरिष्टाभिधायकं परिमर्शनीयमिन्द्रियमुच्यते; इममेव चाध्यायसम्बन्धं दर्शयन्नाह— वर्णे स्वरे चेत्यादि॥१-३॥

स्पर्शप्राधान्येनैवातुरस्यायुषः प्रमाणावशेषं जिज्ञासुः प्रकृतिस्थेन पाणिना शरीरमस्य केवलं स्पृशेत्, परिमर्शयेद्वाऽन्येन। परिमृशता तु खल्वातुरशरीरमिमे भावास्तत्र तत्रावबोद्धव्या भवन्ति। तद्यथा— सततं स्पन्दमानानां शरीरदेशानामस्पन्दनं, नित्योष्मणां शीतीभावः, मृदूनां दारुणत्वं, श्लक्ष्णानां खरत्वं, सतामसद्भावः, सन्धीनां स्रंसभ्रंशच्यवनानि; मांसशोणितयोर्वीतीभावः, दारुणत्वं, स्वेदानुबन्धः, स्तम्भो वा; यच्चान्यदपि किञ्चिदीदृशं स्पर्शानां लक्षणं भृशविकृतमनिमित्तं स्यात्। इति लक्षणं स्पृश्यानां भावानामुक्तं समासेन॥४॥

स्पर्शेनेति वक्तव्ये यत् 'स्पर्शप्राधान्येन' इति करोति, तेन अस्पर्शग्राह्यमपि चक्षुर्लौहितत्वादि रिष्टमिह स्पर्शपरीक्ष्यमध्ये ओघादायातं वक्तव्यमिति दर्शयति। प्रकृतिस्थेनेति नात्युष्णशीतेन। केवलमिति कृत्स्नम्। गुरुदारादेः स्वयं स्पर्शो यदा न युज्यते तदा कर्तव्यमाह— परिमर्शयेद्वाऽन्येनेति। सतामसद्भाव इति अत्र च वृष्णादीनां सतामिति ज्ञेयं, स्थूलावयवानां रिष्टेऽप्यभावदर्शनात्। स्रंसः

मनाग्गमनं, भ्रंशस्तु सुदूराधोगमनं, धावनं तु पार्श्वतो गमनम्। वीतीभावः अतिक्षीणत्वम्। लक्षणमिति मरणलक्षणम्। समासेनेति च्छेदः॥४॥

तद्व्यासतोऽनुव्याख्यास्यामः— तस्य चेत् परिमृश्यमानं पृथक्त्वेन पादजङ्घोरुस्फिगुदरपार्श्व-पृष्ठेषिकापाणिग्रीवाताल्वोष्ठललाटं स्विन्नं शीतं स्तब्धं दारुणं वीतमांसशोणितं वा स्यात्, परासुरयं पुरुषो न चिरात् कालं मरिष्यतीति विद्यात्। तस्य चेत् परिमृश्यमानानि पृथक्त्वेन गुल्फजानुवङ्क्षणगुदवृषणमेढ्रनाभ्यंसस्तनमणिकपर्शुकाहनुनासिकाकर्णाक्षिभ्रूशङ्खादीनि स्रस्तानि व्यस्तानि च्युतानि स्थानेभ्यः स्कन्नानि वा स्युः, परासुरयं पुरुषोऽचिरात् कालं मरिष्यतीति विद्यात्॥ ५॥

तथाऽस्योच्छ्वासमन्यादन्तपक्ष्मचक्षुःकेशलोमोदरनखाङ्गुलीरालक्षयेत्। तस्य चेदुच्छ्वासोऽतिदीर्घोऽतिह्रस्वो वा स्यात्, परासुरिति विद्यात्। तस्य चेन्मन्ये परिमृश्यमाने न स्पन्देयातां, परासुरिति विद्यात्। तस्य चेद्दन्ताः परिकीर्णाः श्वेता जातशर्कराः स्युः, परासुरिति विद्यात्। तस्य चेत् पक्ष्माणि जटाबद्धानि स्युः, परासुरिति विद्यात्। तस्य चेच्चक्षुषी प्रकृतिहीने, विकृतियुक्ते, अत्युत्पिण्डिते, अतिप्रविष्टे, अतिजिह्मे, अतिविषमे, अतिमुक्तबन्धने, अतिप्रस्रुते, सततोन्मिषिते, सततनिमिषिते, निमिषोन्मेषातिप्रवृत्ते, विभ्रान्तदृष्टिके, विपरीतदृष्टिके, हीनदृष्टिके, व्यस्तदृष्टिके, नकुलान्धे, कपोतान्धे, अलातवर्णे, कृष्णपीतनीलश्यावताम्रहरितहारिद्रशुक्लवैकारिकाणां वर्णानामन्यतमेनातिप्लुते वा स्यातां, तदा परासुरिति विद्यात्। अथास्य केशलोमान्यायच्छेत्, तस्य चेत् केशलोमान्यायम्यमानानि प्रलुच्येरन् न चेद्वेदयेयुस्तं परासुरिति विद्यात्। तस्य चेदुदरे सिराः प्रकाशेरञ् श्यावताम्रनीलहारिद्रशुक्ला वा स्युः, परासुरिति विद्यात्। तस्य चेन्नखा वीतमांसशोणिताः पक्वजाम्बववर्णाः स्युः, परासुरिति विद्यात्। अथास्याङ्गुलीरायच्छेत्; तस्य चेदङ्गुलय आयम्यमाना न स्फुटेयुः, परासुरिति विद्यात्॥ ६॥

पृष्ठेषिका पृष्ठवंशः। पृथक्त्वेनेति एकैकश्येन। मणिकः करबाहुसन्धिः। मन्ये गलपार्श्वगते धमन्यौ। उच्छ्वासदैर्घ्यह्रासौ नासाग्रदत्तकरस्पर्शादुपलभ्येते। परिकीर्णा इति मललिप्ताः। दन्तादिश्वेतत्वं चक्षुर्ग्राह्यमपि स्पर्शपरीक्षणीयदन्तधर्मप्रस्तावादुच्यते। चक्षुषी प्रकृतिहीने विकृतियुक्ते इति सामान्यवचनं; तस्य विवरणम्— अत्युत्पिण्डिते इत्यादि। अत्युत्पिण्डिते इति अत्यर्थनिर्गते। अतिजिह्मे अतिकुटिले। अतिविषमे इति एकं संवृतम्, अपरं विस्तृतमिति। निमेषोन्मेषक्रियायामत्यर्थं प्रवर्तेते इति निमेषोन्मेषातिप्रवृत्ते। विपरीतदृष्टिके इति केयूरदृष्टिके; किंवा विपरीतदृष्टिके अन्यथाग्राहिणी। हीनदृष्टिके अदूरदर्शिनी, नष्टदृष्टिके वा। नकुलान्धकपोतान्धलक्षणे ग्रन्थः— "नकुलान्धस्तु रूपाणि दिवा शुक्लानि पश्यति। कपोतान्धस्तु रूपाणि दिवा कृष्णानि पश्यति" इति। अलातस्तु तप्ताङ्गारः। इह चक्षुर्गतारिष्टाभिधानप्रस्तावादस्पर्शग्राह्यमपि चक्षुषोरलातवर्णत्वादिकमुच्यते। उदरानुगताः सिरास्त्विह स्पर्शनग्राह्या भवन्तीति उक्ताः; तत्प्रसङ्गाच्चक्षुर्ग्राह्याः सिरावर्णा अप्युक्ताः। आयच्छेदिति स्फोटयेत्। नखाङ्गुलिगतारिष्टपरीक्षायां तु स्पर्शोऽपि व्याप्रियत एवेति कृत्वा तदरिष्टमपीहोक्तम्॥६॥

तत्र श्लोकः—

एतान् स्पृश्यान् बहून् भावान् यः स्पृशन्नवबुध्यते।
आतुरे न स सम्मोहमायुर्ज्ञानस्य गच्छति॥७॥

एतान् स्पृश्यानिति बाहुल्यादुक्तम्; एवं स्पृशन्नित्येतदपि बाहुल्यादुक्तम्। 'आयुर्ज्ञानस्येति' पाठपक्षे षष्ठी सम्बन्धविवक्षायाम्॥७॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने परिमर्शनीयमिन्द्रियं नाम तृतीयोऽध्यायः॥३॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायामिन्द्रियस्थाने परिमर्शनीयमिन्द्रियं नाम तृतीयोऽध्यायः॥३॥

चतुर्थोऽध्यायः।

अथात इन्द्रियानीकमिन्द्रियं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

उद्देशक्रमानुरोधादिन्द्रियगोचरारिष्टाभिधानार्थमिन्द्रियानीकमुच्यते। इन्द्रियाणामनीकं समूहः, तमधिकृत्य कृतमिन्द्रियानीकम्॥१-२॥

इन्द्रियाणि यथा जन्तोः परीक्षेत विशेषवित्।
ज्ञातुमिच्छन् भिषग्ज्ञानमायुषस्तन्निबोधत॥३॥
अनुमानात् परीक्षेत दर्शनादीनि तत्त्वतः।
अद्धा हि विदितं ज्ञानमिन्द्रियाणामतीन्द्रियम्॥४॥

दर्शनं चक्षुः; दर्शनादीनि चक्षुरादीनि पञ्चेन्द्रियाणि। इन्द्रियाणां परीक्षा न प्रत्यक्षेणेत्याह— अद्धा हीत्यादि। अद्धेति अवितथम्। इन्द्रियाणामतीन्द्रियत्वादनुमानेनैव परीक्षणमिति शेषः॥३-४॥

स्वस्थेभ्यो विकृतं यस्य ज्ञानमिन्द्रियसंश्रयम्।
आलक्ष्येतानिमित्तेन लक्षणं मरणस्य तत्॥५॥
इत्युक्तं लक्षणं सम्यगिन्द्रियेष्वशुभोदयम्।
तदेव तु पुनर्भूयो विस्तरेण निबोधत॥६॥

स्वस्थेभ्य इति प्रकृतिस्थेभ्य इन्द्रियेभ्यः; ‘उत्पन्नम्’ इति शेषः। इन्द्रियसंश्रयमिति बाह्येन्द्रियजन्यम्। अनिमित्तेनेति विकृतिज्ञानजनकबाह्यहेतुव्यतिरेकेण; इन्द्रियगतिकृतज्ञानजनकदोषनिरासस्तु ‘स्वस्थेभ्यः’ इति विशेषणेनैव कृतः। अशुभोदयमिति मरणकारणम्। पुनःशब्दः प्रकाशने, यथा— “दोषाः पुनस्त्रयः” (वि.अ.१) इति। भूयःशब्दः पुनःपुनरर्थे, किंवा भूयःशब्दो महदर्थः; तेन, पुनर्भूयःशब्दयोर्भिन्नार्थत्वम्॥५-६॥

घनीभूतमिवाकाशमाकाशमिव मेदिनीम्।
विगीतमुभयं ह्येतत् पश्यन् मरणमृच्छति॥७॥

घनीभूतमिति कठिनतां गतं; किंवा भूतशब्दः कृतार्थे, यथा— उपधानीभूतम्। तेन, इवशब्दश्चोपमाने भवति। अन्ये तु घनीभूतं पृथिवीरूपतां यातं वदन्ति। आकाशमिव मेदिनीमिति शून्यरूपां मेदिनीम्। विगीतमिति विपरीतत्वेन ज्ञातम्। उभयमित्यनेन यौगपद्येन पृथिव्याकाशविपरीतोपलम्भो रिष्टं, नैकैकश्येन। अयं चारिष्टमहिमा यदेवंरूपमेव रिष्टं भवति, एवमुक्तारिष्टेषु तथा तथोत्पादः स्वमहिम्नैव ज्ञेयः। एतानि चारिष्टानि सामान्येनैवेन्द्रियारिष्टाभिधायकप्रकरणलब्धान्यपि प्रायोभावित्वेन शृङ्गग्राहिकयाऽभिधीयन्ते॥७॥

यस्य दर्शनमायाति मारुतोऽम्बरगोचरः।
अग्निर्नायाति चादीप्तस्तस्यायुःक्षयमादिशेत्॥८॥

दर्शनमिति चक्षुर्गोचरताम्। अम्बरगोचर इत्यनेन भूमिष्ठदेवतारूपवातदर्शनं निषेधयति। एतेन ‘एष वायुः, इत्याकारवान्’ इतिति मारुतप्रत्यक्षज्ञानमरिष्टम्। नायाति दर्शनमिति सम्बन्धः॥८॥

जले सुविमले जालमजालावततते नरः।

स्थिते गच्छति वा दृष्ट्वा जीवितात् परिमुच्यते॥९॥

स्थिते इति स्थिरे। गच्छति वहमाने। येषु चेह रिष्टेषु मरणकालनियमो नोक्तस्तत्र संवत्सरमवधिर्भवति, ततः परेण हि रिष्टे मरणानभिधानात्॥९॥

जाग्रत् पश्यति यः प्रेतान् रक्षांसि विविधानि च।

अन्यद्वाऽप्यद्भुतं किञ्चिन्न स जीवितुमर्हति॥१०॥

प्रेतानित्यादिबहुवचनान्नैकप्रेतादिदर्शनं रिष्टमिति भावः॥१०॥

योऽग्निं प्रकृतिवर्णस्थं नीलं पश्यति निष्प्रभम्।

कृष्णं वा यदि वा शुक्लं निशां व्रजति सप्तमीम्॥११॥

प्रकृतिवर्णस्थमिति वैवर्ण्यविकृत्यादिकारकसविषान्नवर्णादिविरहेण स्वीय एव लोहितकपिले वर्णे व्यवस्थितम्। सप्तमीं निशां व्रजति, तेनाष्टाहान्मरणम्॥११॥

मरीचीनसतो मेघान्मेघान् वाऽप्यसतोऽम्बरे।

विद्युतो वा विना मेघैः पश्यन् मरणमृच्छति॥१२॥

मरीचीनसत इत्यत्र प्रकरणान्मरीचिशब्देन मेघज्योतिरुच्यते। मरीचीनां विशेषणम्— असत इति। विद्युतो वा विना मेघादिति अभ्रान्तच्छटा एव सर्वदा मेघसम्बन्धोपलभ्यमाना ग्राह्या, नान्या विद्युदिति; ता हि विना मेघदर्शनमपि सुदूरात् स्वस्थैरप्युपलभ्यन्ते॥ १२॥

मृन्मयीमिव यः पात्रीं कृष्णाम्बरसमावृताम्।
आदित्यमीक्षते शुद्धं चन्द्रं वा न स जीवति॥ १३॥
अपर्वणि यदा पश्येत् सूर्याचन्द्रमसोर्ग्रहम्।
अव्याधितो व्याधितो वा तदन्तं तस्य जीवितम्॥ १४॥
नक्तं सूर्यमहश्चन्द्रमनग्नौ धूममुत्थितम्।
अग्निं वा निष्प्रभं रात्रौ दृष्ट्वा मरणमृच्छति॥ १५॥
प्रभावतः प्रभाहीनान्निष्प्रभांश्च प्रभावतः।
नरा विलिङ्गान् पश्यन्ति भावान् भावाञ्जिहासवः॥ १६॥
व्याकृतीनि विवर्णानि विसङ्ख्योपगतानि च।
विनिमित्तानि पश्यन्ति रूपाण्यायुःक्षये नराः॥ १७॥
यश्च पश्यत्यदृश्यान् वै दृश्यान् यश्च न पश्यति।
तावुभौ पश्यतः क्षिप्रं यमक्षयमसंशयम्॥ १८॥

शुद्धमिति मेघानन्तरितम्। रात्रावित्यनेन दिवा वह्निनिष्प्रभत्वदर्शनमरिष्टं नैवेति दर्शयति। विलिङ्गानिति विगतसहजलिङ्गान्। तेन प्रभाव्यतिरिक्ताञ्जनादि(?)लिङ्गविपर्यये रिष्टं भवति। भावानिति प्राणान्; किंवा भावानिति पञ्चमहाभूतानि शरीररूपाणि। व्याकृतीनीति विविधाकृतीनि। विवर्णानीति विरुद्धवर्णानि। विसङ्ख्योपगतानीति विपरीतसङ्ख्यायुक्तानि। विनिमित्तानीति विगतनिमित्तानि।

व्याकृत्यादिकारकहेतुव्यतिरेकेण व्याकृत्यादियुक्तरूपदर्शनमरिष्टमित्यर्थः। रूपाणीति रूपवन्ति द्रव्याणि॥ १३-१८॥

अशब्दस्य च यः श्रोता शब्दान् यश्च न बुध्यते।
द्वावप्येतौ यथा प्रेतौ तथा ज्ञेयौ विजानता॥ १९॥
संवृत्याङ्गुलिभिः कर्णौ ज्वालाशब्दं य आतुरः।
न शृणोति गतासुं तं बुद्धिमान् परिवर्जयेत्॥ २०॥

अशब्दस्येत्यादिना श्रोत्रारिष्टमाह। ज्वालायाः शब्द इव शब्दो ज्वालाशब्दः, तम्॥ १९-२०॥

विपर्ययेण यो विद्याद्गन्धानां साध्वसाधुताम्।
न वा तान् सर्वशो विद्यात्तं विद्याद्विगतायुषम्॥ २१॥

विपर्ययेणेत्यादिना घ्राणारिष्टमुच्यते। न वा तान् सर्वशो विद्यादिति सर्वथैव गन्धाञ्छुभानशुभान् वा न वेत्ति॥ २१॥

यो रसान्न विजानाति न वा जानाति तत्त्वतः।
मुखपाकादृते पक्वं तमाहुः कुशला नरम्॥ २२॥

तत्त्वत इति स्वकीयेन रूपेण। मुखपाकशब्दो रसनादोषोपलक्षणं; तेन, पित्तदुष्टरसनत्वाद्रसान्यथात्वग्राहकस्य व्युदासोऽवरुध्यते। पक्वमिति सम्पूर्णायुःकालम्॥ २२॥

उष्णाञ्छीतान् खराञ्छ्लक्ष्णान्मृदूनपि च दारुणान्।

स्पृश्यान् स्पृष्ट्वा ततोऽन्यत्वं मुमूर्षुस्तेषु मन्यते॥२३॥

ततोऽन्यत्वमिति उष्णे शीतत्वं, श्लक्ष्णे खरत्वमित्यादि मन्यते॥२३॥

अन्तरेण तपस्तीव्रं योगं वा विधिपूर्वकम्।

इन्द्रियैरधिकं पश्यन् पञ्चत्वमधिगच्छति॥२४॥

इन्द्रियाणामृते दृष्टेरिन्द्रियार्थानदोषजान्।

नरः पश्यति यः कश्चिदिन्द्रियैर्न स जीवति॥२५॥

सम्प्रति सर्वेन्द्रियरिष्टं सामान्येन ब्रूते— अन्तरेणेत्यादि। अन्तरेणेति विना। योगमित्यस्य विशेषणं— विधिपूर्वकमिति; अनेन यथाविधिकृतस्यैव योगस्यातीन्द्रियज्ञाने समर्थत्वमुक्तम्। अधिकमिति अस्मदादीन्द्रियाविषयम्। पञ्चत्वमिति मरणम्। दृष्टिः उपलब्धिः, तया दृष्ट्या दृष्टिशक्तिरुपचारादुच्यते; तेन ऋते दृष्टिमिति उपलब्धिं विना; ततश्चेन्द्रियाणामुपलब्धिशक्तिं विना य इन्द्रियैरुपलब्धुमशक्यान् पश्येदिन्द्रियैः, न स जीवति। अदोषजानित्यनेन च दोषस्वभावादिन्द्रियाशक्यार्थग्रहणं निराकरोति। यथा— अङ्गुलियन्त्रितं चक्षुर्वातदुष्ट्याऽऽसन्नवस्तुद्वयमिन्द्रियाविषयं पश्यति, तथा पित्तदुष्टरसनं गुडं न मधुरं प्रत्येतीत्यादि बोध्यम्॥२४-२५॥

स्वस्थाः प्रज्ञाविपर्यासैरिन्द्रियार्थेषु वैकृतम्।

पश्यन्ति येऽसद्बहुशस्तेषां मरणमादिशेत्॥२६॥

स्वस्था इति अविकृतेन्द्रियमनसः। प्रज्ञाविपर्यासैरिति शेषीभूतासुप्रभावकृतः प्रज्ञाविपर्यासः। असदिति अयथाभूतम्। बहुश इत्यनेन सकृद्दर्शनस्य नारिष्टत्वम्॥२६॥

तत्र श्लोकः—

एतदिन्द्रियविज्ञानं यः पश्यति यथातथम्।

मरणं जीवितं चैव स भिषक् ज्ञातुमर्हति॥२७॥

इन्द्रियविज्ञानमिन्द्रियगतरिष्टविज्ञानम्। जीवितज्ञानं चेह रिष्टशून्येन्द्रियज्ञाने सति भवतीति ज्ञेयम्॥ २७॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने इन्द्रियानीकमिन्द्रियं नाम चतुर्थोऽध्यायः॥४॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायामिन्द्रियस्थाने इन्द्रियानीकमिन्द्रियं नाम चतुर्थोऽध्यायः॥४॥

पञ्चमोऽध्यायः।

अथातः पूर्वरूपीयमिन्द्रियं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

इन्द्रियगतरिष्टमभिधाय सत्त्वादीनामग्रे सूचितानामरिष्टमग्रे वक्तुं युज्यते; तत्त्वल्पवक्तव्यत्वादुल्लङ्घ्य बहुवक्तव्यं पूर्वरूपरिष्टमभिधातुं पूर्वरूपीयोऽभिधीयते, प्रथमाध्याये तु सत्त्वादीनामग्रेऽभिधानमिन्द्रियैः समं बुद्धिसाधनत्वादिप्रसङ्गागतं ज्ञेयम्। व्याधिस्तु यद्यपि बहुवक्तव्यः कतमानिशरीरीयेऽग्रे सूत्रितश्च, तथाऽपि पूर्वरूपपूर्वकत्वाद् व्याधेः पूर्वं पूर्वरूपनिरूपणमिह; सूत्रे त्वग्रे व्याधिवचनेन पूर्वं रूपाद् व्याधेः पूर्वरूपबोध्यस्य प्राधान्यं दर्शयति॥१-२॥

पूर्वरूपाण्यसाध्यानां विकाराणां पृथक् पृथक्।
भिन्नाभिन्नानि वक्ष्यामो भिषजां ज्ञानवृद्धये॥३॥
पूर्वरूपाणि सर्वाणि ज्वरोक्तान्यतिमात्रया।
यं विशन्ति विशत्येनं मृत्युर्ज्वरपुरःसरः॥४॥
अन्यस्यापि च रोगस्य पूर्वरूपाणि यं नरम्।
विशन्त्यनेन कल्पेन तस्यापि मरणं ध्रुवम्॥५॥

भिन्नाभिन्नानीति साधारणासाधारणानि। तत्र 'पूर्वरूपाणि' इत्यादिना 'तस्यापि मरणं ध्रुवम्' इत्यन्तेन सर्वव्याधिपूर्वरूपरिष्टं साधारणमुक्तं, 'पूर्वरूपैकदेशांस्तु' इत्यादिना तु प्रतिव्याधिभिन्नपूर्वरूपारिष्टमुच्यते। अन्ये तु भिन्नाभिन्नानीति उक्तानुक्तानीति ब्रुवते; तत्र ज्वरादिपूर्वरूपाण्युक्तानि,

'श्वभिरुष्ट्रैः खरैः' इत्यादि तु पूर्वरूपमनुक्तम्। सर्वाणीति समस्तानि। अतिमात्रयेति अत्युल्बणत्वेन। ज्वरपुरःसर इति ज्वरानन्तरभावी। अनेन कल्पेनेत्यनेन सर्वाणि चातिमात्रया चेति दर्शयति॥३-५॥

पूर्वरूपैकदेशांस्तु वक्ष्यामोऽन्यान् सुदारुणान्।
ये रोगाननुबध्नन्ति मृत्युर्यैरनुबध्यते॥६॥
बलं च हीयते यस्य प्रतिश्यायश्च वर्धते।
तस्य नारीप्रसक्तस्य शोषोऽन्तायोपजायते॥७॥
श्वभिरुष्ट्रैः खरैर्वाऽपि याति यो दक्षिणां दिशम्।
स्वप्ने यक्ष्माणमासाद्य जीवितं स विमुञ्चति॥८॥
प्रेतैः सह पिबेन्मद्यं स्वप्ने यः कृष्यते शुना।
सुघोरं ज्वरमासाद्य जीवितं स विमुञ्चति॥९॥

रोगाननुबध्नन्तीति रोगेण पश्चाद्भाविनाऽवश्यं युज्यन्ते। मृत्युर्यैरनुबध्यते इति यै रोगैर्मृत्युरनुबध्यते। एतेनैतत् फलति— पूर्वरूपाणां यैर्व्याधिभिर्नियतः सम्बन्धस्तेऽवश्यं मारका भवन्तीत्यर्थः। "श्वोष्ट्रवराहखरैर्यानं" (नि.अ.६) इत्यादि शोषनिदानेऽप्युक्तं, तेन दक्षिणदिशागमनविशेषितमेव तद्रिष्टम्॥६-९॥

लाक्षारक्ताम्बराभं यः पश्यत्यम्बरमन्तिकात्।
स रक्तपित्तमासाद्य तेनैवान्ताय नीयते॥१०॥
रक्तस्रग्रक्तसर्वाङ्गो रक्तवासा मुहुर्हसन्।
यः स्वप्ने ह्रियते नार्या स रक्तं प्राप्य सीदति॥११॥

अन्तिकादिति समीपात्। रक्तं प्राप्येति रक्तपित्तं प्राप्य। सीदति म्रियते॥ १०-११॥

शूलाटोपान्त्रकूजाश्च दौर्बल्यं चातिमात्रया।
नखादिषु च वैवर्ण्यं गुल्मेनान्तकरो ग्रहः॥ १२॥
लता कण्टकिनी यस्य दारुणा हृदि जायते।
स्वप्ने गुल्मस्तमन्ताय क्रूरो विशति मानवम्॥ १३॥

आटोपः कुक्षौ शब्दवद्वातभ्रमणम्। गृह्यते अनेनेति ग्रहो लिङ्गमित्यर्थः॥ १२-१३॥

कायेऽल्पमपि संस्पृष्टं सुभृशं यस्य दीर्यते।
क्षतानि च न रोहन्ति कुष्ठैर्मृत्युर्हिनस्ति तम्॥ १४॥
नग्नस्याज्यावसिक्तस्य जुह्वतोऽग्निमनर्चिषम्।
पद्मान्युरसि जायन्ते स्वप्ने कुष्ठैर्मरिष्यतः॥ १५॥

संस्पृष्टमिति शस्त्रतृणादिसंस्पृष्टम्॥ १४-१५॥

स्नातानुलिप्तगात्रेऽपि यस्मिन् गृध्नन्ति मक्षिकाः।
स प्रमेहेण संस्पर्शं प्राप्य तेनैव हन्यते॥ १६॥
स्नेहं बहुविधं स्वप्ने चण्डालैः सह यः पिबेत्।
बध्यते स प्रमेहेण स्पृश्यतेऽन्ताय मानवः॥ १७॥

यद्यपि स्नातानुलिप्तगात्रे इत्यादिरिष्टं पुष्पितके "अपिस्नातानुलिप्तस्य" (इं.अ.२) इत्यादिनोक्तं, तथाऽपीह प्रमेहेण मरणोपदर्शनार्थं पुनरुच्यते। तत्र च यदा प्रमेहपूर्वरूपान्तराणि भवन्ति, एतच्च लक्षणं भवति, तदा प्रमेहेण मृत्युः; यदा तु प्रमेहपूर्वरूपाणि न भवन्ति, तदा येन केनापि व्याधिना मृत्युर्ज्ञेयः॥१६-१७॥

ध्यानायासौ तथोद्वेगौ मोहश्चास्थानसम्भवः।
अरतिर्बलहानिश्च मृत्युरुन्मादपूर्वकः॥१८॥
आहारद्वेषिणं पश्यन् लुप्तचित्तमुदर्दितम्।
विद्याद्धीरो मुमूर्षुं तमुन्मादेनातिपातिना॥१९॥
क्रोधनं त्रासबहुलं सकृत्प्रहसिताननम्।
मूर्च्छापिपासाबहुलं हन्त्युन्मादः शरीरिणम्॥२०॥
नृत्यन् रक्षोगणैः सार्कं यः स्वप्नेऽम्भसि सीदति।
स प्राप्य भृशमुन्मादं याति लोकमतः परम्॥२१॥
असत्तमः पश्यति यः श्रृणोत्यप्यसतः स्वनान्।
बहून् बहुविधान् जाग्रत् सोऽपस्मारेण बध्यते॥२२॥
मत्तं नृत्यन्तमाविध्य प्रेतो हरति यं नरम्॥
स्वप्ने हरति तं मृत्युरपस्मारपुरःसरः॥२३॥

उदर्दितमिति उदर्दयुक्तं; यद्वा, उदर्दितम् ऊर्ध्ववातार्दितम्। आविध्येति अधःशिरसं कृत्वा॥१८-२३॥

स्तभ्येते प्रतिबुद्धस्य हनू मन्ये तथाऽक्षिणी।
यस्य तं बहिरायामो गृहीत्वा हन्त्यसंशयम्॥२४॥

शष्कुलीर्वाऽप्यपूपान् वा स्वप्ने खादति यो नरः।

स चेतादृक् छर्दयति प्रतिबुद्धो न जीवति॥२५॥

तादृगिति अपूपशष्कुलीरूपम्॥२४-२५॥

एतानि पूर्वरूपाणि यः सम्यगवबुध्यते।

स एषामनुबन्धं च फलं च ज्ञातुमर्हति॥२६॥

एषामनुबन्धमिति एतत्पूर्वरूपोत्तरकालभाविनं व्याधिम्। फलं चैषां मृत्युरूपम्॥२६॥

इमांश्चाप्यपरान् स्वप्नान् दारुणानुपलक्षयेत्।

व्याधितानां विनाशाय क्लेशाय महतेऽपि वा॥२७॥

यस्योत्तमाङ्गे जायन्ते वंशगुल्मलतादयः।

वयांसि च विलीयन्ते स्वप्ने मौण्ड्यमियाच्च यः॥२८॥

गृध्रोलूकश्वकाकाद्यैः स्वप्ने यः परिवार्यते।

रक्षःप्रेतपिशाचस्त्रीचण्डालद्रविडान्ध्रकैः॥२९॥

वंशवेत्रलतापाशतृणकण्टकसङ्कटे।

संसज्जति हि यः स्वप्ने यो गच्छन् प्रपतत्यपि॥३०॥

भूमौ पांशूपधानायां वल्मीके वाऽथ भस्मनि।

श्मशानायतने श्वभ्रे स्वप्ने यः प्रपतत्यपि॥३१॥

कलुषेऽम्भसि पङ्के वा कूपे वा तमसाऽऽवृते।

स्वप्ने मज्जति शीघ्रेण स्रोतसा ह्रियते च यः॥३२॥

स्नेहपानं तथाऽभ्यङ्गः प्रच्छर्दनविरेचने।

हिरण्यलाभः कलहः स्वप्ने बन्धपराजयौ॥३३॥

उपानद्युगनाशश्च प्रपातः पादचर्मणोः।

हर्षः स्वप्ने प्रकुपितैः पितृभिश्चावभर्त्सनम्॥३४॥

दन्तचन्द्रार्कनक्षत्रदेवतादीपचक्षुषाम्।

पतनं वा विनाशो वा स्वप्ने भेदो नगस्य वा॥३५॥

रक्तपुष्पं वनं भूमिं पापकर्मालयं चिताम्।

गुहान्धकारसम्बाधं स्वप्ने यः प्रविशत्यपि॥३६॥

रक्तमाली हसन्नुच्चैर्दिग्वासा दक्षिणां दिशम्।

दारुणामटवीं स्वप्ने कपियुक्तेन याति वा॥३७॥

काषायिणामसौम्यानां नग्नानां दण्डधारिणाम्।

कृष्णानां रक्तनेत्राणां स्वप्ने नेच्छन्ति दर्शनम्॥३८॥

कृष्णा पापा निराचारा दीर्घकेशनखस्तनी।

विरागमाल्यवसना स्वप्ने कालनिशा मता॥३९॥

इत्येते दारुणाः स्वप्ना रोगी यैर्याति पञ्चताम्।

अरोगः संशयं गत्वा कश्चिदेव प्रमुच्यते॥४०॥

क्लेशाय महतेऽपि वेत्यत्रारोगिणां क्लेशाय महत इति बोद्धव्यं, रोगिणां तु मरणायैव; यत उत्तरत्रोपसंहारे 'इत्येते दारुणाः स्वप्नाः' इत्यादौ यथोक्तमेव विभागं करिष्यति। वयांसीति पक्षिणः। गृध्रादिकाकान्तैः परिवार्यत इति सम्बन्धः। संसज्जतीति संयुक्तो भवति। किंवा, 'प्रमुह्यति' इति पाठः; तत्र प्रमुह्यतीति वंशादिसङ्कटे लग्नः सन्न निर्गममार्गमासादयति। प्रपतत्यपीति भूमावित्यादिना योज्यम्। पांशूपधानायामिति धूलिसंयुक्तायाम्। किंवा, भूमावित्यादि प्रपततीत्यनेन योज्यम्। उपानत्

पादत्राणम्। रक्तपुष्पमिति वनविशेषणम्। गुहान्धकारसम्बाधमिति गुहान्धकाररूपं कष्टकारकम्। दिग्वासा नग्नः सन्। कपियुक्तेन 'यानेन' इति शेषः। कश्चिदेव प्रमुच्यत इति अरोगान् प्रति नैतत् स्वप्नानां रिष्टत्वं; तेन, अरोगेष्वेतेषां मरणव्यभिचारेण नैकान्तत्वेन रिष्टत्वमिति वदन्ति॥२७-४०॥

मनोवहानां पूर्णत्वाद्दोषैरतिबलैस्त्रिभिः।
स्रोतसां दारुणान् स्वप्नान् काले पश्यति दारुणे॥४१॥
नातिप्रसुप्तः पुरुषः सफलानफलांस्तथा।
इन्द्रियेशेन मनसा स्वप्नान् पश्यत्यनेकधा॥४२॥

यथैतत् स्वप्नदर्शनं भवति तदाह— मनोवहानामित्यादि। मनोवहानि स्रोतांसि यद्यपि पृथङ्नोक्तानि, तथाऽपि मनसः "केवलं चेतनावच्छरीरमयनभूतं" (वि.अ.५) इत्यभिधानात् सर्वशरीरस्रोतांसि गृह्यन्ते, विशेषेण तु हृदयाश्रितत्वान्मनसस्तदाश्रिता दश धमन्यो मनोवहा अभिधीयन्ते। त्रिभिरिति त्रिभिरपीत्यर्थः; तेन, पृथगपि दोषैः पूरणं ज्ञेयम्। नातिप्रसुप्त इति नातिनिद्राभिभूत इत्यर्थः। इन्द्रियेशेनेति इन्द्रियप्रेरकेण॥४१-४२॥

दृष्टं श्रुतानुभूतं च प्रार्थितं कल्पितं तथा।
भाविकं दोषजं चैव स्वप्नं सप्तविधं विदुः॥४३॥

स्वप्नानां फलवत्त्वमफलवत्त्वं चोक्तं, तद्दर्शयितुं स्वप्नप्रकारानाह— दृष्टमित्यादि। दृष्टमिति चक्षुषा। अनुभूतं तु शेषेन्द्रियज्ञातम्। कल्पितमिति मनसा भावितम्। प्रार्थितं याच्ञाविषयीकृतम्। भाविकमिति भाविशुभाशुभफलसूचकम्। दोषजमिति उल्बणवातादिदोषजन्यम्॥४३॥

तत्र पञ्चविधं पूर्वमफलं भिषगादिशेत्।

दिवास्वप्नमतिह्रस्वमतिदीर्घं च बुद्धिमान्॥४४॥

दृष्टः प्रथमरात्रे यः स्वप्नः सोऽल्पफलो भवेत्।

न स्वपेद्यं पुनर्दृष्ट्वा स सद्यः स्यान्महाफलः॥४५॥

अकल्याणमपि स्वप्नं दृष्ट्वा तत्रैव यः पुनः।

पश्येत् सौम्यं शुभाकारं तस्य विद्याच्छुभं फलम्॥४६॥

तत्र श्लोकः—

पूर्वरूपाण्यथ स्वप्नान् य इमान् वेत्ति दारुणान्।

न स मोहादसाध्येषु कर्माण्यारभते भिषक्॥४७॥

पूर्वं दृष्टादिकल्पितान्तं पञ्चविधस्वप्नमफलम्। अफलस्वप्नान्तरमाह— दिवास्वप्नमित्यादि। दिवादृष्टं सर्वं स्वप्नं, तथा रात्रिदृष्टमपि अतिदीर्घमतिह्रस्वं च स्वप्नमफलं विद्यात्, फलशून्यत्वादिति। पारिशेष्याद्भाविकं दोषजन्यं च सफलम्। तत्र भाविकं शुभाशुभरूपतया शुभाशुभफलप्रदं, यत्तु दोषजन्यं तद्दोषप्रकोपजन्यव्याधिरूपफलसूचकतया सफलम्। अत्र चाध्याये येषामेव स्वप्नरूपविशिष्टरिष्टसम्भवस्त एवोक्ताः; तेन ग्रहण्यादीनां किमिति स्वप्नारिष्टानि, नोक्तानीति न वाच्यं; तत्र विशिष्टरिष्टासम्भवादेवानभिधानं ज्ञेयम्। 'दृष्टः प्रथमयामे यः' इत्यादिग्रन्थं केचिदत्र पठन्ति। स व्यक्तार्थ एव॥४४-४७॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने पूर्वरूपीयमिन्द्रियं नाम पञ्चमोऽध्यायः॥५॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायामिन्द्रियस्थाने पूर्वरूपीयमिन्द्रियं नाम पञ्चमोऽध्यायः॥५॥

षष्ठोऽध्यायः।

अथातः कतमानिशरीरीयमिन्द्रियं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

सम्प्रति पूर्वरूपीयानन्तरं भाविव्याध्याश्रयारिष्टाभिधानार्थं कतमानिशरीरीयमिन्द्रियमुच्यते। कतमानि शरीराण्यधिकृत्य कृतं कतमानिशरीरीयम्॥१-२॥

कतमानि शरीराणि व्याधिमन्ति महामुने!।
यानि वैद्यः परिहरेद्येषु कर्म न सिध्यति॥३॥
इत्यात्रेयोऽग्निवेशेन प्रश्नं पृष्टः सुदुर्वचम्।
आचचक्षे यथा तस्मै भगवांस्तन्निबोधत॥४॥
यस्य वै भाषमाणस्य रुजत्यूर्ध्वमुरो भृशम्।
अन्नं च च्यवते भुक्तं स्थितं चापि न जीर्यति॥५॥
बलं च हीयते शीघ्रं तृष्णा चातिप्रवर्धते।
जायते हृदि शूलं च तं भिषक् परिवर्जयेत्॥६॥

प्रश्नमिति पृच्छाविषयम्। ऊर्ध्वमुर इति उरऊर्ध्वभाग इत्यर्थः। एतदध्यायप्रतिपाद्यानां चासाध्यव्याधीनां मरणसूचकेन रिष्टेन समं मरणसूचकतया साधर्म्यादनरिष्टानामपि व्याधीनामभिधानमिति ब्रुवते। यदि एत एवासाध्यव्याधयो मरणपूर्वरूपतया रिष्टरूपा एव भवन्ति तथाऽपि न काचित् क्षतिः। तेनारिष्टाधिकारादरिष्टत्वमेव एतदध्यायवाच्यानां व्याधीनामिच्छामः॥३-६॥

हिक्का गम्भीरजा यस्य शोणीतं चातिसार्यते।

न तस्मै भेषजं दद्यात् स्मरन्नात्रेयशासनम्॥७॥

आनाहश्चातिसारश्च यमेतौ दुर्बलं नरम्।

व्याधितं विशतो रोगौ दुर्लभं तस्य जीवितम्॥८॥

आनाहश्चातितृष्णा च यमेतौ दुर्बलं नरम्।

विशतो विजहत्येनं प्राणा नातिचिरान्नरम्॥९॥

ज्वरः पौर्वाह्णिको यस्य शुष्ककासश्च दारुणः।

बलमांसविहीनस्य यथा प्रेतस्तथैव सः॥१०॥

गम्भीरजा इति गम्भीरनाभ्यादिदेशजा, न तु गम्भीरा; तस्याः स्वरूपत एवासाध्यत्वेनोक्तत्वात् 'शोणितं चातिसार्यते' इति विशेषणमनर्थकं स्यात्। व्याधितमित्यनेन हि आनाहातिसारातिरिक्त-व्याधिगृहीतमिति दर्शयति। आनाहातिसारयो रोगत्वे सिद्धेऽपि 'रोगौ' इति विशेषेण रुजाकर्तृत्वोपदर्शनार्थम्। इहालभ्य एव जीविते 'दुर्लभम्' इत्युक्तं; यथा— सर्वथाऽलभ्ये दुर्लभमिति। अन्ये तु दुर्लभभाषया अनियतं मरणे रिष्टमिति ब्रुवते, एवम् "संशयप्राप्तमात्रेयो जीवितं तस्य मन्यते" (इं.अ.९) इत्यादावपि व्याख्यानयन्ति। अनियतरिष्टताऽस्वारस्यं त्वस्माभिः पुष्पितक एवोक्तम्। "संशयप्राप्तमात्रेयो जीवितं तस्य मन्यते" इत्यस्य चार्थं यस्यश्यावनिमित्तीये वक्ष्यामः॥७-१०॥

यस्य मूत्रं पुरीषं च ग्रथितं सम्प्रवर्तते।

निरूष्मणो जठरिणः श्वसनो न स जीवति॥११॥

श्वयथुर्यस्य कुक्षिस्थो हस्तपादं विसर्पति।

ज्ञातिसङ्घं स सङ्क्लेश्य तेन रोगेण हन्यते॥१२॥

श्वयथुर्यस्य पादस्थस्तथा स्रस्ते च पिण्डिके।

सीदतश्चाप्युभे जङ्घे तं भिषक् परिवर्जयेत्॥ १३॥

शूनहस्तं शूनपादं शूनगुह्योदरं नरम्।

हीनवर्णबलाहारमौषधैर्नोपपादयेत्॥ १४॥

मूत्रं ग्रथितमिति घनीभूतं ज्ञेयम्। ज्ञातिसङ्घं स सङ्क्लेश्येतिवचनेन चिरमस्य रोगोऽनुवर्तते, ततः प्रत्याशया ज्ञातयस्तत्प्रतीकारार्थं क्लिश्यन्ति, ततस्तु म्रियत एव न प्रतिकर्तुं पार्यते। पिण्डिके इति जङ्घामांसपिण्डिके॥ ११-१४॥

उरोयुक्तो बहुश्लेष्मा नीलः पीतः सलोहितः।

सततं च्यवते यस्य दूरात्तं परिवर्जयेत्॥ १५॥

हृष्टरोमा सान्द्रमूत्रः शूनः कासज्वरार्दितः।

क्षीणमांसो नरो दूराद्वर्ज्यो वैद्येन जानता॥ १६॥

त्रयः प्रकुपिता यस्य दोषाः कष्टाभिलक्षिताः।

कृशस्य बलहीनस्य नास्ति तस्य चिकित्सितम्॥ १७॥

ज्वरातिसारौ शोफान्ते श्वयथुर्वा तयोः क्षये।

दुर्बलस्य विशेषेण नरस्यान्ताय जायते॥ १८॥

पाण्डुरश्च कृशोऽत्यर्थं तृष्णयाऽभिपरिप्लुतः।

डम्बरी कुपितोच्छ्वासः प्रत्याख्येयो विजानता॥ १९॥

उरोयु(मु)क्त इति उरःप्रभवत्वेनानुमीयमानः। कष्टाभिलक्षिता इति दुरुपक्रमत्वेन ज्ञाताः। किंवा 'कोष्ठा(ष्ठेऽ)भिलक्षिता' इति पाठः, स व्यक्त एव। डम्बरी स्तब्धाक्षावलोकी; किंवा डम्बरी संरम्भवान्। कुपित उच्छ्वासो यस्य स कुपितोच्छ्वासः॥ १५-१९॥

हनुमन्याग्रहस्तृष्णा बलह्रासोऽतिमात्रया।

प्राणाश्चोरसि वर्तन्ते यस्य तं परिवर्जयेत्॥२०॥

प्राणाश्चोरसि वर्तन्त इति वायव उरसि प्रकुपिता वहन्ति; यदि तु जीवितं प्राणा इहोच्यन्ते, तदा तस्योरसि वर्तन्ते, मृत एव पुरुषो भवति, ततश्च तस्मिन् काले रिष्टेनासाध्यतां ज्ञात्वा रोगिपरित्यागे वैद्यस्याप्रसिद्धिर्भवत्येवेति कृत्वा प्राणा वायव इहोच्यन्ते इति ब्रुवते; वयं तु ब्रूमः— सद्योमरणीयारिष्टवदेतत् प्रत्यासन्नमृत्युगमकमेव भविष्यतीति॥२०॥

ताम्यत्यायच्छते शर्म न किञ्चिदपि विन्दति।

क्षीणमांसबलाहारो मुमूर्षुरचिरान्नरः॥२१॥

विरुद्धयोनयो यस्य विरुद्धोपक्रमा भृशम्।

वर्धन्ते दारुणा रोगाः शीघ्रं शीघ्रं स हन्यते॥२२॥

बलं विज्ञानमारोग्यं ग्रहणी मांसशोणितम्।

एतानि यस्य क्षीयन्ते क्षिप्रं क्षिप्रं स हन्यते॥२३॥

आरोग्यं हीयते यस्य प्रकृतिः परिहीयते।

सहसा सहसा तस्य मृत्युर्हरति जीवितम्॥२४॥

तत्र श्लोकः—

इत्येतानि शरीराणि व्याधिमन्ति विवर्जयेत्।

न ह्येषु धीराः पश्यन्ति सिद्धिं काञ्चिदुपक्रमात्॥२५॥

आयच्छते अङ्गानि क्षिपति। विरुद्धयोनय इति परस्परविरुद्धधर्माणः। विरुद्धयोनयोऽपि स्वल्पतयैकदूष्यतया वा अविरुद्धोपक्रमा अपि भवन्तीत्यत उक्तं— विरुद्धोपक्रमा इति। आरोग्यं हीयत इति अत्रोक्तरोगव्यतिरिक्तरोगवृद्ध्या आरोग्यहानिर्बोध्या। प्रकृतिः परिहीयत इति स्वभावः सुशीलत्वादिरूपः क्षीयते; किंवा, प्रकृतिर्जन्मप्रतिबद्धा श्लेष्मप्रकृत्यादिरूपा हीयते॥२१-२५॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने
कतमानिशरीरीयमिन्द्रियं नाम षष्ठोऽध्यायः॥६॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायामिन्द्रियस्थाने कतमानिशरीरीयमिन्द्रियं नाम षष्ठोऽध्यायः॥६॥

सप्तमोऽध्यायः।

अथातः पन्नरूपीयमिन्द्रियं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

व्याधिरूपानन्तरं वेदनोपद्रवौ उद्दिष्टौ, तौ च पूर्वाध्याय एव "शूलाटोपान्त्रकूजाश्च" (इं.अ.५) इत्यादिना तथा अन्यत्र "आनाहश्चातिसारश्च" (इं.अ.६) इत्यादिना रिष्टरूपतया उक्तावेवेति कृत्वा छायाप्रतिच्छायारूपारिष्टस्य क्रमप्राप्तस्याभिधायकं पन्नरूपीयमुच्यते। पन्नरूपामधिकृत्य कृतं पन्नरूपीयम्॥१-२॥

दृष्ट्यां यस्य विजानीयात् पन्नरूपां कुमारिकाम्।
प्रतिच्छायामयीमक्ष्णोर्नैनमिच्छेच्चिकित्सितुम्॥३॥

पन्नरूपामिति नष्टरूपाम्। कुमारिकामिति पुरुषान्तरनयनगतां कुमारिकां; किंवा, आतुरनयनगतामेव। यदुक्तं **हारीते**— "अदर्शनमसङ्ख्याते नेत्रे नष्टकुमारिके" इति। प्रतिच्छायामयीमिति प्रतिच्छायारूपाम्॥३॥

ज्योत्स्नायामातपे दीपे सलिलादर्शयोरपि।
अङ्गेषु विकृता यस्य च्छाया प्रेतस्तथैव सः॥४॥

अन्यत्रापि छायाविकृतिमाह— ज्योत्स्नेत्यादि। अङ्गेषु विकृतेति शिरोबाहुजङ्घादिषु छायाधिकरणभूतेषु भवन्ती प्रतिच्छाया यस्य विकृता भवतीत्यर्थः। तेन व्यस्तसमस्ताङ्गविकृताऽपि छाया गृह्यते। अन्ये तु — विभक्तिविपरिणामादङ्गानामिति व्याख्यानयन्ति; तथा च सुगम एवार्थः॥४॥

छिन्ना भिन्नाऽऽकुला च्छाया हीना वाऽप्यधिकाऽपि वा।
नष्टा तन्वी द्विधा च्छिन्ना विकृता विशिरा च या॥५॥
एताश्चान्याश्च याः काश्चित् प्रतिच्छाया विगर्हिताः।
सर्वा मुमूर्षतां ज्ञेया न चेल्लक्ष्यनिमित्तजाः॥६॥

एतानेव छायाविकृतिभेदानाह— छिन्नेत्यादि। आकुलेति अनिश्चितप्रतिबिम्बा। विकृता विकृतानुकारिणी। यद्यप्यरिष्टाधिकारेऽनिमित्तमेव यद्भवति तदरिष्टमुक्तं, तथाऽपि पुनः स्पष्टार्थं 'न चेल्लक्ष्यनिमित्तजाः' इत्युक्तम्॥५-६॥

संस्थानेन प्रमाणेन वर्णेन प्रभया तथा।
छाया विवर्तते यस्य स्वस्थोऽपि प्रेत एव सः॥७॥

सम्प्रति छायारूपं सामान्येन दर्शयञ्छायाश्रयारिष्टमाह— संस्थानेनेत्यादि। एतच्च छायाप्रतिच्छाययोः समानं सूत्रम्। तत्र संस्थानेन प्रमाणेन च प्रतिच्छायाः स्वरूपकथनं, तथा वर्णेन प्रभया च छायायाः स्वरूपकथनम्। तत्र संस्थानेन प्रमाणेन च सदृशी छाया प्रतिच्छाया ज्ञेया; वर्णेन प्रभया च लक्षिता वर्णप्रभाश्रयाऽग्रे वक्ष्यमाणा पञ्चविधा च्छाया ज्ञेया। अत्र यत्तदोर्नित्याभिसम्बन्धात् 'सा' इत्यध्याहार्यते। तेन संस्थानादिभिर्या छाया प्रतिच्छायारूपा, सा यस्य विवर्तते अन्यथा भवति, स प्रेत एवेति योजना॥७॥

संस्थानमाकृतिर्ज्ञेया सुषमा विषमा च सा।
मध्यममल्पं महच्चोक्तं प्रमाणं त्रिविधं नृणाम्॥८॥

प्रतिप्रमाणसंस्थाना जलादर्शातपादिषु।

छाया या सा प्रतिच्छाया च्छाया वर्णप्रभाश्रया॥९॥

प्रतिच्छायाकारणभूते संस्थानप्रमाणे एव विवृणोति— संस्थानमित्यादि। आकृतिः आकारः। प्रतीत्यादि प्रतिच्छायाविवरणं, 'छाया वर्णप्रभाश्रया' इत्यादि तु छायाविवरणं भविष्यति। प्रतिप्रमाणसंस्थानेत्यत्र प्रति सादृश्ये; तेन प्रमाणसदृशी, संस्थानसदृशी च। प्रमाणसंस्थानसदृशतया जलादिषु या छाया, सा प्रतिच्छाया। छाया तु या पञ्चविधा सा व्रर्णप्रभाश्रया वर्णप्रभासहचरितोपलभ्यत इत्यर्थः॥८-९॥

खादीनां पञ्च पञ्चानां छाया विविधलक्षणाः।

नाभसी निर्मला नीला सस्नेहा सप्रभेव च॥१०॥

रूक्षा श्यावारुणा या तु वायवी सा हतप्रभा।

विशुद्धरक्ता त्वाग्नेयी दीप्ताभा दर्शनप्रिया॥११।

शुद्धवैदूर्यविमला सुस्निग्धा चाम्भसी मता।

स्थिरा स्निग्धा घना श्लक्ष्णा श्यामा श्वेता च पार्थिवी॥१२॥

वायवी गर्हिता त्वासां चतस्रः स्युः सुखोदयाः।

वायवी तु विनाशाय क्लेशाय महतेऽपि वा॥१३॥

खादीनामित्यादिना छायां विभजते। सप्रभेति दीप्ताभा। वायवी गर्हितेति वायवी रिष्टाय प्रायो भवति। यस्य जन्मप्रभृति वायवी, स चापि प्रभूतक्लेशभाग्भवतीत्याह— वायवीत्यादि। विनाशायेति अकस्मादुत्पन्ना विनाशाय, सहजा तु वायवी क्लेशायेति ज्ञेयम्॥१०-१३॥

स्यात्तैजसी प्रभा सर्वा सा तु सप्तविधा स्मृता।

रक्ता पीता सिता श्यावा हरिता पाण्डुराऽसिता॥ १४॥

तासां याः स्युर्विकासिन्यः स्निग्धाश्च विपुलाश्च याः।

ताः शुभा रूक्षमलिनाः सङ्क्षिप्ताश्चाशुभोदयाः॥ १५॥

सम्प्रति छायाश्रयत्वेन वर्णभेद उक्तः, तत्र वर्णभेदास्तदरिष्टं च प्रथमाध्याय एवोक्तं; प्रभायास्तु भेदं रिष्टं चाह— स्यात्तैजसीत्यादि। प्रभा च यद्यपि प्रथमाध्याये सङ्ग्रहे नोक्ता; तथाऽपि तत्र च्छायाश्रयत्वेन वर्णभेदा उक्ताः, तत्र वर्णभेदास्तदरिष्टं च प्रथमाध्याये सङ्ग्रहेणोक्तं, छायाश्रयत्वेन तत्र प्रभाऽपि सूचितेति ज्ञेयम्। अशुभोदया इति अकस्मादुत्पादे मरणोदयाः, सहजोत्पादे तु बहुदुःखरूपा अशुभोदया इति ज्ञेयम्॥ १४-१५॥

वर्णमाक्रामति च्छाया भास्तु वर्णप्रकाशिनी।

आसन्ना लक्ष्यते च्छाया भाः प्रकृष्टा प्रकाशते॥ १६॥

नाच्छायो नाप्रभः कश्चिद्विशेषाश्चिह्नयन्ति तु।

नृणां शुभाशुभोत्पत्तिं काले छायाप्रभाश्रयाः॥ १७॥

प्रभाच्छाययोर्दुर्लक्ष्यत्वेन भेदकं लक्षणमाह— वर्णमित्यादि। वर्णमाक्रामतीति छायाक्रान्तो वर्णो नोपलभ्यते सम्यक्। आसन्ना लक्ष्यते च्छाया, यथा— चित्रगता छाया प्रत्यासन्नैव लक्ष्यते। भाः प्रकृष्टा प्रकाशते; यथा— मणिमौक्तिकादीनां प्रभा दूरादुपलभ्यत इत्यर्थः। विशेषा इति छायाप्रभयोः शुभाशुभरूपविशेषाः। चिह्नयन्तीति गमयन्ति। काले इति परिपाककाले॥ १६-१७॥

कामलाऽक्ष्णोर्मुखं पूर्णं शङ्खयोर्मुक्तमांसता।

सन्त्रासश्चोष्णगात्रत्वं यस्य तं परिवर्जयेत्॥ १८॥

उत्थाप्यमानः शयनात् प्रमोहं याति यो नरः।

मुहुर्मुहुर्न सप्ताहं स जीवति विकत्थनः॥१९॥

संसृष्टा व्याधयो यस्य प्रतिलोमानुलोमगाः।

व्यापन्ना ग्रहणी प्रायः सोऽर्धमासं न जीवति॥२०॥

कामलाऽक्ष्णोरिति कामलिन इव पीताक्षत्वम्। विकत्थन इति निन्दापरः। संसृष्टा इति परस्परसम्बद्धाः, किंवा संसृष्टदोषजन्याः। प्रतिलोमानुलोमगा इति अधोमार्गोर्ध्वमार्गगताः। व्यापन्ना ग्रहणीति च्छेदः; किंवा, व्यापन्ना ग्रहणी यस्य स 'व्यापन्नग्रहणी' इति पाठः। प्रायः सोऽर्धमासं न जीवतीति अनेनार्धमासमतिक्रम्यापि मरणं भवति, न तु मरणव्यभिचारः॥१८-२०॥

उपरुद्धस्य रोगेण कर्शितस्याल्पमश्नतः।

बहु मूत्रपुरीषं स्याद्यस्य तं परिवर्जयेत्॥२१॥

दुर्बलो बहु भुङ्क्ते यः प्राग्भुक्तादन्नमातुरः।

अल्पमूत्रपुरीषश्च यथा प्रेतस्तथैव सः॥२२॥

इष्टं च गुणसम्पन्नमन्नमश्नाति यो नरः।

शश्वच्च बलवर्णाभ्यां हीयते न स जीवति॥२३॥

प्रकूजति प्रश्वसिति शिथिलं चातिसार्यते।

बलहीनः पिपासार्तः शुष्कास्यो न स जीवति॥२४॥

ह्रस्वं च यः प्रश्वसिति व्याविद्धं स्पन्दते च यः।

मृतमेव तमात्रेयो व्याचचक्षे पुनर्वसुः॥२५॥

ऊर्ध्वं च यः प्रश्वसिति श्लेष्मणा चाभिभूयते।

हीनवर्णबलाहारो यो नरो न स जीवति॥२६॥

प्राग्भुक्तादिति यावदन्नं भुङ्क्ते स्म पूर्वदिनेषु ततो बहु भुङ्क्ते इत्यर्थः। इष्टमिति इष्टरसम्। गुणसम्पन्नमिति पथ्यम्। शिथिलमिति पूर्वेण सम्बध्यते, तेन श्लथ इव प्रकूजति। प्रश्वसितीति अन्तः श्वासं नयति। व्याविद्धमिति कुटिलम्॥२१-२६॥

ऊर्ध्वाग्रे नयने यस्य मन्ये चारतकम्पने।
बलहीनः पिपासार्तः शुष्कास्यो न स जीवति॥२७॥
यस्य गण्डावुपचितौ ज्वरकासौ च दारुणौ।
शूली प्रद्वेष्टि चाप्यन्नं तस्मिन् कर्म न सिध्यति॥२८॥
व्यावृत्तमूर्धजिह्वास्यो भ्रुवौ यस्य च विच्युते।
कण्टकैश्चाचिता जिह्वा यथा प्रेतस्तथैव सः॥२९॥
शेफश्चात्यर्थमुत्सिक्तं निःसृतौ वृषणौ भृशम्।
अतश्चैव विपर्यासो विकृत्या प्रेतलक्षणम्॥३०॥
निचितं यस्य मांसं स्यात्त्वगस्थिष्वेव दृश्यते।
क्षीणस्यानश्नतस्तस्य मासमायुः परं भवेत्॥३१॥

तत्र श्लोकः—
इदं लिङ्गमरिष्टाख्यमनेकमभिजज्ञिवान्।
आयुर्वेदविदित्याख्यां लभते कुशलो जनः॥३२॥

ऊर्ध्वाग्रे इति ऊर्ध्वमुखे। आरतकम्पने अविश्रान्तकम्पने। उत्सिक्तमिति अन्तःप्रविष्टम्। अतश्चैव विपर्यास इति शेफोऽतिनिःसृतं, वृषणौ चातिप्रविष्टौ। विकृत्येति स्वभावं विना; तेन

स्वभावोत्सिक्तशोफादि न रिष्टं, किन्त्वनिमित्तं कादाचित्कं सदेव रिष्टम्। निचितमिति क्षीणं, निशब्दस्य प्रतिषेधार्थत्वात्। एवं च तथा मांसं क्षीणं भवति, यथा त्वगस्थिष्वेव लग्ना दृश्यते; किंवा निचितमुपचितं मांसं स्यात्, त्वगस्थिष्वेव दृश्यते त्वगस्थिमात्रावशेषो वा भवतीति यावत्॥२७-३२॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने पन्नरूपीयमिन्द्रियं नाम सप्तमोऽध्यायः॥७॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायामिन्द्रियस्थाने पन्नरूपीयमिन्द्रियं नाम सप्तमोऽध्यायः॥७॥

अष्टमोऽध्यायः।

अथातोऽवाक्शिरसीयमिन्द्रियं व्याख्यास्यामः॥ १॥

इति ह स्माह भगवानात्रेयः॥२॥

उक्तानुक्तरिष्टपरिग्राहकेऽध्यायद्वये वक्तव्ये छायरिष्टाभिधायकत्वसाधर्म्यादवाक्शिरसीयोऽभिधीयते॥ १-२॥

अवाक्शिरा वा जिह्मा वा यस्य वा विशिरा भवेत्।
जन्तो रूपप्रतिच्छाया नैनमिच्छेच्चिकित्सितुम्॥ ३॥
जटीभूतानि पक्ष्माणि दृष्टिश्चापि निगृह्यते।
यस्य जन्तोर्न तं धीरो भेषजेनोपपादयेत्॥४॥
यस्य शूनानि वर्त्मानि न समायान्ति शुष्यतः।
चक्षुषी चोपदिह्येते यथा प्रेतस्तथैव सः॥५॥
भ्रुवोर्वा यदि वा मूर्ध्नि सीमन्तावर्तकान् बहून्।
अपूर्वानकृतान् व्यक्तान् दृष्ट्वा मरणमादिशेत्॥ ६॥
त्र्यहमेतेन जीवन्ति लक्षणेनातुरा नराः।
अरोगाणां पुनस्त्वेतत् षड्रात्रं परमुच्यते॥७॥

अवाक्शिरा इति ऊर्ध्वपादः। एतच्छायाप्रकरणवक्तव्यमपि शीघ्रमारकत्वख्यापनार्थमिह शीघ्रमारकरिष्टेषु पठितम्। अत्र ह्यरिष्टानि त्र्यहादिमारकाणि वक्तव्यानि। न समायान्तीति न परस्परं मिलन्ति। अपूर्वानिति असहजान्। अकृतानिति प्रयत्नेनाकृतान्॥ ३-७॥

आयम्योत्पाटितान् केशान् यो नरो नावबुध्यते।

अनातुरो वा रोगी वा षड्रात्रं नातिवर्तते॥८॥

यस्य केशा निरभ्यङ्गा दृश्यन्तेऽभ्यक्तसन्निभाः।

उपरुद्धायुषं ज्ञात्वा तं धीरः परिवर्जयेत्॥९॥

आयम्येति बलादाकृष्य। यद्यपि "तस्य केशलोमानि" (इं.अ.३) इत्यादिनैव एतदरिष्टमित्युक्तं, तथाऽपीहातुरस्वस्थविषयप्रतिपादनार्थं पुनरभिधानम्। किंच, तत्र 'प्रलुच्येरन्' इति पदेन केशानामनुत्पाटनमुक्तं, नेह तथेति विशेषः॥८-९॥

ग्लायते नासिकावंशः पृथुत्वं यस्य गच्छति।

अशूनः शूनसङ्काशः प्रत्याख्येयः स जानता॥१०॥

अत्यर्थविवृता यस्य यस्य चात्यर्थसंवृता।

जिह्मा वा परिशुष्का वा नासिका न स जीवति॥११॥

मुखं शब्दश्रवावोष्ठौ शुक्लश्यावातिलोहितौ।

विकृत्या यस्य वा नीलौ न स रोगाद्विमुच्यते॥१२॥

ग्लायत इति दौर्बल्यं भजते। अशून इति परमार्थतोऽशूनः। विवृतेति निर्गता। संवृतेति प्रविष्टा। शब्दश्रवौ कर्णौ। विकृत्येति सहजं विना, तथा हेतुं विनेत्यर्थः॥१०-१२॥

अस्थिश्वेता द्विजा यस्य पुष्पिताः पङ्कसंवृताः।

विकृत्या न स रोगं तं विहायारोग्यमश्नुते॥१३॥

स्तब्धा निश्चेतना गुर्वी कण्टकोपचिता भृशम्।

श्यावा शुष्काऽथवा शूना प्रेतजिह्वा विसर्पिणी॥१४॥

दीर्घमुच्छ्वस्य यो ह्रस्वं नरो निःश्वस्य ताम्यति।
उपरुद्धायुषं ज्ञात्वा तं धीरः परिवर्जयेत्॥१५॥

हस्तौ पादौ च मन्ये च तालु चैवातिशीतलम्।
भवत्यायुःक्षये क्रूरमथवाऽपि भवेन्मृदु॥१६॥

घट्टयञ्जानुना जानु पादावुद्यम्य पातयन्।
योऽपास्यति मुहुर्वक्त्रमातुरो न स जीवति॥१७॥

दन्तैश्छिन्दन्नखाग्राणि नखैश्छिन्दञ्छिरोरुहान्।
काष्ठेन भूमिं विलिखन्न रोगात् परिमुच्यते॥१८॥

दन्तान् खादति यो जाग्रदसाम्ना विरुदन् हसन्।
विजानाति न चेद्दुःखं न स रोगाद्विमुच्यते॥१९॥

मुहुर्हसन् मुहुः क्ष्वेडन् शय्यां पादेन हन्ति यः।
उच्चैश्छिद्राणि विमृशन्नातुरो न स जीवति॥२०॥

अस्थिवच्छ्वेता अस्थिश्वेताः। विसर्पिणी बहिर्निर्गता। निःश्वस्येति अन्तरोच्छ्वासं नीत्वा। अपास्यति मुहुरिति मुखमाक्षिपति। असाम्ना इति उच्चैः। उच्चैश्छिद्राणीति नासाकर्णाक्षिस्रोतांसि॥१३-२०॥

यैर्विन्दति पुरा भावैः समेतैः परमां रतिम्।
तैरेवारममाणस्य ग्लास्नोर्मरणमादिशेत्॥२१॥

न बिभर्ति शिरो ग्रीवा न पृष्ठं भारमात्मनः।
न हनू पिण्डमास्यस्थमातुरस्य मुमूर्षतः॥२२॥

सहसा ज्वरसन्तापस्तृष्णा मूर्च्छा बलक्षयः।

विश्लेषणं च सन्धीनां मुमूर्षोरुपजायते॥२३॥

गोसर्गे वदनाद्यस्य स्वेदः प्रच्यवते भृशम्।

लेपज्वरोपतप्तस्य दुर्लभं तस्य जीवितम्॥२४॥

नोपैति कण्ठमाहारो जिह्वा कण्ठमुपैति च।

आयुष्यन्तं गते जन्तोर्बलं च परिहीयते॥२५॥

शिरो विक्षिपते कृच्छ्रान्मुञ्चयित्वा प्रपाणिकौ।

ललाटस्रुप्रतस्वेदो मुमूर्षुश्च्युतबन्धनः॥२६॥

तत्र श्लोकः—

इमानि लिङ्गानि नरेषु बुद्धिमान् विभावयेतावहितो मुमूर्षुषु।

क्षणेन भूत्वा ह्युपयान्ति कानिचिन्नचाफलं लिङ्गमिहास्ति किञ्चन॥२७॥

ग्लास्नोरिति क्षीयमाणस्य। भारमात्मन इति ऊर्ध्वशरीरम्। पृष्ठमिति शरीराधोभागः। गोसर्गे इति प्रत्यूषे। लेपज्वरः स्वल्पशीतयुक्तः कफज्वरः। कृच्छ्रादिति अशीघ्रं मुञ्चयित्वा, प्रपाणिकौ मणिबन्धादूर्ध्वं कूर्परपर्यन्तं (शिरो विक्षिपति)॥२१-२७॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थानेऽवाक्शिरसीयमिन्द्रियं नामाष्टमोऽध्यायः॥८॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायामिन्द्रियस्थानेऽवाक्शिरसीय-मिन्द्रियं नामाष्टमोऽध्यायः॥८॥

नवमोऽध्यायः।

अथातो यस्यश्यावनिमित्तीयमिन्द्रियं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

यस्य श्यावनिमित्तीयोऽपि उक्तानुक्तरिष्टाभिधायकतया उच्यते। यस्य श्यावशब्देन लक्षणया 'यस्य श्यावे' इत्यादिग्रन्थोक्तं रिष्टं ग्राह्यम्। तेन, यस्यश्यावरूपनिमित्तं रिष्टमधिकृत्य कृतोऽध्यायो यस्यश्यावनिमित्तीयः॥१-२॥

यस्य श्यावे परिध्वस्ते हरिते चापि दर्शने।
आपन्नो व्याधिरन्ताय ज्ञेयस्तस्य विजानता॥३॥
निःसञ्ज्ञः परिशुष्कास्यः समृद्धो व्याधिभिश्च यः।
उपरुद्धायुषं ज्ञात्वा तं धीरः परिवर्जयेत्॥४॥
हरिताश्च सिरा यस्य लोमकूपाश्च संवृताः।
सोऽम्लाभिलाषी पुरुषः पित्तान्मरणमश्नुते॥५॥
शरीरान्ताश्च शोभन्ते शरीरं चोपशुष्यति।
बलं च हीयते यस्य राजयक्ष्मा हिनस्ति तम्॥६॥
अंसाभितापो हिक्का च छर्दनं शोणितस्य च।
आनाहः पार्श्वशूलं च भवत्यन्ताय शोषिणः॥७॥
वातव्याधिरपस्मारी कुष्ठी शोफी तथोदरी।
गुल्मी च मधुमेही च राजयक्ष्मी च यो नरः॥८॥
अचिकित्स्या भवन्त्येते बलमांसक्षये सति।

अन्येष्वपि विकारेषु तान् भिषक् परिवर्जयेत्॥९॥

विरेचनहृतानाहो यस्तृष्णानुगतो नरः।

विरिक्तः पुनराध्माति यथा प्रेतस्तथैव सः॥१०॥

पेयं पातुं न शक्नोति कण्ठस्य च मुखस्य च।

उरसश्च विशुष्कत्वाद्यो नरो न स जीवति॥११॥

स्वरस्य दुर्बलीभावं हानिं च बलवर्णयोः।

रोगवृद्धिमयुक्त्या च दृष्ट्वा मरणमादिशेत्॥१२॥

ऊर्ध्वश्वासं गतोष्माणं शूलोपहतवङ्क्षणम्।

शर्म चानधिगच्छन्तं बुद्धिमान् परिवर्जयेत्॥१३॥

समृद्ध उपचितः। शरीरान्ता हस्तपादादयः। शोभन्त इति राजन्ते, किंवा शोभायुक्ता भवन्ति। वात एव व्याधिर्यस्य रोगिणः स वातव्याधिः। तानिति बलमांसक्षययुक्तान्। विरेचनेन हृत आनाहो यस्य स तथा। अयुक्त्येति अनुचितरूपेण॥३-१३॥

अपस्वरं भाषमाणं प्राप्तं मरणमात्मनः।

श्रोतारं चाप्यशब्दस्य दूरतः परिवर्जयेत्॥१४॥

यं नरं सहसा रोगो दुर्बलं परिमुञ्चति।

संशयप्राप्तमात्रेयो जीवितं तस्य मन्यते॥१५॥

अथ चेज्ज्ञातयस्तस्य याचेरन् प्रणिपाततः।

रसेनाद्यादिति ब्रूयान्नास्मै दद्याद्विशोधनम्॥१६॥

मासेन चेन्न दृश्येत विशेषस्तस्य शोभनः।

रसैश्चान्यैर्बहुविधैर्दुर्लभं तस्य जीवितम्॥१७॥

अपस्वरमिति विकृतस्वरं यथा भवति तथा भाषमाणम्। किं भाषमाणमित्याह— मरणमात्मन इति; मरिष्यामि मरिष्यामीति भाषमाणमित्यर्थः। श्रोतारं चेत्यादि रिष्टानन्तरं 'संशयप्राप्तमात्रेयः' इत्यादौ अनियतारिष्टतया आत्रेयस्यात्र मरणं प्रति सन्देह इति ब्रूते। तच्च न, रिष्टस्य मरणाव्यभिचारित्वमाचार्येण प्रयत्नेनोक्तं, व्युत्पादितं चास्माभिः; किञ्च न च वीतसंशयस्यात्रेयस्य संशयोऽस्ति; तेन शिष्यव्युत्पत्त्यर्थमयमाचार्यः संशयं दर्शयति, तथा निर्णयं करोति; यथा— "दृष्ट्वा प्रमेहं मधुरं सपिच्छं मधूपमं स्याद्द्विविधो विचारः" (चि.अ.६) इत्यादौ संशयं दर्शयित्वा निर्णयं दर्शितवान्; तथेहापि दुर्बलस्य सहसा रोगमुक्तौ रिष्टं वा स्यात्, सर्वथा सन्तर्पणाद्व्याधिक्षयो वा स्यादिति सन्देहः; रिष्टपक्षे तु मरणं, तत्र 'अथ चेत्' इत्यादिना परीक्षामारभते; परीक्षायां च मांसरसेन विशेषालाभे रिष्टत्वावधारणं भवतीति सुव्यवस्थोऽयं ग्रन्थः। दुर्लभमिति अप्राप्यम्॥ १४-१७॥

निष्ठ्यूतं च पुरीषं च रेतश्चाम्भसि मज्जति।
यस्य तस्यायुषः प्राप्तमन्तमाहुर्मनीषिणः॥ १८॥
निष्ठ्यूते यस्य दृश्यन्ते वर्णा बहुविधाः पृथक्।
तच्च सीदत्यपः प्राप्य न स जीवितुमर्हति॥ १९॥
पित्तमूष्मानुगं यस्य शङ्खौ प्राप्य विमूर्च्छति।
स रोगः शङ्खको नाम्ना त्रिरात्राद्धन्ति जीवितम्॥ २०॥
सफेनं रुधिरं यस्य मुहुरास्यात् प्रसिच्यते।
शूलैश्च तुद्यते कुक्षिः प्रत्याख्येयस्तथाविधः॥ २१॥
बलमांसक्षयस्तीव्रो रोगवृद्धिररोचकः।
यस्यातुरस्य लक्ष्यन्ते त्रीन् पक्षान्न स जीवति॥ २२॥

निष्ठ्यूत इत्यादौ बहुविधवर्णयोगः पूर्वारिष्टाद्विशेषः। सीदतीति मज्जति। "यस्य पित्तं" (सू.अ.१८) इत्यादिना सूत्रस्थानोक्तोऽपि शङ्खक इह मरणसूचकतया रिष्टत्वेनोच्यते॥१८-२२॥

तत्र श्लोकौ—

विज्ञानानि मनुष्याणां मरणे प्रत्युपस्थिते।

भवन्त्येतानि सम्पश्येदन्यान्येवंविधानि च॥२३॥

तानि सर्वाणि लक्ष्यन्ते न तु सर्वाणि मानवम्।

विशन्ति विनशिष्यन्तं तस्माद्बोध्यानि सर्वतः॥२४॥

विज्ञानानीति लक्षणानि नयनादिवैकृतानि ज्ञेयानि। सर्वाणि लक्ष्यन्त इति नानापुरुषेषु लक्ष्यन्ते। न तु सर्वाणि मानवं विशन्तीति एकपुरुषं न सर्वाणि विशन्तीति॥२३-२४॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने यस्यश्यावनिमित्तीयमिन्द्रियं नाम नवमोऽध्यायः॥९॥

इति श्री चक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायां यस्यश्यावनिमित्तीयमिन्द्रियं नाम नवमोऽध्यायः॥९॥

दशमोऽध्यायः।

अथातः सद्योमरणीयमिन्द्रियं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

व्यवहितमरणप्रतिपादकमरिष्टमभिधाय प्रत्यासन्नमरणप्रतिपादकं रिष्टं वक्तुं सद्योमरणीयोऽभिधीयते। सद्यःशब्देनेह केचित् सप्तरात्रमिच्छन्ति, अपरे त्रिरात्रम्॥१-२॥

सद्यस्तितिक्षतः प्राणाँल्लक्षणानि पृथक् पृथक्।
अग्निवेश! प्रवक्ष्यामि संस्पृष्टो यैर्न जीवति॥३॥
वाताष्ठीला सुसंवृद्धा तिष्ठन्ती दारुणा हृदि।
तृष्णयाऽभिपरीतस्य सद्यो मुष्णाति जीवितम्॥४॥
पिण्डिके शिथिलीकृत्य जिह्मीकृत्य च नासिकाम्।
वायुः शरीरे विचरन् सद्यो मुष्णाति जीवितम्॥५॥
भ्रुवौ यस्य च्युते स्थानादन्तर्दाहश्च दारुणः।
तस्य हिक्काकरो रोगः सद्यो मुष्णाति जीवितम्॥६॥
क्षीणशोणितमांसस्य वायुरूर्ध्वगतिश्चरन्।
उभे मन्ये समे यस्य सद्यो मुष्णाति जीवितम्॥७॥
अन्तरेण गुदं गच्छन् नाभिं च सहसाऽनिलः।
कृशस्य वंक्षणौ गृह्णन् सद्यो मुष्णाति जीवितम्॥८॥
वितत्य पर्शुकाग्राणि गृहीत्वोरश्च मारुतः।
स्तिमितस्यायतक्षस्य सद्यो मुष्णाति जीवितम्॥९॥

हृदयं च गुदं चोभे गृहीत्वा मारुतो बली।

दुर्बलस्य विशेषेण सद्यो मुष्णाति जीवितम्॥ १०॥

वंक्षणं च गुदं चोभे गृहीत्वा मारुतो बली।

श्वासं सञ्जनयञ्जन्तोः सद्यो मुष्णाति जीवितम्॥ ११॥

नाभिं मूत्रं बस्तिशीर्षं पुरीषं चापि मारुतः।

प्रच्छिन्नं जनयञ्छूलं सद्यो मुष्णाति जीवितम्॥ १२॥

भिद्येते वंक्षणौ यस्य वातशूलैः समन्ततः।

भिन्नं पुरीषं तृष्णा च सद्यः प्राणाञ्जहाति सः॥ १३॥

आप्लुतं मारुतेनेह शरीरं यस्य केवलम्।

भिन्नं पुरीषं तृष्णा च सद्यो जह्यात् स जीवितम्॥ १४॥

शरीरं शोफितं यस्य वाताशोफेन देहिनः।

भिन्नं पुरीषं तृष्णा च सद्यो जह्यात् स जीवितम्॥ १५॥

आमाशयसमुत्थाना यस्य स्यात् परिकर्तिका।

भिन्नं पुरीषं तृष्णा च सद्यः प्राणाञ्जहाति सः॥ १६॥

पक्वाशयसमुत्थाना यस्य स्यात् परिकर्तिका।

तृष्णा गुदग्रहश्चोग्रः सद्यो जह्यात् स जीवितम्॥ १७॥

पक्वाशयमधिष्ठाय हत्वा सञ्ज्ञां च मारुतः।

कण्ठे घुर्घुरकं कृत्वा सद्यो हरति जीवितम्॥ १८॥

दन्ताः कर्दमदिग्धाभा मुखं चूर्णकसन्निभम्।

सिप्रायन्ते च गात्राणि लिङ्गं सद्यो मरिष्यतः॥ १९॥

तृष्णाश्वासशिरोरोगमोहदौर्बल्यकूजनैः।

स्पृष्टः प्राणाञ्जहात्याशु शकृद्भेदेन चातुरः॥ २०॥

तितिक्षत इति तितिक्षत एव; प्राणानां प्रियत्वेन स्वयं हननायोग्यत्वात्। पिण्डिके इति जङ्घापिण्डिके। अन्तरेण गुदं नाभिं चेति गुदनाभिमध्ये। हृदयं गृहीत्वेति हृदयं स्वविकारेण प्राप्य। बस्तिशीर्षमिति बस्त्यूर्ध्वभागम्। प्रच्छिन्नमिति प्रच्छिन्नमिव प्रच्छिन्नं, छेदनाकारवेदनायुक्तत्वात्। आप्लुतमिति व्याप्तम्। शोथितमिति शोफयुक्तम्। परिकर्तिका परिकर्तनाकारा वेदना। घुर्घुरकमिति घुर्घुरकमित्याकारं शब्दं, स कफावरुद्धेन श्वासेन भवति। मुखं चूर्णकसन्निभं श्वैत्यात्। सिप्रायन्त इति सिप्रा नदी, तद्वत् स्वेदातिप्रादुर्भावादाचरन्तीति सिप्रायन्ते; किंवा सिप्रायन्त इति शिथिलीभवन्ति, अनेकार्थत्वाद्धातूनाम्॥३-२०॥

तत्र श्लोकः—

एतानि खलु लिङ्गानि यः सम्यगवबुध्यते।

स जीवितं च मर्त्यानां मरणं चावबुध्यते॥२१॥

स जीवितं चावबुध्यत इति यथोक्तरिष्टाभावेन जीवितं बुध्यते, रिष्टसद्भावे च मरणं बुध्यत इति॥२१॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने

सद्योमरणीयमिन्द्रियं नाम दशमोऽध्यायः॥१०॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायामिन्द्रियस्थाने सद्योमरणीयमिन्द्रियं नाम दशमोऽध्यायः॥१०॥

एकादशोऽध्यायः।

अथातोऽणुज्योतीयमिन्द्रियं व्याख्यास्यामः॥१॥
इति ह स्माह भगवानात्रेयः॥२॥

सद्यःकालनियतं रिष्टमभिधाय कालविशेषनियतारिष्टाभिधायकमणुज्योतीयमुच्यते। अणुज्योतिश्चेह यथाश्रुतं रोगं वर्जयित्वा सञ्ज्ञायामनुक्रियते॥१-२॥

अणुज्योतिरनेकाग्रो दुश्छायो दुर्मनाः सदा।
रतिं न लभते याति परलोकं समान्तरम्॥३॥

ज्योतिः सकलशरीरान्तर्गतं तेजः, अणुज्योतिर्मन्दाग्निः। अनेकाग्रः व्याकुलचित्तः, दुर्मना इत्यनेन तु मनोदौर्बल्यमुच्यते; तेन न पौनरुक्त्यम्। समान्तरमिति समामध्ये॥३॥

बलिं बलिभृतो यस्य प्रणीतं नोपभुञ्जते।
लोकान्तरगतः पिण्डं भुङ्क्ते संवत्सरेण सः॥४॥
सप्तर्षीणां समीपस्थां यो न पश्यत्यरुन्धतीम्।
संवत्सरान्ते जन्तुः स सम्पश्यति महत्तमः॥५॥
विकृत्या विनिमित्तं यः शोभामुपचयं धनम्।
प्राप्नोत्यतो वा विभ्रंशं समान्तं तस्य जीवितम्॥६॥

बलिमिति वायसानां विधिवद्दत्तमन्नम्। महत्तम इति मरणरूपं तमः। विकृत्येति प्रसिद्धं धनादिकारणं विना। विनिमित्तमिति शरीरसम्बद्धधनादिसूचकलक्षणं विना; शरीरसम्बद्धलक्षणवशादेव कस्मिंश्चित्काले धनादि तदपचयो वा भवति; तच्च लक्षणनिमित्तत्वादरिष्टमिति प्रथमाध्याय एवोक्तम्। उपचयमिति शरीर एवोपचयम्। अतो विभ्रंशमिति शोभाद्यभावम्॥४-६॥

भक्तिः शीलं स्मृतिस्त्यागो बुद्धिर्बलमहेतुकम्।
षडेतानि निवर्तन्ते षड्भिर्मासैर्मरिष्यतः॥७॥

भक्तिः इच्छा। अहेतुकमिति क्रियाविशेषणम्। सङ्ख्येयनिर्देशादेव षट्त्वे लब्धे पुनः षडिति पदं षण्णां समुदितानामेव निवृत्तिररिष्टमिति दर्शयितुम्॥७॥

धमनीनामपूर्वाणां जालमत्यर्थशोभनम्।
ललाटे दृश्यते यस्य षण्मासान्न स जीवति॥८॥
लेखाभिश्चन्द्रवक्राभिर्ललाटमुपचीयते।
यस्य तस्यायुषः षड्भिर्मासैरन्तं समादिशेत्॥९॥

जालमिति जालाकारम्। चन्द्रवक्राभिरिति बालचन्द्रवक्राभिः॥८-९॥

शरीरकम्पः सम्मोहो गतिर्वचनमेव च।
मत्तस्येवोपलभ्यन्ते यस्य मासं न जीवति॥१०॥
रेतोमूत्रपुरीषाणि यस्य मज्जन्ति चाम्भसि।
स मासात् स्वजनद्वेष्टा मृत्युवारिणि मज्जति॥११॥

रेत इत्याद्यरिष्टं 'निष्ठ्यूतं च पुरीषं च' (इं.अ.९) इत्यादिना यद्यप्युक्तं, तथाऽपीह समासवचनात् समुदितानामेव रेतःप्रभृतीनां मज्जनं स्वजनद्वेषे सति मारकं भवतीति ज्ञेयम्॥ १०-११ ॥

हस्तपादं मुखं चोभे विशेषाद्यस्य शुष्यतः।

शूयेते वा विना देहात् स च मासं न जीवति॥ १२॥

ललाटे मूर्ध्नि बस्तौ वा नीला यस्य प्रकाशते।

राजी बालेन्दुकुटिला न स जीवितुमर्हति॥ १३॥

प्रवालगुटिकाभासा यस्य गात्रे मसूरिकाः।

उत्पद्याशु विनश्यन्ति न चिरात् स विनश्यति॥ १४॥

ग्रीवावमर्दो बलवाञ्जिह्वाश्वयथुरेव च।

ब्रध्नास्यगलपाकश्च यस्य पक्वं तमादिशेत्॥ १५॥

सम्भ्रमोऽतिप्रलापोऽतिभेदोऽस्थ्नामतिदारुणः।

कालपाशपरीतस्य त्रयमेतत् प्रवर्तते॥ १६॥

प्रमुह्य लुञ्चयेत् केशान् परिगृह्णात्यतीव च।

नरः स्वस्थवदाहारमबलः कालचोदितः॥ १७॥

उभे इति वचनं समुदितहस्तादिशोषमेव दर्शयति। प्रवालकृतगुटिकावदाभासन्त इति प्रवालगुटिकाभासाः। कालपाशपरीतस्येति शीघ्रं मरिष्यतः। परिगृह्णाति स्वस्थवदाहारमिति योजना, अबलः सन् स्वस्थवदाहारमत्यर्थं करोतीत्यर्थः॥ १२-१७॥

समीपे चक्षुषोः कृत्वा मृगयेताङ्गुलीकरम्।

स्मयतेऽपि च कालान्ध ऊर्ध्वगानिमिषेक्षणः॥ १८॥

शयनादासनादङ्गात् काष्ठात् कुड्यादथापि वा।

असन्मृगयते किञ्चित् स मुह्यन् कालचोदितः॥१९॥

समीप इत्यादि। चक्षुषोः समीपेऽङ्गुलीकरं कृत्वा तत् पश्यन् मृगयते प्रार्थयते, स्मयते च विस्मितो भवति। ऊर्ध्वगमनिमिषं च ईक्षणं यस्य स तथा। असत् अविद्यमानं शयनासनादि मृगयते प्रार्थयते॥ १८-१९॥

अहास्यहासी सम्मुह्यन् प्रलेढि दशनच्छदौ।

शीतपादकरोच्छ्वासो यो नरो न स जीवति॥२०॥

आह्वयंस्तं समीपस्थं स्वजनं जनमेव वा।

महामोहावृतमनाः पश्यन्नपि न पश्यति॥२१॥

अहास्यहासीति अहास्यविषये हास्यवान्। दशनच्छदौ ओष्ठौ। शीतशब्द उच्छ्वासान्तैः सम्बध्यते। जनमिति गोबलीवर्दन्यायेन स्वजनम्॥२०-२१॥

अयोगमतियोगं वा शरीरे मतिमान् भिषक्।

खादीनां युगपद्दृष्ट्वा भेषजं नावचारयेत्॥२२॥

खादीनामिति खादिकार्याणां धातूनां, किंवा खादिकार्याणां श्रोत्रादीनाम्। योग्यविषयाग्रहणमयोगः। अविद्यमानविषयग्रहणमतियोगः॥२२॥

अतिप्रवृद्धया रोगाणां मनसश्च बलक्षयात्।

वासमुत्सृजति क्षिप्रं शरीरी देहसञ्ज्ञकम्॥२३॥

वर्णस्वरावग्निबलं वागिन्द्रियमनोबलम्।

हीयतेऽसुक्षये निद्रा नित्या भवति वा न वा॥२४॥

वासमिव वासं, शरीरमात्मनो गृहमिव भवति। न वा भवतीति सर्वथा न भवतीत्यर्थः॥२३-२४॥

भिषग्भेषजपानान्नगुरुमित्रद्विषश्च ये।

वशगाः सर्व एवैते बोद्धव्याः समवर्तिनः॥२५॥

एतेषु रोगः क्रमते भेषजं प्रतिहन्यते।

नैषामन्नानि भुञ्जीत न चोदकमपि स्पृशेत्॥२६॥

समवर्तिन इति यमस्य; अन्ये तु समवर्तिशब्देन कालमृत्युं ब्रुवते, चशब्देनोक्तवक्ष्यमाणसकलारिष्टग्रहणं कुर्वन्ति; तेन सर्वमेव रिष्टं कालमृत्योः परं भवतीति वर्णयन्ति। अत्र च द्वेषमनु रोगक्रमणं निष्फलो भेषजप्रयोगश्चापि स्यादित्याह— एतेष्वित्यादि। भेषजं प्रतिहन्यत इति सम्यक्कृतमपि भेषजं हन्यत इत्यर्थः। नैषामन्नानि भुञ्जीतेति प्रायेण तदन्नस्याविशुद्धत्वात्। एवमुदकप्रतिषेधेऽपि बोध्यम्॥ २५-२६॥

पादाः समेताश्चत्वारः सम्पन्नाः साधकैर्गुणैः।

व्यर्था गतायुषो द्रव्यं विना नास्ति गुणोदयः॥२७॥

पादा भिषगादयः। साधकैर्गुणैरिति "श्रुते पर्यवदातत्वं" (सू.अ.९) इत्यादिभिः षोडशगुणैः सम्पन्नाः। कस्माद्वैद्यादयो गतायुषो रोगान्न साधयन्तीत्याह— द्रव्यं विना नास्ति गुणोदय इति।— द्रव्यं कारणं विना आरोग्यलक्षणो गुणोदयो नास्ति। कारणं चेहारोग्योत्पत्तावगतायुष्ट्वं, तच्च नास्तीति भावः॥२७॥

परीक्ष्यमायुर्भिषजा नीरुजस्यातुरस्य च।

आयुर्ज्ञानफलं कृत्स्नमायुर्ज्ञे ह्यनुवर्तते॥२८॥

आयुर्ज्ञानफलं विद्यमानायुषि भेषजदानम्॥२८॥

तत्र श्लोकः—

क्रियापथमतिक्रान्ताः केवलं देहमाप्लुताः।

चिह्नं कुर्वन्ति यद्दोषास्तदरिष्टं निरुच्यते॥२९॥

रिष्टलक्षणमाह— क्रियापथमतिक्रान्ता इत्यादि। अतिक्रान्ता इति गताः। दूतादिगतरिष्टलक्षणमेतन्न भवति, किन्तु शरीरगतरिष्टलक्षणं; तेन नाव्याप्तिर्लक्षणस्य वाच्या। सर्वरिष्टव्यापकं तु लक्षणं यथा— आयुषोऽन्तर्ग(ग)तस्य लिङ्गमिति। तच्च इन्द्रियपदेनैवोक्तमिति प्रथमाध्याय एव इन्द्रियपदव्याख्यायां प्रोक्तम्। ननु निर्निमित्तं रिष्टमित्युक्तम्, इह दोषजन्यत्वं रिष्टानामुच्यत इति न कथं विरोधः? न, निर्निमित्तत्वं ह्यनुपलभ्यमाननिमित्तत्वमुक्तं; तेन रूक्षादिहेतुप्राप्तिमन्तरेण प्रत्यासन्नमरणप्रभावकुपितदोषजन्यत्वं तत्तदरिष्टानामुच्यते, तेनेहाप्युपलभ्यमानव्यक्तनिमित्त-तासद्भावान्न विरोधः॥२९॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थानेऽणुज्योतीयमिन्द्रियं नामैकादशोऽध्यायः॥११॥

इति श्रीचक्रपाणिदत्तविरचितायामायुर्वेददीपिकायां चरकतात्पर्यटीकायामिन्द्रियस्थाने-ऽणुज्योतीयमिन्द्रियं नामैकादशोऽध्यायः॥११॥

द्वादशोऽध्यायः।

अथातो गोमयचूर्णीयमिन्द्रियं व्याख्यास्यामः॥१॥

इति ह स्माह भगवानात्रेयः॥२॥

पारिशेष्याद्गोमयचूर्णीयमुच्यते॥१-२॥

यस्य गोमयचूर्णाभं चूर्णं मूर्धनि जायते।
सस्नेहं भ्रश्यते चैव मासान्तं तस्य जीवितम्॥३॥
निकषन्निव यः पादौ च्युतांसः परिधावति।
विकृत्या न स लोकेऽस्मिंश्चिरं वसति मानवः॥४॥
यस्य स्नातानुलिप्तस्य पूर्वं शुष्यत्युरो भृशम्।
आर्द्रेषु सर्वगात्रेषु सोऽर्धमासं न जीवति॥५॥
यमुद्दिश्यातुरं वैद्यः संवर्तयितुमौषधम्।
यतमानो न शक्नोति दुर्लभं तस्य जीवितम्॥६॥
विज्ञातं बहुशः सिद्धं विधिवच्चावचारितम्।
न सिध्यत्यौषधं यस्य नास्ति तस्य चिकित्सितम्॥७॥
आहारमुपयुञ्जानो भिषजा सूपकल्पितम्।
यः फलं तस्य नाप्नोति दुर्लभं तस्य जीवितम्॥८॥

चूर्णमित्यस्य विशेषणं— सस्नेहमिति। निकषन्निवेति घर्षन्निव। विकृत्येत्यनेन सहजं पादघर्षणादि निषेधति। पूर्वमुरः शुष्यतीत्यभिधानादेव शेषगात्रार्द्रतायां लब्धायां पुनः 'आर्द्रेषु सर्वगात्रेषु' इति

वचनाद्विशेषेणापरगात्राणामार्द्रतां दर्शयति। यमुद्दिश्येति यस्यार्थे। सिद्धमिति अनेन रूपेण बहुशो ज्ञातम्। आहारमित्याद्यरिष्टं रोगिविषयं, तेन "इष्टं च गुणसम्पन्नं" (इं.अ.७) इत्यादिग्रन्थोक्तेन स्वस्थविषयेणारिष्टेन समं न पौनरुक्त्यम्॥३-८॥

दूताधिकारे वक्ष्यामो लक्षणानि मुमूर्षताम्।
यानि दृष्ट्वा भिषक् प्राज्ञः प्रत्याख्यायादसंयमम्॥९॥
मुक्तकेशेऽथवा नग्ने रुदत्यप्रयतेऽथवा।
भिषगभ्यागतं दृष्ट्वा दूतं मरणमादिशेत्॥१०॥
सुप्ते भिषजि ये दूताश्छिन्दत्यपि च भिन्दति।
आगच्छन्ति भिषक् तेषां न भर्तारमनुव्रजेत्॥११॥
जुह्वत्यग्निं तथा पिण्डान् पितृभ्यो निर्वपत्यपि।
वैद्ये दूता य आयान्ति ते घ्नन्ति प्रजिघांसवः॥१२॥
कथयत्यप्रशस्तानि चिन्तयत्यथवा पुनः।
वैद्ये दूता मनुष्याणामागच्छन्ति मुमूर्षताम्॥१३॥
मृतदग्धविनष्टानि भजति व्याहरत्यपि।
अप्रशस्तानि चान्यानि वैद्ये दूता मुमूर्षताम्॥१४॥
विकारसामान्यगुणे देशे कालेऽथवा भिषक्।
दूतमभ्यागतं दृष्ट्वा नातुरं तमुपाचरेत्॥१५॥
दीनभीतद्रुतत्रस्तमलिनामसतीं स्त्रियम्।
त्रीन् व्याकृतींश्च षण्डांश्च दूतान् विद्यान्मुमूर्षताम्॥१६॥
अङ्गव्यसनिनं दूतं लिङ्गिनं व्याधितं तथा।
सम्प्रेक्ष्य चोग्रकर्माणं न वैद्यो गन्तुमर्हति॥१७॥

आतुरार्थमनुप्राप्तं खरोष्ट्ररथवाहनम्।

दूतं दृष्ट्वा भिषग्विद्यादातुरस्य पराभवम्॥१८॥

पलालबुसमांसास्थिकेशलोमनखद्विजान्।

मार्जनीं मुसलं शूर्पमुपानच्चर्म विच्युतम्॥१९॥

तृणकाष्ठतुषाङ्गारं स्पृशन्तो लोष्टमश्म च।

तत्पूर्वदर्शने दूता व्याहरन्ति मुमूर्षताम्॥२०॥

यस्मिंश्च दूते ब्रुवति वाक्यमातुरसंश्रयम्।

पश्येन्निमित्तमशुभं तं च नानुव्रजेद्भिषक्॥२१॥

तथा व्यसनिनं प्रेतं प्रेतालङ्कारमेव वा।

भिन्नं दग्धं विनष्टं वा तद्वादीनि वचांसि वा॥२२॥

रसो वा कटुकस्तीव्रो गन्धो वा कौणपो महान्।

स्पर्शो वा विपुलः क्रूरो यद्वाऽन्यदशुभं भवेत्॥२३॥

तत्पूर्वमभितो वाक्यं वाक्यकालेऽथवा पुनः।

दूतानां व्याहृतं श्रुत्वा धीरो मरणमादिशेत्॥२४॥

इति दूताधिकारोऽयमुक्तः कृत्स्नो मुमूर्षताम्।

अप्रयते इति अपवित्रे। सुप्ते इति निद्राणे। न भर्तारमिति न दूतप्रेषकमातुरमित्यर्थः। दूताश्च यद्यपि रोगिहितमिच्छन्ति, न प्रजिघांसवश्च भवन्ति, न च स्वभावाद् दूताः प्रजिघांसवो घ्नन्ति, तथाऽपि यथाऽऽतुरस्य विनाशो भवति तथा दैवप्रेरिताः सन्त आगच्छन्तो दूताः प्रजिघांसव इव तथा घ्नन्तीवेति कृत्वा 'प्रजिघांसवो घ्नन्ति' इत्युच्यन्ते। तेनात्र इवशब्दो लुप्तनिर्दिष्टो द्रष्टव्यः। चिन्तयत्यप्रशस्तानीति सम्बन्धः। व्याहरत्यपि वैद्ये मृतदग्धविनष्टानीति योजना। विकारसामान्यगुणो देशो यथा— रक्तपित्ते ज्वलनसन्निहितो देशः, विकारसामान्यगुणः कालो यथा— रक्तपित्ते मध्याह्न इत्यादि ज्ञेयम्। त्रीनिति

त्रिसङ्ख्या एव दूता अप्रशस्ताः। षण्डा नपुंसकाः। अङ्गव्यसनी छिन्ननासादिः। उग्रकर्मा मारणाद्यकार्यप्रवृत्तः। पलालेत्यादौ तृणकाष्ठादिपरिस्पृशो दूताः। तत्पूर्वदर्शने इति वैद्यपूर्वदर्शने, पलालबुसादीनि स्पृशन्त आतुरस्य मुमूर्षतां व्याहरन्तीति योजना। प्रेतालङ्कारमेव चेत्यन्तं यं पश्येत् तं च नानुव्रजेदिति सम्बन्धः। तद्वादीनि भिन्नादिवादीनि। तीव्र इति इन्द्रियोद्वेजकः। स्पर्शो विपुलो यथा तीव्रोग्रादिस्पर्शः। तत्पूर्वमिति दूतवचनात् पूर्वम्। अभितो वाक्यमिति सर्वभूतकालवचनम्। व्याहृतमिति आतुरावस्थाकथनम्॥९-२४॥—

पथ्यातुरकुलानां च वक्ष्याम्यौत्पातिकं पुनः॥२५॥
अवक्षुतमथोत्कुष्टं स्खलनं पतनं तथा।
आक्रोशः सम्प्रहारो वा प्रतिषेधो विगर्हणम्॥२६॥
वस्त्रोष्णीषोत्तरासङ्गच्छत्रोपानद्युगाश्रयम्।
व्यसनं दर्शनं चापि मृतव्यसनिनां तथा॥२७॥
चैत्यध्वजपताकानां पूर्णानां पतनानि च।
हतानिष्टप्रवादाश्च दूषणं भस्मपांशुभिः॥२८॥
पथच्छेदो बिडालेन शुना सर्पेण वा पुनः।
मृगद्विजानां क्रूराणां गिरो दीप्तां दिशं प्रति॥२९॥
शयनासनयानानामुत्तानानां च दर्शनम्।
इत्येतान्यप्रशस्तानि सर्वाण्याहुर्मनीषिणः॥३०॥
एतानि पथि वैद्येन पश्यताऽऽतुरवेश्मनि।
शृण्वता च न गन्तव्यं तदागारं विपश्चिता॥३१॥
इत्यौत्पातिकमाख्यातं पथि वैद्यविगर्हितम्।

औत्पातिकमिति अरिष्टसूचकनिमित्तम्। अवक्षुतं छिक्का। उत्कृष्टं सन्त्रस्तरुतम्। प्रतिषेधः 'मा गच्छ' इत्येवंरूपः। व्यसनं वस्त्रादीनां यत् स्फुटनादि। व्यसनीति व्यङ्गः, कलहवान् वा। पूर्णाः पूर्णकुम्भादयः। दूषणं भस्मपांशुभिरिति भस्मपांश्ववकिरणम्। पथच्छेद इति बिडालादिभिर्मार्गलङ्घनम्। मृगद्विजाः क्रूराः शृगालगृध्रादयः। दीप्ता दिक् यस्यां सूर्यो वर्तते, किंवा दक्षिणा दिक् दीप्तोच्यते। शयनं खट्वादि, आसनं पीठादि॥२५-३१॥—

इमामपि च बुध्येत गृहावस्थां मुमूर्षताम्॥३२॥

प्रवेशे पूर्णकुम्भाग्निमृद्बीजफलसर्पिषाम्।

वृषब्राह्मणरत्नान्नदेवतानां च निर्गतिम्॥३३॥

अग्निपूर्णानि पात्राणि भिन्नानि विशिखानि च।

भिषङ् मुमूर्षतां वेश्म प्रविशन्नेव पश्यति॥३४॥

छिन्नभिन्नानि दग्धानि भग्नानि मृदितानि च।

दुर्बलानि च सेवन्ते मुमूर्षोर्वैश्मिका जनाः॥३५॥

शयनं वसनं यानं गमनं भोजनं रुतम्।

श्रूयतेऽमङ्गलं यस्य नास्ति तस्य चिकित्सितम्॥३६॥

शयनं वसनं यानमन्यं वाऽपि परिच्छदम्।

प्रेतवद्यस्य कुर्वन्ति सुहृदः प्रेत एव सः॥३७॥

अन्नं व्यापद्यतेऽत्यर्थं ज्योतिश्चैवोपशाम्यति।

निवाते सेन्धनं यस्य तस्य नास्ति चिकित्सितम्॥३८॥

आतुरस्य गृहे यस्य भिद्यन्ते वा पतन्ति वा।

अतिमात्रममत्राणि दुर्लभं तस्य जीवितम्॥३९॥

विशिखानीति खण्डितानि; किंवा 'वशिकानि' इति पाठः, तदा शून्यानीत्यर्थः। वैश्मिका जना इति गृहप्रतिष्ठिता जनाः। प्रेतवत् मृतस्य यथा क्रियते शयनादि तथा। सुहृद इति वचनेनासुहृद्भिर्द्वेषादमङ्गलार्थं कृतं प्रेतवच्छयनादि निषेधयति। ज्योतिः अग्निः, निवाते सेन्धनश्च सन् यदि निर्वाति तदा रिष्टम्। अमत्राणीति शरावस्थाल्यादीनि॥३२-३९॥

भवन्ति चात्र—

यद्वादशभिरध्यायैर्व्यासतः परिकीर्तितम्।
मुमूर्षतां मनुष्याणां लक्षणं जीवितान्तकृत्॥४०॥
तत् समासेन वक्ष्यामः पर्यायान्तरमाश्रितम्।
पर्यायवचनं ह्यर्थविज्ञानायोपपद्यते॥४१॥
अत्यर्थं पुनरेवेयं विवक्षा नो विधीयते।
तस्मिन्नेवाधिकरणे यत् पूर्वमभिशब्दितम्॥४२॥

सम्प्रति द्वादशाध्यायोक्तं रिष्टं दुरधिगमार्थं सङ्ग्रहेण स्पष्टीकरणार्थमाह— द्वादशभिरित्यादि। पर्यायायान्तरमाश्रितमिति सञ्ज्ञान्तरेण कीर्तितम्। अर्थविज्ञानायेति पूर्वाभिधाने शब्दस्यानेकार्थाभिधायित्वादिना यत्र सन्देहो मिथ्याज्ञानं वा भवति, तस्य शब्दान्तरेणाभिधानाद् व्यक्तोऽर्थो भवतीति दर्शयति॥४०-४२॥

वसतां चरमं कालं शरीरेषु शरीरिणाम्।
अभ्युग्राणां विनाशाय देहेभ्यः प्रविवत्सताम्॥४३॥
इष्टांस्तितिक्षतां प्राणान् कान्तं वासं जिहासताम्।
तन्त्रयन्त्रेषु भिन्नेषु तमोऽन्त्यं प्रविविक्षताम्॥४४॥

विनाशायेह रूपाणि यान्यवस्थान्तराणि च।

भवन्ति तानि वक्ष्यामि यथोद्देशं यथागमम्॥४५॥

प्राणाः समुपतप्यन्ते विज्ञानमुपरुध्यते।

वमन्ति बलमङ्गानि चेष्टा व्युपरमन्ति च॥४६॥

इन्द्रियाणि विनश्यन्ति खिलीभवति चेतना।

औत्सुक्यं भजते सत्त्वं चेतो भीराविशत्यपि॥४७॥

स्मृतिस्त्यजति मेधा च ह्रीश्रियौ चापसर्पतः।

उपप्लवन्ते पाप्मान ओजस्तेजश्च नश्यति॥४८॥

शीलं व्यावर्ततेऽत्यर्थं भक्तिश्च परिवर्तते।

विक्रियन्ते प्रतिच्छायाश्छायाश्च विकृतिं प्रति॥४९॥

शुक्रं प्रच्यवते स्थानादुन्मार्गं भजतेऽनिलः।

क्षयं मांसानि गच्छन्ति गच्छत्यसृगपि क्षयम्॥५०॥

ऊष्माणः प्रलयं यान्ति विश्लेषं यान्ति सन्धयः।

गन्धा विकृतिमायान्ति भेदं वर्णस्वरौ तथा॥५१॥

वैवर्ण्यं भजते कायः कायच्छिद्रं विशुष्यति।

धूमः सञ्जायते मूर्ध्नि दारुणाख्यश्च चूर्णकः॥५२॥

सततस्पन्दना देशाः शरीरे येऽभिलक्षिताः।

ते स्तम्भानुगताः सर्वे न चलन्ति कथंचन॥५३॥

गुणाः शरीरदेशानां शीतोष्णमृदुदारुणाः।

विपर्यासेन वर्तन्ते स्थानेष्वन्येषु तद्विधाः॥५४॥

नखेषु जायते पुष्पं पङ्को दन्तेषु जायते।

जटाः पक्ष्मसु जायन्ते सीमन्ताश्चापि मूर्धनि॥५५॥

भेषजानि न संवृत्तिं प्राप्नुवन्ति यथारुचि।

यानि चाप्युपपद्यन्ते तेषां वीर्यं न सिध्यति॥५६॥

नानाप्रकृतयः क्रूरा विकारा विविधौषधाः।

क्षिप्रं समभिवर्तन्ते प्रतिहत्य बलौजसी॥५७॥

शब्दः स्पर्शो रसो रूपं गन्धश्चेष्टा विचिन्तितम्।

उत्पद्यन्तेऽशुभान्येव प्रतिकर्मप्रवृत्तिषु॥५८॥

दृश्यन्ते दारुणाः स्वप्ना दौरात्म्यमुपजायते।

प्रेष्याः प्रतीपतां यान्ति प्रेताकृतिरुदीर्यते॥५९॥

प्रकृतिर्हीयतेऽत्यर्थं विकृतिश्चाभिवर्धते।

कृत्स्नमौत्पातिकं घोरमरि(नि)ष्टमुपलक्ष्यते॥६०॥

इत्येतानि मनुष्याणां भवन्ति विनशिष्यताम्।

लक्षणानि यथोद्देशं यान्युक्तानि यथागमम्॥६१॥

अभ्युग्राणामिति अभ्युद्गतानाम्। प्रविवत्सतामिति प्रवस्तुमुद्यतानाम्। कान्तं वासमित्यनेन सर्वप्राणिनामेव सर्वावस्थासु शरीरं काम्यं भवतीति दर्शयति। कान्तमपि शरीररूपं वासो जीवितं वा बलादेव स्वकर्मणा त्यज्यमानमपि इहोपचारादिवशब्दलोपाद्वा स्वातन्त्र्येण निर्दिश्यते; यथा— जिहासतामिति, तथ तितिक्षतामिति। तन्त्रं शरीरं, तस्य यन्त्रं सिरास्नाय्वादिरूपं तन्त्रयन्त्रम्। तमोऽन्त्यमिति मरणरूपं तमः। विनाशायेह रूपाणीति प्राणसमुपतापादीनि। खिलीभवतीति अपथ्यग्राहिणी भवति। पाप्मान इति पापजनितरोगाः, अधर्म्याश्च क्रियाः। छायाश्च विकृतिं प्रति 'गच्छन्ति' इति शेषः, तेन प्रत्येकं छाया विकृतिं गच्छतीत्यर्थः। धूमः सञ्जायते मूर्ध्नीति प्रकृतं बाष्पनिर्गमं विना बहलो धूम इव शिरसि भवति। दारुणाख्यश्च चूर्णक इति "यस्य गोमयचूर्णाभं" इत्यादिग्रन्थोक्तश्चूर्णकः। स्थानेष्वन्येषु तद्विधा इति शरीरदेशान्तरेषु। बहुवचनेन स्नेहादयो विपर्यासेन

वर्तन्त इत्यर्थः। संवृत्तिमिति निष्पत्तिम्। उपपद्यन्ते सिध्यन्ति। नानाप्रकृतय इति परस्परं विरुद्धस्वभावाः। प्रतिकर्मप्रवृत्तिः चिकित्साप्रवृत्तिः। औत्पातिकमिति आकस्मिकं; तस्य विशेषणं— अरिष्टमिति; तेन रिष्टसूचकमौत्पातिकमिति फलति॥४३-६१॥

मरणायेह रूपाणि पश्यताऽपि भिषग्विदा।
अपृष्टेन न वक्तव्यं मरणं प्रत्युपस्थितम्॥६२॥
पृष्टेनापि न वक्तव्यं तत्र यत्रोपघातकम्।
आतुरस्य भवेद्दुःखमथवाऽन्यस्य कस्यचित्॥६३॥
अब्रुवन्मरणं तस्य नैनमिच्छेच्चिकित्सितुम्।
यस्य पश्येद्विनाशाय लिङ्गानि कुशलो भिषक्॥६४॥

सम्प्रति ज्ञातस्य रिष्टस्य यथाऽप्रकाश्यत्वं तदाह— मरणायेत्यादि। आतुरस्योपघातकमिति योज्यम्। भवेद्दुःखमन्यस्येति सम्बन्धः॥६२-६४

लिङ्गेभ्यो मरणाख्येभ्यो विपरीतानि पश्यता।
लिङ्गान्यारोग्यमागन्तु वक्तव्यं भिषजा ध्रुवम्॥६५॥
दूतैरौत्पातिकैर्भावैः पथ्यातुरकुलाश्रयैः।
आतुराचारशीलेष्टद्रव्यसम्पत्तिलक्षणैः॥६६॥

हन्त मरणं चेदातुरस्य भावि नोच्यते, तत् किमारोग्यमपि भावि न वक्तव्यमेवेत्याह— लिङ्गेभ्य इत्यादि। मरणमाख्यापयन्तीति मरणाख्यानि, तेभ्यो विपरीतानि आरोग्यसूचकानि। आगन्त्विति पश्चात्कालभावि। औत्पातिकैर्भावैरिति शुभसूचनार्थमकस्मादुत्पन्नैर्भावैः; सामान्येन शुभाशुभसूचकं

यदकस्मादुद्भवति तदौत्पातिकमुच्यते। द्रव्यसम्पत्तिलक्षणैरित्यन्तैरारोग्यमागन्तु वक्तव्यमिति योजना॥६५-६६॥

स्वाचारं हृष्टमुव्यङ्गं यशस्यं शुक्लवाससम्।

अमुण्डमजटं दूतं जातिवेशक्रियासमम्॥६७॥

अनुष्ट्रखरयानस्थमसन्ध्यास्वग्रहेषु च।

अदारुणेषु नक्षत्रेष्वनुग्रेषु ध्रुवेषु च॥६८॥

विना चतुर्थीं नवमीं विना रिक्तां चतुर्दशीम्।

मध्याह्नमर्धरात्रं च भूकम्पं राहुदर्शनम्॥६९॥

विना देशमशस्तं चाशस्तौत्पातिकलक्षणम्।

दूतं प्रशस्तमव्यग्रं निर्दिशेदागतं भिषक्॥७०॥

शुभभवनलक्षणं स्वाचारमित्यादिना ब्रूते। अमुण्डमिति असशिखकृतवपनोऽभिप्रेतः। जात्यादिभिरातुरेण सह समो जातिवेशक्रियासमः। अग्रहेष्विति अप्रशस्तस्थानस्थितक्रूर-ग्रहानधिष्ठितेषु कालेष्वित्यर्थः। अदारुणेषु नक्षत्रेष्वनुग्रेषु ध्रुवेषु चेति दारुणानीति तीक्ष्णानि, यदुवाच **वराहः**— "मूलशिवशक्रभुजगाधिपानि तीक्ष्णानि" (बृ.सं.अ.१८) इति; शिव आर्द्रा, शक्रो ज्येष्ठा, भुजगाधिप आश्लेषा। उग्राणि च **वराहो**क्तानि यथा— "उग्राणि पूर्वभरणीपित्र्याणि" (बृ.सं.अ.९८) इति। तत्र पूर्वशब्देन पूर्वफाल्गुनी, पूर्वाषाढा, पूर्वभाद्रपदा च। पित्र्यं मघा। वराहोक्तदारुणादीनि नक्षत्राणि वर्जयित्वाऽन्येषु नक्षत्रेषु दूता आगताः शुभा भवन्ति। रिक्तामिति चतुर्थ्यादिविशेषणम्। चतुर्थी नवमी चतुर्दशी च रिक्तोच्यते। तथा रिक्तेति विशेषणेन चतुर्थ्यादीनां निष्फलत्वसूचनेन कर्मारम्भं प्रत्यनुपादेयतोपदिश्यते। शस्तमौत्पातिकमाकस्मिकं लक्षणं यस्य तच्छस्तौत्पातिक-लक्षणम्॥६७-७०॥

दध्यक्षतद्विजातीनां वृषभाणां नृपस्य च॥७१॥

रत्नानां पूर्णकुम्भानां सितस्य तुरगस्य च।

सुरध्वजपताकानां फलानां यावकस्य च॥७२॥

कन्यापुंवर्धमानानां बद्धस्यैकपशोस्तथा।

पृथिव्या उद्धृतायाश्च वह्नेः प्रज्वलितस्य च॥७३॥

मोदकानां सुमनसां शुक्लानां चन्दनस्य च।

मनोज्ञस्यान्नपानस्य पूर्णस्य शकटस्य च॥७४॥

नृभिर्धेन्वाः सवत्साया वडवायाः स्त्रियास्तथा।

जीवञ्जीवकसिद्धार्थसारसप्रियवादिनाम्॥७५॥

हंसानां शतपत्राणां चाषाणां शिखिनां तथा।

मत्स्याजद्विजशङ्खानां प्रियङ्गूनां घृतस्य च॥७६॥

रुचकादर्शसिद्धार्थरोचनानां च दर्शनम्।

गन्धः सुरभिर्वर्णश्च सुशुक्लो मधुरो रसः॥७७॥

मृगपक्षिमनुष्याणां प्रशस्ताश्च गिरः शुभाः।

छत्रध्वजपताकानामुत्क्षेपणमभिष्टुतिः॥७८॥

भेरीमृदङ्गशङ्खानां शब्दाः पुण्याहनिस्वनाः।

वेदाध्ययनशब्दाश्च सुखो वायुः प्रदक्षिणः॥७९॥

पथि वेश्मप्रवेशे तु विद्यादारोग्यलक्षणम्।

दध्यक्षतेत्यादिना मार्गादिषु प्रशस्तदर्शनान्याह। सुरध्वजः शक्रध्वजः। कन्यापुंवर्धमानानामिति अङ्कारोपिताः कुमार्यः कुमाराश्च वर्धमानाः, पुरुषोत्तमवत् समासः; अन्ये तु वर्धमानाः शरावा इत्याहुः; ते चालेपनादिना मण्डिता इति बोद्धव्यम्। एकपशुः श्रेष्ठपशुरित्यर्थः। शकटस्य पूर्णस्य नृभिरिति

सम्बन्धः। वडवायाः स्त्रियाश्च सवत्साया इति योजना। जीवञ्जीवकः पक्षी स्वनामप्रसिद्धः। प्रियवादी चातकः॥७१-७९॥—

मङ्गलाचारसम्पन्नः सातुरो वैश्मिको जनः॥८०॥
श्रद्दधानोऽनुकूलश्च प्रभूतद्रव्यसङ्ग्रहः।
धनैश्वर्यसुखावाप्तिरिष्टलाभः सुखेन च॥८१॥
द्रव्याणां तत्र योग्यानां योजना सिद्धिरेव च।
गृहप्रासादशैलानां नागानामृषभस्य च॥८२॥
हयानां पुरुषाणां च स्वप्ने समधिरोहणम्।
सोमार्काग्निद्विजातीनां गवां नृणां पयस्विनाम्॥८३॥
अर्णवानां प्रतरणं वृद्धिः सम्बाधनिःसृतिः।
स्वप्ने दैवैः सपितृभिः प्रसन्नैश्चाभिभाषणम्॥८४॥
दर्शनं शुक्लवस्त्राणां ह्रदस्य विमलस्य च।
मांसमत्स्यविषामेध्यच्छत्रादर्शपरिग्रहः॥८५॥
स्वप्ने सुमनसां चैव शुक्लानां दर्शनं शुभम्।
अश्वगोरथयानं च यानं पूर्वोत्तरेण च।
रोदनं पतितोत्थानं द्विषतां चावमर्दनम्॥८६॥

योजनायां सत्यां सिद्धिः योजनासिद्धिः। सम्बाधनिः सृतिः सङ्कटनिस्तरणम्। द्विषतां चावमर्दनमित्यन्तं स्वप्ने ज्ञेयम्॥८०-८६॥

सत्त्वलक्षणसंयोगो भक्तिर्वैद्यद्विजातिषु।

साध्यत्वं न च निर्वेदस्तदारोग्यस्य लक्षणम्॥८७॥

आरोग्याद्बलमायुश्च सुखं च लभते महत्।

इष्टांश्चाप्यपरान् भावान् पुरुषः शुभलक्षणः॥८८॥

सत्त्वस्य गुणस्य लक्षणैः सह संयोगः सत्त्वलक्षणसंयोगः। न च निर्वेद इति आत्मन्यनवज्ञेत्यर्थः॥८७-८८॥

तत्र श्लोकौ—

उक्तं गोमयचूर्णीये मरणारोग्यलक्षणम्।

दूतस्वप्नातुरोत्पातयुक्तिसिद्धिव्यपाश्रयम्॥८९॥

उक्तमित्याद्यध्यायसङ्ग्रहः। दूतादिषु पृथङ्मरणारोग्यलक्षणमिहोक्तं व्यक्तमेव। युक्त्याश्रयं मरणलक्षणं यथा— 'यमुद्दिश्यातुरं वैद्यः सम्पादयितुमौषधम्' इत्यादिग्रन्थोक्तम्। सिद्ध्याश्रयं मरणलक्षणं यथा— 'विज्ञातं' इत्यादिग्रन्थोक्तम्। आरोग्यलक्षणं युक्त्याश्रयं सिद्ध्याश्रयं च यथा— 'इष्टालाभः सुखेन च' इति ग्रन्थोक्तम्॥८९॥

इतीदमुक्तं प्रकृतं यथातथं तदन्ववेक्ष्यं सततं भिषग्विदा।

तथा हि सिद्धिं च यशश्च शाश्वतं स सिद्धकर्मा लभते धनानि च॥९०॥

इतीत्यादिनेन्द्रियस्थानोक्तं प्रमेयजातं महाफलत्वेनावश्यबोध्यतयोपदर्शयन्नुपसंहरति॥९०॥

इत्यग्निवेशकृते तन्त्रे चरकप्रतिसंस्कृते इन्द्रियस्थाने गोमयचूर्णीयमिन्द्रियं नाम द्वादशोऽध्यायः॥१२॥

इति श्रीचक्रपाणिदत्तविरचितायां चरकतात्पर्यटीकायामायुर्वेददीपिकायामिन्द्रियस्थाने गोमयचूर्णीयमिन्द्रियं नाम द्वादशोऽध्यायः॥१२॥

इन्द्रियस्थानं सम्पूर्णम्।